CC-0. In Public Domain. Digitization by eGangotri

Almira 2
Shelf 2
4

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चित्सुखमुनिविरचिता तत्त्वप्रदीपिकाग्रन्थः प्रत्यक्स्वरूपमुनिकृतनयनप्रसादिनीटीकासहिता निर्मलेनोदयसिंहेन परिशोधिता प्रारभ्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चि.सु. ॥ ॐ स्वस्ति श्रीगणेशाय नमः ॥ यन्निर्मलं निरवग्रहस्वमहिमा मेयस्वभावं महामायावेशवशाद्य वर्त्तत विपदायग्रतु
टी.न. वीक्षुत्वैः ॥ भावैस्तत्तरं तं तत्र विभ्रममयैर्विध्वस्तमेदोद्भवं निर्द्वन्द्वावधिबोधमोदजलधिं वन्दे महीयो महः ॥ १ ॥
१ उन्निद्रस्वभ्रसरसीरुहसंनिषण्णां निर्गच्छदच्छरुचिनिर्जितचन्द्रकान्तिं ॥ हारोज्वलां लिपितनुं स्फटिकाक्षसक्कं
भमुद्रास्वपुस्तककरां प्रणमामि वाणीं ॥ २ ॥ अविरलविगलितमदजलविलुलितमत्तालिमाल्यमनुलम्बः ॥
विपुलकपोलफलकोदलयतुलं बोदरोदुरितम् ॥ ३ ॥ यद्विद्याधवलैर्विभक्ति विबुधैः सर्वादिवापीं समुन्मी
लत्कैरवकोरकाकुलरुचिं विश्वंभरेयं भृता ॥ घोराज्ञानदुरंतयकनिकरप्रोन्माथि विद्यानदी मूलं नौमि मुनी-
न्द्रमन्वहमहं विद्यागिरिं तं गुरुम् ॥ ४ ॥ यत्पादपावनसरोजरजः पराणे रेते विनेयनिवहा विरजत्वमापुः ॥ स
त्यप्रकाशपरिशुद्धनिजानुभावं प्रत्यक्प्रकाशमभिनौमि गुरुं यतीन्द्रम् ॥ ५ ॥ उद्बुद्धिद्यासु रसविद्पंनिः सृता
यत्स्वकाशात् यत्पादाब्जं सकलविबुधानंतसलीलां विभर्त्ति हंसानां यद्विम–लववाग्जीवनं जीवनं तं वन्दे विद्यागुरु
मविरतं मानसं तीर्थमार्ग्यम् ॥ ६ ॥ अविनश्वरकृतितत्वप्रदीपिका लोकनाथिनां क्रियते अज्ञानतिमिरजे
श्रीमानसनयनप्रसादिनी टीका ॥ ७ ॥ दोषत्वमुज्वलगुणा अपि यान्ति येषु तैर्दूषणैः किमयवेहतिरस्कृतैः किं एस
॥ दोषोपि येषु गुणतामुपयाति भूयांस्तेभ्यो नमोस्तु सततं सुविसज्जनेभ्यः ॥ ८ ॥ प्रारीप्सितस्य प्रकरणस्य नि १
रंतरायपरिसमाप्तिप्रतिपन्थिदुरित ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

परंपरानिवारणाय शिष्योपशिष्यद्वारा प्रचयप्रचाराय शिष्टानुष्ठानप्रतिस्थापनेन शिष्टपरिग्रहाय च प्रवर-
गुणगणोपवर्णनपूर्वकं परमेश्वरं परिपूजयन् आशीर्लक्षणमंगलमविगीतशिष्टाचारानुमितस्मृतिपरि-
कल्पितश्रुतिप्रमाणकमाचरितं शिष्यशिक्षार्थं ग्रन्थतो निबध्नाति ॥ स्तंभाभ्यंतरेति महर्षिरज्ञानतत्कार्य्यैर्हनी-
वः सुस्नानव्याहृस्नातान् तस्मै वरहरेर्विशेषणानि स्तंभाभ्यन्तरेत्यादीनि स्तंभस्याभ्यंतरं स्तंभाभ्यंतरं तत्र गर्भभावः
स्तंभाभ्यंतरगर्भभावः गर्भत्वं चेदमनभिव्यक्ततयावृत्तित्वं ननु गृहान्तरावस्थितदेवदत्तवत्प्रकटतया सर्वात्म-
रभावो नेन विवक्ष्यते मुकुलपुटकुटीकोटरक्रोडलीनामितिवत् तेनन पौनरुक्तं नेन निगदव्याख्यानं निगद-

ॐ श्रीगणेशाय नमः ॥ स्तंभाभ्यंतरगर्भभावनिगदव्याख्यानतद्वैभवो यः पांचाननपांचज-
मात्रेण व्याख्यानं उपायान्तरनिरपेक्षतया स्पष्टीकृतमिति यावत् त ९ न्यवपुषाव्यादिष्टविश्वात्मनः ॥
द्वैभवं तस्य स्वरूपस्य तत्त्वाद्गनुपममिति वा वैभवं विभुत्वं येन यस्येति वा असौ स्तंभाभ्यंतरगर्भभावनिगद-
व्याख्यानतद्वैभवस्तदनेन सर्वगतत्वमुक्तं भवति ॥ सर्वगतमपि नैयायिकादेर्विवक्षुतः परिच्छिन्नस्यादिति न
त्रिवृत्तये सर्वात्मना माह यः पांचाननपांचजन्यवपुषा व्यादिष्टविश्वात्मनः इति पंचाननसम्बन्धि पांचाननं पं-
चाननः सिंहः पंच सुदिरूपाननमस्य विपरिवर्तनेन इति व्युत्पत्त्या विस्तृतास्यत्वाद्वापविविस्तार इत्यस्मात्पंचशब्द

वि·सु·
टी·न·
२

त्युत्पत्तेः सिंहो मृगेन्द्रः पंचास्य इत्यमरः सिंहो केश्च पंचजना मनुष्याः स्युः पुमांसः पंचजना इति तेनैवोक्तत्वा
त् दिक्संख्ये संज्ञायामिति समासाभिधानाच्च तत्सम्बन्धि पांचजन्यं पांचाननेचतत्पांचजन्यं चेति पांचाननपांच
जन्यं तादृशं वपुः पांचाननपांचजन्यवपुः नरसिंहात्मकमित्यर्थः तेन वपुषा व्यादिष्टा विशेषेणोक्ता विश्वात्म-
ता विश्वस्वरूपता येन यस्येति वा सत्तथोक्तः नच सर्वात्मकत्व—कथनेनैव सर्वगतत्वसिद्धेस्तथा पृथक्कथनमि
ति वाच्यं अतत्परत्वात् यदेतद्वादिभिः स्त्र्यादि प्रसिद्धं सर्वगतत्वं सर्वात्मकत्वं तन्नूनं मया प्रकटितमित्युत्प्रेक्षाया
विवक्षितत्वात् तदेवं सर्वगतत्वं सर्वात्मकत्वं चोक्त्वा परमकारुणिकस्य भक्तानुगृहीतृतामाह प्रह्लादेति प्र।

प्रह्लादाभिहितार्थतत्क्षणमिलद्दृष्टप्रमाणो हरिः सोव्याद्वः शरदिंदुसुंदरतनुः सिंहाद्रि
चूडामणिः॥ १॥

ह्लादेनाभिहितोर्थः प्रह्लादाभिहितार्थस्तस्मिंस्तत्क्षणं समसमयमेव मिलत् घटमानं
दृष्टं प्रत्यक्षं प्रत्यक्षवत्साक्षात्कारसाधकत्वात्प्रमाणं यः सत्तथोक्तः प्रमाणशब्दस्य नित्यनपुंसकत्वात्प्रागपि
पादृष्टपि तत्तया तत्पुरुषसमासतया स्वप्रधानत्वाच्च संगच्छत एव प्रमाणं हरिरिति सामानाधिकरण्यं स-
र्वात्मकस्य परमेश्वरस्य स्तंभादिसर्ववस्तुगतत्वं हि प्रह्लादेन प्रत्यभिज्ञापितं च आगमोनुमानं वा यत्तेन वक्त
व्यं प्रमाणं तत्परोक्षमेवाहं तु साक्षात्कारयिष्यामीत्यभिमानेन स्तंभोद्दशान्निरगादित्यर्थः शरदिंदुसुंदरतनुः

रामः
२

CC-0. In Public Domain. Digitization by eGangotri

वल्लानतुर्यस्य सुतयोनः सिंहाद्रेश्चूडामणिः सिंहाद्रिचूडामणिः सिंहगिर्यलंकारः सिंहगिरिनिवासीत्यर्थः य
एवंविधः सहरिरित्यन्वयः यत्त्वप्यत्र वैभवस्यार्थात्मकतया निगदव्याख्यानेन संभवति तस्य ग्रंथधर्मत्वात्तथापि स
माधिप्रदर्शनार्थमयमन्यधर्मोन्यत्र निवेशितः समाधिनामकाव्यविशेषस्य प्राणविशेषः काव्यविशेषस्य हि
दश प्राणाः कविभिः परिगणिताः यथाहुः श्लेषः प्रसादः समता माधुर्यं सुकुमारता अर्थव्यक्तिरुदारत्वमो
जः कान्तिसमाधयः इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृता इति तथान्यधर्मस्ततोन्यत्र लोकसीमानुरो
धिना सम्यगाधीयते यत्र स समाधिः स्मृतो यथा कुमुदानि निमीलंति कमलान्युन्मिषंति चेत्यत्र हि नेत्रक्रि
यारूपयोर्निमीलनोन्मीलनयोः कुमुदकमलयोरनेत्रयोरध्यारोपणं समाधिस्तथेहापि ग्रंथधर्मस्या
र्थे निवेदनात्समाध्यलंकारो दर्शितो भवति पांचालीवैदर्भीरीत्योश्चौजसैव वैषम्यादस्य च वेदांतशास्त्र
प्रकरणत्वात्तद्विषयादिभिस्तद्वत्वमस्तीति दर्शयितुं लेशतस्तदपि सूचितं तथाहि हरिरित्यनेनाज्ञान त
त्कार्यहारित्वदर्शनान्निर्हेतोपाधिव्याधिपरिशुद्धप्रत्यग्रूपब्रह्म प्रयोजनं सूचितं व्यादिष्टविश्वात्मत इत्य
नेनारोपितमायतयाऽज्ञातं प्रत्यग्भूतं च ब्रह्म विषयो दर्शितः प्रह्लादशब्देन तादृगधिकार्यथ शब्दसूचि
तोपि सूचितः अर्थाच्च शास्त्रफलयोर्हेतुहेतुमद्भावरूपः शास्त्रतत्त्वज्ञानयोस्तत्त्वज्ञानफलयोश्च कार्यकार
णभावरूपो तत्फलज्ञानतत्त्वयोश्च विषयविषयिभावरूपः शास्त्रतत्त्वयोश्च प्रतिपाद्यप्रतिपादकभावरू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चि॰सु॰
टी॰न॰
३

पदानि पंचविधः सम्बन्धो दर्शितः अनेनैव प्रकरणारम्भोऽपि समर्थितः ॥१॥ तदेवमाशीर्वादेन परदेवतापूजिता गु-
रुपूजयापि भवितव्यं यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन इति देवताभ-
क्तिवद्गुरुभक्तेरपि विद्याङ्गतावगतावन्तरङ्गतावगमान्तरङ्गं गुरुं नमस्करोति ज्योतिर्यदित्यादिना सत्यानन्देति स-
त्यानन्दपदाभ्यां प्रकाशिते अथवा सत्यानन्दात्मकं यत्पदं पद्यते इति पदं तेनोदितं स्फुरितं इत्यभावे तृतीया अने-
न च गुरुदेवतयोरैक्यमुक्तं वेदान्तवेद्यं च तत्स्वरूपप्रतिपादकवेदान्तापेक्षितन्यायसूत्रणाय व्यासपदवीमवा-
प पुनस्तदर्थाविष्करणाय शङ्कराचार्यतां तन्न्यायार्थविवरणाय च ज्ञानोत्तमतामुपागमदिति भावः ॥२॥ य

ज्योतिर्यद्दृशिपां मूर्ध्नि व्यासशंकरशब्दितं । ज्ञानोत्तमाख्यं तद्वन्दे सत्यानन्दपदोदितम् ॥२॥
विप्रतिपत्तिध्वान्तध्वंसप्रगल्भवाचाला । क्रियते चित्सुखमुनिना प्रत्यक्तत्त्वप्रदीपिका विदुषा ॥३॥

अपि शारीरकविषयादिनास्यापि परमविषयादिमत्त्वं सिद्धमिति न्यायसाधारणान्यपराण्यपि च
क्तव्यान्येव अथ याप्यथगारंभवैयर्थ्यादिन्यसाधारणान्याह विप्रतिपत्तीति विप्रतिपत्तीनां ध्वान्तः समूहस्तदेव-
ध्वान्तं तस्य ध्वंसे प्रगल्भा दृढतरन्यायोपेता वाचाला बहुभाषिणी आलजाटचौ बहुभाषिणीति पाणिनिस्मरणात्स्वा-
ज्जल्पा कस्तु वाचालो वाचाटो बहुगर्ह्यवागित्यभिधानाच्च अनेनासम्पूर्णोक्तिः परिहृता प्रत्यक्चासौ जीवस्तत्त्वं पारमा-
र्थिकं स्वरूपं निरतिशयानन्दनिरस्तानर्थं ज्ञानं प्रत्यक्तत्त्वस्य प्रदीपिकेव प्रदीपिका प्रकाशकत्वात् एतदुक्तं भवति यद्यपि शारी

२
राम॰
३

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करणभूतवेदांतानांविप्रतिपत्तिनिरसनरूपोपकरणेतिकर्तव्यताकृत्यमपिकृतंतथापि तत्तदभिनव विप्रतिपत्ति
ध्वाननिवारणे तदेवास्यापिप्रयोजनंभवति विप्रतिपत्तिनिरोहितंतुविषयः तत्काम्यधिकारीतथाविधश्च सं
बन्धइत्यस्यैवासाधारणविषयादि अतएवचारंभणीयमिति केचिद्विप्रतिपत्तीत्यादिना अवान्तरप्रयोजना
स्यनिर्देशः।अन्यकर्तृत्वंप्रदीपिकेति प्रधानस्यैवेतिवदन्ति अनंतरवक्ष्यमाणवादार्थं नरसिंहनमस्कारच्छले
नदर्शयति प्रमाणेति प्रमाणतत्त्वमस्यादिवाक्यजनिताजीवब्रह्मैक्याकाराचित्प्रतिबिंबधारिणीबुद्धिवृत्तिस्त
त्प्रतिबिंबितंवाचैतन्यं वाक्यापेक्षयाचबहुत्वंप्रमाणमयैर्नखैर्विभिन्नोमहामोहाहूयोमरारिरसुरोयेनतस्मै

प्रमाणनखनिर्भिन्नमहामोहामरारये नमस्कुर्मोनृसिंहाय स्वप्रकाशचिदात्मने ४ अथको

अथकिमिति तत्कर्मकानुभवाजनकत्वंप्रमाणानामिति तत्राह स्वप्रकाशेति १ पं स्वप्रकाशशब्दार्थः ॥
स्वप्रकाशाचित्सैवात्मायस्य अथवास्वप्रकाशश्चिद्रूपश्चासावात्माचेति विग्रहः एतेनस्वप्रकाशरूपेति शयाना
धायकत्वेपि मोहनिवृत्तिलक्षणातिशयाधायकतयावेदांतानांस्वप्रकाशेब्रह्मणिप्रामाण्यंप्रमाणत्वंचोप-
पादितंभवति तदनेन संविदात्मनोःस्वप्रकाशत्वप्रतिज्ञातंतदेतद्द्वयमुत्तरत्रयथाक्रमंसमर्थयिष्यते ॥४॥
अथकोयमिति अथशब्दोयमानंतर्यार्थे विषयादिसिद्ध्यनंतरमित्यर्थः ॥ अधिकारार्थोवा ॥ स्वप्रकाशत्वस्यस्वय
मनंगीकारादंगीकृतशब्दद्वाराविप्रतिपत्त्यधिकरणनिर्देशः कोयमिति किंलक्षणकइत्यर्थः ॥ ६ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चि·सु·
टी·न·
४

स्वस्येति स्वत्वे सति प्रकाशत्वमित्यर्थः घटादावतिव्याप्तिनिवृत्त्यै प्रकाशग्रहणं स्वस्येति स्वविषयत्वे सति प्र
काशत्वं वेत्यर्थः अर्थान्तरतानिवृत्त्यै प्रथमं विशेषणं शब्दशब्दादावतिव्याप्त्यै प्रकाशग्रहणं द्वयमिहोक्तं भवति
स्वस्य स्वस्मिन्प्रकाशत्वविधानं अर्थात्प्रकाशान्तरव्यावृत्तिश्चेति इत्यतोमुत्तरे विशेषणं शंकते सजातीयेति अर्था
न्तरतानिवृत्त्यै सजातीयग्रहणं एतच्च प्रदीपादेरपि स्वप्रकाशत्वं वाच्यतो लक्षणं स्वसत्तायामिति यावदस्य स
त्तातावत्प्रकाशेनावियोगः वेद्यत्वे हि निलीनतायां अपि सम्भवात्प्रकाशव्यतिरेकोऽनवस्था वा स्यादित्यर्थः

किं स्वस्यासौ प्रकाशश्च स्वप्रकाशः १ स्वस्य स्वयमेव प्रकाश इति वा २ सजातीयप्रकाशाप्र
काश्यत्वं वा ३ स्वसत्तायां प्रकाशव्यतिरेकविरहितत्वं वा ४ स्वव्यवहारहेतुप्रकाशत्वं वा ५ ज्ञा
नाविषयत्वं वा ६ ज्ञानाविषय

स्वव्यवहारेति अविज्ञाने व्यवहारायोगादवश्यं ज्ञानेन स्वव्यवहारहेतुभू
तेन भवितव्यं तद्रूपत्वं च तस्य स्वप्रकाशत्वं विवक्षितमित्यर्थः यद्यपि न पूर्वपूर्वपक्षदोषपरिजिहीर्षया सर्वत्रोत्त
रोत्तरपक्षपरिग्रहस्तथापि संभाव्यमानत्वाद्भिन्नदूषणत्वाच्च विनेयमतिविकासायोपन्यस्तं ते ज्ञानाविषयत्वं
शशविषाणादेरप्यलिकत्वजनितबुद्धेर्विकल्पमात्रतया ज्ञानासंस्पर्शात् यथाहुः पतंजलयः शब्दज्ञानानु
पाती वस्तुशून्यो विकल्प इतीत्यपवित्तोषात्पक्षान्तरं शंकते ज्ञानाविषयत्वे सतीति नत्वतृतीयपक्षयोः ६ ॥

राम·
४

संकरः तथाभूतस्यापि प्रदीपस्य ज्ञानविषयत्वात् अथ ब्रूयात्किमिदमपरोक्षत्वं किमपरोक्षज्ञानविषयत्वे किं
वाऽपरोक्षज्ञानत्वं नाद्यः ज्ञानाविषयत्वज्ञानविषयत्वयोर्व्याघातात् न द्वितीयः सर्वस्यैव ज्ञानस्य स्वप्रकाशतानाश्रय
णे न व्यर्थविशेषणत्वापातात् अनपरोक्षज्ञानाभावात्स्वभवन्मते यत्साक्षादपरोक्षाद्ब्रह्मेति श्रुतेर्वृत्तिरूपस्य
ज्ञानस्य च ज्ञानत्वं नेष्यते भवतेति अतः पक्षान्तरं शंकते व्यवहारेति अख्यातिवादिनां व्यवहारविषयत्वे सति ज्ञानावि
षयत्वं शुक्तिरजतादिसंसर्गेऽप्यस्तीत्यतिव्याप्तिमालक्ष्य पक्षान्तरं कक्षीकरोति स्वप्रतिबद्धेति असंभवनिवृत्त्यै।

त्वे सत्यपरोक्षत्वं वा ७ व्यवहारविषयत्वे सति ज्ञानाविषयत्वं वा ८ स्वप्रतिबद्धव्यवहारे स
जातीयपरानपेक्षत्वं वा ९ अवेद्यत्वे सत्यपरोक्षव्यवहारविषयत्वं वा १० तद्योग्यत्वं वा ११ ना

सजातीयग्रहणं ज्ञानाविषयत्वे सत्यपरोक्षत्वं पूर्वमुक्तमिदं तु ॥ ग: वेद्यस्यापि ज्ञानस्य स्वप्रकाशत्वा
द्व्यवहारविषयत्वमिति न सप्तमदशमसंकरावसरः शुक्तिरजतादौ व्यवहारानंगीकारणादव्याप्तिः स्यादत उक्तं तद्यो
ग्यत्वं वेति अथवाऽर्थान्तरतानिवृत्त्यै द्वितीयोत्थानं विरोधपरिहाराय तृतीयोत्थानं घटादावतिव्याप्तिपरिहाराय चतुर्थः
सुखादावतिव्याप्तिनिवृत्त्यै पंचमः प्रदीपेति व्याप्तिपरिहाराय षष्ठः सप्ताष्टमनवमेषु चोक्तमेव प्रदीपेत्यतिव्याप्तिनिव
त्त्यै दशमः एकादशेऽप्युक्तमिति संभवत्येव सर्वत्र पूर्वपूर्वानुपपत्तिपरिहारायोत्तरोत्तरोपन्यासः वेद्यस्यापीति न हि तद

स्वयमूनाप्यप्रकाशः ज्ञानतांगीकारादित्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

चि·सु कर्मकर्तृभावेनि यद्यपी यं स्वस्येति षष्ठी संबन्धमात्रेपि संभवति तथाप्यविवक्षितविशेषेव्यवहाराद्योगाद्विशेषस्य च सं
टी·न निहितप्रकाशनक्रियानुरोधेन कर्मणि व्यवस्थापनात्प्रसज्येतैव कर्मकर्तृभावइत्यर्थः प्रदीपादेरिति नहितदालोकां
५ तरेण प्रकाश्यते यच्च ज्ञानं प्रकाशकं तद्विजातीयमित्यर्थः नच प्रदीपस्यापि स्वप्रकाशत्वाद्दननि व्याप्तिरिति शंकनीयं
भ्युपगमात् नद्वितीयः कर्मकर्तृभावविरोधेन लक्षणस्यासंभवात् नतृतीयः प्रदीपादेः सजातीय
प्रकाश्यप्रकाशस्यास्वयंप्रकाशत्वेन लक्षणस्यातिव्याप्तेः घटादेरपि सजातीयप्रकाशाप्रकाश्यस्य
स्वप्रकाशत्वप्रसंगाच्च नहि प्रदीपादौ ज्ञाने वा घटत्वादिजातिरस्ति येन घटादयः सजातीय
प्रकाशप्रकाश्या भवेयुः॥ सत्तया सजातीयत्वं तत्राप्यस्तीति चेन्न विशेषणवैयर्थ्यात्स
त्ताविरहिणः प्रकाशस्यैवासम्भवात्प्रकाशाप्रकाश्यत्वमित्येतावतैव चरितार्थत्वात् नापि
चतुर्थः सुखादावतिव्याप्तेः सुखादेरपि स्वसत्तायां प्रकाशाव्यभिचारात् नपंचमः प्रदीपा॥
भौतिकस्य स्वप्रकाशताव्याघातादिति नविशेषणवैयर्थ्यादिति सर्वं हि विशेषणस्य सार्थकं यदि कयापि जा
त्या साजात्यहीनः कश्चित्प्रकाशः स्यात् नत्वेवमस्ति जातिमतः सर्वस्यापि अंततः सत्तया साजात्यादित्यर्थः प्रका
शाव्यभिचारात् साक्षिणैश्वरज्ञानेन वा मानसप्रत्यक्षेण वेत्यर्थः घटादावपि तुल्यमेतत् ॥ ॥ ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वव्यवहारहेतुत्वादिति व्यवहारोह्येतद्विषयो भिज्ञाभिवदनं वाहानादिर्वा कर्मकारकप्रदीपजन्य इत्यर्थः अथ ज्ञानेति स्वव्यवहारेत्यत्र प्रस्तुतं ज्ञानमेव स्वशब्देनाभिधीयते न विषयमात्रं तद्व्यवहारहेतुत्वं च न दीपादेरस्ति प्रदीपादेर्ज्ञानाप्रकाशत्वादतो नान्यतिव्याप्तिरिति भावः अनुव्यवसायेति ईश्वरज्ञानस्याप्युपलक्षणं अथानुव्यवसाय ज्ञानमेव स्वप्रकाशवादेन सम्प्रतिपन्नं यत्रापि व्याप्तिरुच्येत संप्रतिपन्नत्वेवात स्यापि व्यवसायवदेव पक्षनेति तत्राह प्रदीपज्ञानमिति विशिष्टवेदनस्य विशेषणालंवनत्वनियमात् विषयजन्यत्वाच्च तज्ज्ञानस्य प्रदी-

दावतिव्याप्तेः प्रदीपादेरपि स्वव्यवहारहेतुत्वात्प्रकाशत्वाच्च अथ ज्ञानव्यवहारहेतु प्रकाशत्वं विवक्षितं तदपि न अनुव्यवसायेति व्याप्तेः तस्यावेदत्वेपि व्यवसायज्ञानव्य वहारहेतुप्रकाशत्वात् प्रदीपज्ञानमिदमिति व्यवहारहेतौ प्रदीपप्रकाशेतिव्याप्तेश्च

पज्ञानमिदमित्यनुव्यवसाय———————स्याभिज्ञारूपव्यवहारस्य स्वविषयज्ञानविशेषणीभूत प्रदीपजन्यत्वमस्तीति ज्ञानव्यवहारहेतौ प्रदीपेतिव्याप्तिः स्यादेवेत्यर्थः अभिवदनं वा व्यवहारस्तस्यापि परं परयाव्यावर्तकप्रदीपजन्यत्वाद्व्यवहारहेतुत्वमिति व्यवहारहेतुत्वमिति स्वव्यवहारहेतुप्रकाशत्वमित्यत्र व्यवहार हेतुत्वं प्रकाशस्य विशेषणमुपलक्षणं वेत्यर्थः उपलक्षितत्वमप्युपलक्षितेनामतस्य धर्मः स्वरूपं वा आद्ये तदप्युप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१
वि.सु. नाद्य अनवस्थापातात् द्वितीयं निरस्यति द्वितीयेति द्वितीयशंकने स्वरूपमात्रत्वे त्विति न लक्षणसिद्धिरिति लक्षणस्व
टी.न. रूपमात्रत्वात्स्वजडज्ञानवादिभिरपि तावन्मात्राङ्गीकाराच्चेत्यर्थः ज्ञानाविषयत्वे सतीत्यत्र यदिदं ज्ञानविषयत्वं
६ प्रतिषिध्यते तत्किं वेद्यत्वं ज्ञानकर्मत्वं वा नाद्यस्तन्निषेधासंभवस्य दर्शितत्वादित्याह अविषयत्वस्येति द्वितीयं नि

किंच व्यवहारहेतुत्वं विशेषणमुपलक्षणं वा नाद्यः मुक्तिप्रलयादावभावेन द्वितीयः उपलक्षितत्वस्यापि विशेषणत्वे प्रागुक्तदोषानुषंगात् स्वरूपमात्रत्वे तु ज्ञानेऽप्रकाशेऽप्येवंस्वान्न तथात्वे सति न लक्षणसिद्धिः नापि षष्ठः स्वयंप्रकाशत्वसाधकानुमानागमादिजन्यज्ञानविषयत्वेन लक्षणस्यासंभवित्वात् तस्याप्यविषयत्वे कथामात्रस्यानुपपत्तेः नापि सप्तमः अविषयत्वस्यैवासंभवेन निरस्तत्वात् द्विषयत्वशब्देन कर्मत्वविवक्षायां गुरुमतानुसारिणामात्मन्यतिव्याप्तेः ज्ञानस्य ग्राहकतया सिद्धस्याविषयत्वेऽप्यपरोक्षतायास्तैरङ्गीकारात् नाप्यष्टमः प्राचीनदोषानुषंगात्॥

षेधति विषयत्वेति प्राभाकराणां मते संविदाश्रयतया सिद्धस्यात्मनो ज्ञानाकर्मत्वेनापरोक्ष
नास्तीत्यंगीकारादतिव्याप्तिरित्यर्थः ईश्वरवादिनान्तज्ज्ञानाकर्मतयाऽपरोक्षे जगति भ्रमविषयसंसर्गे च वेदान्तिनां च
साक्षिवेद्यसुखादावतिव्याप्तिरित्यपि द्रष्टव्यं प्राचीनदोषानुषंगादिति व्यवहारविषयत्वस्य मुक्तिदशायामसंभवाद्दू

९८
राम.
६

CC-0. In Public Domain. Digitization by eGangotri

अतिव्याप्तिं चाह शुक्तीति शुक्तिरूप्यसंसर्गस्य ज्ञानविषयत्वं तेषां मतेऽभिमतं तथा सत्यपि यथार्थज्ञानांगीकारापातादिति भा
वः ॥ सजातीयं किमत्यन्तं यथा कथंचन वा आद्ये प्रदीपे प्रसक्तिरुक्ता द्वितीये प्यनपेक्षामात्रं घटादेरप्यस्ति अपेक्षावत्त्वान।
पिकरणत्वविवक्षायामाह सत्तयेति अदृष्टादेः सर्वोत्पत्तिमन्निमित्ततया सत्तावत्तया च तज्जन्यव्यवहारस्य सजातीयप

शुक्तिरजतादिसंसर्गोऽख्यातिवादिनामतिव्याप्तेश्च तस्य व्यवहारविषयत्वेपि नैर्ज्ञानविषयतानंगीकारा
त् नापि नवमः स्वमतिविरुद्धव्यवहारे सजातीयपरानपेक्षत्वस्य प्रदीपादौ घटादौ चाभावेनातिव्याप्तेः सत्तया सजाती
यत्वविवक्षायां तु तद्व्यवहारस्यापि सत्तया सजातीयादृष्टादिजन्यतयानपेक्षत्वेन लक्षणस्यासंभवित्वप्रसं
गात् नापि दशमः अवेद्यत्वेनुमानाद्यगोचरतया कथानवतारप्रसंगस्य दर्शितत्वात् अपरोक्षव्यवहारवि-
षयत्वमिति शब्देन प्रत्यक्षज्ञानविषयत्वस्य कंठोक्तत्वात् तद्विपरीतावेद्यत्वाभिधानेऽसमानावंध्येति
वद्व्याघातात्सुषुप्तिप्रलयमोक्षेष्वव्याप्तेश्च तदा व्यवहारस्यैवासंभवेन तद्विषयताभावात् ना
प्येकादशः उक्तव्यवहारयोग्यताया धर्मत्वे द्वैतवादिनामपसिद्धान्तापातात्स्वरूपत्वे च ज्ञानस्वभा
भावस्यात्मनो व्यवहारनिरूपणीयत्वात्प्रतियोगिकत्वप्रसंगात् तदेवं न स्वप्रकाशलक्षणं पश्यामः ॥

रसापेक्षतया लक्षणासंभवादित्यर्थः पूर्वोक्तव्यर्थविशेषणत्वमपि द्रष्टव्यम् अपरोक्षेति अपरोक्षज्ञानमप्यपरोक्षव्यवहा
रो भवत्येवाभिज्ञारूपत्वात् न तस्य व्याघात इत्यर्थः अविवदनविवक्षायां तु तस्य स्वविषयज्ञानप्रयोज्यत्वाद्व्याघातः ननु प्रमा
णबलात्स्वप्रकाशत्वे सिद्धे तदनुगुणं यत्किंचिल्लक्षणमपि भविष्यति यतो लक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१·

चि·सु· णमपिप्रमाणान्तरसिद्धस्येतरेभ्यो व्यावर्त्तकं व्यवहारहेतुर्वा भवेदिति अत आह नापिप्रमाणमिति स्वापरत्वदीपाव
टी·न· लीकृतमनुमानमुपन्यस्यति अथानुभूतिरित्यादिना प्रकाशत्वस्य यत्किंचिद्व्यवहारहेतुत्वस्य च परैरप्यंगीकारात्सि
७ द्धसाधनतास्यादित्यनुभूतिग्रहणं नचाप्रसिद्धविशेषणता अनुभूतिव्यवहारस्योभयसिद्धतया तद्धेतुभूतप्रकाश
स्यापि संमतत्वात्केवलव्यतिरेकाव्यतिरेकयोर्विप्रतिपन्नेस्तया चानुभूतिव्यवहारहेतुत्वाप्रसिद्धिरलंकारएव व

नापिप्रमाणं अथानुभूतिरनुभूतिव्यवहारहेतुप्रकाशोनुभूतित्वात् यन्नैवं तन्नैवं यथा घटइ
त्यनुमाने प्रमाणं नचाप्रसिद्धविशेषणःपक्षः अनुभूतिव्यवहारस्यहेतुभूतःप्रकाशःपरेषा
मपिहिप्रसिद्धस्तत्रानुभूतेस्तत्स्वरूपत्वप्रतिज्ञोपपद्यते नचानुव्यवसायज्ञानेसाध्यस्यसिद्ध
त्वाद्ज्ञानेसिद्धसाधनता तत्स्वरूपस्येवासंमतत्वेनतस्यधर्मिभागतानंगीकारादितिचेन्नैवं अ ७
नुभूतिव्यवहारस्यहेतुभूतःप्रकाशोयत्रसिद्धस्तत्रहेतोर्वृत्तौकेवलव्यतिरेकित्वव्याकोपात्॥

द्दिमत्वादीनामपिमहोदध्यादिसंबंधस्यानुमानगम्यत्वादितरथासिद्धसाधनतापातादितितदिदमाह नचाप्रसि
द्धविशेषणःपक्षइत्यादिना तदेतद्दूषयतिमैवमिति अयमभिसंधिर्नतावदनुभूतिव्यवहारहेतुरविवक्षितस्वत्वविशे राम·
षःप्रकाशःसिध्यतीति शक्यांगीकारेनह्यस्तिसंभवः संप्रतिपन्नस्तुभयोः केनिनज्ञायतइति कस्यचायमविवक्षितस्व ७
त्वविशेषःसिध्यतीति विवेचनीयं नतावत्त्वत्पक्षेतस्यसंविद्रूपतयानिर्णीतत्वात्परस्यापरंप्रतिप्रसाधनायोगात्॥

CC-0. In Public Domain. Digitization by eGangotri

यदाह निश्चितो हि वादं कुरुते इति नापि परस्य तस्याप्यननुव्यवसायेन निर्णीतत्वादेतदेव नोभयोस्तस्मादविवक्षि
तस्थल विशेषस्सिद्धान्तस्य न कंचनार्थं पश्यामः न च केवलव्यतिरेकिण्यप्रसिद्धविशेषणता नाम न दूषणमिति
मंतव्यं तथासति वस्तुधर्मशशविषाणोल्लिखितवस्तुधर्मत्वादित्यादिना शशविषाणादेरपि सिद्धिप्रसंगात् अथ तत्र प्र
माणान्तरबाधयादुष्टता नाप्रसिद्धविशेषणतयेति चेत्तत्र बाधकासिद्धेः नहि शशविषाणादेर्नामभाववेदकं प्र।
माणमस्ति तस्य प्रमाणान्तरयोग्यता योग्यत्वे तयोरभावासिद्धेः अन्यथा नियमेन प्रमाणानुपलंभो बाधकः ततो निवि।
क्तानर्हिकानामप्रसिद्धविशेषणतेति घट्टकुटीप्रभातायितं अथ विपक्षे बाधकतर्काभावान्न किंचित्पक्षे बाध

अवृत्तेरसपक्षाप्रवेशिनोऽसाधारणानैकान्तिकत्वापातात् वृत्तावपि भागे सिद्धसाधनतायाः
दुःपरिहरत्वात्॥

कस्तर्कः प्रमाणानुग्राहकद्वारोपयोगित्वात्तेनैव वा नान्यस्तर्कस्य प्रमाणानुग्राहकव्यापारमन्त
रेणोपयोगाभावात् प्रथमे तु तर्काभावात्प्रमाणाभाव एव सिद्ध इति सैव चाप्रसिद्धविशेषणतेति सिद्धं नः समीहितं।
किंच केवलव्यतिरेकित्वादेव केवलव्यतिरेकिणि न दूषणमप्रसिद्धविशेषणता केवलान्वयिन्यन्वयव्यतिरेकिणि च
सपक्षवत्त्वप्रसिद्धविशेषणतांशे केवलान्वयिनि हेतावतेयमप्रसिद्धविशेषणता कथानुपक्षिणी तस्माद्युक्ता यं प्रसिद्धः
ससपक्षः स्वीकर्त्तव्यस्तथा चोच्यमानदूषणगणग्रासोद्धुनिरस्त इति सपक्षवृत्त्यवृत्त्योः केवलव्यतिरेकिणो हानिरसा
धारणानैकान्तिकता चेति दूषणद्वयमुक्तं तत्र मानामानं यत्र भूत्केवलव्यतिरेकान्वयव्यतिरेकेव भवत्विति शंकमानः प्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१

वि·सु यत्तूक्तं स्वप्रकाशवादिनो नानुव्यवसायो नाम ज्ञानग्राहकं ज्ञानमस्ति तत्कथं तस्य धर्मिता कथं तरां तत्र सिद्धता का-
टी·न र्यं तन्मते सिद्धसाधनतेति तत्राह नचस्वस्यासिद्धतामात्रेणेति विपक्षेबाधिकां प्रतिवंदीं गृह्णाति अन्यथान्यथेति केन
८ विहेतुनेति रजतार्थिनो नियमेन पुरोवर्त्ति प्रवृत्तिहेतुत्वाद्रजतेच्छाधीनपुरोवर्त्तिप्रवृत्तिहेतुत्वादेमादिनेत्यर्थः अस्तुतु
व्यवसायवादिनं प्रत्यप्रयोगः यस्यतु तन्मात्मसिद्धतं प्रतिनिरुपसर्गः प्रयोग इत्यत आह स्वप्रकाशवादिनमिति ननुविवाद

नचस्वस्यासिद्धतामात्रेण परसिद्धे साध्यवति धर्मिणि सिद्धसाधनतायाः परिहारः अन्यथाऽन्यथा
ख्यातिवादिभिः केन विहेतुना रजतज्ञानस्य पुरोवर्त्ति विषयत्वे साधिते वेदांतिना चानिर्वचनीयपु
रोवर्त्ति रजत विषयत्वेन सिद्धसाधनत्वे नास्माकं तन्निसिद्धमिति वचनमात्रेणान्यथाख्यातिवादि
नश्चरितार्था भवेयुः अथ तनानिर्वचनीयवादिनां प्रति अयं प्रयोगस्तस्य सिद्धसाधनतापत्तेः त
र्हि तु व्यवसायवादिनं प्रत्ययं प्रयोगो नस्यात् द्वागे सिद्धसाधनत्वप्रसंगात् स्वप्रकाशवादिनं
प्रति सिद्धसाधनत्वादप्रयोगादिति मूकीभाव एव स्यात् अथ विवादपदेनानुव्यवसायस्य
पदमित्यनुभूतेर्विशेषणं प्रक्षिप्यते तथा चानुव्यवसायस्य परसंप्रतिपन्नसाध्यस्य व्यावर्त्तनमिति तदाह अ ताम·
थेति ननैतद्वक्तव्यं किमनुव्यवसायज्ञानं स्वमतसंमतं नवा नयदितदा व्यर्थ विशेषणता अथ संमतं तदाकथं ८
स्वप्रकाशता कथंवा केवलव्यतिरेकिनेति

CC-0. In Public Domain. Digitization by eGangotri

तदेतदपि नासूचयन्ग्रंथांतरेण पुरोदितं केवलव्यतिरेकिनाकोपमाह तथापीति साध्यविशेषणेति साध्यमेव।
विशेषणं पक्षं प्रति विशेषणत्वात्तस्य न च व्यवसायं पक्षीकृत्यानुव्यवसायवदनुभूतिव्यवहारहेतुप्रकाशत्वसाधनाद
न्वयव्यतिरेकिनास्तु अनुव्यवसायांगीकारानंगीकारयोर्व्याहति दृष्टांताभावयोः प्रसंगात्। यानि च स्वव्यवहार
हेतुप्रकाशत्वमिति पंचमपक्षे व्यवहारहेतुत्वस्य विशेषणोपलक्षणपक्षविकल्पेन दूषणान्युक्तानि तान्यत्र प्रस

व्यवच्छेदात्वास्य धर्मिभागतेति मतिस्तथापि तस्य साध्यविशेषणप्रसिद्धिस्थलत्वेनाभ्युपग
माद्धेतोः केवलव्यतिरेकित्वाभावस्तदवस्यस्तदनंगीकारे च न विशेषणप्रसिद्ध्युपपत्तिः अ
थ परं प्रत्येव तस्य प्रसिद्धिस्थलता तर्हि तं प्रति केवलव्यतिरेकिप्रयोगायोगः किंच व्यवहार
हेतुत्वस्य प्रकाशविशेषणतायां कैवल्येतदभावात्स्वयंप्रकाशताऽभावः व्यवहारहेतुत्वयो
ग्यतायां च स्वरूपातिरिक्तायां स एव दोषः अथ तदुपलक्षितप्रकाशात्मत्वमेव साध्यं तथापु

रतीत्याह किंच व्यवहारहेतुत्वस्येति ननु व्यवहारहेतुत्वयोग्यताविवक्षिता सा च तदानीमप्यस्ति योग्यता यावद्व
स्तुभावित्वादित्याशंक्य तर्हि सा स्वरूपातिरिक्ता तदनतिरिक्ता वा अतिरिक्तापि विशेषणमुपलक्षणं वेति विकल्प्य
विशेषणपक्षं दूषयति व्यवहारेति स्वरूपातिरिक्तायां विशेषणतायां चेत्यध्याहर्तव्यं उपलक्षणपक्षं दूषयंशंक
ते अथेति तथा योग्यतया तेन व्यवहारहेतुत्वेन वोपलक्षितं यत्प्रकाशात्मकत्वं तदेव साध्यमित्यर्थः॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१

चि॰सु॰ नदापि वक्तव्यं यत्तदुपलक्षितत्वं तद्विशेषणमुपलक्षणं वा आद्यं दूषयति तथापीति स एव दोष इति केवलस्या-
टी॰न॰ वस्थायां तदभावाद् स्वयंप्रकाशत्वप्रसंग इत्यर्थः उपलक्षितत्वस्योपलक्षणत्वपक्षं दूषयति अनंतर्भावे चेति
९ तस्याश्चान्यत्रापीति अनुभवसमयादिष्वपीत्यर्थः एतेनानभिव्यक्तपक्षो विनिरस्तो वेदितव्यः उक्तदूषणजातं प्राची-
नाचार्योदीरितानुमानेष्वतिदिशति एतेनेति एतेनेत्येतदेव विवृणोति तत्रापीति तदेवं स्वप्रकाशत्वे संभाव्य।

पलक्षितत्वस्य साध्यांतर्भावे स एव दोषः अनंतर्भावे च प्रकाशस्वरूपताया एव साध्यत्वात् त-
स्याश्चान्यत्रापि सिद्धत्वात् न केवलव्यतिरेक्यनुमानावकाशः। एतेनानुभूतिरनुभाव्या न भ-
वत्यनुभूतित्वादित्यादिप्रयोगोपि परास्तः तत्राप्यप्रसिद्धविशेषणतायाः दुःपरिहरत्वात्।
ज्ञानं वेद्यं वस्तुत्वाद्घटवदिति प्रतिप्रयोगसंभवाच्च न च हेत्वसिद्धिः सत्ताधिकरणत्वलक्ष-
णवस्तुत्वस्यावधीरितकल्पिताकल्पितविशेषस्य ॥ मानानुमानानि दूषयित्वा वेद्यत्वेप्यनुमानमा- ६

ह ज्ञानमित्यादिना प्रतियोगेति प्रतिपक्षसाधकेत्यर्थः सत्प्रतिपक्षतां वा ननु किमिदं वस्तुत्वं हेतूक्तं किं काल्पनि-
कसत्त्वमाहोस्विद्ब्रह्मवत्सत्त्वमिति नाद्य उभयासिद्धेर्नेतरः अद्वैतवादिनः साधनविकलत्वादित्यत आह नच हेत्व- रामः
सिद्धिरिति साधनवैकल्यस्याप्युपलक्षणमेतत् अथवा किं वस्तुत्वं नाम काल्पनिको धर्मः उताकाल्पनिकः नाद्य- ९
स्त्वासिद्धेर्नेतरः प्रमासिद्धेरित्याशंकाविवक्षितविशेषमाद्यायां परिहारः सत्ताधिकरणत्वेति स्वरूपसत्ताधि-

CC-0. In Public Domain. Digitization by eGangotri

अनुभूतित्वादिवदिति यथाह्यनुभूतित्वादिति स्वप्रकाशत्वादिहेतौ कोयमनुभूतित्वं नाम धर्मः किं कस्यचित उताकस्यचितः नाद्यः परस्यासिद्धेर्न द्वितीयः स्वस्यासिद्धेरिति विकल्पिते साधारण्येनैव परिहारस्तद्वदित्यर्थः अत्र गंगापुरीभट्टारकोदीरितदूषणमनुवदति ननु किमिदमित्यादिना मैवं घटादेरिवेति नहि घटादेरिवानुभूतेरपि वेद्यत्वं प्रत्यक्षादिप्रमाणसिद्धमिति मन्तुमुचितं तथासति नैयायिकादेरिव जडत्यापि संविदोऽर्थप्रथनसिद्धौ घटादिप्रतीत्यन्यथानुपपत्त्युपन्यासानवसरात्तदूषणानां स्वमतेप्यनुषंगप्रसंगाच्च नच नैयायिकाद्युपगतजडतायाः समारोपितत्वांगीकारादस्त्येवानुभूतेरपि व्यावहारिक

अनुभूतित्वादिवद्धेतुत्वोपपत्तेः ननु किमिदं साध्यमानं वेद्यत्वं वास्तवमुत वास्तवमाहोस्विद्व्यावहारिकमथवा साधारणमाद्ये साध्यविकलं निदर्शनमितरेषु सिद्धसाधनत्वमिति चेन्मैवं घटादेरिव व्यावहारिकप्रमाणसिद्धवेद्यतापादनेपि स्वप्रकाशत्वासिद्धेः किंचानुभूतिपदं स्वगोचरगोचरज्ञानजन्यपदत्वात्कुम्भपदवत् ननु किमत्र गोचरशब्देन विषयमात्रमुच्यते किंवा वाच्योर्थः अथ लक्ष्यो वा न तावत्प्रथमाद्वितीयो सिद्धसाधनतापत्तेरभ्युपेयते हि अनुभूतिशब्दवाच्यस्यान्तःकरणवृत्तिविशिष्टस्य वेद्यत्वेति साम्प्रतं तस्याः

शुक्तिरजतादेरिव व्यवहाराक्षमत्वात् अतो व्यावहारिकवेद्यत्वसाधनमपि विरुणद्ध्येव राद्धान्तमिति भावः वेद्यत्वेनुमानान्तरमाह किंचानुभूतिपदमित्यादिना स्वगोचर एव गोचरो यस्य तज्ज्ञानं स्वगोचरगोचरज्ञानं तज्जन्यः शब्दनिष्ठत्ववादिना प्रयोगस्य तज्जन्यत्वात्स्वशब्दोपि तज्जन्यपदमुच्यते सिद्धसाधनतानिवृत्त्यै स्वगोचरग्रहणं अत्रापि नैरुज्ज्ञावितदूषणमनुवदति ननु किमत्रेति सिद्धसाधनतामेव विवृणोति अभ्युपेयते हीति अन्तःकरणवृत्तिविशिष्टस्येति हेतुगर्भं विशेषणं यस्मादन्तःकरण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१
वि॰सु॰ टी॰न॰ १० मुख्यार्थविवक्षयेति सर्वं हि तदा प्रयोगः स्यादित्याद्यपदं स्वलक्ष्यविषयज्ञानजन्यं पदत्वात् संप्रतिपन्नवदिति एतच्च
नैकान्तिकं मुख्यार्थविवक्षया प्रयुक्तगंगादिपदानां तल्लक्ष्यतीरादिज्ञानजन्यत्वाभावात्तेषां मुख्यार्थज्ञानमात्रजन्यत्वा
दित्यर्थः तदेतद्दूषयति सैवमिति लक्षकपदत्वं हेतुस्तथा च नानैकान्तिकमित्यर्थः पदमात्रं पक्षीकृत्य लक्षकपदत्वा
दित्युक्ते भागासिद्धिर्वाधोऽस्यातोऽमिति लक्षकपदमित्युक्तं उभयवादिसंप्रतिपन्नात्तु भाष्यवाचकानुभूतिलक्षक
पदं चात्र विवक्षितं तेन नाश्रयासिद्धिसिद्धसाधने किंच यावत्किंचित्स्वप्रकाशत्वानुमानमुपन्यस्तं तेन स्वस्वर्वेस

स्वज्ञानस्वज्ञानगोचरतातृतीये तु मुख्यार्थविवक्षयाप्रयुक्तगंगादिपदैर्व्यभिचार इति चेन्नैवं
लक्षकपदं पक्षीकृत्य लक्षकपदत्वेन लक्षकगंगादिपदवल्लक्ष्यज्ञानजन्यत्वानुमानात् किं-
वानुभूतिपदाभिधेयस्य स्वप्रकाशत्वमभिधीयते भवद्भिरुत लक्ष्यस्य नाद्य अपसिद्धान्तापाता-
न्न द्वितीयः प्रतिवादिनं प्रत्याश्रयासिद्धेः सकलधर्मातीतस्याद्वितीयस्यानुभूतिपदलक्ष्य-
स्य परैरनंगीकारात् ॥ ६ ॥

धर्म्येव तावन्न निरूपणपद्धतिमध्यास्ते इत्याह किंचानुभूतीति अपसिद्धान्तेति अंतःकरणवृत्तिविशिष्टस्य स्वप्र-
काशत्वानाश्रयणादित्यर्थः प्रतिवादिनं प्रतीति न तावदनुभूतिपदलक्ष्यस्य यस्य कस्यचित्प्रमातुर्वा प्रमेयस्य वा राम १०
स्वप्रकाशतासिसाधयिषिता येनाश्रयासिद्धिर्न भवेत्किन्त्वद्वितीयानादिनिधनात्मभूतज्ञानस्य तस्य परं प्रत्यसिद्ध-
त्वाविशिष्टैवाश्रयासिद्धिरिप्याविकेति भावः किंच स्वप्रकाशतायां प्रमाणसद्भावा ॥ ~ ॥ ~ ॥

90

CC-0. In Public Domain. Digitization by eGangotri

तद्भावयोः समेयासिद्धिरिति व्याघातलक्षणतर्कस्तु गलविरोधइत्याह किंच स्वप्रकाशतायामिति एवं स्वप्रकाशत्वे प्रमा
णलक्षणे समाक्षिप्य समाधानुमुपक्रमते अत्रोच्यत इत्यादिना तत्र लक्षणं तावच्छ्लोकेन गृह्णाति अपरोक्षेत्यादि
ना नः अस्माकं पक्षे अपरोक्षव्यवहृतेर्व्यवहारस्य योग्यस्य व्यधिकरणे षष्ठ्यौ तथा धीपदस्य संविद्विषयस्य स्वप्र
काशस्य संभवे सति स्वप्रकाशस्येति पदस्तु पर्य्येपि संबध्यते हारमध्यस्थमणिवत् अतत्स्वस्य स्वप्रकाशस्य लक्षणा
सम्भवः कुतो न कुतोपीति योजना संगृहीतः लक्षणं विवृणोति न तावदित्यादिना अपसिद्धान्तापत्ति ॥ ॥
स्याद्वैतवादिनइत्तरदशायामपीति शेषः नच शंकनीयमित्युक्तं तत्र हेतुमाह योग्यत्वात्यंतेति कदाचिदपि यो

किंच स्वप्रकाशतायां सति प्रमाणे तद्द्वयत्वं मस्तिच साधकाभावादेव नतत्सिद्धो रिति सैषोपनिषदास्त
भयतः पाशारज्जुरित्यलमतिविस्तरेण अत्रोच्यते अपरोक्षव्यवहृतेर्योग्यस्याधीरपदस्यनः संभवे स्वप्र
काशस्यलक्षणासंभवः कुतः ॥ १ ॥ न तावत्स्वयं प्रकाशे लक्षणासंभवः अवेद्यत्वे सत्यपरोक्षव्यवहार
योग्यतायास्तल्लक्षणत्वात् नच योग्यतालक्षणधर्मोगीकारे व्याप्तिर्मोक्षदशायां तदसंभवादपसिद्धान्ता

त्यताधिकरणं नदत्यंताभावानधिकरणमेवानुपपत्ति॰ पतिश्चेति शंकनीयं योग्यत्वात्यंताभावानधिकरणत्वस्यत
विनाशत्वेन हि संसर्गाभावविशेषमत्यंताभावमुपगच्छन्ति तार्किकास्तथा च यदि कदाचिदपि तत्प्रतियोगी स्यात्तदा तत्पूर्व
वानदुत्तरकालवानरभावो मतनव्यः तसमसमयं विरोधात् नचान्योन्याभावतत्प्रतियोगि घटयोश्च समसमयं वर्त्तमान
त्वात्तविरोध इति वचनीयं तस्यतादात्म्यप्रतियोगित्वात्तस्य कदाचिदप्यभावात् इतरथा घटसंसर्गाभाव घटान्योन्याभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वि॰सु॰ रप्रसंगात् अथ घटप्रतियोगित्वे समानेऽपि संसर्गतादात्म्यरूपविशेषणभेदात् संकरस्तयोरेवं तर्हि भाभावविवेकेन संसर्ग·
टी॰न॰ तादात्म्ययोरेवोभयत्र प्रतियोगित्वं न घटस्येति मूकीभावः तदितराभावे तु वायं नियमः विस्तरेण चैतदुपरिष्टादुपपादयि-
११ ष्यते ततश्च प्रतियोगिपूर्वकालीनत्वे विनाशित्वम् उत्तरकालीनत्वे तूत्पत्तिमत्त्वम् तस्मात्तत्र प्रागभावप्रध्वंसयोरन्यतरत्वे
प्रसज्येत तस्मात्कदाचिदपि योग्यताधिकरणं तदत्यन्ताभावानधिकरणमेवेति सिद्धं ततश्चैतदंगीकर्तव्यमितरथा।
गुणवद्द्रव्यमिति कणादोक्तगुणवत्त्वस्य द्रव्यलक्षणत्वभंगप्रसंगात् प्रथमक्षणे हि गुणवत्त्वाभावेनाव्याप्तेः यथा चैतत्त-
था द्वितीयपरिच्छेदे द्रव्यलक्षणखण्डनप्रस्तावे विस्तरेण निवेदयिष्यते तस्मात्तदत्यन्ताभावानधिकरणत्वमेव तत्त्र

गुणवत्त्वात्यन्ताभावानधिकरणस्य द्रव्यत्ववचनेन नाव्याप्तिर्नाप्यपसिद्धान्तः कात्स्निकधर्माणां संसा-
रदशायामभ्युपगमात् अस्मामभवतः केयं साधकत्वप्रकल्पने किं न पश्यसि संसारं तत्रैवाज्ञानकल्पि-
॥ तमिति सुरेश्वराचार्य

शरणं तदत्रापि समानमभिनिवेशमपहायेत्यभिसंधिराह गुणत्वात्यन्तेति यद्यप्यप ११
रोक्षव्यवहारविषयत्वात्यन्ताभावानधिकरणत्वमेव लक्षणं भवति तथाप्यायुक्ते विद्यमानयोग्यताऽत्यागाय द्रष्टुकं भव
त्वेवमव्याप्तिपरिहारोपसिद्धान्तव्याधेः किमौषधमित्यत आह नाप्यसिद्धान्त इति कः खल्वेवं वदेत्संसारदशायामपि का। राम॰
त्स्निकधर्माः नसंतीति किं परः किं वा स्वयूथ्यः कश्चित्परश्चेद्द्वियदाद्यारोपसमर्थनेन समर्थनीयः उत्तरमात्रवाक्येन सं ११
मनयति अस्मामभवन इत्यादिना अद्वितीयात्मनः साधकत्वकल्पनायां केयमक्षमा असहिष्णुता भवतः किं न त्वेवसम
स्तप्रपंचकल्पितं न पश्यसि तत्तोत्यत्यमिदमित्यर्थः विषयिणस्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्धर्माणां चेत्यध्यासभाष्यावयवं व्याचक्षाणैः पंचपादिकाकृद्भिः ननु विषयिणश्चिदेकरसस्य कुतो धर्मा ये विषये ऽध्यस्येर
न्नित्याशंक्य समाहितं आनंदो विषयानुभवो नित्यत्वं चेति संति धर्माः अपृथक्त्वेपि चैतन्यात्पृथगिवावभासंत इति ननु संसारद
शायां कल्पनासंभवः मोक्षदशायां तु तदभावात् व्याप्तिरित्यत आह मोक्षदशायामिति यद्यप्ययमपि कश्चन धर्मस्तथापि परै-
स्तद्भावरूपत्वेनांगीकृतत्वात् अभावभावयोरेवंविधस्य लेपनतिरेकस्वीकाराच्च न दोषः। एतच्च पूर्वोक्तस्यैव विवरणं इ
दानीं लक्षणविशेषणानां कृत्यमाह अपरोक्षेत्यादिना अवेद्यत्वशब्देन ज्ञानाविषयत्वमभिमतमिति भ्रांतः शंकते नन्विति।

वचनात् आनंदो विषयानुभवो नित्यत्वं चेति संति धर्मा इति पंचपादिकाचार्यवचनाच्च मोक्षदशायां च वि
वक्षितधर्माभावेपि कदाचित्त्वेन तदत्यंताभावानधिकरणत्वस्य गुणाश्रयो द्रव्यमितिवत्सिद्धेरपरोक्षव्यव
हारयोग्यघटादावतिव्याप्तिपरिहारार्थमवेद्यत्वे सतीति विशेषणं न चैतावदस्तु लक्षणमिति वाच्यं तथास-
त्यतीतानागतयोर्नित्यानुमेयेषु च धर्मादिष्वतिव्याप्तेः ननु तेषामप्यागमवेद्यत्वान्नावेद्यत्वमिति चेन्मैवं।
फलव्याप्यतालक्षणवेद्यत्वस्य तत्राभावात् ॥छ॥छ॥ तत्र विशिष्टशब्दप्रमाणबलात्तदाकारधीवृत्तिस

फलव्याप्यत्वेति विषयावच्छिन्नं चैतन्यमभिव्यक्तं फलमिति वेदांतवादिनां मतं अभिव्यक्तिश्चेन्द्रियद्वारा अर्थसन्निकृष्टम
नःपरिणामविशेषः न चैवंविधः परिणामविशेषो दृष्टादिषु संभवति तेषामिंद्रियायोग्यत्वात् एतेनातीतानादिव्याख्यातं तस्मा
न्न धर्मादीनां फलावच्छेदकतया वेद्यत्वमित्यर्थः यथानयैव व्यवहारसिद्धिस्तथा भवत्कल्पनयान्यथानतथोदितं तत्तद
गाधधीभिस्तेनोचयं विस्तरतो विभीताः। ननु यदि नवेद्यत्वं तेषां कथं तर्हि तेषु विज्ञानमनुष्ठानमित्यादिव्यवहार इत्यत आह तत्रेति

१
वि-सु- माणं विधिवाक्यादि धीवृत्तिरंतःकरणपरिणामस्तस्य समसुत्थान उदयस्तन्मात्रादित्यर्थः ननु यद्यपि धर्मादीनां नास्मदादि
टी-न- प्रत्यक्षगम्यत्वं तथापि योगिनां भवति तत्प्रत्यक्षमत एव वेद्यत्वमित्यत आह नचेति अयमभिसंधिर्न तावद्धर्मादीनां बाह्ये-
१२ न्द्रियग्राह्यत्वं रूपादिहीनतया तदुपहितमर्यादविषयाणामिन्द्रियाणां तत्राप्रवृत्तेर्मानसत्वं तु तेषामात्मगुणत्वेपि संस्कार-
वद्योग्यत्वेन दूरनिरस्तं अथ विशिष्टादृष्टसामर्थ्यात्तेषां तेषु विषयेषु सामर्थ्यमिति मतं नहि तदेवं हि विशिष्टादृष्टात्ते
कथं कारमेषां सृष्टेति अज्ञातेषु तेषामनुष्ठानायोगात् अथ योग्यनरवचनाद्यथपरंपरा अथ नित्यसिद्धेश्वरवचनात्
स्यादेवं यदि नित्यसिद्धईश्वरः सिद्धोत आगमबलादीश्वरसिद्धिरिति चेत्तत्किमीश्वरवचनतया प्रमाणमपौरुषेयतः

समाम्नायादेव तद्व्यवहारइति वेदवादिनां प्रक्रिया नच योगिप्रत्यक्षगम्यतया अपरोक्षत्वं धर्मादीनां
चोदनैकप्रमाणवेद्यत्वात्तेषां नचैतावता सर्वदर्शित्वाभावो योगिनां सर्वदर्शित्वशब्देन योग्यसर्व
दृष्टत्वस्य विवक्षितत्वात् यत्राप्यनिमृग्योऽदृष्टः सर्वार्थाननिलङ्घनादृते सूक्ष्मादिदृष्टौ स्यात्तर्क
पेक्षोवृत्तिनार्हतीत्याशयात् अतो धर्मादि स्ववक्त्रदर्थमपरोक्षव्यवहारयो ॥ यावा प्रथमेत्यितरेतना- 92
७॥
तात्पर्येन हि वचनात्तत्प्रामाण्यं तत्प्रामाण्याच्च तत्सिद्धिरिति उक्तदेवत्वपराहतः यथा चानुमानजातमपि न पराभिमतेश्व-
रवत्तेति यथा चापौरुषेयत्वं वेदस्य तत्सर्वमस्माभिरग्रे निवेदयिष्यते अथागमात्तानेष्वनुष्ठानमिति अस्तु तर्हि सएवाग- राम.
गमस्तत्र प्रमाणमवश्यापेक्षणीयत्वात्कृतं तदुपजीविभिर्योगिभिरिति ननु यदि न योगिनामयोग्यविषयेषु सामर्थ्यं क- १२
थं नहि तेषां सर्वदर्शित्वप्रदर्शकशास्त्रवाशिता अत आह नचैतावतेति प्रमाणान्तरबलात्सर्वशब्दः संकोचनीय इत्यर्थः॥

CC-0. In Public Domain. Digitization by eGangotri

यत्रापिविषयेनिशायोदृष्टः पार्श्वसंपातिप्रभृतीनां विश्वरूपाशोकवनिकानिहितसीतादिषुसोतिशयः स्वार्थानतिलं
घनादृष्टव्यः अनतिलंघनमेवाह दूरसूक्ष्मादीति योग्यस्यैवविषयेदूरवर्तिनिसूक्ष्मेवादर्शनं नत्रनपुनारूपा
दौष्योत्रादेर्वृत्तिविनिर्गमइत्यर्थः फलव्याप्यत्वाभावेनेति प्रमाणाविषयत्वेनकेवलसाक्षिवेद्यत्वादित्यर्थः परि
हरति सत्यमवेद्यत्वेपीति नाज्ञानादीनांसाक्षादपरोक्षतावेद्यतयातेषांसाक्ष्यपरोक्षाध्यासादेवापरोक्ष्यादि।

योग्यत्वेसतीति विशेषणं नन्वज्ञानांतःकरणतद्धर्मेच्छादिषुशुक्तिरजतादिषुचलक्षणाति।
व्याप्तिस्तदवस्थातेषामपिफलव्याप्यत्वाभावेनावेद्यत्वात् अहमज्ञइत्याद्यपरोक्षव्यवहा
रयोग्यत्वाच्चेति चेत् सत्यं अवेद्यत्वेपिनापरोक्षव्यवहारयोग्यतातेषां अभ्यस्ततयैवतेः
षांसिद्धेर्ननुतथाप्यपरोक्षमिति व्यवहारदर्शनात्तद्योग्यतातत्रकल्पनीयेति चेन्नैवं रज
तादिव्यवहारायोग्येपि शुक्तिशकलादौरजतादि व्यवहारदर्शनात् नन्वेवंसत्यवे॥ ६ ॥

त्यर्थः उक्तौचोद्यपरिहारौ स्पष्टार्थौ ननुयदिस्वतोपरोक्षत्वं चैतन्यस्यैवाज्ञानादीनांतुतदध्यासादपरोक्ष्यम
ध्यस्तमिति नापरोक्षव्यवहारयोग्यत्वमितिदूषणतर्हितद्घटादावपितुल्यमिति नतेषामप्यपरोक्षव्यवहारयो
ग्यत्वप्राप्तिरनस्तद्यवच्छेदार्थमवेद्यत्वविशेषणं व्यर्थमिति शंकते नन्वेवमिति ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वि॰सु॰ व्यवहारदशायामिति यद्यपि वास्तवापरोक्षस्याभावो घटादेरज्ञानादेश्च समानस्तथाप्यर्थक्रियासमर्थापरोक्ष्यं प्र
टी॰न॰ त्यक्षादिप्रमाणसिद्धं सत्त्वमिव घटादेरस्ति अज्ञानादेस्तु नास्ति प्रत्यक्षादिविषयतया अप्यभावात् अतः शुक्ति
२३ रजतादिसत्तावन्मातीतिकमित्यर्थः ननु तथापि व्यवहारयोग्यतापदस्य कृत्यं न पश्यामः अवेद्यतापदेन घटादि
व्यावृत्तेरपरोक्षतापदेनाज्ञानादिव्यावृत्तेरिति शंकते तथापीति परिहरति सत्यमिति अयमर्थः अपरोक्षज्ञान

वत्त्वविशेषणस्य तव्यवच्छेद्यमस्तित्वन्मते घटादेरप्यध्यस्ततया अपरोक्षव्यवहारयोग्यत्वाभावात्
मैवं व्यवहारदशायां तेषां प्रत्यक्षप्रमाणविषयाणामपरोक्षव्यवहारयोग्यतांगीकारात् तथाप्य
वेद्यत्वे सत्यपरोक्षत्वमेव लक्षणमस्तु व्यभिचाराभावादिति चेत्सत्यमपरोक्षज्ञानविषयता
त्वेनैव घटादेरपरोक्षत्वांगीकारादत्रापि तथात्वाद्याघातइति विभ्रमो माभूदिति तद्व्यवहारे
णैव प्रतिवादिनामपि संप्रतिपन्नेन तदेव स्फुटीक्रियत इति न कश्चिद्दोषः॥ ९॥ विषयेष्वपि तावद ९२

परोक्षशब्दः प्रयुज्यते तत्रापरोक्षमित्युक्ते व्याहतिशंकास्यात्तन्निवृत्त्यर्थमवेद्यत्वेप्युपपद्यमानव्यवहारयोग्यतापद
ग्रहणमिति वस्तुतस्तु न प्रसरत्येव घटादिष्वपरोक्षत्वं तस्य प्रमात्वावांतरजातितया प्रमायां घटादावभावात् न च राम॰
मिथ्याज्ञानेपि भावात्प्रमात्वेन परापरभावाभावान्न जातिरिति वाच्यं तत्रारोपांगीकाराच्छब्दप्रयोगस्यापि तन्मा २३
गत्वात् अन्यथा घटत्वादेरप्यपलापप्रसंगात्सुवर्णनिर्मितेपि घटशब्दप्र॥ ६ ॥ ७ ॥ ६ ॥ ७ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

योगेण पृथिवीत्वादिना परापरभावाभावस्यापि शक्यवचनत्वात् यद्यपि व्यवहारो ज्ञानमपि भवति तथाप्यवेद्यत्वविशेषणानुरोधेन शब्दप्रयोग एव स्वीक्रियते तेन न पूर्वपक्षावसरोक्तदूषणप्रसरः यद्यपि योग्यता व्यतिरेकेणापि लक्षणं शक्यसमर्थनं तथापि सुषुप्तौ तदभावेपि योग्यत्वस्य सत्तोऽत्यागाय तद्ग्रहणं व्यवहारविषयत्वादेव ज्ञानविषयत्वमपि सिद्ध्यतीत्यभिप्रेत्य शंकते कथं तर्हीति तदेतत्प्रसंगो वा प्रसाधनं वेति विकल्प्य दूषयति किमिदमवेद्यत्वे व्यवहारविषयत्वमित्यादिना आपाद्यापादकयोरिति क्वचित्प्रमितेन पक्षे चाहाप्यो

कथं तर्हि अवेद्यस्य व्यवहारयोग्यत्वमिति चेत् किमिदमवेद्यत्वे व्यवहारविषयत्वं तस्यादित्यनिष्टप्रसंजनमुत व्यवहारविषयत्वाद्वेद्यत्वानुमानं नाद्य आपाद्यापादकयोरुभयोरपि परेषामप्रसिद्धेः नेतरः तस्य सप्रतिसाधननिरासस्समये निराकरिष्यमाणत्वात् तस्मादनाविलं स्वप्रकाशलक्षणं प्रमाणमपि अनुभूतिः स्वयंप्रकाशा अनुभूतित्वाद्यन्नैवं तन्नैवं य

योपि तेन क्वचिद्व्यापकतया प्रमितेन पक्षे चानभिमतमापाद्यत इति हि स्थितिस्तदि ८ यथा घट इत्यनुमानम् हावेद्यत्वेनापादकेन प्रमितेन भवितव्यं न चैतत्सर्वं प्रत्यक्षमिति मन्यमानस्य संभवति नापि व्यवहारविषयत्वस्य प्रमितिरिति केन किमापाद्यत इत्यर्थः तस्य सप्रतिसाधननिरासस्समय इति लक्षणदूषणसमये प्रत्यनुमानप्रयोगेनावसरे निरस्त इत्यर्थः तदेवं लक्षणं समर्थयित्वा प्रमाणं समर्थयितुमुपक्रमते प्रमाणमपीति ॥

CC-0. In Public Domain. Digitization by eGangotri

१

चि·सु· त्वप्रकाशलक्षणसंभवेपि नादृग्रूपं साध्यं प्रसिद्धमप्रसिद्धं वा आद्ये सिद्धसाधनता केवलव्यतिरेकिता व्याकोप
टी·न· श्च द्वितीये प्रसिद्धविशेषणताऽऽहत्य तत आह नचेति हेतुमवतारयति यत इति श्लोकेन हेतुमाह सामान्यत इति
१४ सामान्यतोऽनुमानेन सामान्यतोदृष्टेन प्रसिद्धेपि विशेषण इत्यत्रापि सामान्यत इत्यनुषञ्जनीयं अनिर्द्धारितध
र्मिविशेषतयेत्यर्थः अत एव सामान्यतोदृष्टानुमानेन निर्द्धारितधर्मिविशेषनिष्ठस्येति विवरणं। अपिर्भिन्नक्र
मः सामान्यतोपि प्रसिद्धे विशेषणे अप्रसिद्धविशेषणः पक्षः कथमिति कथयन कथमपीति योजना अत्र च सा

नन्वाप्रसिद्धविशेषणत्वं यतः सामान्यतोऽनुमानेन प्रसिद्धेपि विशेषणे कथं कथय पक्षोप
मप्रसिद्धविशेषणः॥ २॥ तथा हि वेद्यत्वं किञ्चिन्निष्ठात्यन्ताभावप्रतियोगिधर्मत्वात् शौक्ल्य
वदिति सामान्यतोदृष्टानुमानेनानिर्द्धारितधर्मिविशेषनिष्ठस्यावेद्यत्वधर्मस्य प्रसिद्धत्वात्

मान्यत इति सिद्धसाधनतापि परिहृता वेदितव्या सामान्यतोदृष्टमेवाह तथा हि वेद्यत्वमित्यादिना अभावप्रति
योगीत्युक्ते अन्योन्याभावेन वेद्यत्वेप्युपपद्यमानेनार्थान्तरता स्यात्तन्निवृत्त्यर्थमत्यन्ताभावग्रहणं न चास्तित्वेन।
व्यभिचारस्तस्य पक्षत्वात् पक्षतुल्यत्वाद्वा अभिधेयत्वादिष्वपीयमेव गतिः अंततः स्वस्मिन्नेवाभावाद्वात्माश्र
यप्रसंगात् उत्पत्तिज्ञप्तिप्रतिबंधकस्यैव दोषत्वमिति प्रक्रियामात्रं नियमेन प्रमाणानुपलब्धेरविशेषादिति। साम·
अत्र च वेद्यत्वप्रसिद्धौ वयत्र्यपि तदनधिकरणत्वमपि प्रसिद्धं प्रतियोगिप्रसिद्धौ वाभावप्रसिद्धस्तथापि सुहृद् १४
त्वेदमाहेति सूक्ष्मम् अनिर्द्धारितेति अनिर्द्धारितो यो

98

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धर्मिविशेषस्तन्निष्ठस्येत्यर्थः ननु भवत्ववेद्यत्वसिद्धिरपरोक्षव्यवहारयोग्यत्वे सत्यवेद्यत्वस्य कुतः सिद्धिरित्यत आ
ह केवलव्यतिरेकिणश्चेति अथवा मानान्तरेणावेद्यत्वसिद्धौ किमनेनानुमानेनेत्यत आह केवलेति केवलव्यतिरेकि-
ण इति पंचमी प्रथमपक्षे त्वयमर्थः अपरोक्षव्यवहारविषयत्वं तावदनुभूतावेव न वापि संप्रतिपन्नं तादृगनुभूतो
चावेद्यत्वमन्यतः स्वरूपेण सिद्धं यदा साध्यते तदा किमपरमत्राप्रसिद्धं येनाप्रसिद्धविशेषणता स्यादिति द्वितीये
तु सामान्यतः सिद्धस्यानुमानेन धर्मिविशेषे साधनान्नानर्थक्यमित्यर्थः एतेन केवलव्यतिरेकिनापिरस्तिना।

केवलव्यतिरेकिणश्चोभयवादिसंप्रतिपन्नापरोक्षव्यवहारयोग्यानुभूतिविशेषावलंबनाया
एव समर्पणात् नाप्रसिद्धविशेषणता यद्वा यद्विपर्यये असमीहितप्रसक्तिस्तत्क्वचिन्मानयो
ग्यमिति सामान्यव्याप्तिरिह चानुभूतिरनुभाव्या भवति नवेति वादिविप्रतिपत्तेः संशये सत्य
नुभाव्यत्वे सत्यसमीहितप्रसक्तेस्तद्विपर्ययस्य सामान्यतो मानयोग्यत्वाधिगमात्

अन्यत्र प्रसिद्ध्यनभ्युपगमात् एवमुदयनरीत्या केवलव्यतिरेकिणः प्रामाण्यं समर्थितं संप्रति लीलावतीका
रीत्याप्याह यद्वेति यस्य वैपरीत्यांगीकारे प्रमाणान्तरबाधादिप्रसक्तिस्तत्प्रमाणयोग्यमिति सामान्याकारेण व्या
प्तिः व्याप्तहेतोः पक्षधर्मतामाह इह चेति ननु किं सर्वत्र विपक्षबाधात्प्रमाणान्वयेन तथा च गगने घटादिप्रत्यक्षेणाविम
र्शपूर्वकेणेत्यत आह संशये सतीति कोटिद्वयाप्रसिद्ध्यासाधारणधर्मदर्शनाभावान्न संशयोऽत उक्तं विप्रतिपत्तेरिति
इदं च प्रयोगशरीरं वेद्यत्वमनुभवनिष्ठप्रामाणिकात्यन्ताभावप्रतियोगि तत्कोटिबाधितत्वात् यदेवं तदेवं य

CC-0. In Public Domain. Digitization by eGangotri



१

कि.प्र. यास्तु किंरजतादिषया वा घटत्वादीति तर्कमात्रं तेन्द्रमित्याशंक्य प्रस्तुतानुमानोपयोगमाह विशेषप्रमाणापेक्षाया-
टी.न. मिति अत्र सामान्यतोऽनुमानेनेति सामान्येन प्रमाणोन्नयनेनेति योजनीयं एतदेव प्रतिबंधसाधयति अन्यथेति अनु-
२५ पपत्तिसाम्यं तावदाह अष्टद्रव्यव्यतिरिक्तेति तत्र वृत्ताविति अत्राष्टद्रव्यातिरिक्तद्रव्यप्रसिद्धौ तदाश्रितगुणादीनां सपा-
क्षत्वं तथा च तत्र हेतुवृत्त्यवृत्त्योर्दूषणद्वयं स्यादित्यर्थः एवमनुपपत्तौ समानायामस्मदुक्तविधामन्तरेण नापरा वि-
धास्तीति भावः तथाहि इच्छादयो गुणाः अनित्यत्वे सत्यस्मदाद्यबाह्यप्रत्यक्षत्वात् गंधवदित्यादिना गुणत्वे स्थि-

विशेषणप्रमाणापेक्षायां व्यतिरेकिण उपन्यासात् नाप्रसिद्धविशेषणता अन्यथा कथमि-
च्छादीनामष्टद्रव्यव्यतिरिक्तद्रव्याश्रितत्वे साध्ये पृथिव्यादयोऽपि साध्येयुः अष्टद्रव्यव्यतिरिक्तद्र-
व्यस्याप्रसिद्धावप्रसिद्धविशेषणताप्रसिद्धौ तु हेतोस्तत्र वृत्तावन्वयव्यतिरेकितया केवल-
व्यतिरेकित्वासम्भवः अवृत्तौ चासाधारणानैकान्तिकतापत्तिः॥ ते गुणत्वापरजातिमत्त्वानिय- १५

तैकद्रव्यवत्त्वेरूपतया विशेषगुणत्वे च सिद्धे सतीच्छादयः क्वचिदाश्रिताः गुणत्वाद्रूपवदिति सामान्यतोदृष्टा-
नुमानेनाश्रितत्वे सिद्धे कस्मिन्नाश्रिता इत्यपेक्षायां न तावत्स्पर्शवद्विशेषगुणाः प्रत्यक्षत्वे सत्यकारणगुणपूर्वकत्वात्प्रत्यक्ष-
त्वे सत्ययावद्द्रव्यभावित्वाद्वा नाप्याकाशविशेषगुणाः बाह्येन्द्रियाप्रत्यक्षत्वात् नापि दिक्कालमनसां विशेषगुणत्वादि- वाम.
त्यादिनाऽष्टद्रव्याश्रयत्वानुपपत्तौ सिद्धायामिच्छादयोऽष्टद्रव्यव्यतिरिक्तद्रव्याश्रया एवानुपपद्यमानत्वे सति गुण- २५
त्वाद्यन्नैवं तन्नैवं यथा गंधादीति केवलव्यतिरेकिणैव सिद्धिरिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नन्वेवंविधपरिहारस्यानस्यसर्वत्रसुलभत्वात्कृतं वताप्रसिद्धविशेषणता   तपस्विन्ये त्यत आह नचैवंसतीति
एतदुक्तंभवतिनसर्वत्रैवंविधः परिहारः सुलभः असमाधेयाप्रसिद्धविशेषणत्वानामपिभूमिः शशविषाणोल्लिखि
ताद्यादीनांसंभवात् तेषुचास्याः साम्राज्यमिति तदेवमृजुरीत्याः प्रसिद्धविशेषणतांपरिजिहारयिषुर्वक्रीतिंरोचयं
तेतात्प्रतिमहाविद्याभिरपिसाध्यप्रसिद्धिंसुलभयति अथवेति अयंघटः वेद्यत्वानधिकरणान्यद्वृत्तिः प्रसि
द्धविशेषणता सर्ववेद्यत्ववादिनोऽनुमानान्तुरत्वात्तदनधिकरणासिद्धेरत उक्तं घटान्यत्वे सतीति घटत्वानधिक
रणत्वहृतिपावत् तथाचसर्वघटेषुसिद्धसाधनं तत उक्तं एतदिति एतस्यच घटस्यवेद्यत्वाधिकरणत्वेपिस्व

नचैवंसत्यप्रसिद्धविशेषणतायाअदूषणतापत्ति रुक्तसामान्यतोदृष्टानुमानगोचरत्वा
सम्भवे शशविषाणोल्लिखिताभूरित्यादौतस्याः सावकाशत्वादथवा अयंघटः एतद्घटा
न्यत्वेसतिवेद्यत्वानधिकरणान्यः पदार्थत्वात्पटवदित्यादिमहाविद्याप्रयोगैरप्यवेद्यत्व

न्यत्वप्रत्यनधिकरणत्वात्तथाविधघटान्यत्वस्यच पटादावेवप्रसिद्धेर्नोप्रसिद्धविशेषणतासिद्धसाधनते
त्यर्थः घटमात्रंपक्षीकृत्यैतद्घटान्यत्वेसति वेद्यत्वानधिकरणान्यद्वृत्तुके घटान्तरमादायार्थान्तरता घटान्तर
साप्येतद्घटान्यत्वेसति वेद्यत्वानधिकरणादेतस्मादन्यत्वात्तद्व्यवच्छेदार्थमयमितिपदं एतस्यैव घटस्यएतद्घटा
न्यत्वे सति वेद्यत्वानधिकरणान्यत्वे साध्यमाने घटान्तरमादायार्थान्तरताया अनवकाशात् एतद्घटान्यत्वानधिक
रणान्यद्वृत्तुकेव्याहतिस्यादेतद्घटस्यैतद्घटान्यत्वायोगात् तदर्थंवेद्यत्वपदं अत्रचैतद्घटान्यत्वेसतिवेद्यत्वान

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१
वि·सु· धिकरणमयं घटस्तदन्यत्वमादाय पर्यादौ बाध्यप्रसिद्धिः पक्षे त्वेतद्घटस्यैतद्घटान्यत्वे सति वेद्यत्वानधिकरणा
टी·न· न्यत्वमेतद्घटान्यत्वानधिकरणान्यत्वेन वा वेद्यत्वानधिकरणान्यत्वेन वा साध्यासिद्धेर्व्याहतिः एतस्यैव घटस्यैतद्घटा
२६ न्यत्वायोगात् अत एतद्घटान्यत्वे सति वेद्यत्वानधिकरणमन्यत्किंचिदादाय तदन्यत्वसिद्धिरिति अवेद्यत्वसिद्धिः
आदिग्रहणेन वेद्यत्वं स्वस्वेतरवृत्तित्वानधिकरणान्यत्वाभावप्रतियोगिवृत्तिधर्माधिकरणं मेयत्वादित्यादि संगृहीतं
एतदपि सामान्येनानुमानेनेति संगृहीतमेव नाप्रसिद्धविशेष्यतापीति विशेष्यधर्मिनि दैवं पक्षदूषणान्यपाकृत्यदे

प्रसिद्धिरप्यूहनीया नाप्रसिद्धविशेष्यतापि अनुभूतेः प्रसिद्धत्वात् अत एव नाश्रयासिद्धि
रपि हेतोः नापि स्वरूपासिद्धिः कस्मिंश्चिद्व्यक्तिवेदनिष्ठस्य चंद्रत्वसामान्यस्यैवानुभूतित्वसामा
न्यस्याभ्युपगमसिद्धान्ताविरोधात् कस्मिन्नस्यापि प्रतिविवादिवत्साधकत्वसंभवात् नच प्र
तिवाद्यसिद्धिस्तेनाप्यनुभूतित्वसामान्यस्याभ्युपगमात्॥ तद्दूषणान्यपाकरोति अत एवेत्यादि य

त एवं विशेष्यरूपस्य धर्मिणः प्रसिद्धिस्तत एवेत्यर्थः ननु किमिदमनुभूतित्वं नाम न तावज्जातिः अनुभूतेरेकत्वां
गीकारेण व्यक्त्यभेदस्य जातिबाधकत्वात् यथाहव्यक्तेरभेदस्तुल्यत्वं संकरोथानवस्थितिः रूपहानिरसंबन्धो राम·
जातिबाधकसंग्रह इति अत एव नोपाधिरपि अनुगतोह्युपाधिर्भवति अद्वैतविरोधश्चोभयत्रापि तुल्य इत्या २६
सिद्धिरेव हेतोरित्यत आह नापीति यथा च कस्मिन्नस्यापि साधकत्वं तथा मिथ्यात्ववादे स्मुत्पादयिष्यते

१६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु प्रतिवादिना पारमार्थिकी ज्ञातिरङ्गीक्रियते भवता तु काल्पनिकीत्यन्यतरासिद्धिरित्यत आह नचकल्पितेति अवधीरितः कल्पिताकल्पितरूपो विशेषो येनानुभूतित्वमात्रेण तत्तथोक्तं उभयविधानङ्गीकारेस्त्वित्याह निर्बाधकमाह अन्यथेति न देनदेशेति धूमवत्त्वे किं महानसनिष्ठहेतुकत्वपर्वतनिष्ठमात्रेः सिद्धिः द्वितीये साधनविकलं निदर्शनमिति दूषणे नोद्धरितपदवीव्यतिरेकेण परित्राणमस्तीत्यर्थः अन्यथाः सिद्धिं परिहरति नचव्याप्यत्वासिद्धिरिति एषां हि हेत्वाभासानां स्थितिर्व्याप्यत्वे सति पक्षधर्मतया प्रमितत्वं सिद्धत्वं तद्विपरीतमसिद्ध

नचकल्पिताकल्पितत्ववैयर्थ्याद्धेतोरन्यतरासिद्धिराशंकनीयाऽवधीरितकल्पिताकल्पितविशेषस्यानुभूतित्वमात्रस्याभयवादिसिद्धत्वादन्यथाधूमवत्त्वात्तावपि तदेशत्वेन निष्ठत्वादिविकल्पेनासिद्ध्यादेर्दुःपरिहरत्वात् नचव्याप्यत्वासिद्धिः सोपाधिकस्यैवतया त्वात् ॥१८॥

नन्वत्र व्याप्तेरसिद्धौ व्याप्यत्वासिद्धिरित्यभिधीयते पक्षधर्मताः सिद्धिस्तु त्रिधा तत्राश्रयस्वरूपासिद्धा वाश्रयासिद्धिस्तद्विशेषणपक्षत्वाप्रतीत्यातुसिद्धसाधनमिति इमामपि त्रिविधां केचिदभिदधति साध्याकाराप्रसिद्ध्या साध्यस्वरूपासिद्धावेति प्रथमासिद्धसाधनताभिधानाद्वितीयात्वप्रसिद्धविशेषणमिति एतत्तु केवलपक्षदूषणनयैव तद्व्यवहारे प्रसिद्धदेहस्वरूपासिद्धौ तु स्वरूपासिद्धिरिति नत्र व्याप्यत्वासिद्धिर्नाम सोपाधिकः संबन्धः निरुपाधिकसंबन्धस्य व्याप्तित्वात्सोपाधिकत्वेच निरुपाधिसंबन्धवैधुर्यादिति तदेतत्सर्वमभिसंधायाह सोपाधिकस्यैवतयात्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१
वि॰सु॰ भवतु तर्ह्युपाधिरविकिमेतावताइत्यत आह केवलव्यतिरेकिणि चेति केवलव्यतिरेकिण्युपाध्यभावं वक्तुमुपाधि
टी॰न॰ लक्षणमनुवदति उपाधिर्हीति साधनाव्यापक उपाधिरित्युक्ते शब्दोऽनित्यः कृतकत्वादित्यत्र सामान्यवत्त्वे सत्यस्मदादि
१७ बाह्येन्द्रियग्रहणार्हत्वमुपाधिः स्यात् तदर्थं साध्यव्यापक इत्युक्तं न येत्युक्ते सामान्यवत्त्वादिनाऽनित्यत्वसाधने कृतकत्व
मुपाधिः स्यात् तदर्थं साधनाव्यापक इत्युक्तं एतेन पक्षेतरत्वमपि व्याख्यातं तस्यापि साध्यव्यापकत्वे उपाधित्वादितर
याऽनुपाधित्वादिति भवत्वेवं ततः किमायातमित्यत आह सचान्वयव्यतिरेकीति साध्यव्यापकत्वमन्वयः साधना

केवलव्यतिरेकिणि चोपाधेरसम्भवात् उपाधिर्हि साध्यव्यापकत्वे सति साधनाव्यापकः स
चान्वयव्यतिरेकी कश्चिद्धर्मः स कथं केवलव्यतिरेकिणि पक्षव्यतिरिक्तभूमौ साध्येनान्व
यी स्यात् न च पक्षे साध्येनान्वयस्तत्र साध्यस्याद्यापि संदिग्धत्वात् निश्चये च ॥ व्यापकत्वव्यतिरे

कः तदुभयवान्धर्मः कश्चिदुपाधिरित्यर्थः अस्त्वेतावतापि प्रस्तुते किमित्यत आह स कथमिति न त्ववक्तव्यं किं पक्ष ९५
व्यतिरिक्तस्थले साध्यव्यापकत्वं किं वा पक्ष एवाभिप्रेतमिति नाद्य इत्याह स कथमिति केवलव्यतिरेकिणि प्रवर्तमा
नः स उपाधिः पक्षव्यतिरिक्तभूमौ साध्येन कथमन्वीयात् न कथमपीति योजना केवलव्यतिरेकिणीति हेतुगर्भं वि राम॰
शेषणं न हि केवलव्यतिरेकिणि पक्षव्यतिरिक्तस्थले साध्यं सम्भवति अविद्यमानसपक्षत्वादित्यर्थः न द्वितीय १७
इत्याह न च पक्ष इति तत्र साध्यानिर्णयादित्याह तत्र साध्येति विपक्षे दूषणमाह निश्चये चेति साध्यापहारो ह्युपाधेः

CC-0. In Public Domain. Digitization by eGangotri

कृत्वं तत्र साध्यमेव चेन्निर्णीतं किं कुर्वन्नयमुपाधिः स्यादित्यर्थः दूषणान्तरमाह पक्षे चेति साधनवन्निष्ठात्यंताभा
ववत्त्वं ह्युपाधेः साधनाव्यापकत्वं तत्र पक्षेपि चेदुपाधिर्वर्तेत कथं तत्रैव तस्यात्यंताभावः स्यान्न चान्यत्र केवलव्यतिरेकि
साधनस्यान्वयाभावादिति भावः ननु न वयं साध्यसद्भावे उपाधिं ब्रूमः येन साध्यव्यापकता दुःसाध्या अपि तु साध्याभाव
इत्यत आह न च साध्यसद्भाव इति न च वाच्यमित्युक्तं तत्र हेतुमाह तथाहि यत्रोपाधिरिति तथाहि तथा सतीत्यर्थः उपा
धिना हि साध्याभावप्रमितिं वांछता साध्याभावं प्रति गमकत्वेन व्याप्यत्वेनोपाधिरेष्टव्य इत्युक्तं व्यापकत्वे दोषमाह अ

सिद्धं नः समीहितमिति किमुपाधिः करिष्यति पक्षे चोपाधिवृत्तौ साधनव्यापकता च दुर्वारा न च सा
ध्यसद्भावे माभूदुपाधिः साध्याभावे पुनरुपाधिः कश्चिद्भविष्यतीति वाच्यं तथाहि यत्रोपाधिरस्ति
तत्र साध्यं नास्तीति साध्याभावस्य गमकत्वेनोपाधिरेष्टव्यः अन्यथोपाधिसद्भावेपि साध्याभावो व्या
पकतया न वर्त्तेत चेदुपाधिसद्भावे साध्यं स्यात्तच्च न पक्षे तत्रोपाधिसद्भावे तस्य साधनव्यापकत्वप्रसं

न्यथेति अन्यथाव्यापकत्वेनांगीक्रियमाणे व्यापकतयोपाधेरिति संबंधः व्यापकस्य चोपाधेरधिकवृत्तित्वसंभवान् उ
पाधिसद्भावेपि साध्याभावो यदि न वर्तेत न संभवति ह्यवर्त्तनं न्यूनवृत्तेः साध्याभावस्य तत उपाधिसद्भावेपि साध्यसद्भाव
स्यात् साध्याभावाभावस्य साध्यरूपत्वात्तन्नान्तरीयकत्वादित्यर्थः अव्यापकतयेति वा पदच्छेदः साध्याभावस्याव्यापक
त्वाभावेनेत्यर्थः भवतूपाधिसद्भावेपि साध्यसद्भावः किमतस्तत्र वक्तव्यं किं पक्षे उत तद्व्यतिरिक्तस्थले आद्यमत्राह नप

इति तत्र हेतुमाह तत्रोपाधिसद्भाव इति यद
त्र वक्तव्यं तत्पुरस्तादेवोक्तं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१
वि.सु. द्वितीयं पक्षं दूषयति तस्मादिति भवत्वेवं ततः किमिति केवलव्यतिरेकिनाकोपममपहाय न किंचिदित्याह तथा चेति त
टी.त. नु मो भूदुक्तदोषत्राशिंक्ये यानुकर्षितया साध्याभावं प्रति व्यापकत्वमुपाधेर्व्याप्यत्वे कानामानुपपत्तिरिति तत्राह प्रकृते चे
१९ ति अनुमानेनेति हेतुनेत्यर्थः अत्र हि स्वप्रकाशत्वलक्षणसाध्याभावो वेद्यत्वं यत्र यत्र वस्तुत्वं तत्र च वेद्यत्वं गमकत्वेना
भिमतमिति तद्वेद्योपाधिमत्त्वस्य केवलान्वयित्वेनाभिमततया सर्वनिष्ठस्य साधनवत्यपि विद्यमानत्वात् साधना
व्यापकत्वं दुर्लभमित्यर्थः अत्र च प्रकृतग्रहणं केवलान्वयिग्रहणं चोपलक्षणं सर्वं केवलव्यतिरेकिणि पक्ष

तस्मादन्यत्रोपाधिमत्वे साध्यस्य समत्वं स्यादिति वाच्यं तथा च केवलव्यतिरेकित्वभंगप्रसंगः
प्रकृते चानुभूतिर्वेद्या वस्तुत्वाद्घटवदिति केवलान्वयिनानुमानेन हि स्वयंप्रकाशत्वव्यतिरे
कोऽवकृष्टः तत्र च नोपाधिः संभवति साधनाव्यापकत्वस्य वक्तुमशक्यत्वात् तदेवं नासि
द्धो हेतुर्नापि विरुद्धः वेद्येष्वविपक्षेष्वनुभूतित्वहेतोरवृत्तेर्नाप्यनैकान्तिकः विपक्षाद्व्यावृत्तेः ९८

निष्टतयाशंक्यमानस्य सर्वोपाधेः साधनाव्यापकत्वात् एतेन साध्याभाव ( वनाप्यसाधारणः सपक्षाभावात्
समव्याप्तः कश्चिदुपाधिरस्तीति पक्षोपि निरस्तः किं च यदा साध्याभावं प्रति व्याप्यमुपाधिरिष्यते तदा साध्याभाव- राम.
व्याप्तत्वादुपाधिव्यावृत्तिरप्येष्टव्या व्यापकाभावं नाभाववन्निष्ठात्यन्ताभावप्रतियोगितो व्याप्यत्वासंभवद्व्यतिरेक १९
योऽप्यव्यतिरेकव्याप्तेरप्येष्टव्यत्वात्

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तथा च साध्याभावव्यावृत्तावुपाधेरपि व्यावृत्तिः किंच पक्षे उतान्यत्र नाद्यः पक्षे साध्याभावाभावरूपसाध्यस्याप्य
निर्णयात् नाप्यन्यत्र केवलव्यतिरेकितापातादिति अत्र कश्चित्साध्याभावसाधनाभावसंबंधभंजकतया विपक्षे ए
वोपाधिर्निरध्यादिति तत्तु साध्यशब्दार्थानवबोधविजृंभितमिति न तदपराधः कश्चित् एवं हि साध्याभावाव्यापक
त्वमति साधनाभावव्यापक उपाधिरित्युक्तं स्यात् तथा च कथं साध्यव्यापकत्वं न हि साधनाभावः साध्यमविप्रति
पन्नत्वात् कुत्र च साध्याभावाव्यापकत्वमवसेयं न तावत्पक्षे तत्र साध्याभावानिर्णयात् नाप्यन्यत्र तथा सति
साधनाभावाव्यापकतापातात् अन्यस्य व्यतिरिक्तस्य सर्वस्य केवलव्यतिरेकिसाधनाभाववत्त्वात् वक्तुश्चात्र वक्त

विपक्षे बाधकतर्काभावात्संदिग्धानैकान्तिकतेति चेन्नैवमनुभूतेरनुभाव्यत्वेऽनवस्थापाता
न्न च वाच्यमवश्यवेद्यत्वाभावान्नानवस्था व्यवहारस्य तत्स्वरूपसत्तामात्रेणाप्युपपत्तेरिति

व्यमस्ति विस्तरभयात्तु नोच्यते ननु भवतु विपक्षवृत्त्यभावात्सपक्षेऽसति सपक्षाप्रवेशाभावाच्च विरुद्धानै।
कान्तिकतानध्यवसितानामभावः विपक्षे बाधकतर्काभावात्तु संदिग्धानैकान्तिकता किंवदन्त्याः कानुप्रतिक्रि
येतिशंकते विपक्षे बाधकेति नन्वनुभूतिरनुभाव्यैवेति यदि नियमः स्यात्स्यादनवस्था न त्वयं नियम इति म
तमाशंक्य निषेधति न च वाच्यमित्यादिना ननुपदिनानुभाव्यतानियमः अननुभूततया न हि कथमर्थे व्यवहार इति शं
कामेव परिहरति व्यवहारस्येति तत्स्वरूपसत्तामात्रेणाज्ञातेनेत्यर्थः

CC-0. In Public Domain. Digitization by eGangotri

चि·सु· न च वाच्यमित्युक्तं तत्र हेतुमाह तद्विषयेति स्यादेवं यदि तज्ज्ञानमन्तरेण तत्सत्तानिश्चीयेत तत्वेन दर्शितप्रमाणामा
टी·न· वेऽनुरवधारणसत्तावत्ता दिनरथाः सत्वमेव कथं नाध्यवसीयते यथोक्तं कोऽसूते सतीमाविनि रिति तस्मात्सत्वमपि त
१९ स्य प्रमाणादेवावगंतव्यमित्यर्थः॥ यदत्र नात्यव्यपविश्रुद्धातुरयनेनोक्तं तदाशंकते अथेति अयमर्थः नास्माभिः।
सत्तायां प्रमाणमेव नास्तीत्युच्यते अपितु जिज्ञासायां सत्यां तत्पुनः स्वोदयसमसमयमेवेति तस्याश्चानीतायाः
प्रत्यक्षाविषयत्वात् व्यवहारादिनालिंगेनेत्युक्तं आदिशब्देन च स्मरणं गृह्यते परिहरति तन्नेति अयंभावः भवे

न हि विषयप्रमाणानुदयेन तत्सत्ताया अप्यनिश्चयात् तत एव व्यवहारस्याप्यसिद्धेरथ यदाक
दाचित्तत्सत्ताजिज्ञासोदये व्यवहारादिनाकेनचिल्लिंगेन सापि प्रमीयत इति मतं तत्र घटइ
ति घटमनुभवामीति चानुभूतिद्व्यातिरिक्तायास्तदनुभूतिपरंपरावगाहिकायाः कस्या
श्चिदनुभूतेरनुभवागोचरत्वात् अन्तरेण तदनुभवं तत्सत्ताभ्युपगमे प्रमेयसत्ताया अपित
थाभ्युपगमोपपत्तौ प्रमाणगवेषणावैयर्थ्यापातात्॥

देवं यदि काचिदेवंविधाविज्ञि स्यात्ते
वत्वनुपलब्धिविरुद्धा न हि समस्तमंडले कस्यचिदर्वाग्दृशो व्यवसायानुव्यवसायातिरिक्तानंतद्विज्ञिपरंपराग्राहिका राम·
काचिदपि विज्ञिरनुभूयते तेनोपलब्धियोग्यत्वे सत्यनुपलब्धेरभाव एवावसीयते योगिप्रभृतीनां तु तद्दर्शितत्वेन तत्प्र १९
माणमस्तीति अयमाभूदनभवस्तया॥२॥ ६ ॥ पिततत्कल्पयामइत्यत आह अंतरेणेति तदनुभवं तादृशविज्ञप्त्यनुभ

93

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नवयमेवमेवकस्ययाम अपितु प्रमाणबलादिति चेत्तत्राह तत्रापीति तृतीयज्ञानइत्यर्थः ननु तादृशी संवित्स्व।
ज्ञापकप्रमाणमन्तरेणैव स्वरूपविशेषात्स्वविषयेव्यवहारं प्रवर्त्तयतु नह्येकस्य यादृशस्वभावस्तादृशोवसर्वस्येति
शंकानियमनंजगदेवविश्वभंगप्रसंगादितिशंकते अथसेति स्वभावभेदात्स्वभावविशेषादित्यर्थः स्वविषयभेद
व्यवहारमिति स्वविषयविशेषव्यवहारमित्यर्थः परिहरति सैवतर्हीति स्वव्यवहारमिति स्वविषयव्यवहारमि
तियावत् अतिमायायोन्यायः समप्रथमायामेवास्तु प्रथमस्य तथाभावे प्रद्वेषः किंनिबंधनइतिन्यायादित्य

तत्रापित्वप्रमाणगवेषणायांपूर्वोक्तानवस्थातदवस्थैवस्यात् अथसास्वविषयप्रमाण
मन्तरेणस्वभावभेदादेवस्वविषयभेदव्यवहारंजनयेत् जनयेत् सैवतर्हितथास्वव्यव
हारमिति यथानुभूतिपरंपरास्वपयाति स्तदेवमनुभूतेरनुभाव्यत्वेऽनुभूतिस्वरूपासि
द्धिप्रसंगस्यैवविपक्षेबाधकतर्कत्वात् नसंदिग्धानैकान्तिकता किंचानुभूतिरर्थप्रकाशन
॥ समयेयदि न प्रकाशेन तथासत्यनंतरक्षणे

र्थः तृतीयज्ञानमेववानन्त्वव्यावमृष्टं तदा
स्वविषयवत्स्वस्मिन्नपितथाव्यवहारंप्रवर्त्तयेत्तन्न्यायेनचात्मस्यस्वप्रकाशतासिद्धानीतिद्रष्टव्यं किंचानुभू
तित्वंभवतुस्वप्रकाशत्वंचमाभवत्विति वदन्प्रष्टव्यः किमर्थप्रकाशनसमयेऽनुभूतिर्नप्रकाशनएव प्रकाश।
मानावापरत इति नाद्य इत्याह किंचानुभूतिरिति अप्रकाशमानेपि सर्वत्र संदे

CC-0. In Public Domain. Digitization by eGangotri

१
वि·सु· हादिर्नास्ति जिज्ञासाभावादपि तदभावोपपत्तेर्न हि हिमगिरिदरीविहारिकेसरिसटासंख्यासु संदिहानेन
टी·न· ना असंदिहानानां वा विपर्यस्यतीति अविपर्यस्यतो वाऽभावप्रमित्येवं त्वप्रमिण्वतो वा न तत्त्वं विनिश्चिन्वतीत्यत
२० उक्तं जिज्ञासोरिति जिज्ञासायां सत्यामपि संदेहादिर्नोदेति अभावनिर्णयादपि तेषामभावोपपत्तेरत उक्तं विपरीत
प्रमावोदियादिति एतदुक्तं भवति यत्र विषये प्रमितिरपि नास्ति जिज्ञासा च च कास्ति तस्यास्फुरणदशायां संदेहा
दिर्भवेदेवेति न चैतदत्रास्तीत्याह न च कश्चिदिति निश्चयमेवाभिनयति इदमद्राक्षमिति इदानीं द्वितीयमनिर्वे

जिज्ञासोस्तत्र संदेहो विपर्य्ययो वा विपरीतप्रमा वोदियात् न कश्चिदसुमद्राक्षीन्नो वा भवा।
नितिपृष्टोऽनन्तरक्षणे संदिग्धे विपर्यस्यति संविदभावं वा प्रमिणोति किं तु निश्चिनोत्येव इदम
हमद्राक्षमिति तेन प्रकाशमानैवानुभूतिरर्थव्यवहारजननीत्युक्तं न च सुखादिवदस्या धी। १८
नप्रकाशत्वेऽपि संशयाद्यविषयत्वोपपत्तिः सति धर्मिणि तद्वदेवावश्यवेद्यत्वेऽनवस्थादोषस्या 20

धति न च सुखादिवदिति हेतुमाह सति धर्मिणीति धर्मो अनुभवः तद्वदेवेति सुखादिवदेवेत्यर्थः अथवा सति
धर्मिणीति द्वितीयज्ञाने सतीत्यर्थः तद्वदेवेति प्रथमज्ञानवदित्यर्थः तथा सत्यनवस्था प्रसरत्येवेति भावः न च सु राम·
खादिप्रतिवेदीतत्राप्यस्मन्मतेन तत्साधकसाक्षिणा स्वप्रकाशत्वेनानवस्थानवतारात् भवतामेव तत्रापि दोषस्या २०
त् तदेवमर्थप्रतीतिसमये संविदः स्फुरणमनवस्थाभयादन्यनिबंधनं न भवतीत्युक्तमिदानीं तात्कालिकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नद्विषयंज्ञानमेवनिरूपयितुंनशक्यतेकारणाभावादित्याह किंचयेनेति व्यवसायजनकसंयोगेनैवानुव्यवसायज
न्मेत्यादिपक्षोनिराचष्टे नाद्यइति तत्रकिंयुगपदेवज्ञानद्वयंजनयतिसमनःसंयोगःउतपर्यायेण नाद्यःजन्यजनकयोःस
मसमयमेवजन्माभावादित्याह अनुव्यवसायंप्रतीति नद्वितीयइत्याह करणस्येति प्रत्ययपर्यायः प्रत्ययपरंपरामन्य
यपर्यायेसामर्थ्याभावंविवृणोति यतइति अस्यैवभेदकत्वानंगीकारेदण्डमाह अन्यथेति यत्रसंस्कारसहितमिंद्रि
यंप्रत्यभिज्ञांजनयति तत्रघटविषययोरनुभवस्मरणयोस्तद्घटविषयानुभवांतरस्यचेतिज्ञानत्रयस्ययुगपदुत्पत्तिप्र

किंचयेनमनःसंयोगेनघटानुभूतिर्जनिताते नैवानुव्यवसायस्यापिजन्मउतसंयोगांतरेण नाद्यःअ
नुव्यवसायंप्रतिकर्मकारकतयाजनकस्यव्यवसायस्यतज्जन्यानुव्यवसायस्यचयोगपद्यायोगा
त् करणस्यप्रत्ययपर्यायेसामर्थ्यानंगीकाराच्च यतोसमवायिकारणभेदएवज्ञानभेदहेतुरभ्युप
यते अन्यथापेक्षणीयांतरासंभवेनयुगपदेवघटानुभवस्मरणयोरनुभवांतरस्यचतद्विषय
स्योत्पत्तिप्रसंगात् अक्रमाच्चकारणात्कार्यभेदक्रमायोगात् ॥ संगाततत्रहेतुः अपेक्षणीयांतरासंभवे
नेति संयोगभेदस्यानंगीकारात् विषयस्यचैकत्वादेवसंपन्नत्वात्संस्कारस्यसंप्रयोगस्यचविद्यमानत्वादितिभावः नदेवं
कार्यभेदोदृश्यमानस्तदुपपादकासमवायिकारणभेदंकल्पयतीत्युक्तमिदानींकार्यक्रमोपिक्रमवत्कारणमंतरेणानु
पपद्यमानोऽसमवायिकारणक्रमंकल्पयति ततश्चतस्यानेकत्वमित्याह अक्रमाच्चेति ननुभवतुकारणक्रमःसत्वस
मवायिकारणस्यनभवति अपितुवाह्यसामग्रीयाविषयेन्द्रियसंप्रयोगादिस्तदीयइत्याशंक्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१
वि.सु. न हि यत्र युगपदेव विषयेन्द्रियसंप्रयोगस्तत्र युगपदेवानेकानि ज्ञानानि जायेरन् ननु नदस्तितस्मात्तत्रापि कार्येक
टी.न. मप्रयोजको बाह्यसामग्र्यतिरिक्तस्यान्तरस्य कारणस्य क्रमो वक्तव्यस्तच्च चात्ममनसोरेकत्वेन क्रमायोगात्तद्विशेषात्त
२१ योः संयोगलक्षणासमवायिकारणक्रमस्य च प्रयोजकत्वमित्याह बाह्यसामग्रीति न चादृष्टमात्रभेदादतिप्रसंगात् न दे
वप्रथमज्ञानजनकसंयोगादेव द्वितीयज्ञानजन्मेत्ययपक्षो निरस्तो वेदितव्यः इदानीं संयोगान्तरादनुव्यवसायज

बाह्यसामग्र्यविच्छेदकक्रमभेदेन कार्यक्रमाभ्युपगमे युगपदेव संप्रयुक्तेषु घटपटादिषु यु
गपदेवानेकज्ञानजन्मप्रसंगान्न द्वितीयः घटज्ञानोदयसमये मनसि क्रियातो विभागस्त
तः पूर्वसंयोगविनाशस्ततउत्तरसंयोगोत्पत्तिस्ततो ज्ञानान्तरमित्यनेकक्षणविलम्बेनोत्पद्य
मानस्य ज्ञानस्यापरोक्षतया पूर्वज्ञानग्राहकत्वानुपपत्तेः किंच चक्षुरादिवत्प्रकाशमान
स्यैव ज्ञानस्य स्वातिरिक्तज्ञानजननेनार्थव्यवहारहेतुत्वाभावात् ॥ नेति द्वितीयपक्षं निरस्यति न २१

द्वितीय इति वर्त्तमानग्राहकमन्यस्याभावादित्यर्थः पूर्वसंवित्स्फुरणानुपपत्तिर्बाधिकेत्युक्तमिदानीं स्वस्फुरणानु
पपत्तिबाधकमाह किंचेति स्वविहितेषामभ्युपगमः ज्ञायमानमेव ज्ञानमर्थव्यवहारहेतुरिति नियमो नित्यो राम.
नस्यापि तस्य चक्षुरादिवद्व्यवहारहेतुत्वसंभवादिति नचैषोऽपि युक्तः तथा सति चक्षुरादिवदेवार्थप्रकाशक २१
त्वं स्यान्नतु प्रकाशत्वं प्रकाशत्वं च सिद्धमतो न चक्षुरादिसाम्यमित्यर्थः किंच तदपि ज्ञानं पूर्वज्ञानवदेवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तिन किंचिदपि ज्ञानमर्थप्रकाशं स्यात् जडानां च जडत्वादेव न स्वयं परस्परेण वा प्रकाशसंभव इत्यंधस्यैवांधल
ग्नस्य विनिपातः पदे पदे इत्याभाणिकभाणितयैव घोरांधकारनिकरकूपोदरनिपातापात इत्याह जडानां चेत्यादि
ना प्रत्यक्षविरुद्धकालातीततामाशंकते ननु इति घटविशेषितज्ञानावग्राहित्वाज्ज्ञानविशेषितघटावग्राहित्वोभय
थापि ज्ञानग्राह्यमेवेदमित्यर्थः अत्र तावदेवंविधशब्दप्रयोगस्य विषयस्फुरणेन भवितव्यं तत्तु यथा स्वयं ज्ञानस्य
स्वरूपस्फुरणेन घटस्य तु तेनैव स्फुरणेनेत्येवं स्फुरणे पि सम्भवत्येवायं व्यवहार इति नायं ज्ञानस्य वेद्यत्वापाद

जडानां च स्वतः परस्परं वा प्रकाशमानत्वायोगात् ज्ञानमपि न प्रकाशते चेत्किमपि न प्रका
शेतेति जगदांध्यप्रसंग इत्यादि विपक्षबाधकस्तर्क उन्नेयः ननु घटज्ञानवानहमस्मि ज्ञा
तो घट इति प्रत्यक्षेणैवानुभूतेर्वेद्यत्वप्रतीतेः कालात्ययापदिष्टतेति चेन्न वेद्यत्वव्यति
रेकेण तस्याः स्वतः स्फुरणेनापि तादृग्व्यवहारोपपत्तेः किंच विदितो घट इत्यत्रानुव्यव
सायेन घटस्यैव विदितत्वमवसीयते न तु वित्तेः विदितत्वस्य घटविशेषणत्वात्।

नक्षम इत्याह नवेद्यत्वव्यतिरेकेणेति विदितो घट इत्यत्राधिकमाह किंचेति अथवा व्यवहारस्यानुभूतिविष
यत्वमंगीकृत्यान्यथासिद्धिरभिहिता इदानीं तु नदेव नास्तीत्याह किंचेति एवं हि वेदनस्यापि विदितत्वं व्यवहारविष
यत्वं वा स्यात् यदि विदित इति पदं वेदनेन समन्वियान्न त्वेतद्घटेनैव तस्यान्वयादित्यर्थः किंच भवतु वानेन ज्ञानेन
स्फुरणं तथाप्येतज्ज्ञानवेद्यमनेनैव गृह्यते न्येन वा न तावदन्येन तस्य तदानीमप्रथमस्यातीततयानभिष्टवेद्यताया अ

१
वि॰सु॰ सत्यत्वान्न द्वितीय अपराद्धं नादित्याह अपि चानुभूतेरिति सौगतमतानुप्रवेशो ज्ञानस्यैव स्वग्राहकत्वेन क्रि
टी॰न॰ याकर्मभावस्वीकारः सत्यमिति पक्षान्तरं परिहरति नचेति येयं व्याप्तिग्राहिणी संवित्सा मम वस्तुतत्त्वं न वेद्यत्वं च गृह्णा
२२ ति सापि स्फुरति न वा यदि स्फुरति तदा स्वेनान्येन वा स्वेनेति नावश्यं घटत इत्याह स्वेनेति नैवं यं क्रियाकर्मभावं वृ

अपि चानुभूतेः सत्यत्वतायामपि तत्सत्यत्वेनैव तदनुभाव्यत्वस्यापत्यस्वीकरणात्तत्सत्यत्ववि
कल्पता अन्यथानुव्यवसायेन व्यवसायस्य स्वविषयोषितवेद्यत्वग्रहणे विशेषणतया स्वस्यापि वेद्यत्वेन
वेद्यत्वापातात् सौगतमतानुमतिप्रसंगः नच वेद्यत्वापादकवस्तुत्वाद्यनुमानविरोधः व्याप्ति
ग्रहणासिद्धेः तथा हि वस्तुत्वादेर्वेद्यत्वेन साधयता पक्षहेतुस्तत्तद्वेद्यमिति व्याप्तिरभ्युपेया।
तथा सत्यस्या व्याप्तेर्ग्राहिका संवित् व्याप्तिग्रहणसमये स्फुरति न वा आद्ये स्वेनैव स्फुरणे सौग
तमतानुमतस्वप्रकाशतापत्तिः तत्स्फुरणस्य स्वहेतुतायाः अनङ्गीकारे वेदान्तसिद्धान्ता
भिमतं स्वयंप्रकाशत्वं त्वयाभ्युपगतं स्यात् द्वितीये तु संविल्लक्षणवस्तुविशेषस्यास्फुर। 22
णादेव सर्वोपसंहारवती व्याप्तिर्वा त्वमिपत्तत्र कुतोऽनुमानप्रसरः कुत

मोयेन तथागतमतापातः स्यात् किं तु संविद्रूपत्वमित्यत आह तत्स्फुरणस्येति अन्येनेति त्वनवस्थया दूषि राम॰
तमायमित्युपेक्षितं अस्फुरणं दूषयति द्वितीये त्विति सर्वोपसंहारवतीं सर्व कोटिकासर्वव्यक्तिनिष्ठा २२
इति यावत् तदेवं साधारण्येन व्याप्त्यसि

CC-0. In Public Domain. Digitization by eGangotri

द्विमिथ्यायप्रतिदर्शनमपिदर्शयति अपिचेति भाट्टानांप्राकट्यंस्वप्रकाशमित्यर्थः यस्यतुनैयायिकस्यस्व
प्रकाशेनकिंचिदप्यस्तिनस्यपूर्वोक्तिहेतुमानेनवेद्यत्वरहितंकिंचित्साधयितव्यंतत्रहेतोरवृत्त्यनिश्चयात्संदिग्धा
नैकान्तिकताचवक्तव्यास्यादित्याह नैयायिकादेश्चेति ननुनतदेवविपक्षेबाधकंयद्वस्तुत्वहानिरित्यतआह नहीति
वस्तुत्वंहिस्फुरणाभावेनिवर्तेत अवेद्यस्यापिस्वतःस्फुरणोपपत्तेर्नान्तरेणवेद्यत्वमनुपपत्तिर्वस्तुत्वस्येत्य
र्थः एतेनैतदप्यपास्तंयदाह मानमनोहरकारः ज्ञानंप्रत्यक्षवेद्यंवस्तुत्वाद्घटवदिति यच्चतार्किकैकदेशस्य
स्तरांचप्रकृतस्यहेतोःसम्प्रतिसाधनता अपिचभाट्टानांज्ञाततायांव्यभिचारात् नैयायिका
देश्चवेद्यत्वस्यापिधर्मतयात्यन्ताभावप्रतियोगित्वादवेद्यस्यापिकस्यचित्संभवेनवस्तुत्वादेःके
वलान्वयित्वेननाभिमतस्यापिहेतोः संभावितविपक्षतयाविपक्षबाधकतर्कमन्तरेणाप्र
योजकत्वान्नह्यनुभूतेरप्यवेद्यत्वेवस्तुत्वानुपपत्तिःस्वतःसिद्धतायामपितदुपपत्तेर्लक्ष्यत्वस्या
यविषयत्वहेतोरपियथोक्तमूहनीयं नचलक्षकपदत्वेनलक्ष्याविषयज्ञानजन्यत्वमनुमेयं हे
तेवेद्यत्वसाधनायलक्ष्यत्वान्यायविषयत्वादितिच तत्रापि हेतोरसिद्धत्वान्नह्यनुभूतिपदमनुभूति
यलक्ष्यंपञ्चन्यायविषयंतद्वेद्यमितिव्याप्तिग्राहिणिज्ञानेलक्ष्येन्यायविषयेचस्फुरत्यस्फुरतिचपूर्वोक्तविकल्पदो
षाःसमानाइत्याह लक्ष्यत्वेति यत्तूक्तंलक्षकपदत्वादेवलक्षकपदपक्षीकृत्यलक्ष्यविषयज्ञानजन्यत्वमनुमीय
तइतितत्राह नचेति हेतुमाह नहीति अयमर्थः नहियस्यकस्यचिल्लक्षकमनुभूतिपदंपक्षस्तथासतिप्रमात्रादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



लक्षकानुभूतिपदस्य     लक्ष्यविषयज्ञानजन्यत्वेनासिद्धसाधनताप्रसंगात्तस्मादनुभूतिलक्षकमनुभूतिपदं
पक्षइतिवक्तव्यं तथा च तादृशानंगीकारांगीकारयोरासिद्ध्यपसिद्धान्तयोरन्यतरापात इति अथानुभाव्यवाचका
नुभूतिलक्षकपदं पक्षीकुर्यात्तं प्रति साध्यं विकल्पयति किंचेति लक्ष्यकर्मकस्फुरणजन्यत्वमतीतादिवस्तुलक्षकपद
स्य नास्ति अतीतादीनामिदानीमभावे नानुभवावच्छेदकत्वाभावात् अतो नैकांतिकमित्याह अतीताद्यर्थेति तद्विष

लक्षयतीति तत्त्वाभिमतं तद्वाचकत्वेनैवस्वीकारात् किंच लक्ष्यज्ञानशब्देन लक्ष्यकर्मकं स्फुर
णं किं वा तद्विषयस्तुत स्फुरणमात्रं किं वा तद्विषयान्तःकरणवृत्तिर्विवक्ष्यते नाद्य अतीताद्यर्थलक्ष
कपदेषु व्यभिचारात् नेतरे सिद्धसाधनत्वात् अस्ति हि तत्स्वभावस्यापि स्फुरणस्य तद्व्यवहा
रजनकत्वेन तद्विषयत्वं अस्ति च स्फुरणमात्रमनुभूतेः स्फुरणरूपत्वात्तदाकाराया वृत्तेः स्वी
काराच्च अनुभूतिपदवाच्यस्य लक्ष्यस्य स्वात्मप्रकाशत्वमित्यपि विकल्पोऽनुपपन्नः उभयवादि
संप्रतिपन्नस्फुरणमात्रस्य स्वप्रकाशत्वप्रतिपादनात् अन्यथा वे ॥ ६ ॥ ६ ॥ ७ ॥ २२

यस्फुरणजन्यत्वसाधने सिद्धसाधनतामुपपादयति अस्ति हीति येन हि यस्य व्यवहारः प्रवर्तते तस्य हि स विष
य भेदः स्वतंत्रइत्यभिप्रायः तत्स्फुरणमात्रेण जन्यत्वसाधने तृतीयपक्षे सिद्धसाधनतामाह अस्ति चेति लक्ष्यस्वभावभू राम॰
तस्फुरणस्यापि लक्ष्यस्फुरणत्वादित्यर्थः चतुर्थे पक्षे सिद्धसाधनतां दर्शयति तदाकाराया इति अन्यथेति अनुभूतिप २३
दवाच्यस्य चेत्सिद्धसाधनं लक्ष्यस्य चेत्तदासिद्धिरिति विकल्पदूषणे साधारणं शशग्रहणमेव शरणमित्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तानुमानस्य यद्यपि विशेषतो दूषणं न स्फुरति तथापि अस्याभासमानयोगक्षेमत्वं तथा च यदि तस्य दूषणं तदस्यापि समानमिति शंकते नन्वेवमिति अत्र किं रूपादिमान् घटः पक्षीक्रियते उतालौकिकः कश्चित्तादृशः धर्मिग्राहकप्रमाणबाधादित्याह मैवमिति चक्षुःस्पर्शनप्रमाणसिद्धत्वे हेतुः स्पर्शरूपादिमत्त्वमिति द्वितीयं दूषयति अनदिति नचात्रापीति रूपादिहीनस्य यथा घटत्वमप्रसिद्धमेवमित्यर्थः हेतुमाह तथासतीति विप्रतिपत्तिरेव वेद्यावेद्यसाधारणत्वसाधनेपि तत्रास्य विकल्पस्य दुःपरिहरत्वात् नन्वेवमपि घटः स्वयंप्रकाशो घटत्वाद्यन्नैवं तन्नैवं यथा पट इत्याभाससमानयोगक्षेमता हेतोरिति चेन्नैवं पृथुबुध्नोदराकारस्य घटशब्दवाच्यस्य स्पर्शरूपादिमतश्चक्षुःस्पर्शनप्रमाणसिद्धत्वेन संमतस्य स्वप्रकाशत्वसाधने प्रत्यक्षाविरोधात् तद्विषयस्य चाप्रसिद्धत्वेन धर्म्यसिद्धिर्न चात्राप्यवेद्यस्यानुवृत्तित्वमप्रसिद्धमिति वाच्यं तथासति तस्या वेद्यत्वावेद्यत्वयोर्वादिनां विप्रतिपत्त्यभावप्रसंगात् नचैवमुभयतः पाशारज्जुरनुभूतेः प्रमाणजन्यस्फुरणाश्रयतया स्फुरणकर्मतया वा घटादिवद्धि ऽऽरणानुभूतिप्रसिद्धौ प्रमाणमित्यर्थः यच्च प्रमाणसद्भावे वेद्यत्वादस्वप्रकाशत्वमभावे च प्रमाणाभावादसिद्धिरित्युभयतः पाशारज्जुरित्युक्तं तदपि नास्तीत्याह नचैवमिति स्फुरणाश्रयतयेति भाट्टाभिप्रायेणोक्तं स्फुरणकर्मतयेति तदाभिप्रायेण एतदुक्तं भवति न प्रमाणप्रवृत्तिमात्रादनुभवकर्मत्वं येनास्वप्रकाशता स्याद्यपि तु तदाकारान्तःकरणवृत्तिरेव प्रमाणैर्जन्यते न च वृत्तिविषयतामात्रादस्वप्रकाशता स्यात्प्रकाश्यप्रकाश्यत्वाभावात्त्वरूपप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१
चि॰सु॰ काशाभिव्यंजकमात्रत्वादुक्तेः तेनतवेद्यत्वप्रसक्तिर्नोऽप्यप्रामाणिकमिति ननु वृत्तिव्याप्यत्वमात्रात् प्रामा-
टी॰न॰ णिकत्वमपि तु स्फुरणव्याप्यतया घटादौ तथादर्शनादित्यत आह उक्तेति कुतः केवलव्यतिरेकाभावात् नहि सम-
२४ वह्निव्यतिरेकयोरन्वयमात्राद्धेतुहेतुमद्भावनिश्चयोऽतिप्रसंगात् माभूत् रागरक्तवर्णयोर्हेतुहेतुमद्भावः सम्भवति हि
न्वय इतिभावः किंच तौ तावति केस्तावदेवं वक्तुमशक्या प्राकट्यानाधारयोरप्यतीतानागतयोः ज्ञानमात्रविषा-
यतया प्रामाणिकत्वांगीकारादित्याह अतीतेति तार्किकाणां वृत्तिफलविभागएव नास्तीति न पर्यनुयोगावकाशः

घटभावाभावेपि प्रमाणजनितांतःकरणवृत्तिव्याप्यत्वेन विषयतांगीकारेपि स्वप्रकाशत्वा-
व्याघातात् उक्तवृत्तिव्याप्यत्वेपि स्फुरणव्याप्यत्वाभावापराधेनाप्रामाणिकतापि केवल-
व्यतिरेकाभावादतीतानागतयोः स्फुरणविरहिणोरुक्तवृत्तिव्याप्ययोर्भाट्टैः प्रामाणिकत्वा-
भ्युपगमात् चेष्टादिलिंगकानुमानविषयस्यापि परज्ञानस्य स्वाश्रये स्वविषयापरोक्षव्यव-
हारजननेऽज्ञानान्तरनिरपेक्षतया स्वप्रकाशत्वोपपत्तेश्च २४

एतदेवं वृत्तिविषयत्वमात्रेणापि प्रामाणिकत्वमस्तीत्युपपादितं इदानीं वृत्तिविषयत्वेपि स्वप्रकाशत्वम-
स्तीत्युपपादयति चेष्टादीति स्वाश्रये स्वाधारे नहि प्रमाणावेद्यत्वं स्वप्रकाशत्वं किंतु स्वविषयापरोक्षव्य- राम॰
वहारजनने प्रकाशान्तरनिरपेक्षत्वं तच्च स्वप्रकाशत्वसाधकप्रमाणगम्यत्वेपि न विरुध्यते प्रमाणान्तरनिर- २४
पेक्षतयैव स्वाश्रये स्वविषयापरोक्षव्यवहारजनकत्वादित्यर्थः ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

एवं व्यतिरेक्यनुमानेन स्वप्रकाशत्वं समर्थितं येतुवक्रनयवर्त्मानुसारिणस्तान्प्रत्यभिनवरीतिसुरभिमन्वय
व्यतिरेकिप्रयोगमाह किंचत्वज्ज्ञानमितित्वज्ज्ञानंवेद्यंनभवतीत्युक्तेऽप्रसिद्धविशेषणतातन्निवृत्त्यर्थमपरोक्ष
व्यवहारयोग्यत्वेसतीत्युक्तंवेद्यत्वाभावस्याप्रसिद्धत्वेप्यपरोक्षव्यवहारयोग्यत्वेसति वेद्यत्वरहितस्यपरमाण्वदृ
ष्टादेः प्रसिद्धत्वेननाप्रसिद्धविशेषणता तावत्युक्तेऽर्थान्तरतातदीयज्ञानस्यपरंप्रत्युक्तरूपत्वात्तदर्थंत्वेत्युक्तमे
वमपिपरकीयज्ञानमादायार्थान्तरतानस्यैतंप्रतितथात्वादतउक्तंत्वज्ज्ञानमिति एतदीयस्यचज्ञानस्यैतंप्रत्यप
रोक्षव्यवहारयोग्यत्वेसतिवेद्यत्वानधिकरणत्वमपरोक्षव्यवहारयोग्यत्वानधिकरणत्वाद्वावेद्यत्वानधि

किंचत्वज्ज्ञानंनत्वापरोक्षव्यवहारयोग्यत्वेसतिवेद्यंनभवतिज्ञानत्वान्मदीयज्ञानवत् न
चमदसमवेतत्वंमदन्यसमवेतत्वंवोपाधिः साध्याव्याप्तेस्त्वदीयधर्मादिषुत्वत्समवेते
ष्वसमवेतेषुचपरमाणुषूक्तसाध्यसद्भावेप्युपाधेः॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

करणत्वाद्वानाद्यःव्याघातात् उत्तरंतु सिद्धादपरोक्षव्यवहारयोग्यत्वेसत्यवेद्यत्वलक्षणंस्वप्रकाशत्वमाद
यसिद्ध्यतीति स्वप्रकाशत्वसिद्धिरन्यज्ञानेचैतदपरोक्षव्यवहारयोग्यत्वानधिकरणत्वात् तद्गर्भवेद्यत्वाना
धिकरणत्वमितिसाध्यप्रसिद्धिः अन्यदीयज्ञानस्योक्तसाध्यवत्त्वेमदसमवेतत्वमदन्यसमवेतत्वंवोपा
धिरित्याशंकानिरस्यति नत्वेति कुतःसाध्याव्यापकत्वात् तदेवविवृणोति त्वदीयेति त्वददृष्टसंस्कारयोस्त्व
दपरोक्षव्यवहारयोग्यत्वेसति वेद्यत्वरहितयोस्त्वदसमवेतत्वत्वदन्यसमवेतत्वयोरुपाध्योरभावेनसाध्याव्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१
वि.सु. पकत्वादित्यर्थः उक्तस्योपाधेः साध्याव्याप्त्युदाहरणान्तरमाह अस्समवेतेत्विति प्रत्यक्षाकाशादीना
टी.न. मसमवेतत्वेनान्यसमवेतत्वस्य सुतरामभावादित्यर्थः उपाध्यन्तरमाशंक्य निराकरोति नचेति प्रतिवा
२५ दिज्ञानस्य तदपरोक्षव्यवहारयोग्यत्वे सति वेद्यत्वानधिकरणत्वेन तदपरोक्षव्यवहारायोग्यत्वमुपाधी——
——तथा च वादिज्ञानेऽव्यमुपाधिर्व्यावर्तमानः साध्यमपहरतीत्युपाधिवादिनोऽभिमतं तद्दूष
यितुं हेतुमाह ममापरोक्षव्यवहारयोग्यत्वादित्यादिनोपाधित्वादित्यन्तेन —— उपाधिं वदतो
पाधिव्यतिरेकेण साध्यव्यतिरेकोऽनुमानत्वः सर्वोपाधीनामेवस्वाभाव्यात् उक्तं चैतत्साध्योपाध्योर्व्याप्यव्या

रभावान्न च ममापरोक्षव्यवहारायोग्यत्वमुपाधिः ममापरोक्षव्यवहारयोग्यत्वादित्यंम
मापरोक्षव्यवहारयोग्यत्वे सत्यवेद्यत्वं न भवति घटवदिति व्यतिरेकज्ञानेन तत्त्वस्यैवोपा

पकभावार्थं तदभावयोरपि व्याप्यव्यापकभावनियमात् ततउपाध्यभावसाध्याभावयो (( धित्वात् ॥ ९ ॥
रपि निरुपाधिसम्बन्धो यत्र वस्तुतस्तदभावयोरप्युपाधिर्निर्विशमानो दूषयेदेव प्रयत्नोपाधिमित्यभिसंधाय २५
तद्व्यतिरेकयोरप्युपाधिरूपत्वस्तत्र ममापरोक्षव्यवहारयोग्यत्वादित्युपाधिव्यतिरेकनिर्देशः शेषः साध्य
व्यतिरेकनिर्देशः अनयोः सम्बन्धज्ञानेन तत्त्वमुपाधित्वमित्यर्थः नह्येवं व्यतिरेकानुत्थापकत्वात्साध्याव्यापकत्वा राम.
त्वानुपाधित्वे सिद्धे पूर्वोक्तहेतुरप्रयोजक इत्यभिप्रायः ननु यथाज्ञानत्वव्यतिरेकस्य ज्ञानेन तत्त्वस्योपाधित्वं ब्रूषे २५
एवं ममापरोक्षव्यवहारयोग्यत्वादित्यस्य हेतोर्व्यतिरेक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्यसमापरोक्षव्यवहारायोग्यत्वस्योपाधित्वं परेणापि स्तुवच मिति निषेधमेसुतापिनं चक्रकापत्तिश्च ज्ञानेनरत्वव्यति
रेकस्य ज्ञानत्वस्य प्रतिवादिसाध्यव्यतिरेकरूपत्वदीयसाध्यव्यापकत्वसिद्धे ज्ञानेतरत्वस्योपाधित्वे नस्योपाधि
त्वे व्यतिरेकानुन्नायकत्वात्समापरोक्षव्यवहारायोग्यत्वस्यानुपाधित्वं नस्यानुपाधित्वे च ज्ञानत्वस्य प्रथमसाध्य
प्रतिहेतुत्वमिति तस्मात्त्वेयं रीतिश्चतुरस्रेणाचीनिसरणिमधिरोहतीति आकर्ण्यतां तावदत्र हिन हृदयंग्रथकारस्य
दयं समापरोक्षव्यवहारयोग्यत्वस्य प्रथमसाध्यव्यतिरेकोन्नायकत्वं तावदसंगतं वेद्यत्वहानेन साधनीयं न च न
दप्रसिद्धेयेन समापरोक्षेति विशेषणानर्थक्यं स्यात्तस्मान्महेश्वरमिह मद्व्यवहारयोग्यत्वादिस्येवास्तमिति

विवादपदानि ज्ञानानि घटज्ञानान्यत्वे सति वेद्यत्वान्नधिकरणानि ज्ञानत्वाद्घटज्ञानवत्

व्यर्थविशेषणत्वाद्धेतुरेवायमतएव नतद्व्यतिरेकस्योपाधित्वेनि ननु सततदेवोच्यतां किमनेनाजागलस्तनायमानेन
सत्यमित्यमपि काचन रीतिस्ताकिंकैः स्वरीकृतेनेति प्रदर्शनार्थं तथाहि मानसमनोहरकारणवादिवागीश्वरेणान्यप्रकर
णे विवादाध्यासितेषोधाधारजन्यकार्यत्वात् वेदादिवदित्यनुमाने व्यर्थविशेषणे नापि शरीरिजन्यत्वव्यतिरेकेण
——— विवादाध्यासितं वीधाधारजन्यं न भवति शरीर्यजन्यत्वादिति सत्प्रतिपक्षिते स्वनत्थाविवादाध्या
सितमूर्त्तमप्रयत्नजं परमाणुव्यतिरिक्तत्वे सति मूर्त्तत्वाद्धः प्रयत्नजः गंधवत्वात्पटवन्मूर्त्तं धरत्वेति ईश्वरानुमाने च नश
रीरिणाऽजन्यत्वादित्यनेन प्रकरणसमत्वं नापि तज्जन्यत्वमुपाधिः कार्यत्वस्योपाधेर्व्यतिरेकस्य व्यर्थविशेषणत्वाद्वे

ति चेन्न तस्मान्नकश्चिदपि कलङ्कपङ्काङ्ककाशङ्का
शैवरीत्यानुमानान्तरमाह विवादपदानीति ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१
वि·सु·
टी·न·
२६

ज्ञानमात्रपक्षीकरणे घटज्ञानांशे सिद्धसाधनतातदर्थं विवादपदमितिग्रहणं वेद्यत्वानधिकरणमित्युक्तेः
अप्रसिद्धविशेषणतातन्निवृत्त्यर्थं घटज्ञानान्यत्वे सतीति विशेषणं वेद्यत्वानधिकरणत्वस्याप्रसिद्धत्वेपि घटज्ञा
नान्यत्वे सति वेद्यत्वानधिकरणत्वं घटज्ञानेऽप्रसिद्धं घटज्ञानस्य घटज्ञानान्यत्वानधिकरणत्वादेवान्यत्वं चात्र त
त्वानधिकरणत्वं घटज्ञानान्यत्वानधिकरणानीत्युक्ते व्याहतिस्तेषां घटज्ञानान्यत्वादेव तदर्थं वेद्यत्वग्रहणं घ
टज्ञानान्यत्वे सति वेद्यत्वानधिकरणत्वं घटज्ञानान्यत्वानधिकरणत्वात्संभवति व्याघातात् तस्माद्वेद्यत्वानधि
करणत्वसिद्धिः पूर्वानुमानं समग्रलक्षणवतः सज्ञावेइदंत्ववेद्यत्वमात्रइतिविशेषः घटज्ञानस्योक्तसाध्यवत्वे

नन्वघटज्ञानत्वमुपाधिः शारीरिजन्यत्वोपाधाविव व्यर्थविशेषणत्वात्

घटज्ञानत्वमुपाधिमाशंक्य निषेधति नन्वेति यथाहि विवादपदं सकर्तृकं कार्यत्वात्कुंभवदित्यत्र शरीरिजन्य
त्वं व्यर्थविशेषणत्वादनुपाधिर्जन्यत्वमात्रेण साध्यव्याप्तिसिद्धेरितरस्य पक्षमात्रव्यावर्तकत्वात् एवं ज्ञान २९
त्वमित्यनेनैव ज्ञानव्यतिरिक्तव्यावृत्तौ सिद्धायां घटपदस्य पक्षीकृतघटज्ञानव्यतिरिक्तज्ञानव्यवच्छेदकत्वा
त्पक्षेतरतयाऽयमनुपाधिरित्याह शारीरीति अर्वाचीनपदमाचार्यैरकार्यत्वयोगाद्वगाः महाविद्याः पुनर्दिव्या। राम
दीव्यन्यत्रानिवारितम् तथाहि विमतं ज्ञानमेतज्ज्ञानविज्ञानविषयत्वे सति वेद्यत्वरहितज्ञानविषयः पदविष २६
यत्वात् घटवदित्यादिमहाविद्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिरपिसमर्थनीयंस्वप्रकाशत्वंफलाविषयत्वादिसाधनान्तव्याहतिः स्वप्रकाशसमर्थनमुपसंहर
ति तस्मादिति विज्ञानस्वप्रकाशत्वमात्मस्वप्रकाशत्वेप्यतिदिशति एतेनेति यद्यपिविज्ञानस्वप्र
काशतयैवतद्रूपस्यात्मनः स्वप्रकाशतासिद्धातथापि तद्रूपतायामेवविवादात्तत्समर्थनार्थमधिक
युक्तिप्रदर्शनार्थंचवादानवारम्भः हेतून्प्रमाणानि संगृह्णाति श्लोकेन चिद्रूपत्वादित्यादिना प्र

तस्माद्विगलितसकलकलंकमनुभूतेःस्वप्रकाशत्वात्तु मानमितिसिद्धम् एतेना
त्मनोपिस्वप्रकाशत्वं व्याख्यातं तथाहि चिद्रूपत्वादकर्मत्वात्स्वयंज्योतिरितिश्रु
तेरात्मनः स्वप्रकाशत्वंकोनिवारयितुक्षमः ९ आत्मासंविद्रूपः संवित्कर्मतामं
न्तरेणापरोक्षत्वात्सम्वेदनवदितिप्राभाकरंप्रत्यनुमानात् घटतज्ज्ञानयोः सम्ब
न्धः आत्मनिष्ठः ज्ञाननिष्ठत्वात्सदविषयत्ववदितिनैयायिकादीन्प्रत्यनुमानादात्मन

स्यमंसमर्थयते आत्मासंविद्रूपइति अपरोक्षव्यवहारविषयत्वंचापरोक्षत्वं नापरोक्षज्ञानविषय
त्वमपरोक्षज्ञानत्वंवा तेनन साधनवैकल्यासिद्धी घटादेरतीतादेश्चव्यवच्छेदायविशेषणद्वयंघ
टतज्ज्ञानेति यद्यपिज्ञानज्ञेययोर्विषयविषयि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रि॰सू॰ भावो नाम न भावरूपः कश्चित्सम्बन्धस्तथाप्यभावरूपत्वादस्त्येवास्मिन्नर्थे सिद्धान्ते त्वाध्यासिकः स
टी॰न॰ म्बन्धोऽत्र संबन्धस्य संबन्धिमात्रनिष्ठत्वात्संबन्धिभूतज्ञानघटयोरन्यतरस्यात्मत्वमारोपयान्नभिष्टत्वप
२२ र्यवस्यति तत्रापि घटस्यात्मत्वमुभयवाद्यनभिमतमिति विप्रतिपन्नज्ञानस्यात्मतामापादयति पदस्वा
विषयत्वं पदविषयत्वं ज्ञानरूपत्वाभावे बाधकमाह विपक्षे चेति संशयाद्यविषयत्वं स्वप्रकाशत्वा

स्विद्रूपत्वसिद्धिर्विपक्षे चात्मनः संशयविपर्यासगोचरत्वापत्तिर्बोधिका न ह्यात्मन्य
हमनहं वेति कश्चित्संदिग्धे नैवाहमिति वा विपर्यस्यति न चैतत्स्वप्रकाशज्ञानरू
पतामन्तरेणावकल्प्यते न चान्तरेणापि ज्ञानरूपतां दुःखादिवदेतदुपपद्यत इति
शंकनीयं तेषां स्वसत्तायां ज्ञानाव्यभिचारात्तदनुपपत्तेर्न चात्मन्येवमभ्युपगम्यते सु
षुप्त्यभावप्रसंगात् न च ज्ञानात्मनोः सम्बन्धोऽनात्मवृत्तिर्ज्ञानवृत्तित्वात् ४८

त्मानं न भवति दुःखादावदर्शनादित्याशंकां निषेधति न चान्तरेणेति सुषुप्त्यभावप्रसंगादिति एतन्नि राम॰
रुद्धज्ञाने नैतत्स्वप्रकाशाव्यभिचारेऽस्य न सुषुप्तिः स्यात् एतन्निष्ठकार्यज्ञानोपरमसैन्न सुषुप्ति २२
त्वादित्यर्थः सम्प्रति पक्षतामाशंक्य निषेधति न चेति अत्रापि संबन्धस्या ॥ ७७ ॥ ७७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नात्मवृत्तित्वमन्यतरस्यानात्मतामादाय पर्यवस्यति तत्राप्यात्मनो नात्मताव्याहतेति ज्ञानानात्मत्व
सिद्धिर्नतु मानमनोहरकारेणसच ज्ञानाश्रयः नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेइति श्रुतोद्रष्टृदृश्ययोः
संवन्धप्रतीतेरिति ज्ञानात्मनोः संवन्धः तत्कथमाश्रयासिद्धिरितिशंकते नहिद्रष्टुरिति नेयंश्रुतिःसंव

सत्तावदितिशंकनीयं ज्ञानमेवात्मेत्यभ्युपगच्छतां ज्ञानात्मनोः संवंधस्यैवाभावादाश्रया
सिद्धेर्नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यते इतिद्रष्टृदृश्ययोः संवंधःश्रुतितएवाधिगतइतिमान
मनोहरकारः मातिष्ठिपदिति चेन्नैवं श्रुतेर्लोकप्रसिद्धसंवन्धानुवादेन दृष्टेर्विनाशित्वाभा
वमात्रप्रतिपादपर त्वात् अप्राप्तेहिशास्त्रमर्थवदितिन्यायात् मुख्यार्थेः द्वैतश्रुतिविरोधा
त् राहोः शिरइतिवदुपचारेणापिसंवंध ॥

॥ धप्रतिपादिका अन्ययप्रभरत्वादिति परिहरति नैवमिति
तत्परत्वाभावेचकारणमाह अप्राप्तइति अप्राप्तेहिशास्त्रमर्थवत् अर्थेनुपलब्धेतत्प्रमाणमिति तत्रजैमिनि
नोक्तत्वादित्यर्थः एवमनुवादकतयापरिहारमुक्त्वा प्रकारान्तरेणपरिहरति मुख्यार्थइति एतेनदेवताधिकरण
न्यायोप्यनवकाशीकृतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१
वि.सु. नन्वद्वैतश्रुतिविरोधादन्यथाभावोस्याः किमिति कल्प्यते विपरीतमेव वा किं न स्यात् श्रुत्योस्तुल्यबलत्वा
टी.न. त्तुल्यं हि सामर्थ्यापिकमिति न्यायादित्याशंकां तत्परत्वातत्परत्वविशेषान्नेत्याह नचेति तत्परत्वमेव तस्याः
२८ कथमवगम्यत इत्यत आह उपक्रमेति आत्मनो ऽयमत्रत्वस्येति चाद्वैतेनोपक्रमोपसं
रौ इदं सर्वं सलिल एक इति चाभ्यासः जीवब्रह्मैक्यं च प्रमाणांतरागोचरं एतावदर इति फलश्रवणं अ

धश्रुतेर्द्वैतस्युपपत्तेश्च नचानयोस्तुल्यबलतया विपर्ययस्तत्परत्वातत्परत्ववि
शेषोपपत्तेरुपक्रमोपसंहारादिषड्विधतात्पर्यलिंगोपेताद्वैतश्रुतिः कथं लोक
प्रवादपाठोपजीविनीं संवन्धश्रुतिर्न वाधेत ॥ ॥ ॥ ॥ ॥

समहत एतेभ्य इति सूक्ष्मादिरर्थवादः इंद्रभ्यादिदेवतानैरुपपादितं नदेनदादिशब्देन गृहीतं लोकप्रवा
द इत्यनेनानुवादकतया संबंधश्रुतेरतत्परत्वमुक्तं कथं न वाधेत वाधेतैवेत्यर्थः एवं च परत्रेतनैव गताजि
तं नचानाम्नायप्रतीत आम्नातो भवितुमर्हतीत्यादि तत्राप्युपचारप्रवृत्तेः सुलभत्वादित्ययं तत्सर्वप्रम
तमपलपितायितं यत्तु नच प्रत्यक्षं तत्सभेदग्राहकत्वादित्युक्तं

२८

CC-0. In Public Domain. Digitization by eGangotri

तद्यपि भेदनिर्भासेन समयेन सम्युपरिष्टाद्वस्य साक्षाद्वयिष्यामस्तदेवं वैयधिकरण्यं षष्ठ्योरंगीकृत्य
पर्यहार्षीत्संप्रति वैयधिकरण्यमेव नास्ति सामानाधिकरण्येनाप्युपपत्तेरिति सनिदर्शनमाह देवदत्त
स्येति नतु न दृष्टेर्द्रष्टारं पश्येरित्यत्र यथा वैयधिकरण्यमेव मत्रापि किं न स्यादित्यत आह नदृष्टेरिति ॥

देवदत्तस्य गंतुर्भिन्नेव दृष्टुर्दृष्टेरिति दृष्टरूपाया दृष्टेर्दृष्टिलक्षणो वा यो द्रष्टा तस्य विपरिलो
पो नास्तीति सामानाधिकरण्ये न षष्ठ्योः सम्बन्धसंभवे वैयधिकरण्यस्य कल्पना योगा
न् नदृष्टेर्द्रष्टारं पश्येरित्यादाविव वैयधिकरण्ये प्यन्तःकरणपरिणामरूपायाः दृष्टेर्यो
द्रष्टेति वा परिणामिनोन्तःकरणस्य द्रष्टुः साक्षिभूताया दृष्टिस्तस्या विपरिलोपो नास्तीति
वा अद्वैतश्रुत्यनुगुणे संभवति सम्बन्धे गुणगुणिभावेन संबन्धकल्पना अविदितमी
मांसावृत्तान्तस्यैव परं शोभते ॥ ॥ अंतःकरणवृत्तिसाक्षिणो वांतःकरणसाक्षिणो वा भिन्नौ सं
बंधितया निर्दिश्येते नतु ज्ञानात्मानाविनर्थः अद्वैतश्रुत्यनुगुणे संबन्धे संभवतीत्यस्यायमर्थः अ
द्वैतश्रुत्यविरुद्धानेकप्रकारे परिस्फुरत्यपि यत्तस्याविरुद्ध एव प्रकारः पश्यस्फुरन्तत्र न दृष्टो भाग्यमेव
परं कारणमित्यभिप्रायः इयं स्थिति

CC-0. In Public Domain. Digitization by eGangotri

१
त्रि·सु· देवतावत्त्वतत्त्वस्येतार्थवतीदूरेतरांतरङ्गभिमतसम्बन्धेप्रामाण्यमित्याह किंचेति नापीश्वरस्येति यद्यपीदं
टी·न· मैत्रेयी ब्राह्मणं जीवानुवादेन तस्यब्रह्मात्मना प्रतिपादनपरं ननु जीवपरं जीवब्रह्मभेदपरं वेति वाक्या
२९ न्वयादिन्यत्रप्रतिपादितं तथापि शोधितस्य ब्रह्मना प्रतिपादनमिति शोधनसमये जीवस्याप्येवंस्व
भावतावक्तव्येत्यभिप्रेत्य प्रियादिसंसूचितस्याविनाशितोपपादनादित्युक्तं तेनात्रेश्वरज्ञानस्यकारणत

किंचजीवेश्वरयोर्भेदमभ्युपगच्छतानित्यदृष्टिसंबन्धः कस्योच्यतइति विवेचनीयं
नतावज्जीवस्यतस्यानित्यज्ञानाभ्युपगमात् नापीश्वरस्य मैत्रेयी ब्राह्मणे नवाअरेपत्युः
कामायपतिः प्रियोभवतीत्यादिनापतिजायादिप्रियसंसूचितं जीवमुपक्रम्यतस्यैव
चैतेभ्योभूतेभ्यः समुत्थायतान्येवानुविनश्यति ॥

हितनास्मिमांस्कत्तिं प्रमाणयन् वादिवागीश्वरोप्युपहसितः एतेभ्य इत्यादिश्रुतेरयमर्थः यान्येतानिका
र्यकारणविषयाकारपरिणतानि नामरूपात्मकानि पंचभूतानि एतेभ्यो भूतेभ्यो हेतोः पंचमी समुत्थायस राम·
म्यगुत्थाय प्रादुर्भूत्वा यथोदकेभ्यो हेतुभ्यः स्वच्छात्मनि प्रतिबिंबचन्द्रमणाप्रप्यभावः तद्वत्तान्येवानुविनश्यतितो २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्यस्याविद्यायाः समूलं विनश्यंत्यतु विनश्यति उपाधिप्रलयात्तत्प्रयुक्तावच्छेदोऽपि निवर्त्तत इत्यर्थः न प्रेत्येति श रीरद्वयपरित्यज्य संज्ञाविशेषविज्ञानं नास्ति तदापादकानामुपाधीनामभावादित्यर्थः अवस्थान्तरेति मोक्षा वस्था प्रतिपादनावसर इत्यर्थः विनाशमिति संज्ञा नास्तीति ज्ञाननाशाभिधानादित्यर्थः प्रतिवचनमिदं अरे मैत्रेयि अयमात्मा अविनाशीति विनाशशब्देन विक्रियाविवक्ष्यते सास्य नास्तीत्यर्थः तयानुच्छित्तिधर्मा उ च्छित्तिः स्वरूपनाशः स धर्मोऽस्य नास्तीत्यनुच्छित्तिधर्मा कस्तर्हि संज्ञा नास्तीत्यस्यार्थ इत्यत आह मात्रेति मा

नप्रेत्य संज्ञास्तीत्यवस्थान्तरप्रतिपादनावसरे विनाशमाशंक्याविनाशी वा अरेऽयमात्मा ऽनुच्छित्तिधर्मा मात्राऽसंसर्गस्त्वस्य भवति यद्वै तन्न पश्यति पश्यन्वै तद्द्रष्टव्यं न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वादिति अविनाशित्वोपपादनात् ज्योतिर्ब्राह्म णे च जागराद्यवस्थोपन्यासपुरःसरम् ॥ मात्राभिर्विषयेन्द्रियाद्याकारपरिणतैर्भूतैरसंसर्गः पर मस्य भवति न स्वरूपविनाशः यद्वै तन्न पश्यतीति वै इत्यवधारणे यत्तत्र पश्यत्येवेति मन्यस इत्यर्थः पश्य न्वै तन्न पश्यति तत्र हेतुर्नहीति हि यस्माद्द्रष्टुरात्मनो दृष्टेः स्वरूपभूताया इति वा पूर्वोक्तप्रकारेण वा विपरि लोपो विघातो न विद्यत इत्यन्वयः तत्रापि हेतुः अविनाशित्वादिति स्वरूपविनाशाभावादथवा अविनाशित्वम पक्षयरहितत्वमित्येवं विशेषविज्ञानाभावेऽपि स्वरूपविज्ञानस्य नित्यत्वप्रतिपादनादित्यर्थः जागरादीति सवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१
वि·सु· यत्रेति यत्र यस्मिन्ननंनते सुप्तो जीवः न कंचन कामं जाग्रत्स्वप्नयोर्ये कामास्तेषु न कमपि कामं कामयते तथा न
टी·न· कंचन स्वप्नं स्वप्नशब्देन तद्विषयाणि ज्ञानान्यभिधीयन्ते जाग्रद्दर्शनमपि मिथ्याविषयत्वात्स्वप्नशब्देन निर्दि
३० श्यते न कंचनेत्यत्र चनशब्दोऽप्यर्थः कमपि स्वप्नं न पश्यतीत्यर्थः संप्रसादावस्थानमिति संप्रसादः सुषुप्त्यव
स्था सम्यक्प्रसीदत्यस्यां जीवस्वरूपमिति व्युत्पत्त्या तस्यामवस्थानं संप्रसादावस्थानं तद्वता यो नस्त्रेति वाक्य

अथ यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यतीति संप्रसादावस्थानमभवनाय्ये यद्वै तन्न प
श्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इति विशेषविज्ञानाभावेपि स्वरूपविज्ञा
नस्य नित्यत्वप्रतिपादनात् ईश्वरपक्षे च विशेषविज्ञानाभावस्यावश्यमनुक्तत्वात्तस्य सर्वदा सर्वज्ञ
त्वात् सुषुप्त्याद्यवस्थाभावाच्च न तस्माज्ज्ञानात्मनोः सम्बन्धोऽनात्मनिष्ठत्वानुमानमाश्रया २०
सिद्धमिति सिद्धं यत्तु गुणत्वादनित्यत्वाज्ज्ञानमात्मा न भवति रूपादिवदित्यनुमानेन तत्सर्वम
॥ न्यतरासिद्धतयापास्तम्

शेषः भवत्वेवं ततः किमित्यत आह ईश्वरपक्ष इति अनुपपन्नं चेदं चा
ह सुषुप्त्यादीति ननु ज्ञानमात्मा न भवति गुणत्वाद्रूपवत्तथा ज्ञानमात्मा न भवत्यनित्यत्वादित्यादिप्रयोगावि ताम·
रोधात्कथमात्मनो ज्ञानात्मकत्वमित्यत आह यत्त्विति यस्य हि नित्यात्मस्वरूपताभिमता विज्ञानस्यानेन स कथं ३०
गुणत्वमनित्यत्वं वाभिमतमित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणत्वसाधकानुमानं शंकते अथेति अत्रापि संवंधिमात्रनिष्ठस्य संवंधस्य गुणनिष्ठत्वमन्यतरसंवंधिनिर्गु
णत्वमंतरेण न घटते घटस्य च गुणत्वमुभयानभिमतमिति ज्ञानस्य गुणत्वसिद्धिर्यदि च ज्ञानस्य गुणत्वं न
स्यात्तदा जानामीति ज्ञानाश्रयं विषयीकुर्वतः प्रत्ययस्य निर्विषयतापत्तेः स्वरूपत्वेन तस्य साधारणतायोगादिति
वाधकमाह विपक्षे चेति इदं च प्रतिप्रयोगेण निरूप्ये मैवं रूपेति अत्रापि रूपस्य द्रव्यत्वमुभयवादिविप्रति

अथ घटतज्ज्ञानयोः संवंधः गुणनिष्ठः ज्ञाननिष्ठत्वात्सत्तावद्विपक्षे च जानामीति प्रत्यय
स्य निरालंवनत्वप्रसंगो वाधक इति चेन्मैवं रूपतज्ज्ञानयोः संवंधो द्रव्यनिष्ठो ज्ञाननिष्ठ
त्वात्सत्तावदिति प्रतिप्रयोगसंभवात् जानामीति चानुभवस्यांतःकरणवृत्त्याश्रयप्रमातृ
विषयतयाप्युपपत्तेर्विज्ञानमानंदं ब्रह्म प्रज्ञानं ब्रह्म ज्ञानघन एवेत्यादिश्रुतिभ्यश्चात्म
नश्चिद्रूपत्वसिद्धेर्न चाधिकरणपरतया ज्ञानशब्दो योज्यः अद्वैतश्रुतिविरोधात्तस्मात्सा
धूक्तं चिद्रूपत्वादिति ।

षिद्धमिति ज्ञानस्य द्रव्यसिद्धिर्यत्तु वाधकमुक्तं तदंतःकरणवृत्तिमादाय प्रत्या
ख्यातीत्याह जानामीति तदेवमनुमानाच्चिद्रूपत्वमुक्त्वा तदनुग्राह्यमागममप्याह विज्ञानमिति यत्तु मानसम
नोहरकृतोक्तं ज्ञानशब्दस्य ज्ञायते अस्मिन्नित्यधिकरणवचन इति तद्दूषयति नचेति करणाधिकरण
योश्चेत्यधिकरणेपि ल्युट विधानादित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१
चि·सु· द्वितीयं हेतुं विवृणोति अकर्मत्वाच्चेति नन्वकर्मत्वमेव कथं यावता मानसप्रत्यक्षोयमिष्यत इत्यत आह
टी·न· वेद्यत्व इति स्वाश्रयं यज्ज्ञानं तद्विषयतयेत्यर्थः स्यादेतदुपाधिवशात्किमित्यनेकाकारता न स्यात् दृश्यते
३१ ह्येकस्यापि देवदत्तस्यानेकाकारता पिता भ्राता मातुलः श्याल इत्यादिः संभवति चात्रापि सुख्यादिविशि
ष्टाकारेणाहं सुखीति ज्ञेयत्वं केवलस्य तु ज्ञातृत्वमित्युपाधिभेदस्तत्राह नच सुख्यादीति पित्रादीनां स्वरूपे

अकर्मत्वाच्चात्मनः स्वप्रकाशत्वं वेद्यत्वे स्वाश्रयज्ञानविषयतया कर्मकर्तृभावविरो
धप्रसंगात् नच सुख्यादिविशिष्टस्याहं सुखीत्यादिज्ञानकर्मत्वं केवलस्य च कर्तृत्वमि
त्याकारभेदाद्विरोधो गमनादिक्रियास्वपि केवलस्य कर्तृत्वं गमनविशिष्टाकारेण।
च कर्मत्वमित्याकारभेदेनाविरोधात्कर्मकर्तृभावविरोधस्य सर्वत्रोच्छेदप्रसंगात्।
तथापि नात्मनः स्वप्रकाशत्वं तत्तदर्थसंवेदनाश्रयतयापि स्फुरणोपपत्तेः ३१

णैकत्वेपि प्रतियोगिनानात्वात्संभवति तदपेक्षयानेककल्पना विषयत्वमिह तूपाधिविशिष्टस्यैव तं
प्रति कर्तृत्वं कर्मत्वं चेति विप्रतिषिद्धं नियमेनानुपलब्धेर्गमनादावप्येवं विधोपाधिभेदेनाविरोधप्रसं राम·
गादित्यर्थः अत्र प्राभाकरः शंकते तथापीति यद्यप्यकर्मत्वं तथापि तत्तदर्थविषयाणि यानि संवेदना ३१
नि तदाश्रयतया स्फुरणरूपतामन्तरेणापि स्फुरणोप १०७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पत्तेरिति योजना पूर्वविरूपतानन्यानिसाधिना अत्रत्वकर्मत्वस्यान्यथोपपत्तिः परिह्रियत इति नजामिता न
नु कर्मत्वेनैवास्य किमिति नात्मिज्ञानक्रियाफलभाक्त्वा क्रियाफलभाजकस्य कर्मत्वादिति नैयायिकमतमाशंक्य
कामस्यैव निषेधति नचास्येति नक्रियाफलभाक्त्वमात्रं कर्मत्वं न यावंगच्छति चैत्र इत्यत्र चैत्रस्यापि कर्मत्वप्रसं
गात् तस्मात्पर समवेतक्रियाफलशालित्वं कर्मत्वं तच्चास्य नास्ति स्वसमवेतत्वात् ज्ञानक्रियाया इति भावः

नचास्य क्रियाफलभाजोपि कर्मत्वं परसमवेतक्रियाफलशालित्वाभावान्न चैतन्मान
सप्रत्यक्षेपि समानं ज्ञाततेः सदा सकर्मकतया कर्मणा व्याप्तस्य तन्निवृत्तौ निवृत्तेरिति
चेन्नैवं संविद्व्यतिरिक्तस्य संवित्कर्मत्वे नैवापरोक्षत्वनियमादात्मनः कर्मत्वाभावेन तद
नुपपत्तेः ॥

ननु तर्हि संविदाश्रयतयेति किमित्ययमाग्रहः मानसप्रत्यक्षत्वेपि परसमवेतक्रि
याफलविकलतया कर्मताऽभावेन कर्मकर्तृविरोधाभावादित्यत आह नचैतदिति तथा सति ज्ञानतामे
व जह्यात् आत्मनः कर्मत्वाभावादन्यस्य च कर्मणोऽनंगीकारादित्यर्थः नचैतन्निरस्यति नैवमिति यदि सं
विद्व्यतिरिक्तः स्यात्तर्हि कर्मतयैवापरोक्षव्यवहारविषयः स्याद्विषयेषु तथा व्याप्तेः तेन कर्मत्वं व्यावर्त्तमा
नं संविद्व्यतिरिक्तत्वं व्यावर्त्तयतीत्याह संविदिति ॥ ७७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१
वि·सु· संविदाश्रयतयाऽपरोक्षत्वे चानुमानविरोधमाह संवेदितेति बाधनिवृत्त्यै प्रथमविशेषणं परप्रसिद्धा
टी·न· पिप्रतियोगिप्रसिद्धिः एवं च सति संविदधीनप्रकाशत्वविकल्पेन यदत्र कैश्चिद्दूषणमुक्तं तदप्यनव
३२ काशीकृतं यत्तु नैरंबोक्तविपक्षबाधकतर्काभावादिति तत्र विपक्षबाधकतर्कमाह स्वसत्तायामिति प्रका
शान्तराधीनव्यवहारवत्त्वेति त्यज्ञानवत्त्वानंगीकारात्स्वसत्तायाप्रकाशव्यभिचारवत्त्व इति योजना तेन च।

संवेदितासंविदाश्रयतयाऽपरोक्षो न भवति अपरोक्षत्वात्संवेदनवदिति न च विपक्षे बा
धकतर्काभावः स्वसत्तायाप्रकाशव्यभिचारवतः प्रकाशान्तराधीनव्यवहारवत्त्वे कदाचि
त्संशयादिगोचरत्वप्रसंगस्यैव बाधकत्वादात्मनो घटादिज्ञाने भासमानत्वांगीकाराच्च घ
टादिवदेव चाक्षुषत्वमपि प्रसज्येत तज्जनितज्ञाने भासमानताया एव तत्त्वात् ॥ सुखादिव्याप्

व्यापकेश्च सर्वगतात्मवादिनां तस्याविभावादिति भावः॥

निः यत्तु नैरेवादृष्टत्वोपाधिर्हनत्वाच्चेत्युक्तं तदसत्पक्षेतरत्वात् पर्वतेतरत्वादिवद्व्यतिरेकानिर्णयेन साध्या
व्यापकत्वात् तर्कान्तरविरोधमाह आत्मन इति आत्मनो घटादिवदेव चाक्षुषत्वमपि प्रसज्येत घटादिज्ञाने राम·
षु भासमानतांगीकारादिति योजना ननु चक्षुःसंयुक्तस्य कथं चाक्षुषत्वमित्यत आह तज्जनितज्ञान इति। ३२
अन्यथा चक्षुःसंयुक्ततया परमाण्वादेरपि चाक्षुषत्वप्रसंगात्सोयं देवदत्त इति प्रत्यभिज्ञाने तत्तायाश्च चाक्षुष

३२

भवतुनहिचाक्षुषत्वमपिनचनीरूपस्यचाक्षुषत्वाभावः रूपादौव्यभिचाराद्द्रव्यत्वविशेषणेपिवियदादौभाट्टा
नांव्यभिचारादित्यतआह नीरूपस्यचेति किमयसमयवलादिति नप्रमाणवलादित्याह आत्माचाक्षुषज्ञा
नहति रूपतत्सामान्यादिषुव्यभिचारनिवारणायद्रव्यग्रहणं घटादिव्यभिचारविघटनायारूपिग्रहणं
नचभाट्टानांसाध्यविकलता दृष्टांतस्य तत्प्रत्यक्षत्वेप्रमाणाभावात्प्रत्युताकाशमचाक्षुषमरूपिद्रव्य

नीरूपस्यचद्रव्यस्यचाक्षुषत्वायोगात् आत्माचाक्षुषज्ञानेनप्रकाशतेअरूपिद्रव्य।
त्वादाकाशवदिति प्रतिप्रयोगसंभवाच्च अत्रायंपुरुषःस्वयंज्योतिरिति श्रुतेश्चात्मास्वप्रका
शः ननुस्वप्नावस्थामधिकृत्येदमाम्नायतेतत्रमनसोनुपरमात्कथंस्वयंज्योतिष्ट्वंनचमन
सोगजाद्याकारपरिणतस्यावभासकर्मत्वेनयेवावस्थानात्करणांतराभावाच्चात्मैवस्वयंज्यो
((तिःस्यादितिशंकनीयम्

त्वात्सर्वदाःस्पर्शवद्द्रव्यत्वात्मनोवत्सर्वगतत्वादात्मवदित्यादिप्रयोगसं ))
भवाच्च नचांतरत्वमुपाधिर्गुरुत्वादौसाध्याव्याप्तेस्तृतीयंहेतुंविवृणोति अत्रायमिति शंकतेनन्विति अयमर्थः न
तावत्स्वप्नावस्थायामात्मप्रकाशत्वंश्रुत्यादर्शयितुं शक्यमिंद्रियस्यमनसोविद्यमानतया व्यतिरेकनिर्णयाभावा
दन्यथाजागरेपितद्भुत्पादनसंभवेनस्वप्नावस्थाश्रयणवैफल्यादिति सिद्धांतिमतमाशंक्यदूषयति नचमनस

इत्यादिनाशंकनीयमित्यंतेन

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तत्र हेतुमाह मनस इति यदि हि मनसोऽस्पश्यनुयावस्थानं स्यात्तस्मात्तर्हि करणत्वं नत्वेतदस्ति मनस इंद्रिय
त्वे ना योगिनः प्रत्यनींद्रियत्वात् शरीरसंयुक्तमनींद्रियं साक्षात्प्रतीतिसाधनमितींद्रियलक्षणात्मनोनींद्रियमिंद्रियत्वाच्च
क्षुर्वदिति प्रयोगसंभवाच्चेत्यर्थः कत्तर्हि सूत्रेऽर्थइत्यत आह तस्मादिति ज्योतिर्लक्षणप्रकाशाधिकरणत्वा
त्ज्योतिरित्यभिधीयते ज्योतिःसाधनतया वा ज्योतिःशब्दःवागादिवदित्यर्थः उपपत्तिविरुद्धश्चायमर्थइत्या

मनसश्चक्षुरादिवदिंद्रियत्वेन प्रत्यक्षत्वानुपपत्तेस्तस्मान्मनःसंयोगजन्यज्ञानाधारत्वे
न स्वयंशब्दवाच्य आत्मा ज्योतिरित्यभिधीयते ज्योतिःसाधनत्वाद्वा दैवायं ज्योतिषा अग्निने
वायं ज्योतिषेत्येतस्य करणपठितत्वाग्न्यादिवन्नत्वात्मा स्वयंज्योतिरिति द्रव्यस्य गुण
त्वानुपपत्तिरिति चेन्मैवं यतः संबंधस्याश्रयत्वेन विज्ञानासमवायिनः इंद्रियत्वाविघा
तान्न मनःप्रत्यक्षमात्मवत् ५॥ह द्रव्यस्येति ज्ञानस्य गुणत्वादात्मनो द्रव्यत्वाच्चेत्यर्थः तदेतदप्यप

करोति मैवमिति हेतुमवतारयति यत इति श्लोकेनानुमानमाह संबंधस्येति मनःप्रत्यक्षं विज्ञानासमवा
यिनो विज्ञानं प्रत्यक्षसमवायिकारणस्य संबंधस्याश्रयत्वेन हेतुनात्मवदित्यनुमाने संगृहीतं यत्तु प्रत्यक्षत्वेइ
न्द्रियत्वव्याघात इति तत्राह इन्द्रियत्वाविघाताच्चेति नवेन्द्रियजन्यायोगिसाक्षात्काराविषयो मन इंद्रियत्वा 33
च्चक्षुर्वदिति प्रयोगः नैयायिकादेरप्रसिद्धविशेषणत्वादुक्तहेतुव्यतिरेकस्योपाधित्वाच्च

संगृहीतमनुमानं विवृणोति मन इत्यादिना ज्ञानासमवायिकारणमात्ममनःसंयोगः ज्ञानाधारत्वादित्यु
क्ते असिद्धिस्तस्याऽसमवायिकारणाधारत्वादित्युक्ते परमाण्वादिषु व्यभिचारस्ततो विशेषणद्वयमिदं इंद्रिय
त्वाविघातार्थं चेति विवृणोति न चेति ननु कथं ज्ञानस्वरूपस्यात्मनो ज्योतिःशब्दवाच्यता यावता भूतविशे

मनः प्रत्यक्षज्ञानासमवायिकारणाधारत्वात् आत्मवदित्यनुमानान्मनसोपि प्रत्य
क्षत्वोपपत्तेर्न च प्रत्यक्षत्वे सति इन्द्रियत्वव्याकोपस्तस्य साक्षिवेद्यस्यापैंद्रियकज्ञाना
विषयत्वेनेन्द्रियत्वाव्याकोपात्तस्मान्निरस्तसमस्तकलंकावकाशमात्मनः स्वप्रकाश
त्वेन चात्मस्वरूपमविद्यापरिकल्पितप्रपंचावभासकत्वादविद्यातमोनिवर्तकत्वाच्च ज्यो
तिःशब्दाभिधेयं यथा भावरूपशार्वरादितमोनिवर्तनेन जगदवभासकमादित्यादि
ज्योतिरिति सिद्धं ननु तमो न भावरूपं ॥

ष एवायं ज्योतिःशब्दो युक्त इत्यत आह न चेति तमो
निवर्तनेनावभासके हि ज्योतिःशब्दः प्रयुज्यते तदिहापि समानमित्यर्थः भावाभावातिगाऽविद्या न चेद्दृष्टान्ति
तेन तमः कृष्टैस्तदस्य भावत्वं वादेनानेन साध्यते भावरूपतमोनिवर्तनेनेत्युक्तं न तदिदमसृष्यमाणा वैशेषिका
दयः प्रत्यवतिष्ठन्ते ननु तमो न भावरूपमिति

१
वि·सु· हेतुमाह भावे त्विति षट्पदार्थान्यतमत्वं हि भावत्वं तद्भिन्नदन्यतमत्वं व्याववर्त्तमानं भावत्वमपि व्यावर्तय
टी·न· तीत्यर्थः तत्र किं द्रव्यान्तर्भूतमुत गुणपंचकान्तर्भूतं वा द्रव्यान्तर्भावे पृथिव्यादिनवान्यतमद्रव्ये द्वै तिविकल्प्य नवा
३४ न्तर्भावं निषेधति नाद्यः क्षितौति तत्र रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगु
रुत्वद्रवत्वसंस्काराश्चतुर्दश क्षितिगुणाः गंधरहिताः स्नेहसहितास्त एव चतुर्दश सलिलगुणाः संख्यापरि
माणपृथक्त्वसंयोगविभागबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाख्यसंस्काराश्चतुर्दशात्मगुणा आ

भावेष्वनंतर्भावात् न हि पृथिव्यादिद्रव्याणामन्यतमत्तदन्यद्वा स्यात्ताद्यः क्षितिसलिला
त्मस्वचतुर्दशगुणेषु तेजसि एकादशगुणे मातरिश्वनि नवगुणे मनसि चाष्टगुणे नभ
सि षड्गुणे दिक्कालयोः पंचगुणयोरविनाशिनोरनन्तभावात् अन्तर्भावे वा तावद्गुणव
त्वप्रसंगादात्मादावन्तर्भावे नित्यत्वापत्तेश्च ॥ त्याचाद्यापरः रूपस्पर्शसंख्यापरिमाणपृथक्त्वसं

योगविभागपरत्वापरत्वद्रवत्वसंस्कारा इत्येकादश गुणास्तेजसः रूपद्रवत्वहीनास्त एव नव गुणा वायोः स्प ३८
र्शरहितास्त एवाष्टमनसो गुणा एतेन स्वरोऽपि गृहीतः शब्दसंख्यापरिमाणपृथक्त्वसंयोगविभागाः षड् गगन
गुणाः शब्दवर्जितास्त एव पंच दिक्कालयोः तेनैषु नान्तर्भावादित्यर्थः ननु किमित्यनन्तर्भाव इत्यत आह अन्तर्भावे राम·
वेति यस्मिन्नस्यान्तर्भावोऽभिमतस्तस्य यावन्तो गुणास्तावद्गुणत्वप्रसंगादित्यर्थः नित्यद्रव्यान्तर्भावेऽधिकं दूष ३४
णमाह आत्मादाविति नयाचालोकानिवत्यत्वमिति शेषः

CC-0. In Public Domain. Digitization by eGangotri

नन्वबहिष्ट्वं दूषयति नापि द्वितीय इति नन्वेवं वक्तव्यं किं गुणवद् उत निर्गुणमिति निर्गुणपक्षं दूषयति निर्गु
णस्येति गुणवत्त्वस्य द्रव्यलक्षणत्वेन तद्रहितस्य द्रव्यत्वव्याघातादित्यर्थः प्रथमं शङ्कते नीलेति रूपपरि
माणगुणवत्त्वोपलम्भादित्यर्थः परिहरति नेति पृथिव्यां हि नीलरूपं गन्धादिभिर्व्याप्तमतस्तन्निवृत्तौ तमसि।
नीलरूपमपि निवर्त्तेतेत्यर्थः भावायोगादिति पदच्छेदः भङ्ग्यन्तरेणापि द्रव्यान्तरत्वं दूषयति अपि चेति तत्किं

नापि द्वितीयो निर्गुणस्य द्रव्यत्वानुपपत्तेर्द्रव्यान्तरत्वस्य सुतरामनुपपत्तेः नीलोत्प
लदलश्यामं महत्त्वोपलभ्यमानं तमः कथं निर्गुणमिति चेन्न नीलरूपस्य गन्धाद्येका
र्थसमवायिनस्तद्व्याप्तस्य तदभावे भावायोगात् अपि च द्रव्यान्तरत्वेन तावन्निरवयवत्वं
नित्यत्वेनालोकानिवर्त्यत्वापपत्तेः सावयवत्वे च तदारम्भकाणां स्पर्शवत्त्वेन स्मिन्नपि
स्पर्शोपलम्भप्रसङ्गात् स्पर्शवत्त्वे च तेषां मनोवद्द्रव्यारम्भकत्वायोगात् ॥ निरवयवमुतावयवा

रब्धं नाद्य इत्याह नतावदिति निरवयवद्रव्यस्यात्मवन्नित्यत्वादित्यर्थः द्वितीयेऽपि किं स्पर्शवदारब्धं तद् दं
रहितारब्धं वा प्रथमे माह तदारम्भकाणामिति समवायिकारणगतविशेषगुणस्य कार्ये सजातीयगुणा हि
रम्भकत्वनियमादिति भावः द्वितीयं दूषयति अस्पर्शवत्त्वे चेति यत्स्पर्शरहितं न तद्द्रव्यारम्भकं यथा मनः

१
त्रि·सु· उत्तरंपंचकांतर्भावंक्रमेणदूषयति नापीति गुणपक्षेपिकिंरूपांतर्भूतमितरांतरभूतंवाआद्येपिकिंपृथि
टी·न· व्यादित्रयवृत्तीतरवृत्तिर्वा ओद्यंनिराचष्टे रूपांतर्भावइति इतरवृत्तितामपिक्रमेणदूषयति नापीतिन
३५ भस्वात्वायुर्विशेषगुणरहितत्वादिति दिक्कालमनसांविशेषगुणशून्यत्वमितिसिद्धांतादित्यर्थः चक्षुर्मा

नापिगुणःरूपांतर्भावेपृथिव्यादित्रितयगुण[illegible]त्वेचतत्सहचारिणांगुणांतराणामप्यु
पलब्धिप्रसंगात् नापिनभोनभस्वतोर्गुणास्तयोररूपत्वात् नापिदिक्कालमनसामेते
षांविशेषगुणरहितत्वात् नाप्यात्मनस्तस्यवाह्येंद्रियप्रत्यक्षगुणानधिकरणत्वात् ना
पिकर्मसंयोगविभागयोरकारणत्वात् नापिसामान्यविशेषसमवायाःतेषांव्यक्त्या
श्रयसंवंधिनामुपलब्धिमंतरेणानुपलंभनियमात् नहिसामान्यस्येवव्यक्तिर्विशेषा
णामिवचाश्रयःसमवायस्येवसंवंधीनमसःकश्चिदुपलभ्यते ॥

त्रग्राह्यस्येतरगुणांतर्भा ३२
वस्यसम्भवनिरस्तः कर्मांतर्भावंनिराकरोति नापीति संयोगविभागयोरसमवायिकारणत्वस्यक राम·
र्मलक्षणत्वात्तमसश्चतदभावादित्यर्थः सामान्यादित्रयधर्माणामभावंतमसिदर्शयति नहीति ३५
सामान्यत्वेव्यक्तिव्यंग्यत्वविशेषत्वेचाश्रयप्रतीत्यपेक्षासमवायत्वेचसंवंधिप्रतीत्यपेक्षास्यादित्यर्थः

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं भावत्वेनिःस्वभावापत्तिमुक्त्वा प्रतीत्यनुपपत्तिमाह नचेति प्रत्यक्षं तावदनुभूयते तत्र किं चाक्षुषमुत मा
नसं स्पार्शनादिकं वानुपलम्भपराहतं नाद्य इत्याह नचेति अस्मत्पक्षे निमीलितलोचनस्यापि संततमसालोचनं
संभवति आलोकाभावस्यान्तरस्य चक्षुषाग्रहणसम्भवादालोकानपेक्षत्वाज्ज्ञावपक्षे त्वालोकापेक्षाभावस्य मा
णत्वात् पदार्थान्तरस्याप्यान्तरस्य ग्रहणप्रसंगाच्चेति भावः रूपगुणत्वे रूपवद्द्रव्यत्वे चानुपपत्त्यंतरमाह अपि

नत्वास्य तमस उपलंभसंभवः तदुपलंभकाभावात् नच लोचनमुपलंभकं तदव्या
पारे तदनुपलंभापातात् अस्ति च निमीलितनयनस्यापि तमः पश्यामीत्यभिमानः
अपिच रूपत्वे रूपवत्त्वे वालोकाजन्यचक्षुर्जन्यसाक्षात्कारविषयत्वं तस्यादालोक।
सहकृतस्यैव चक्षुषस्तत्र सामर्थ्यात् नापि मनस्तदुपलंभकं वाह्येन्द्रियनिरपेक्षस्य तस्य
बहिरप्रवृत्तेः

चेति आलोकेनाजन्यश्चक्षुर्जन्यश्च यः साक्षात्कारस्तद्विषयत्वं तस्मादस्ति च तदित्यर्थः
रूपघटादिव्यभिचारापाद्यविशेषणं ईश्वरप्रत्यक्षवेद्यस्यास्मदादिस्पार्शनप्रत्यक्षवेद्यस्य च घटादेर्निवृत्त्यै चक्षुर्जे
न्यग्रहणं अस्मत्पक्षे त्वालोकाभावस्यालोकानपेक्षत्वात्प्रत्यक्षप्रतियोगिकतया च प्रत्यक्षत्वात्तानुपपत्तिरिति भावः
मानसत्वं निषेधति नापि मन इति तमसश्च वहिरुपलब्धेरिति शेषः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वि॰सु॰ उपसंहरति तस्मादिति तद्भाववद्वृत्त्यंतर्भूतत्वेपीत्यर्थः अयमत्रप्रयोगस्तमः पदमालोकाभाववाचकमालोका
टी॰न॰ नपेक्षस्वस्फूर्तौयद्वाचकत्वादालोकाभावपदवदिति समाधातुमुपक्रमते अत्रोच्यतइति श्लोकेनप्रमाण।
३६ मुपदर्शयति तमालेति तमालवत् श्यामलमिति ज्ञानंतमालश्यामलज्ञानंतस्मिन्निर्बाधेस्फुटेजाग्रति स्फुर
तिसति अकस्मान्निःकारणं दृश्यान्तरंतमः विशेषणैरुदय दयंकस्मादुपलभ्यते अयुक्तोह्यकस्मादुप

तस्मात्स्वदृश्यस्वपिभावेष्वनंतर्भावात्तद्भावेवोपलंभकाभावाच्च प्रभाभावस्तमइति अत्रो
च्यते तमालश्यामलज्ञानेनिर्बाधेजाग्रतिस्फुटेदृश्यांतरंतमः कस्मादकस्मादुपलभ्य
ते ५ अस्तिहितमस्तमालमालाश्यामलमिति प्रतीतिनेचाप्रतीतावेवायंप्रतीतिप्र
मस्तद्व्यवहारस्यतत्प्रतीतिमन्तरेणानुपपत्तेः॥

॥ लापोतिप्रसंगादितियोजना अत्रजाग्रती
त्यनुत्पत्तिलक्षणमप्रामाण्यंपरिहृतं स्फुटइतिसंशयः परिहृतः निर्बाधइतिविपर्ययपर्युदासः श्लोकंवि ३६
वृणोति अस्तिहीति अत्रप्राभाकरावलंबिनः प्राहुः प्रतीतिरेवतावन्नोदेति यस्तुप्रतीतिव्यवहारः सतुप्रतीत्य राम॰
भावएवप्रतीतिभ्रमः यथाहुरदृष्टोध्वांतदृष्टिवदिति तन्निराचष्टे नचेति तत्रहेतुः तद्व्यवहारस्येति अस्तिताव ३६
देवंविधः संसर्गव्यवहारः सचतादृशज्ञानमंतरेणानुपपन्नः येनतद्व्यवहारस्यज्ञानपूर्वकत्वनियमादित्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यथा चैतन्नयोर्द्वैकैः ख्याति मन्याख्याने प्रख्याप्यते न चालोकादर्शनविषयज्ञानमेव तमः पश्यामीति व्य
वहारहेतुस्तस्याचाक्षुषत्वादिदमिति व्यवहाराद्यनुपपादकत्वादिति भावः एतेनैतदपि परास्तं यदाह मान
मनोहरस्तमसि प्रमाणाभावस्तु पेन्यस्य नीलं तम इति प्रतीतिः प्रमाणमिति चेन्न नीलबुद्ध्यसिद्धेरुक्तं नार्थेनापि
अप्रतीतावपि प्रतीतिभ्रमो मामंदानामिति यत्तु तेनैवोक्तं कथं तर्हि पदप्रयोग इति चेत्तेनाभावे उपचारादसितं।

न चायमौपचारिक आलोकाभावे शौक्ल्याभावे पटादौ नीलव्यवहार इवेति युक्तं मुख्ये
बाधकाभावात् रूपत्वे रूपवत्त्वे वा आलोकानपेक्षचक्षुर्जन्यज्ञानविषयत्वासंभवो बा
धक इति चेन्नैव मालोकविरोधिनस्तमसश्चालोकाभावव्यञ्जनीयतया तन्निरपेक्ष
चक्षुर्विषयत्वोपपत्तेः ॥

नीलमिति हि लौकिकः प्रयोग इति तदेतदनुवादपूर्वकं दूषयति न
चायमित्यादि युक्तमित्यन्तेन पटादौ शौक्ल्याभावे नीलस्य व्यवहार इवालोकाभावे यमौपचारक इति न युक्तमि
त्यन्वयः मुख्ये बाधकाभावादिति तत्र हेतुः यत्त्वत्रापि तेनोक्तं मुख्ये किं बाधकमिति चेदालोकनिरपेक्ष
स्य चक्षुषो रूपप्रत्ययजनकत्वानुपपत्तेः कारणाभावे कार्यं जायत इति दुर्घटमिति तदेतदर्थतः शंकते
रूपत्व इत्यादिना परिहरति नैवमिति रूपवत्त्वे पीतरूपवद्बहुलक्षण्यमस्तीत्यन्यथासिद्धमित्यर्थः॥ ६ ॥

१

वि॰ सु॰ नन्वितरस्यालोकसापेक्षस्य चक्षुषः कथं तमन्तरेण तमसि सामर्थ्यमित्यत आह सामर्थ्यस्येति एतदेव

टी॰ न॰ प्रतिबन्ध्यासमर्थयते नचेदित्यादिना यदि हि रूपवत्त्वमात्रेणालोकसापेक्षता स्यात्तदा रूपवद्भावत्वा

३७ दालोकाभावेऽपि घटाद्यभाववदालोकं किमिति नापेक्षते चक्षुरित्यर्थः प्रसंगसाम्यमुक्त्वा परिहारं समीकरो

ति तद्विरोधितयेति तच्चाभिव्यंजकतयाप्यवश्यापेक्षणीयस्तस्यालोकाभावेनावतैव तमः शब्दार्थः।

सामर्थ्यस्य कार्य्यगम्यत्वान्न चेदालोकाभावस्यापि रूपवद्भावतया घटाभाववदा
लोकनिरपेक्षचक्षुर्विषयत्वं न स्यात्तद्विरोधितया तदनपेक्षत्वं तु समत्वेऽपि समानम
न्यत्राभिनिवेशात् न च निमीलितनयनस्यालोचनव्यापाराभावेऽपि तमस उपलंभाद।
॥ चाक्षुषत्वं तत्रापि प

क्यानुक्तमधिकांधकारकल्पनयेति वाच्यं यतः कल्पयंतं प्रत्ययं पर्यनुयोगः ॥ ३८

नप्रत्यक्षं प्रमाणयंतं प्रति आभासतोद्भावनीयमिति चेदुद्भाव्यतां सैव न तु केनेति विवेचनीयं न हि नीलं तम इ राम॰

ति प्रत्यक्षमस्ति बाधकं अनुमानमिति चेन्न सैव तावद् ध्वस्तविध्वस्तविषयस्य बाधव्याधिसमाधस्त्वत एव ३७

मालोकनिरपेक्षचक्षुःप्रवृत्त्यनुपपत्तिः परिहृता यत्तु चक्षुर्व्यापाराभावे तूपलंभाद चाक्षुषत्वमिति तदनू

द्यासिद्धिमाह न च निमीलितेनेति ॥

CC-0. In Public Domain. Digitization by eGangotri

नचरूपवदंतरग्रहप्रसंगः तत्रालोकसापेक्षत्वात् नचेंद्रियाणामंतःप्रवृत्तिर्नदृष्टचरीयेनायमलौकिकः स्फु
टः स्यादित्याह पिहितेति तत्रशब्दइत्यादिप्रतीतेः श्रोत्रमपिगत्वाग्राहीतिभावः इत्यस्युपलंभकसिद्धिरुक्ता
अथयदुक्तंनीलरूपमस्यनसंभवति तद्व्यापकगंधवैधुर्यादिति तदनूद्याभाससमानयोगक्षेमतान्दर्शय
न्बाधकमाह अनुष्णाशीतस्पर्शेत्यादिना अत्रहिगंधव्यावृत्त्यानीलरूपव्यावृत्तिरनुमित्सितासाचायुक्ता

स्वपटलांतर्वर्तितमसश्चक्षुर्व्यापारादेवोपलब्धेः पिहितकर्णपुटस्यश्रोत्रव्यापारा
देवांतरशब्दोपलब्धिवत् यत्तुगंधाभावेनव्याप्तंनीलरूपमपिनस्यादिति तदपिनानु
ष्णाशीतस्पर्शस्यपृथिव्यांगंधादिव्याप्तस्यतदभावेपिमरुतिप्रतीतेरेवांगीकारवदिहा
पिप्रतीतेरेवनीलरूपस्यगंधाभावेप्यभ्युपेयत्वात् अथपाकजस्यैवानुष्णाशीतस्पर्श।
स्यगंधादिनाव्याप्तिस्तर्हीहापिपाकजस्यैवकालिमगुणस्यगंधादिनाव्याप्तिरितितुल्यम्

रूपोपलब्धिविरोधात् यदिचैवमपिनानुमन्यसे तर्हिगंधव्यावृत्त्यानुष्णाशीतस्पर्शमपिपवनाद्व्याव
र्तयेत्यर्थः अथनानुष्णाशीतस्पर्शस्यगंधेनव्याप्तिरपितुतद्विशेषस्यपाकजनाम्नस्तर्हीहापिननीलरूप
मात्रस्यगंधेनव्याप्तिः किन्तु पाकजस्यैवेत्याह अथपाकजस्यैवेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१

चि·सु· नन्वपाकजस्पर्शवदपाकजनीलरूपसिद्धावेतत्स्यात्तदेवमुक्तः प्रमाणादित्यत आह सद्भावग्राहिण इ

टी·न· ति ननु तमो रूपरहितं स्पर्शरहितत्वादाकाशवदित्यनुमानविरोधाद्रूपवत्त्वमेव नास्तीति कुतस्तद्विशे

३८ षनीलरूपवत्ताइत्यत आह नचस्पर्शेति एतदपि पवनस्पर्शप्रतिबंध्यासमर्थयते अन्यथा रूपाभावेने

ति वायुः स्पर्शरहितः रूपरहितत्वादाकाशवदित्यपि सुवचत्वात् प्रतीतेराभासतयानुमानोदयस्य सुव

सद्भावग्राहिणः प्रत्यक्षस्योभयत्रसमानत्वान्न च स्पर्शाभावात्तमसो रूपवत्त्वाभावः
रूपग्राहकप्रत्यक्षविरोधे हेतोः कालात्ययापदिष्टतया तदभावानुमानानुदयात् अ
न्यथा रूपाभावेन पवनेपि स्पर्शाभावानुमानस्य दुर्निवारत्वादन्यत्र रूपवतामेव स्प
र्शवत्त्वनियमान्न चास्पर्शवत्त्वादेव तमः परमाणूनामनोवदनारंभकत्वमनुमा
तुं युक्तं तत्र वैयर्थ्यस्योपाधेः सद्भावात् ॥ ३८

वत्त्वादित्यर्थः अस्यैव व्याप्तिमाह अन्यत्रेति यत्तु यत्स्पर्शरहितं न तद्द्रव्यारंभकं यथा मन इति व्याप्त्या
स्पर्शरहितत्वं योगीकृत्य तमः परमाणूनां द्रव्यारंभकत्वाभ्युपगमव्याघात इति कंदलीकारोक्तं दूषणं तद राम·
नूद्य निराकरोति नचास्पर्शवत्त्वादेवेति मनसि द्रव्यानारंभकत्वेन तदारब्धकार्यवैयर्थ्यमुपाधिः अतो ३९
नास्पर्शवत्त्वद्रव्यानारंभकत्वयोर्व्याप्तिरित्यर्थः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वैयर्थ्यमेव विवृणोति नहीति शरीरतया भोगसाधनताभावमाह पार्थिवादीति अयमर्थः पार्थिवा।
प्यतैजसवायवीयानि चतुर्विधानिहि शरीराणि प्रमाणवृन्ति तत्र पार्थिवानि कानि यानीमान्यनुभूयन्ते आ
प्याद्दीनि तु तत्तच्छास्त्रगम्यानीति स्थितिः नपुनश्चातुर्विध्यानवरुद्धशरीरसद्भावे प्रमाणमस्तीति तदा
रब्धस्य न शरीरता अत्र च मृतशरीरवद्भोगसाधनताया मिन्द्रियानाश्रयत्वं हेतुः तत्र च हेतुरनन्तर्भूत

नहि शरीरतया विषयतयेन्द्रियतया वा मनआरब्धद्रव्यस्य भोगसाधनतासंभाव
नीया पार्थिवादिचतुर्विधशरीरान्तर्भूतस्येन्द्रियानाश्रयस्य शरीरतया भोगसाधनता
नुपपत्तेर्नेच विषयतया रूपस्पर्शशून्यारब्धस्य तद्रहितत्वेन विषयत्वायोगात् शरीरे
न्द्रियव्यतिरिक्तावयवी विषयइत्यङ्गीकारान्नापीन्द्रियतया

त्वं विषयत्वाभावमाह नच विषयत्वेनेति रूपस्पर्शशून्यान्तःकरणारब्धमपि रूपस्पर्शशून्यमन एव।
विषयत्वरहितं द्व्यणुकेषु रूपवत्सु स्पर्शवत्सु वा बाह्येन्द्रियप्रवृत्तेरित्यर्थः नभः पवनयोर्व्यवच्छेदाय रू
पस्पर्शग्रहणं उक्तं च मानमनोहरकारेण शरीरेन्द्रियव्यतिरिक्तावयवी हि विषय इति नच रूपस्पर्श
रहितस्यावयवित्वं कार्यत्वे सति रूपस्पर्शवत्तो वयवित्वादिति भावः॥

CC-0. In Public Domain. Digitization by eGangotri

२
वि॰सू॰ मनआरब्धस्येंद्रियत्वं निषेधति मनसएवेंद्रियत्वादिति ननु मास्तु त्रिविधान्तर्भाव अनन्तर्भूतस्यैव
टी॰न॰ किमिति भोगसाधनत्वं न स्याद्गुणादिवदित्यत आह नचशरीरेति कार्यद्रव्यस्येत्यत्र हृदयं नत्र कालादी
३९ नां सर्वोत्पत्तिनिमित्ततया भोगसाधनतास्तीति तत्र बाधपरिहाराय कार्यग्रहणं उक्तोपाधेरात्मादिषु
पि साध्यव्याप्तिमाह आत्मादीनामिति प्रकृतस्य तु पुनस्तमसो विषयतया भोगसाधनतयोपाधेः साधना।

मनसएवेन्द्रियत्वात्तदारब्धेन्द्रियान्तरस्वीकारवैयर्थ्यात् नचशरीरेन्द्रियविषयानं
तर्भूतस्य कार्यद्रव्यस्य भोगसाधनत्वं परैरंगीक्रियते आत्मादीनामपि पुनरस्पर्शवत्वात्।
शरीरेन्द्रियविषयारंभासंभवात्स्मानमेव द्रव्यान्तरारम्भवैयर्थ्यं इह पुनस्तमसो महतो
रूपवतः संभवति भोगसाधनत्वमिति नारम्भवैयर्थ्यम्॥

व्यापकत्वमाह इहपुनरिति उपलक्षणं चैतत्स्पर्शवत्त्वस्यापि स्वरूपस्पर्शोऽनुष्णाशीतस्पर्शो वक्तव्ये २३
ति मतीनेः नचेदं परिमाणवादिवद्गुणेयेनविषयतया फलभोगायस्यादित्याह महतइति तत्त्वतोत्याचा राम॰
यमारंभवादः समर्थितः नास्माकमयं समर्थनीयः नह्यस्माकमनिर्वचनीयाविन्त्यसामर्थ्याविद्यास। ३९
विवर्तस्य विवर्तवादिनामेतादृशानु पपत्त्याभासपांसुभिः परिभव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्याह किंचास्मन्मतइति भाट्टीयन्यायवायुरोक्तं मूलकारणमखंडमायावद्ब्रह्म महाविद्युदादीति द्व्यणु
कादिपरंपराविलंबो निरस्तः पुनरपि सिंहावलोकितेन आरम्भमेव निवारयति तत्र यन्मनसो नारम्भक
त्वं दृष्टान्तितं न तदभ्युपगम्यते यद्यप्युपाधिकृतस्तदेव तु नास्त्यस्मत्पक्षेन स्यापि सावयवतया परिणामित्वे
नारम्भकत्वादित्याह नचमनसइति अन्यत्रानैकान्तिकतां चाह आत्मनश्चेति तमोद्रव्यरूपवत्ता द्धट

किंचास्मन्मतेन न तमस्तमोवयवैरारब्धं तस्य मूलकारणान्मेघमंडलान्महाविद्युदा
दिजन्मवज्जन्माभ्युपगमात् नच मनसोऽनारम्भकत्वं तस्यापि सावयवद्रव्यत्वेन पा
रिणामित्वाभ्युपगमात् आत्मनश्च स्पर्शरहितस्य सर्वजगदुपादानकारणत्वाभ्युपग
माच्च चलत्वाच्चालोकवत्तमोद्रव्यान्तरं अन्यानुविधाननियमान्न स्वाभाविकं चलनमस्य
॥घटरूपादिवदिति चेत्

यदित्युक्तमिदानीं क्रियावत्त्वादपि द्रव्यत्वमाह चलत्वाच्चेति असिद्धिं शं
कते अन्येति घटरूपादिवदिति घटगतगुणानां क्रियारहितानां यथा घटगमनानुविधानेपि न स्वाभावि
कं गमनमेवमित्यर्थः तत्किंतमः स्वाभाविकचलनहीनमन्यचलनानुविधायित्वाद्रूपादिवदित्यनुमिते
षितयाचसुवर्णेऽनैकान्तिकं तत्रत्वत्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वि.सु. क्विन्तद्रवत्वस्याकरजतेजसः सुवर्णस्य कठिनपार्थिवद्रव्येण नित्यमवष्टंभात् तच्चलनाद्यनुविधान
टी.न. नियमोऽस्ति न चैतावता स्वाभाविकत्वहानिश्चलत्वस्येति परिहरन्ति तद्रव्यस्यापीति आकरजं तेजो विशे
५० ष आकरेषु जायत इति सुवर्णत्वाद्यनुविधं हि तेजो वैशेषिकैः परिगणितं भौमं दिव्यमौदर्यमाकरजं चेति न
नु न वयमनुमिमीमहे अपि तर्हि प्रमाणमेव नास्ति चलनवत्ते प्रतीति स्तत्वस्यानुविधानेनान्यथासिद्धेति

तद्रव्यस्यापि सुवर्णादिद्रव्यान्तरानुविधानेऽपि स्वाभाविकचलनोपपत्तेस्तथा हि आ
करजस्य तेजसः सुवर्णादेः पार्थिवद्रव्योपष्टंभात्तनादिप्रतिभासेऽपि न स्वाभाविकं चल
नमुपरुध्यते किं चेदमनुविधानम् किमालोकावस्थानपश्चाद्यनुविधानं किं वाऽनि
वर्तकप्रदीपाद्यनुविधानं नाद्यः निश्चलोऽप्यचलादौ तच्छायायाश्चलनोपलंभात् नापि
द्वितीयः वैपरीत्यादालोकागमने गच्छति छायेति प्रतीतेर्गमने चागच्छतीति प्रतीतेः

ब्रूमः इति तर्ह्यनुविधानमेव नास्त्यनिरूपणादित्याह किं चेदमन्यानुविधानमिति न किमपीत्यर्थः किंच ४०
त्रिभिन्नच्छायायात्मकं न भस्तदनुविधत्ते किं वा यन्निवर्त्यते तदनुविधत्त इति विकल्पयति किमालोकेत्यादि राम.
ना नाद्यः नियमाभावादित्याह निश्चलेऽपीति द्वितीयोऽप्ययुक्तः विपरीतभानादित्याह नापि द्वितीय इति आग ५०
मन इति पदच्छेदः यदि हि तदनुविदध्यात् तदा तस्मिन्नाच्छति गच्छत्यागच्छत्यागच्छतीति प्रतीतिः स्यात्

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नहि रोधित्वाच्चेति यस्य हि यद्द्रव्यसमवायमेव विनाशस्तस्य कथं न द्रव्यानन्तरं स्थितिस्तत्क्रियानुकरणं वा अस्थितस्यानुकरणादिति भावः तदनेन भावत्वविभावनेनोत्पत्तिसमर्थनेन गुणवत्तया द्रव्यत्वदीयनेन च गतेरनागन्तुकत्वनिरूपणेन चोपलम्भकोन्मीलनेन च गुणवत्त्वाद्यनुगुणप्रमाणगवेषणपरिश्रमपरिहृयमानसोदयनदैन्यमप्यपनोदितं मन्तव्यं पूर्वमालोकाभावप्रतिबन्ध्यारूपवत्त्वपि तमस्यालोकनिरपेक्षचक्षुषः प्रवृत्तिरस्तीत्युक्तमिदानीं तत्रैवानुमानमप्याह किंच चक्षुरित्यादिना श्लोकेन प्रकाश न

नहि रोधित्वाच्च तदनुविधानानुपपत्तेः किंच चक्षुः प्रकाशनाजन्यरूपवद्द्रव्यग्रहणसमं रूपिग्राहीन्द्रियत्वेन यथैव स्पर्शनेन्द्रियं ६ चक्षुरालोकाजन्यरूपिद्रव्यसाक्षात्कारजनकं रूपिद्रव्यग्राहकेन्द्रियत्वात्त्वगिन्द्रियवन्न च रूपरहितेन्द्रियत्वमुपाधिः ॥ ६ ॥ श्री ॥ ॥ ॥

मालोकस्तेनाजन्यं यद्रूपवद्द्रव्यग्रहणं रूपिद्रव्यसाक्षात्कारस्तत्समं तत्समर्थमिति प्रतिज्ञा तत्र हेतुमाह रूपीति रूपवद्द्रव्यग्राहकत्वात् यथा त्वगिन्द्रियमित्यर्थः संगृहीतमनुमानं विवृणोति चक्षुरित्यादिना आलोकाजन्यसाक्षात्कारक्षममित्युक्ते आलोकाभावतया प्यर्थान्तरतानिदर्शद्रव्यग्रहणम् आलोकाजन्यद्रव्यसाक्षात्कारक्षममित्युक्तेऽर्थान्तरता महत्त्वे कालादीनामपि तथात्वात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वि-सु
४१

यथाहमानमनोहरः विवक्षितासाधनं चेति तदर्थं रूपिग्रहणं घटादिप्रमीतिजनकत्वेन सिद्धसाधनतानि
रस्यर्थमालोकाजन्येत्युक्तं । अनुमानादेर्व्याहत्यर्थं हेतौ विंद्रियग्रहणं । इंद्रियत्वादित्युक्ते घ्राणेनैकांतिकता
नरसद्रव्यग्राहकत्वाभावात् तदर्थं द्रव्यग्राहकेंद्रियत्वादित्युक्तं । तावत्युक्ते प्रतिवादिनो मनस्यनैकांतिकं ।
तात्तस्यात्मद्रव्यग्राहकत्वेपि रूपिद्रव्ये स्वातंत्र्येण ग्राहकत्वाभावात्तदर्थं रूपीत्युक्तं । साध्यहेत्वोर्द्रव्यपदं
स्पष्टार्थमित्येके । एवं च सति मानमनोहरसंभ्रमोप्यनवसरनिरस्तः त्वगिंद्रियस्योक्तसाध्यवत्तायां रूप्य

यद्रूपवदिंद्रियं तदालोकाजन्यरूपिसाक्षात्कारजनकं न भवति घ्राणवदि
ति व्यतिरेकव्याप्तौ रूपवद्ग्राहकत्वस्यैवोपाधित्वात्तन्निष्ठमेतत्तमोद्रव्यान्तरमिति ६॥

द्धिर्नेंद्रियत्वं नोपाधिस्तस्य व्यतिरेकव्याप्त्यभावेन साध्याव्यापकत्वादित्याह यद्रूपवदित्यादिना व्यतिरेकासि
द्धेर्वा दृष्टान्ते चेंद्रियसन्निकर्षे चोलूकादिदृष्टे च साध्याव्याप्तिनिवृत्त्यै मनुष्येंद्रियत्वविशेषितोक्तसाध्यस्योपा 89
धेर्विधानमपि निरस्तं मंतव्यं एवं च सति यदनुमानं तमः पदमित्यादि तदुक्तप्रमाणबलाद्भावरूपत्वे निर्णी राम
ते कालातीतं विपक्षे बाधकाभावात् शंकितोपाधिता च न चालोकनिरपेक्षचक्षुर्ग्राह्यत्वहानिस्तस्यालोकविरो ४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धितया तद्भावव्यंग्यत्वेनाप्युपपत्तेस्तमःपदस्य नानार्थवाचकत्वसिद्धावप्यस्य चरितार्थत्वेन न तमसोऽभाव त्वासिद्धेश्चालोकसंसर्गाभावस्तमःपदवाच्यो न भवति अभावत्वाद्घटाभाववदित्यादिना सत्प्रतिपक्षेचाभाव प्रमाणागम्याभाववादिनः साधनवैकल्यं च दृष्टान्तस्येत्यादिदोषादुपेक्ष्यं मनस्त्वस्य शैवदृष्टिवेगवद्वृत्तिजा त्यन्यत्वे मेयत्वाद्घटवदिति तमसो द्रव्यांतरत्वसिद्धिरित्यप्येके साक्षिवेद्यस्वराधांते ध्वांते तच्चासुषंपुनरा चा

इत्थमालोकवदेवभावरूपाज्ञानतमोविरोधिनश्चात्मनो जगदवभासकस्य ज्योतिः शब्दवाच्यत्वात्तस्यत्वसंगस्य दृश्यसंगानिरूपणात् दृश्यप्रपंचस्य स्वतः परतश्चासिद्धेर्दृगात्मन्यध्यस्ततयैव सिद्धिरिति सिद्धं मिथ्यात्वम् ६ ॥ ६ ॥ ६ ॥ ६ ॥ ॥

यथोऽसाधयद्युक्तिवैभवं स्वं विभावयन् वादार्थमुपसंहृत्य प्रयोजनमाह इत्थमित्यादिना अभावविलक्षणाविद्यासिद्धिः फलमित्यर्थः ज्योतिःशब्दवाच्यत्वाद्युत्पत्ते ऽस्ति रत्नायं पुरुष इत्यादिके ज्ञि शेषः वक्ष्यमाणवादार्थं प्रस्तावयति दृश्यप्रपंचस्येत्यादिना काम्यवाचारंभणं भेदलोढं सत्यं तत्त्वं त्वेकमेवाद्वितीयमित्य द्वैतश्रोतएवाहयुक्तौ युक्त्याभासोद्भूतविभ्रांतिभित्ये ॥ दृगात्मन्यध्यस्ततया दृश्यप्रपंचस्य मिथ्यात्वमित्यु

CC-0. In Public Domain. Digitization by eGangotri



क्तंनदिदमसहमानः प्रपंचसत्यत्ववादी मिथ्यात्वलक्षणमाक्षिपति किंपुनरिति आक्षेपमेवसंभवत्सर्वप्र
कारनिरसनेननिर्वाहयितुंसंभवत्प्रकारान्विकल्पयति प्रमाणेत्यादिना प्रमाणाविषयत्वाभावादप्रमाणवि
षयत्वमत्वेदेवाप्रमाणामपिद्वेधा यथार्थमयथार्थंचयथास्मृतिर्विपर्य्ययश्चतेनप्रथमद्वितीयत्तृतीयक

किंपुनरिदंमिथ्यात्वंप्रमाणागम्यत्वंवा १ अप्रमाणज्ञानगम्यत्वंवा २ अयथार्थज्ञानगम्यत्वं
वा ३ सद्विलक्षणत्वंवा ४ सदसद्विलक्षणत्वंवा ५ अविद्यातत्कार्ययोरन्यतरत्वंवा ६ ज्ञा
ननिवर्त्यत्वंवा ७ प्रतिपन्नोपाधौनिषेधप्रतियोगित्वंवा ८ बाध्यत्वंवा ९ स्वात्यंताभावसमाना
धिकरणतयाप्रतीयमानत्वंवा १० नाद्यः ब्रह्मणोपिमिथ्यात्वप्रसंगात्तस्यस्वप्रकाशत्वेनत्वया
सर्वप्रमाणागोचरतानंगीकारान्नापिद्वितीयः ६॥ ६ ७॥ ६॥ ६॥ ६॥ ७॥

ल्पसंकरकलंकाभावः अविद्यातत्कार्ययोरिति अव्याप्तिनिवृत्त्येअन्यतरग्रहणं बाधकज्ञानविषयत्वमा
देरसत्निवर्त्यपूर्वज्ञानादेश्चप्रतिपन्नोपाधौबाधाभावात्तस्यप्रमाधृमत्वमसंकरः प्रतिपन्नोपाधिः प्रती
तमधिष्ठानंस्वात्यंतेति पूर्वंस्वाधिष्ठाननिष्ठाभावमात्रप्रतियोगित्वंविवक्षितमिहतुस्वात्यंताभावस्यस्वस्य
चैकत्रवर्त्तमानतयाप्र



42

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नोतिरिति नाप्यसद्रूपसंकरः शंकनीयः गोचरताचात्रवेद्यतानपुनर्विषयत्वमेवतद्विवक्षायांचनैयायि
कादेरसिद्धिः सर्वस्यापिपश्चात्कथंचनप्रमाणविषयत्वात् सद्भ्यादिभिरपीति येहिप्रपंचसत्यत्ववादिनस्तै
रपिसत्यस्यैवशुक्तिकादेरधिष्ठानतयाऽप्रमाणज्ञानगम्यत्वस्वीकारात्सत्यत्वेप्युपपद्यमानमर्थान्तरमेवे
त्यर्थः तदेवविवृणोति तस्यतस्येति अन्यत्सत्यंचेदंशुक्तिकादावंगीकृतमितिसर्वस्यैवप्रपंचस्यैवंविधत्वमं

सद्भ्यादिभिरपितस्यांगीकृतत्वेनार्थान्तरत्वात् तस्यतस्यशुक्तिशकलादेस्तेनतेनरजताद्या
कारेणप्रतीयमानतयाऽप्रमाणज्ञानविषयत्वात्सर्वस्यप्रपंचस्यक्षणिकमिदंब्रह्मकार्य्यं।
मिदमनिर्वचनीयमिदमितिचमिथ्याज्ञानगोचरतायाः परैरभ्युपगमात् स्मृतेरप्रमाणत
यातद्विषयस्यतथात्वांगीकाराच्चनतृतीयः उक्तदोषानुषक्तेरेवनचतुर्थः सद्विलक्षणस्यापि
(शशविषाण)

गीकृतमितिस्फुटतरमर्थान्तरमित्यर्थः अर्थान्तरोद्धारणान्तरमाह स्मृतेरिति उक्तदोषेति तत्तदारोपाधिष्ठानत
यासर्वस्यायथार्थज्ञानगम्यत्वांगीकारादित्यर्थः सद्विलक्षणस्येति नचशशविषाणस्यापिमिथ्यात्वादनति
व्याप्तिरितिवचनीयंमिथ्याभूतप्रपंचस्यापरोक्षज्ञानयोग्यत्वम ०॥ ६॥ ६॥ ६॥ ०॥ ६॥

CC-0. In Public Domain. Digitization by eGangotri

१
त्रि·सु·
टी·न·
४३

र्थक्रियासामर्थ्यं च स्वीकुर्वद्भिः शशविषाणवैषम्येष्टेरमिथ्यात्वं स्वीकृतमेव शशविषाणस्य न चैवं सत्यद्वैत
विरोधः सद्द्वैताभ्युपगमादनुपपत्तेरतोतिव्याप्तिरनतिलंघनीयेतिभावः एकतरेति सत्त्वनिषेधेऽसत्त्व
नान्तरीयकमसत्त्वनिषेधे च सत्त्वं नान्तरीयकं परस्परविरोधेन हि प्रकारान्तरस्थितिरितिन्यायात् अतोऽसंभवी
दं लक्षणमित्यर्थः। न षष्ठ इति अविद्यातत्कार्ययोरित्यत्र केयमविद्या विवक्षिता किमनिर्वचनीयरंडायमाना विद्या

द्वैतमिथ्यात्वात् न पञ्चम एकतरनिषेधस्यान्यतरविधि नान्तरीयकतयानद्संभवान्नषष्ठः अ
निर्वचनीयाविद्याया अप्रसिद्धत्वात् अग्रहणमिथ्याज्ञानलक्षणाविद्यायास्तत्कार्यस्य प्रवृत्ति
संस्कारादेः सत्त्वान्न सप्तमः ज्ञाननिवर्त्यस्यापि ज्ञानसुखादेः सत्त्वात् सर्वस्य सत्त्वेऽपि परैरी
रज्ञाननिवर्त्यत्वाङ्गीकारात्

किं वाऽग्रहणमिथ्याज्ञानात्मिका प्रथमेऽसिद्धिर्लक्षणस्येत्याह अनिर्वचनीयेति उत्तरस्मिन्नर्थान्तरतेत्याह अग्र
हणेति ज्ञाननिवर्त्यस्येति आत्मविशेषगुणानां मपर्यायमुत्पत्तिमनिच्छतामुत्तरेणोत्तरेण पूर्वपूर्वनिवृत्तिस्वी
कारेष्टेरर्थान्तरत्वमित्यर्थः न केवलं सुखादेरेव सर्वस्यैव संहरणीयस्य प्रपञ्चस्येश्वरज्ञानेनानिमित्तभूतेन एम·
निवृत्तिस्वीकाराद्भवतितरामर्थान्तरत्वमित्याह सर्वस्येति परिणामवाद्यभिप्रायेण वा ६॥ ७॥ ८॥ ४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाप्युमइति प्रतिपन्नोपाधाविसत्र प्रतिपत्तिशब्दस्य कोर्थः किं प्रमाणज्ञानमुत भ्यांनिज्ञानमाहो साधारण
माद्यमत्याह प्रमाणेनेति द्वितीयमत्याह भ्यांनीति नकेवलसंभवः स्वीकृतं चान्यथाख्यातिभिरित्याह अ
न्यथाख्यातीति एतेन साधारणपक्षोपि निरस्तः किमिदं बाध्यत्वमभिमतं किं बाधकज्ञानविषयत्वमुतान ।

नाप्युमः प्रमाणेन यद्रूपाधौ यः प्रतिपन्नस्तत्र तस्य निषेधासंभवादन्यथातिप्रसंगात् भ्यां ।
तिप्रतिपन्नोपाधौ निषेधप्रतियोगित्वस्य सत्वेपि संभवेनार्थान्तरत्वादन्यथाख्यातिवा
दिभिरपि क्वचिन्निषेधस्यान्यत्र सत्तास्वीकारात् ननवमः बाधकज्ञानविषयत्वं तन्निव
र्त्यत्वं वा बाध्यत्वमित्यभ्युपगमेप्यर्थान्तरतायास्तादवस्थ्यात् शुक्त्यादेरपि बाधकज्ञा
नविषयत्वांगीकारात् बाधकज्ञानेन पूर्वज्ञाननिवृत्त्यभ्युपगमाच्च ननवमः संयोगवि
भागशब्दात्मविशेषगुणानां प्रदेशवृत्तीनां

न्निवर्त्यत्वमुभयथाप्यर्थान्तरतेत्यभिप्रेत्याह ननवमइति प्रथमोदाहरणमाह शुक्त्यादेरपीति द्वितीयमाह
बाधकज्ञानेनेति संयोगविभागेति अयमर्थः संयोगविभागयोरव्याप्यवृत्तितां स्वीकुर्वद्भिस्तदत्यन्ताभावस
मानाधिकरणत्वमंगीक्रियते नन्वत्रापि घटावयवानां द्वयसंयोगविभागयो ६ ॥ ७ ॥ ७ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रि·सु· भिन्नाधिकरणताशंकोपपादनानन्यासत्तिनद्वयवसंयोगस्यापितद्वयवत्तित्वापरंपरयापरमाणावेव
टी·न· परिनिष्ठितत्वात्तस्य प्रथमावतारेद्व्यणुकसंयोगयोगित्वात्तदनिष्ठत्वाप्यछमतिनायत्रैवसंयोगस्तत्रैवतदत्यं
४४ ताभावोप्यभ्युपेयः तच्चप्रमाणवितिवेशितयोर्विरोधशंकावकाशः अतिप्रसंगात् शब्दस्य चाकाशेवर्त्त
मानस्यप्रदेशभेदमादायाप्येकस्मिन्नेवनभसि भावाभावौ समानाधिकृतौ स्वीकृतौ एवं सर्वगतात्मवा
दिनामात्मविशेषगुणानांतत्रात्यंतिपीडनेसाक्षादेवैकाधिकरण्यंप्रदेशवृत्तीनास्तितिर्नुतदनुमति

स्वात्यंताभावसमानाधिकरणतयाप्रतीयमानानामपिपरैः सत्यत्वांगीकारादर्थांतरता
याद्दुरतिक्रमत्वात् नदेवंनप्रपंचमिथ्यात्वनिरुक्तिर्नापितत्रप्रमाणं तथाहि नतावत्प्रत्य
क्षंतत्रक्रमते

मनुसंधानेनोक्तमत्रब्रह्मणःप्रपंचतिव्याप्तेर्द्वितीयस्योन्यानं अर्थांतरतानिवृत्त्यै तृतीयचतुर्थयोरसत्त्व ४४
तिव्याप्तिनिवृत्त्यै पंचमः असंभवनिवृत्त्यै षष्ठः असंभवातिव्याप्तिनिवृत्त्यै सप्तमः अष्टमोप्यर्थांतरनि
वृत्त्यर्थमेव असंभवार्थांतरयोर्निवृत्त्यै नवमः दशमोप्यर्थांतरनिवृत्त्यर्थमेवेति नापितत्रप्रमाणमि राम
ति यद्यपि लक्षणमपिप्रमाणविशेषएवतथापि ॥६॥ ७ ॥ ८ ॥ ९ ॥ ८ ॥ ७ ॥ ६॥ ४४

CC-0. In Public Domain. Digitization by eGangotri

नतत्स्वरूपसिद्धिपरमपि त्वितरव्यावृत्तिं व्यवहारं चोपहरति प्रमाणं तु लक्षितमेव स्वरूपं साधयतीति सर्वत्रा
नयोः पृथगाक्षेपसमर्थने द्रष्टव्ये प्रत्यक्षेन प्रमाणमित्युक्तं तत्र हेतुमाह उक्तप्रकाराणामिति अयमर्थः भवा
दुक्तप्रकाराणामन्यतमं मिथ्यात्वं न स्यात्तु न कस्यचिदप्यत्र प्रत्यक्षसिद्धिर्यदि हि प्रत्यक्षतः सिद्ध्येत्तदा कोपि विप्रति
पद्येत न हि प्रत्यक्षसिद्धे घटादौ विवदंते विवदंते चाद्यापि वादिनो मिथ्यात्वे इत्यर्थः ननु मा भूत्प्रत्यक्षमनु।

उक्तप्रकाराणामन्यतमस्यापि मिथ्यात्वस्य प्रत्यक्षसिद्धत्वे तत्र वादिनां विवादाभावप्रसं।
गात् न च विवादपदं मिथ्या दृश्यत्वाच्छुक्तिरूप्यवदित्यनुमानं प्रमाणागम्यत्वस्य सदसद्वैल
क्षणस्याविद्यातत्कार्ययोरन्यतरत्वस्य वा साधने ऽप्रसिद्धविशेषणत्वाद् यथार्थज्ञानगम्य।
त्वस्य गुरुमते ऽप्रसिद्धत्वात्

मानं भवत्वित्यत आह न च विवादपदमिति दशधा हि मिथ्यात्वसंभवः तत्र प्रमाणागम्यत्वादिरूपसाधने ऽप्रसि
द्धविशेषणता अविद्यायाप्यनिर्वचनीयाविवक्षिता इतरयोस्तस्या असंप्रतिपन्नत्वात् नन्व यथार्थज्ञानगम्यत्वा।
त्मकं साध्यं तथा च नाप्रसिद्धविशेषणतात आह अयथार्थेति यद्यप्यस्माकमिदं प्रसिद्धं तथाप्यख्यातिवादिना
मप्रसिद्धविशेषणता सापि हि तावदेवं मिथ्यात्वे विप्रतिपन्न इत्यर्थः ० ॥ ९ ॥ ॥ ६ ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१
चि॰ सु॰ भवतु नं प्रतिज्ञां प्रतिज्ञा तु को दोष इत्यत आह इतरेषु चेति पक्षत्रयातिरिक्तेष्वित्यर्थः तथा च पक्षा चैतत्तत्यानन्त
टी॰ न॰ र्लक्षणदूषणसमये यथान्तरं दर्शयितोपपादितमुपलक्षणं चैतत्तेन यथासम्भवं सन्देहलक्षणादिप्रयुक्तदू।
४५ षणमूहनीयं तदेवं साध्यानिरूपणमुक्त्वा हेतोरप्यनिरुक्तिमाह किं चेति अतीन्द्रियेष्विति हेतोपपा
दनमिदं स्वप्रकाशलक्षणसमये त्वदृष्टादेरवेद्यतामावेदयद्भिरस्माभिस्तेन भागासिद्धो हेतुः शुक्तिरू।
प्यादिव्यतिरिक्तमखिलं जडं पक्षः अतीतानागतादेरपि पक्षतया तत्राप्रवृत्तेरित्यर्थः। नन्वविवक्षितविशेषतृती

इतरेषु च सिद्धसाधनत्वात् किं च दृश्यत्वं नाम फलव्याप्यत्वं वा वृत्तिव्याप्यत्वं वा साधारणं।
वा नाद्य अतीन्द्रियेषु तदभावेन भागासिद्धत्वात् न द्वितीयः ब्रह्मणोपि वेदान्तैर्वृत्तिव्या
प्यत्वाभ्युपगमादनैकान्तिकत्वान्न तृतीयः ब्रह्मण्यनैकान्तिकत्वादेव एतेन जडत्वाद्यन्तव।
त्त्वपरिच्छिन्नत्वादयो हेतवो निरस्ताः तत्रापि साध्यानिरुक्तेः ६॥ ७॥ ॥ ॥६॥ ८५

येपक्षेकात्मकतिरित्यत आह न तृतीय इति ब्रह्मणीति अविवक्षितविशेषसाधारणस्वरूपं किं च न विशेषमा
दायापि पर्यवसानादित्यर्थः ननु विवादपदं मिथ्या जडत्वादाद्यन्तवत्त्वात्परिच्छिन्नत्वाद्वा शुक्तिरूप्यवदि एम
तिप्रयोगो मिथ्यात्वे प्रमाणमित्यत आह एतेनेति अतिदिश्यमानमेव विशदयति तत्रापीति ६॥ ६॥ ॥ ४५

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुमानानन्तरं शंकते अयं पट इति एतत्तंतव एतत्पटसमवायिकारणं तंतवस्तन्निष्ठात्यंताभावप्रतियोगीति
योजना अभावप्रतियोगीत्युक्ते कार्यकारणभेदवादिनां तार्किकाणामेतत्तंतुष्वेतत्पटान्योन्याभावप्राग
भावप्रध्वंसाभावस्वीकारेणार्थांतरता तदर्थमत्यंताभावप्रतियोगीत्युक्तं तावत्युक्ते यत्किंचिन्निष्ठात्यं
ताभावप्रतियोगित्वेन सिद्धसाधनतास्यात्तत्परिहारार्थं तंतुनिष्ठेत्युक्तम् एतत्पटस्यैतत्पटाजनकत्वेनाभि

अथायं पट एतत्तंतुनिष्ठात्यंताभावप्रतियोगी दृश्यत्वाद्घटवदिति चेन्नैतत्तंतुनिष्ठा
त्यंताभावे दृश्यत्वहेतौ चानैकांतिकत्वात्तयोर्दृश्यत्वेपि तंतुनिष्ठात्यंताभावाप्रतियो-
गित्वात् प्रतियोगित्वे वा

मतं तंतुनिष्ठात्यन्ताभावप्रतियोगित्वेन पुनरपि सिद्धसाधनतास्यात्तत्परिहारार्थमेतदिति तन्तुविशेषणम् एतत्तंतु।
शब्देन च वादिनो जनकत्वेनाभिमतत्तन्तव उच्यन्ते। पटान्तरापेक्षया सिद्धसाधनतापरिहारायायमिति पटविशेषणम्
घटस्यैतत्तंतुनिष्ठात्यंताभावः प्रसिद्ध इति साध्यप्रसिद्धिस्तदेतद्दूषयति नेति एवं ह्यनुमित्वनापद्य दृश्यं नतत्तदेत
तंतुनिष्ठात्यंताभावाप्रतियोगीति व्याप्तिरेष्टव्या न च ० ॥ ० ॥ ० ॥ ० ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चि·सु·
टी·न·
४६

यमस्मिन्नेतत्तंतुषु योयमस्य पटस्यात्यंताभावः साध्यतेनेन तस्यैतत्तंतुनिष्ठात्यंताभावप्रतियोगित्वमस्ति न स्वीका
रे च तत्साध्यस्य वाभावादनुमानं व्याहतं स्यादथ च तत्र दृश्यत्वमस्तीत्यनैकांतः इदं च वादिनं प्रत्येव नाद्
द्विविधविपक्षस्य सत्यत्ववादिनोऽसिद्धेस्तथा दृश्यत्वहेतावप्युक्तसाध्यतास्त्येतत्तंतुषु दृश्यत्वस्यात्यंताभाव
प्रतियोगित्वे तन्तूनामदृश्यततया साध्यासिद्धिप्रसंगादथ च दृश्यत्वमस्तीत्यनैकांतः इदं तूभयानुमतं तेनदेत।

तन्निष्ठात्यन्ताभावाभावात्पटस्य तत्प्रतियोगित्वलक्षणसाध्यासिद्धिस्तन्तूनाम
दृश्यताच्च स्यात् किंच प्रपंचस्य प्रामाणिकत्वे मिथ्यात्वानुमानानां धर्मिग्राह
कप्रमाणेन बाधः अप्रामाणिकत्वे चाश्रयासिद्धिः

दाह तन्निष्ठेत्यादिना अदृश्यताच्च स्यादित्यंतेन मिथ्यात्वसाधकानुमानजातस्य च साधारणदूषणमाह
किंचेत्यादिना बाध इति प्रमाणगम्यत्वस्यैव सत्त्वादिति भावः ननु न वयं प्रमितमप्रमितं वाश्रयमाश्रया। राम
महे नापि शशविषाणायमानमपि तु प्रतीतिमात्रसिद्धं प्रतीतिमात्रसिद्धस्याश्रयत्वोपपत्तेरित ४६

४७

CC-0. In Public Domain. Digitization by eGangotri

व्यतिरिक्तप्रमितत्वस्याप्याश्रयकोटिनिवेशने नकिंचनमानंपश्यामइत्यतआह प्रतीतिमात्रेति आश्रयस
र्थेः नप्रतीतिमात्रसिद्धस्य साधन दूषणोत्ते तथासति सर्वदर्शनाना मपिसाधनवाधनप्रसंगात्त
त्वोपप्लवप्रसंगात् कतोमतादृशानिसाधनानिदूषणानिवानसंति यानिप्रतीतिपथमपिनावतरेयुः शब्दे
नापितत्प्रतीतोताशक्यजननत्वादिति आश्रयोक्तविकल्पंसाध्यादिष्वतिदिशति एवमिति तथाहि तेषां

प्रतीतिमात्रसिद्धस्याश्रयत्वेचदूषणभूषणादेरपिप्रतीतिमात्रसिद्धस्यसर्वत्रसंभवात्सर्व
वादविधिनिषेधप्रसंगःएवंसाध्यहेतुदृष्टांतानामपिप्रामाणिकत्वेदृश्यपत्वहेतोस्तत्रानै।
कांतिकतात्वप्रामाणिकत्वेवासाध्यसाधनाद्यभावादनुमानासिद्धिः नाप्यागमःप्रपंचस्मि।
ध्यात्वेमाने

प्रामणिकत्वेसत्यत्वेनविपक्षतयातत्रवर्तमानोहेतुरनैकांतिकः स्यादप्रामाणिकत्वेचयथ्यापद्यम
प्रसिद्धविशेषणतास्वरूपासिद्ध्याश्रयहीनताः प्रसज्जेरन्निति भावः ननुमाभूदनुमानान्मिथ्यात्वमाग
मादागमिष्यतीत्यतआह नाप्यागमइति तत्रवक्त

Nepal Sanskrit University, Balmiki Campus, Kathmandu

नि·सु· व्यं किमेकमेवाद्वितीयमित्यद्वितीयशब्दात् ब्रह्मव्यतिरिक्तस्य मिथ्यात्वसिद्धिरिति मन्यसे किं वा सत्यं ज्ञान
टी·न· मनन्तमित्यनन्तश्रुत्या किं वा नेह नानास्तीति ब्रह्मणि नानात्वनिषेधात् आहोस्विदिन्द्रो मायाभिः पुरुरूप
४७ ईयत इति मायाभिर्बहुभवनाभिधानात् उत मृत्योः स मृत्युमिति द्वैतदर्शननिंदया न त्वत्राद्वितीयाविग्र
हे न तावदित्यादिना न युक्तं वक्तुमित्युक्तं तत्र हेतुमाह अद्वितीयशब्दस्येति यथा खल्वस्मिन् ग्रामे अयमे

तथाहि न तावदेकमेवाद्वितीयं सत्यं ज्ञानमनंतं ब्रह्मेत्यत्र ब्रह्मणो द्वितीयत्वानंतत्वप्रतिपादनात् द्वितीयवस्तुनोऽभावं प्रतीयत इति युक्तं वक्तुमद्वितीयशब्दस्य तत्सजातीयवस्त्वंतरनिषेधपरत्वादस्मिन् ग्रामेऽयमेक एवाद्वितीयः पुरुष इतिवत्

क एवाद्वितीयः पुरुष इत्यत्र शौर्योदार्यातिशयादिमान् सजातीयः पुरुषः प्रतिषिध्यते न तु तद्व्यतिरिक्तं समस्तं ४८
वस्तु न तत्र स्वहेतोस्तस्य तस्य वस्तुनस्तत्तत्प्रमाणोपनीतत्वात् अशक्यनिषेधत्वात्तद्वदिहापि समस्तमानोपनी राम
तवस्तु निषेद्धुमशक्यत्वान्नाद्वैतश्रुतिस्तत्सजातीयब्रह्मान्तरनिषेधतात्पर्येः भवत्वद्वितीयश्रुतेरियं गतिः ॥ ६॥ ४७

अनंतशब्दस्य को निवारकस्तत्राह अनंतपदस्य चेत्यादि वस्तुपरिच्छेदाभावस्य परस्पराभावाधिकरणत्वराहित्यरूपस्य लोकेऽप्रसिद्धतया तत्रागृहीतसंगतिकत्वात्कालपरिच्छेदाभावप्रकाशादो प्रसिद्धमभिधत्त इति भावः प्रागुत्तरकालीनौ प्रागभावप्रध्वंसौ अनेकान्योन्याभावपक्ष एकानधिकरणस्यापि तत्सिद्धेर्नाद्वैतसिद्धिरिति तदधिकरणत्वानधिकरणेत्युक्तं तृतीयं पक्षं निषेधति नेह नानास्तीति इदं हि वाक्यमिह परावमृष्टे प्रस्तुते कारणे ब्रह्मणि नानात्वं निषेधति तया च न नानात्वं किं त्वेकमिति स्यात् ब्रह्मव्यतिरिक्तस्य तु किमायातमित्यर्थः चतुर्थं निषेधति इंद्रो मायाभिरिति अत्र हि मायाः

अनंतपदस्य च प्रागुत्तरकालीनांतात्यंताभावपरत्वात्तथैव तस्य श्रुत्यंतेरन्योन्याभावाधिकरणत्वानधिकरणत्वस्याप्रसिद्धत्वेन तत्र श्रुत्यन्वययोगान्नेह नानास्ति किं च नेत्यादेः आगमस्य कारणे ब्रह्मणि नानात्वनिषेधपरत्वादिंद्रो मायाभिरित्यादेश्च तत्तद्धियद्वारकबुद्धिवृत्त्युपाधिभिर्मायाशब्दाभिधेयैः स्वशक्तिविशेषैर्वा भेदेन परमेश्वरप्रतिपत्तिविधिपरत्वेन प्रपंचनिषेधे तात्पर्याभावात् ॥

शब्दतबुद्धिवृत्तयोऽभिधीयंते चेतनश्चितं तत्तु मायेति चित्ताभिधायकतावगमान्मायाशब्दस्य तत्र च चित्तस्यैकत्वात्कथं मायाभिरिति बहुवचनोपपत्तिरित्यत उक्तं तत्तद्धियेति स्वतएकस्यैव सतश्चित्तस्यानेकेऽर्थोपाधिक वृत्तिभेदादिदं बहुवचनं अतस्तैरुपाधिभिः परमेश्वरो बहुधोपास्यत इत्यर्थः अथवा याः परमेश्वरस्येच्छाज्ञानक्रियाशक्तयो मायाशब्दाभिधेयास्तासामपि श्रुत्यादिषु मायाशब्दाभिधानदर्शनात्ताभिश्च परमेश्वरः प्रत्युपासकं बहुरूप आविर्भवति अवतारभेदैर्वा बहुधा व्यवह्रियत इत्यर्थः

वि॰सु॰
टी॰नं॰
४८

ननु मृत्योः स मृत्युमाप्नोति संसारात्संसारं प्रतिपद्यत इति भेददर्शनात्संसाराविमोककथनादेतत्वज्ञानत्वमवगम्यते अ
तत्ववत्तद्विषयस्य भेदस्यानर्थत्वमिति भेदस्य मिथ्यात्वमियमेव श्रुतिर्गमयतीति पंचमं पक्षं निरस्यति मृत्योरिति नास्याः
श्रुतेरत्र तात्पर्यमपुरुषार्थत्वात् अपितु भेदध्यानविधौ तत्स्तुत्यर्थं च भेददर्शननिंदा यथोदिते जुहोतीति विहितोदि
तहोमस्तुतयेऽनुदितहोमनिंदा प्रातःप्रातरनृतं ते वदन्तीति । अनुदितहोमस्य विहितस्य स्तुत्यर्थमुदितहोमस्य निंदा यथ
थाऽतिथये प्रद्रुतायेति ततोऽन्यपरादस्मात् प्रत्यक्षविरुद्धोऽयमर्थो न लभ्यत इत्यर्थः ननु प्रत्यक्षागमयोरुभयोः प्रमाण

मृत्योः स मृत्युमाप्नोतीत्येवंविधाया अश्रुतेर्भेददर्शननिंदयाऽभेदप्रतिपत्तिविधिपरत्वेन प्रपंचनिषे
धे तात्पर्याभावात् आगमस्य च रूपावगतौ पदपदार्थविभागप्रतिपत्तौ च प्रत्यक्षादिसाकां
क्षत्वात्प्रत्यक्षस्य चागमानपेक्षत्वात् ॥ त्वाविशेषकेन वैषम्येणेदमवधार्यते यत्प्रत्यक्षादिविरोधे श्रुतिरे

वतदनुरोधेन व्याख्येया न विपरीतमित्यत आह आगमस्य चेति अथवाऽऽगमस्वरूपपर्यालोचनयाऽनात्रतात्पर्यमि
त्युक्तं इदानीं भवतु वाऽऽगमस्तात्पर्यस्तथापि प्रत्यक्षादिभिर्विरोधे वा ध्यानपरत्वेनाभिप्रेताऽऽगमस्य दौर्बल्ये कारणान्याह आगम
स्य चेति रूपाहे नूनं न हि विरोधे तेषामेव बाधादिस्तु तत्र प्रतिज्ञायां संबंधः यथा हि शब्दः स्वरूपग्रहणे संगतिग्रहणे वाऽबा
धितं प्रत्यक्षादिकमपेक्षते तेन तथा प्रत्यक्षादिस्वरूपादिप्रतिपत्तौ शब्दप्रमाणमपेक्षते तेन सापेक्षनिरपेक्षयोर्विरोधे सापेक्षागम

ब्र॰सि॰टी॰ ४८
राम
४८

किंचपरस्परविगीततयाऽतिकलहैर्नैवतावद्बहुप्रहताआगमाः किमुतकल्पमविगीतानानुपहतप्रत्यक्षादिविरोधइत्याह नहिंस्यादित्या
दिनाब्रह्मणेब्राह्मणत्वायस्मालभतिर्विशसनपरापक्षिनगृह्यमाणेषोडशशस्त्राणिशस्यन्तेसप्तदशविशेषः षोडशीयथाह्येकस्यैवहिंसा
हिंसेग्रहस्यैकस्मिन्नेवग्रहणाग्रहणेहोमस्यैकस्यैकस्मिन्नेवप्रयोगेउदितानुदितकालसंबंधइतिपरस्परविरुद्धानधिगमयन्त्यागा
मोनतयाप्रत्यक्षादीन्याह प्रत्यक्षादेश्चेति सावकाशनिरवकाशयोर्निरवकाशंबलवदितिन्यायः सावकाशत्वागमाइत्याह आगमस्य
चोपचरितार्थत्वेनेति यथाह्यागमस्यमुख्यलक्षणागुणात्मकानेकवृत्तिमत्तया अत्यन्तमानुपपत्तावन्यतमाहात्यापिप्रमाणत्वनिर्वाहोन
तथाप्रत्यक्षादेर्हृन्यंतरमस्तिशब्दधर्मत्वाज्जात्यामित्यर्थः संजातासंजातविरोधिनोः संजातविरोधिदुर्बलंसंजातविरोधिनश्चागमाः प्र
मोपजातपदभेदाववोधकाध्यक्षादीननुवर्तमानाइत्याह पूर्वसिद्धतयेति किंचाप्युपगम्याविरोधमिदंप्राबल्यमभिहितंवस्तुतस्तु

नहिंस्यात्सर्वाभूतानि अग्निषोमीयंपशुमालभेत नब्राह्मणोनहंतव्यः ब्रह्मणेब्राह्मणमालभेत अतिरात्रेषोडशिनंगृह्णाति नाति
रात्रेषोडशिनंगृह्णाति उदितेजुहोति अनुदितेजुहोतीति च परस्परंव्याकुलत्वात् प्रत्यक्षादेश्चतदभावात् आगमस्योपचरितार्थत्वे
नापितत्सावकाशत्वादनवकाशत्वाच्चभेदग्राहिणः प्रत्यक्षादेः पूर्वसिद्धतया चागमेभ्यस्तस्यप्रतिष्ठितत्वान्नहिरोधेनेषामेव
बाधात् मृत्तिकेत्येवसत्यंत्रीणिरूपाणीत्येवसत्यंप्राणावैसत्यंसत्यस्यसत्यमित्याभवदिति च प्रपंचस्यसत्यत्वप्रतिपादनात् विवादास्प
दीभूतः प्रपंचः सत्यः प्रमाणसिद्धत्वादात्मवदिति अयंघट एतद्भिन्नघटाद्यभेदातिरिक्तभेदाश्रयः द्रव्यत्वात्पटवदिति

ऽऽविरोधशव
नास्ति आगमेभ्यएवप्रपंचसत्यतावगमादित्याह मृत्तिकेत्यादिना त्रीणिरूपाणीति लोहितशुक्लकृष्णानीत्यर्थः सदिति भूतत्रयंत्यदितिवा
य्वाकाशौद्वौ अत्रचसदितिखुररवश्रवणेनोपन्यस्तंभेदग्राहिप्रत्यक्षादीति येयमागमविभीषिकोक्ता तत्रप्रत्यक्षंसार्वजनीनमितिनतत्रकि
चिद्वक्तव्यमस्ति अनुमानंदर्शयति विवादेति प्रपंचमात्रस्यसत्यत्वसाधनेशुक्तिरूप्यसंसर्गोदोषायस्यात् तेषामपरोक्षतयाबाधनात्पाच
स्यदसद्विलक्षणतयामिथ्यात्वात्तथाघटाद्यनुगतसत्तांशेसिद्धसाधनतातइति अत्रपर्यविवादास्पदग्रहणं नचासिद्धोहेतुः प्रत्यक्षेप्रदर्शितत्वा
गमेभ्यश्चाविवादादिति भिन्नवस्तुसत्यत्वेऽनुमानमुक्तंभेदस्यापिसत्यत्वेऽनुमानमाह अयंघटइति अथवाव्यावहारिकतात्त्विकत्वादिस्वकपो

नि·सु·
टी·न·
४९

मेदाश्रयद्रव्युक्तेकल्पितमेदमादायासिद्धसाधनंतदर्थैवाध्यमेदातिरिक्तग्रहणंतावत्तिवाऽप्रसिद्धविशेषणता अद्वैतवादिनः सर्व
मेदानांवाध्यत्वादतउक्तं एतन्निष्ठेति एदार्थांतरनिष्ठमेदस्यैतन्निष्ठत्वाध्यमेदातिरिक्तमेदत्वेननाऽप्रसिद्धविशेषणतापक्षेचैतन्निष्ठवा
ध्यमेदातिरिक्तत्वंमेदस्यैतन्निष्ठातिरिक्तत्वान्नसंभवति एतन्निष्ठत्वादेव अतोवाध्यमेदातिरिक्तस्यमेदस्यसिद्धिः अतिरिक्तत्वंचात्रामेदा
नधिकरणत्वंनेननार्थांतरताऽस्यत्वनुमानतोपीति एवंप्रकारानुमानतद्द्यर्थः ननुप्रतिकूलतर्कपराहतत्वात्शंकितोपाधिदुष्टमिदमनुमानद्वयं
तथाहिमेदस्यमेदिनोवादृश्यवर्गस्यसत्यत्वेनएतज्ज्ञानस्यचकः —— संबंधइतिविवेचनीयंनतावत्संयोगस्तस्यगुणत्वेनद्रव्यमात्रहत्तित्वा
त् ज्ञानस्यगुणत्वात्द्रव्यत्वाभावात् नापिसमवायः आत्मसमवेतत्वाद्ज्ञानस्य नाप्यन्यः कश्चित्षट्पदार्थनियमात्गुणःसंभवति नाप्य।
भावःअभावतज्ज्ञानयोःसंबंधाभावप्रसंगात् किंचयत्रयत्रास्यांतर्भावस्तस्यतस्यतज्ज्ञानेनसंबंधोनस्यात्स्वदृत्तिविरोधादितितदेतद्दूषण

अनुमानतोविषदादेरात्मनांचसत्यमेदसिद्धिः नचमेदस्यासत्यत्वेदृग्दृश्ययोःसंबंधानुपपत्तिर्वाधिका ततस्मातिपत्तिहेतुभूतं
द्रियलिंगादेस्तत्तद्विषयसंबंधादेवतदुत्पत्तेस्तानाना ततद्विषयप्रतिनियमस्सिद्धावंतरेणापिसंबंधानरमतिप्रसंगाप्रसंगात् शब्दा
नरभ्यासस्संख्यादेश्चकर्ममेदप्रतिपादकप्रमाणस्यमेदंविध्यातेऽप्रामाण्यप्रसंगः ऽऽति नचेतिहेतुमाहतत्तदितिनियामको हि
संबंधःसंभवतिचतत्रनियमःतत्तज्ज्ञानानांतत्तदर्थैःस्वतंत्रसंबंधाभावेपितत्तज्ज्ञानजनकेंद्रियलिंगशब्दादेर्नानात्तदर्थैः सहसंबंधेनेत्यर्थः एवंप्र
तिकूलतर्कपरिहृत्यस्वानुमानस्यविपक्षेवाधकतर्कमाह शब्दांतरेति अयमर्थः शब्दांतराभ्याससंख्यासंज्ञागुणप्रकरणांतरैः कर्ममेदोनिरू
पितोद्वादशलक्षण्यांद्वितीयाध्याये तत्रयजतिददातिजुहोतीत्यादौ धातुमेदेनधात्वर्थमेदेपिभावनाभिधानेनचेतिसंदेहेधातूनांमेदेपि।
भावनावाचकलिङादेःसर्वत्रप्रत्ययमित्रयाऽभेदावगमात् धात्वर्थस्यचभावनांप्रतिगुणभूतत्वात्गुणमेदेनप्रधानमेदस्यान्याय्यत्वात् अमेद
एवेतिपूर्वपक्षस्यधातोरितिविवक्षितैकवचनेनसूत्रेणैकधातोरुपरिप्रत्ययविधानात्सर्वत्रधात्वर्थानुरंजितायाभावनायाःप्रतीतेरेकानुरंजि
तायाश्चान्यानुरंजनायोगात्प्रतिधात्वर्थंभिद्यतएवभावनेतिराद्धांतितं शब्दांतरेकर्ममेदःकृतानुबंधत्वादिस्यत्रायमर्थः शब्दांतरेधात्वंतरेसति ४९

नावच्छेदत्वात्तद्भावनायाः इति सोयं शब्दान्तरात्कर्मभेदः तथा समिधो यजति तनूनपातं यजती त्यादिषु पंचकृत्वो यजतिश्रुतौ किं प्रथमविहितस्यै
व यागस्य पुनः पुनरभ्यास उत पंचापि विविधय इति संदेहे शब्दान्तरे सति कर्मभेदस्य पूर्वाधिकरणे वर्णनात् इहैकस्यैव यजतेः पुनः पुनः श्रवणा।
त्तस्यैवायमभ्यास आदरार्थ इति पूर्वपक्षः अप्रवृत्तप्रवर्तकत्वाद्विधेः सर्वेषां च प्राथम्याहेतत्या विध्यनुवादविनिगमाभावाद्दानर्थ।
क्यपरिहाराय भिन्नविधित्वात् कर्मभेद इति सिद्धान्तितेन एकस्यैव पुनः श्रुतिरविशेषादनर्थकं हि स्यादित्यत्रायमर्थः एकस्य विधेः पुनः श्र
वणमपि एवं कर्मभेदकं कुतः अविशेषात् विध्यनुवादविशेषाभावात् इतरथा पुनः श्रवणं हि यस्मादनर्थकं स्यादिति आनर्थक्ये वा हेतु
रविशेषादिति सोयमभ्यासात्कर्मभेदः तथा सप्तदश प्राजापत्यान्पशूनालभेतेत्यत्र किं सप्तदशपशुकमेकं कर्मोत सप्तदश कर्माणि विधी
यन्ते इति संशये प्राजापत्यानित्यत्र बहुत्वैकशेषाणां पशूनां तद्धितेनैकप्रजापतिदेवताकत्वबोधनादेककर्मत्वमिति प्राप्यप्यराद्धान्तितं एककर्म
त्वे हि एक एवातिदेशः स्यात्तत्रैकपशुनिष्ठमेकादशावदानमतिदेशप्राप्तमेकपशौ निष्पन्नमितीतरेषामदृष्टार्थता स्यात् सप्तदश कर्म
त्वे तु प्रतिपशुमेकादशावदानसिद्धिरिति दृष्टार्थता ऽतः कृततद्धितेन देवतासंबंधनया देवतासंबद्धानामेकशेषेणेति सप्तदश कर्माणीति इदं भाष्यकारी
यं मतं वार्तिककारीयं तु तिस्र आहुतीर्जुहोतीत्यत्रैकस्य जुहोतेः श्रवणादेकहोमत्वे त्रित्वं तु एकादशप्रयाजादिवदावृत्त्येति प्राप्ते राद्धान्तः त्रित्व।
स्य तावज्जुहोतिसामानाधिकरण्यप्रसंगतो होमभेदकमेकातिरिक्तसंख्यायाः पृथक्त्वसामानाधिकरण्यस्वरसत्वान्न ह्यावृत्तिगम्याऽप
वाद एकादशप्रयाजादौ प्रवृत्तौ पंचत्वावधारणात् न चेह तथा बाधकमस्तीति होमभेद इति तदुक्तं पृथक्त्वनिवेशात्संख्यया कर्मभेदः स्या।
दिति संख्ययापि हेतुना कर्मभेदः स्यात् कुतः कर्मपृथक्त्वनिवेशात् कर्मपृथक्त्वेनैव तस्या निवेशात् एकातिरिक्तसंख्यायाः कर्मपृथक्त्वसामाना
धिकरण्यादित्यर्थः सोयं संख्यया कर्मभेदः तथाऽथैष ज्योतिरथैष विश्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेत्यत्र ज्योतिर्विश्वज्योतिः
शब्दयोः प्रकृतज्योतिष्टोमानुवादकत्वं कर्मान्तरविधायकत्वं वेति संशये सन्निधिशब्दस्य सर्वनाम्नः प्रकृतावमर्शित्वात् ज्योतिरादिशब्दस्य
तत्समानाधिकरणत्वात् पूर्वकर्मैवानूद्य सहस्रदक्षिणालक्षणगुणान्तरं विधीयते इति प्राप्ते ज्योतिष्टोमशब्दस्य ज्योतिरादिशब्दानां च
स्वरूपविलक्षणत्वात् भिन्नार्थत्वे संभवत्येकदेशलक्षणयैकार्थत्वकल्पनाया अगतिकगतित्वात् सर्वनाम्नश्च प्रस्तोष्यमाणपर॰

CC-0. In Public Domain. Digitization by eGangotri



मर्शितत्पापिसंभवात्तन्नामांतरंकर्मांतरंगमयतीतिसाधितं संज्ञाचोत्पत्तिसंयोगादित्यत्रअयमर्थः संज्ञाचपूर्वविलक्षणाकर्मभेदिकाकुतः उत्प
त्तिसंयोगात् कर्मस्वरूपज्ञापनसमयएवतत्स्यनाम्नःसंयोगादिति तथावैश्वदेव्यामिक्षावाजिभ्योवाजिनमित्यत्रद्रव्यदेवतासंबंधानुमि
तयागकेकिंपूर्वकर्मानुवादेनोत्तरत्रवाजिनगुणविधानमुतकर्मांतरंतद्गुणकमितिविशयेवाजिभ्यइत्यत्रवाजमन्नमेषामितिव्युत्पत्त्याऽमिक्षा
ऽन्नयुक्तविश्वेदेवदेवताककर्मानुवादेनवाजिनगुणविधानादेककर्मत्वमितिप्राप्तेवैश्वदेवीत्यत्रविश्वेदेवादेवताअस्याइत्यर्थेऽणप्रत्यय
विधानादेततीनेदमापराम्रृष्टामिक्षायास्तद्धिततनिर्दिष्टविश्वेदेवसंबंधेनश्रोततयाप्रबलेनसहवाजिभ्योवाजिनमितिपदद्वयात्मकवाक्या
वगतवाजिनसंबंधस्यविकल्पसमुच्चययोरभावाद्वाजिनगुणविशिष्टकर्मांतरविधानमितिसिद्धांतितं गुणश्चापूर्वसंयोगेवाक्यपोःस
मत्वादित्यत्रगुणश्चकर्मभेदकः अपूर्वकर्मसंयोगेपूर्वकर्मसंबंधाभावेसतिकुतःवाक्ययोःसमत्वात् संनिहितदावोक्तोभवतःततोऽवि
घातमनेककर्मेत्यर्थः सोयंगुणांतरात्कर्मभेदः तथाऽसंनिहितदेशकालनिमित्तफलसंस्कार्यसंबंधकर्मवाक्येषुमासमग्निहोत्रंजुहोतीत्या

नचतस्यलोकसिद्धभेदानुवादकत्वसंभवः तादृक्कर्मापूर्वभेदस्यलोकतोऽसिद्धत्वेचशब्दांतराद्यधिकरणानारंभप्र
सगात्

दिषुकिंप्रकृताग्निहोत्रादौमासादिगुणविधानमुततद्गुणकंकर्मांतरविधानमितिसंदेहेकर्मांतरविधानेगौरवप्रसं
गादग्निहोत्रशब्देनतदनूद्यगुणमात्रविधानमितिपूर्वपक्षितेमासादेरनुपादेयत्वयासाक्षाद्विधाना योगादग्निहोत्रादेश्वविच्छिन्नप्र
करणतयाप्रत्यभिज्ञाभावाच्चमासादिगुणविशिष्टकर्मान्तरमेवविधीयतेऽग्निहोत्रादिधर्मातिदेशार्थंचाग्निहोत्रादिनामोपदेशइतिप्रक
रणांतरात्कर्मांतरत्वनिरधारिप्रकरणांतरेप्रयोजनान्यत्वमित्यत्र अयमर्थः प्रकरणांतरेसतिप्रयोजनान्यत्वविधेयभावनान्यत्वस्यानु
पुनःपूर्वकर्मानुवादेनतत्रगुणविधानमितितत्रशब्दांतरंधातुभेदोऽभ्यासोविधेःपुनःश्रुतिःउत्पत्तिस्थाद्व्यादिसंख्यासंज्ञाचागमपूर्वगंचा
नुपादेयसंबंधोऽसंनिधिःप्रक्रियांतरमितिशब्दांतरादीनामुक्तलक्षणविचक्षणेःतदेतदखिलमभोनिधावेवनिर्धीयेतभेदमिथ्यात्वइति
ननुशब्दांतरादीनांनभेदेप्रामाण्यंतस्यलोकसिद्धत्वाऽप्रतिपाद्यत्वादित्यतआह नचतस्येतिभेदमात्रस्यलोकसिद्धत्वेप्यलौकिककर्मभे



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उपसंहरतितदेवमिति तत्रलक्षणंश्लोकेन संगृह्णाति सर्वेषामिति सर्वेषां भावानां मृषात्मता मिथ्यात्वमिदं यत्स्वाश्रयत्वेन संमतेऽत्यंता
भावप्रतियोगित्वे निःस्वम विद्यमानत्वमिति योजना श्लोकं विवृणोति तथाहीति अभिमता इति प्रमितव्यावृत्तिस्तेन च बाधः परिहृतः नन्वेतावता
पि किमिति मिथ्यात्वमिति चेन्न त्ववक्तव्यं किमस्मत्संवित्तिरुत स्वतंत्रा एव संवित्तिर्नाद्यः प्रमाणाभावादित्याह नहीति द्वितीयं प्रतिषेधति
नत्रापीति अयमर्थः नतावदात्मवदेषामनाश्रितत्वं कार्यत्वेन समवायिकारणाश्रितत्वात् सामान्यादीनामपि धर्मत्वात्समानमाश्रितत्वं तस्मा
दाश्रितानामन्यत्राप्यभावात्स्वाप्रदेशेऽपि चेदसत्त्वमापद्यते एवं तदा बलात् मिथ्यात्वमिति ननु भवत्वाश्रितानामेवं मिथ्यात्वमनाश्रितानां पर
माणवाकाशादीनामाश्रयाभावेनोक्तलक्षणाभावात् मिथ्यात्वेऽव्याप्तिरित्यत आह न च निराश्रयेष्विति लक्षणपदं तु मध्यस्थमणिवन्न

तदेवं मिथ्यात्वलक्षणप्रमाणयोः संभवादनुमानागमाभ्यां प्रपंचस्य सत्यत्वापादनान्न मिथ्यात्वमिति अपास्तं न तावल्लक्ष
णासंभवः यतः सर्वेषामपि भावानामाश्रयत्वेन संमते प्रतियोगित्वमत्यंताभावं प्रति मृषात्मता तथाहि घटादीनां भावानां स्वा
श्रयत्वेनाभिमतास्तंत्वादयो येन तन्निष्ठात्यंताभावप्रतियोगित्वेन तेषां मिथ्यात्वं नहि तेषामन्यत्र सत्तासंभविनी तत्रापि चेत्सा न
स्यात्तदा गलेपादुकान्यायेन मृषात्वमेव पर्यवस्येत न च निराश्रयेषु निःस्वेषु भावेषु सा नास्तीति लक्षणस्याव्याप्तिः ब्रह्मव्यति
रिक्तस्य कृत्स्नस्य कार्य्यतया कारणाश्रितत्वस्य व्यवहारदशायां रजतादेरिव शुक्त्याद्याश्रितताया स्वीकारात् नाप्यतिव्याप्तिः।
सत्यस्य ब्रह्मणो निराश्रयत्वात्तस्य तन्निष्ठात्यंताभावप्रतियोगितायाः शंकितुमप्यशक्यत्वात्

॥ यत्तेन सत्ताभावाल्लक्षणस्यम
पि पर्यवस्यतीति वियदधिकरणाद्युक्तन्यायेन तेषामप्यस्यैव कार्य्यत्वमित्यर्थः कार्य्यत्वं चेदं कल्पितत्वं तेन नाविद्यायामव्याप्तिः यथा चैतत्तथा
द्वितीयपरिच्छेदे प्रसाधयिष्यते अद्वितीयासंगस्य ब्रह्मणः कथं मिथ्याभूतवियदाद्याश्रयत्वमिति मतिमपाकर्तुं व्यवहारदशायामित्युक्तं न
तु सन्मात्रं ब्रह्म सत्ता च घटपटाद्याश्रिताऽतस्तत्राप्युक्तलक्षणस्य शक्यसमर्थत्वाल्लक्षणस्यातिव्याप्तिः स्यादित्याशंक्याह नाप्यतिव्या
प्तिरिति सत्यसन्मात्रं ब्रह्म तस्य तु घटादिसमवायोऽसिद्धः घटादीनामेव तत्र कल्पितत्वादिति भावः ॥ ९ ॥ ९ ॥ ९ ॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

१
त्रि·सु· यत्तु पूर्वपक्षिणोक्तं संयोगादिभिः स्वात्यन्ताभावसमानाधिकरणैरर्थान्तरतेति तद् दूषयति न च परैरिति न च वस्तुसतां संयोगादीनाम
दी·न· त्यन्ताभावसामानाधिकरण्ये प्रमाणमस्ति व्यवहारस्तु विभ्रममात्रशरीरैरनिर्वचनीयैरपि सेत्स्यतीति न सोऽस्मत्साधक इति भावः ननु
५१ किमिति जलाञ्जलिर्दीयते यावता भावाभावावयवहाय भावभेदेष्वेव गोत्वाश्वत्वघटत्वप्रभृतिष्वयं प्राणान्धारयतीत्यत आह भावाभाव
योरिति परीक्षकाणां परिपन्थभावहि गोत्वाश्वत्वयोस्तत्त्वविरोधः अपि तु परस्परात्यन्ताभावाविनाभूतत्वं तद् यदि भावाभावयोर्न विरोधः
कानुमानतदा तद्घातयोर्विरोधवार्त्तेति भावः नन्वेकस्मिन्नपि प्रदेशभेदमादाय संयोगादेर्वर्त्तते अतो न विरोधोच्छेद इति निरूढगतेः

^भावा

न च परैः प्रदेशवृत्तितयाभ्युपगतेषु संयोगशब्दादिषु स्वस्वेष्वपि लक्षणस्य सद्भावादर्थान्तरतात्यन्ताभावयोरेकाधिकरणत्वाभ्यु
पगमे सर्वत्रैव तथाभावापत्तेः विरोधस्य जगति दत्तजलाञ्जलिताप्रसङ्गात् भावाभावयोर्हि साक्षाद्विरोधस्तत्त्वेनैवाभ्य
त्रैतिपरीक्षकपरिषदां संमतत्वात् प्रदेशोपाधिभेदेन वा तत्र विरोधसमाधाने भावात्यन्ताभावयोर्भिन्नाधिकरणत्वेन लक्षणस्य
तत्र सत्त्वे कुतः संभवः कुतस्तरां चातिव्याप्तिः कुतस्तमां चार्थान्तरतातदेवं न मिथ्यात्वनिरुक्तिः नापि मानासत्त्वे अनुमानसद्भा
वात् तथा हि अग्निनः स्वांशगात्यन्ताभावस्य प्रतियोगी नः अंशित्वादितरांशिवदित्येवं गुणादिषु ॥ ८ विमतः पटः एतत्तन्तुनिष्ठा
त्यन्ताभावप्रतियोगि अवयवित्वात्पटान्तरवत् ऽऽ पूर्वपक्षिणो मतमाशंक्यातिव्याप्तिं परिहरति प्रदेशेति कुतः संभव इति तदंगीकारे

मिथ्यात्वं अंगीकारप्रयुक्तत्वादर्थान्तरतायाः स्यादेतत् यद्यपि लक्षणमिदमसङ्कीर्णं तथापि तल्लक्षणलक्षितस्य मिथ्यात्वस्यात्र सद्भावे किं प्र
माणं न हि लक्षणमस्तीति सर्वत्र तत्सत्तासिध्यत्यतिप्रसंगादित्यत आह नापीति अंशिनोऽवयविनः स्वावयवनिष्ठात्यन्ताभावप्रतियो ५१
गित्व इति प्रतिज्ञायां हेतुमाह अंशित्वादिति इतरावयवीवेति दृष्टान्तः अनवयविरूपगुणादिष्वतिदिशति दिगेषैवेति दिक् मार्गः
श्लोकोक्तमनुमानं विवृणोति विमत इत्यादिना पटमात्रं पक्षीकृत्यैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वे साधितेऽर्थान्तरता पटान्तर। एम
स्यैतत्तन्तुनिष्ठत्वाभावात् तन्निवृत्त्यर्थं विमत इत्युक्तं पटविशेषणमित्यर्थः ॥ ८ ॥ ९ ॥ ॥ ७ ॥ ९ ॥ ॥ ५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वत्र चैवं विशेषणावपसीकर्तव्यः अत्रैतत्पटारंभकास्तंतव एतत्तंतवः अन्योन्याभावादिव्यवच्छेदार्थमत्यन्ताभावग्रहणं तंतुनि-
ष्ठात्यंताभावप्रतियोगीत्युक्ते तंत्वंतरमादायार्थान्तरतात तदर्थमेतत्तंतुनिष्ठेत्युक्तं पटान्तरे त्वेतत्तंतुभिरनारब्धेषु प्रसिद्धसाध्यअव
यवित्वात् अवयवित्वेनस्मतत्वात् तेनन प्रतिज्ञाहेत्वोर्विरोधः दिंगोपिवेत्यतद्धि हपोति एवमिति एतद्रूपमेतत्तंतुनिष्ठात्यंताभाव
प्रतियोगिरूपत्वादितररूपवत् एवं स्पर्शादिष्वपि एतत्स्खलनमेतत्तंतुनिष्ठात्यंताभावप्रतियो गिचलनत्वादन्यचलनवत् तथा
तंतुत्वं तत्तंतुनिष्ठात्यंताभावप्रतियोगिजातित्वाद्घटत्ववत् एवं सतादयोप्यनुमेयाः एवं समवायेपि द्रष्टव्यं अयमेतत्स्वविशेषः एतदा
त्मनिष्ठात्यंताभावप्रतियोगीविशेषत्वादात्मान्तर्गतविशेषवदिति विशेषेषु स्यादेतत् पटादीनां तत्वादिषु यदत्यंताभावप्रतियोगित्वं

एवमेतद्गुणकर्मजात्यादयोपि तत्तंतुनिष्ठात्यंताभावप्रतियोगिनः तत्तद्रूपत्वादितरतत्तद्रूपवदित्येवमादिप्रयोगः सर्वत्रै
वोहनीयः ननु किं प्रामाणिकैतन्निष्ठात्यंताभावप्रतियोगित्वं साध्यं किं वा प्रातिभासिकात्यंताभावप्रतियोगित्वं नाद्यः अभावा
नां प्रामाणिकत्वे तैरेव द्वैतापत्तेः प्रामाणिकाभावप्रतियोगित्वे च भावानामपि प्रामाणिकतया न मिथ्यात्वसिद्धिः न द्वितीयः रज
ते सो सविभ्रमे सी समेवेतन्नरजतमिति रजते रजतत्व —— प्रतिषेधे प्रातिभासिकात्यंताभावप्रतियोगिनोपि
रजतत्वस्य मिथ्यात्वेनार्थान्तरत्वापातादिति चेन्नैवं अभावानां प्रामाणिकत्वेपि सद्द्वैताव्याकोपात् ।।साध्यते सकिंप्रा

माणिकोऽप्रामाणिको वास्यादिति विकल्प्य दूषयति पूर्ववादी किं प्रामाणिकेत्यादिना प्रामाणिको यस्तन्निष्ठात्यंताभाव इति विग्रह
स्तैरेवेति यानत्यंताभावान्प्रति प्रतियोगित्वं तंतुप्रत्यासीपटप्रपंचादेः साध्यते तैरेव प्रामाणिकैरित्यर्थः किंच एष त्वभावानां स्वभा
वोयत्प्रतियोगिनिरूपणीयत्वं तथा च यद्यभावाः प्रामाणिकाः सुतरां तन्निरूपकाभावाः तथा चाद्वैतहानेर्वनोदेतीत्याह प्रामाणिका
भावेति एतेन सद्द्वैतमेवाद्रियत इति वदतिनां किं वदंत्यपोदितां अप्रामाणिकपक्षं दूषयति नेति अप्रामाणिकात्यंताभावप्रतियो
गित्वं न मिथ्यात्वं सम्यसैव रजतत्वस्यासौ सविभ्रमविषये रजते भ्रांतिप्रामाण्यंताभावप्रतियोगित्वस्य परैर्मिथ्यात्वास्वीकारादित्याह रज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इममभ्युपगमं स्वजनानुहंतारहस्यमादाय परिहरंति कथं च व्यावहारिके तिनप्रमाणमात्रगम्यत्वात् सत्त्वमायाति देहात्मत्वादौ त थाभावाभावात् अपि तु तात्विकप्रमाणागम्यत्वात् न चैतत्तुच्छव्यतिरिक्तस्याभावस्याभावस्य वास्तित्वेनाद्वैतसंकोचावकाशः स्या दिति भावः यत्तु प्रामाणिकाभावपक्षे प्रतियोगिभूते भावेऽद्वैतविरोध इति तन्न परिहरंति नापि प्रामाणिकेति अयमर्थः नैवं व्याप्ति रस्ति यत्प्रामाणिकाभावप्रतियोगि तत्प्रामाणिकमिति यतः शुक्तीदमंशे रजताकारयोरेकज्ञानोपनीतस्य — संसर्गस्य प्रामाणि कत्वं नाभावप्रतियोगिनोपि क्वचिदपि देशे कदाचिदपि काले सत्त्वमन्यथाख्यातिवादिभिर्नेष्यते तथाऽख्यातिवादिभिः संसर्ग

कथं च व्यावहारिकप्रमाणोपस्थापितस्य भावैर्भावे रभावैर्वा तत्तावेदकप्रमाणोपनीतस्याद्वैतस्य व्याकोपाऽऽशंकावका शः नापि प्रामाणिकाभावप्रतियोगिनोपि शुक्तीदमंशरजताकारद्वयालिंगितस्य संसर्गस्येदंरजतमित्येकज्ञानोपनी तस्य केवलतद्व्यवहारोपनीतस्य वा धीरूपरजताकारोपारोहिणो वह्निधूमस्य वा क्वचिद्देशकालेवाकेनचिदपि वा दिनासत्त्वाऽऽस्वीक्रियते येन प्रामाणिकाभावप्रतियोगिनः सन्तो भावाः प्रतिपद्येरन् द्वितीयस्तु विकल्पोऽनंगीकारपराहतः नच धर्मिग्राहकप्रमाणबाधः धर्मिणस्तत्तावेदकप्रमाणासिद्धत्वानभ्युपगमात् नह्याश्रयासिद्धिरिति चेन्न नसांव्या वहारिकप्रमाणोपनीतस्याऽऽश्रयत्वोपपत्तेः प्रपंचसत्तावेदकप्रमाणविषयः धर्मितादात्म्यवदिति चेन्नव्यात्मत्व

ज्ञानाभावेपि संसृष्टव्यवहारोपनीतस्य संसर्गस्य तथा विज्ञानवादिभिरपि धीरूपं यद्रजतं तन्नारोपितस्य वह्निधूमस्यान्येवं यथा तद्गतं व्यभिचारः यादिति यत्तु प्रामाणिकाभावप्रयुक्तदूषणमुक्तं तदभावस्य प्रामाणिकत्वास्वीकारान्निरनुयोज्यानुयोगद्रत्याह द्वितीय इति यस्त्विति यत्वाश्रय स्य प्रामाणिकत्वाप्रामाणिकत्वविकल्पेन दूषणमुक्तं तत्परिहरति नचेति प्रमाणमात्रगम्यस्यात्यंतिकसत्ताभावादिति भावः सत्त्वे चेन्नास्ति तर्हि असदेव तथा च शशविषाणवदेवानर्थक्रियासमर्थमिति शंकते नहीति देहात्मभावादिवद्व्यावहारिकसत्त्वमादाय परिहरति नसांव्यवहा रिकेति यथा च सत्त्वसद्विलक्षणाऽपराकोटिस्तथाऽनिर्वचनीयवादे निर्वस्यते नत्तावेदकप्रमाणगम्यत्वाभावेन धर्मिग्राहकबाधः परिहृतस्ते

ननु कथमात्मत्वमुपाधिः साध्यव्यापकत्वानिर्णयात् तथाहि यत्रात्मत्वं नास्ति तत्रानन्त्वावेदकप्रमाणगम्यत्वमपि नास्तीति साध्याभावे
नोपाध्यभावव्याप्तिरेष्टव्या न चैषा शक्यनिर्णया आत्मेतरहिते प्रपंचे साध्याभावानिर्णयात् तस्मात्पर्वतेतरत्वादिवन्न्यसेनतोपसिम्यत आह
न च व्यतिरेकेति शुक्तिरूप्यसंसर्गादौ सर्वेषां प्रमाणायोग्ये शंका उभयाभावो निर्णेतुमित्यर्थः अनैकान्तिकतां चाह धर्मित्वेति संसर्गधर्मि
णोऽतिसंसर्ग एव धर्मी हेतोस्तत्रावृत्तिमाशंक्य तेनासाविति परिहरति नेति अयमर्थः मिथ्यात्वादिर्नोमेव हेतुं प्रति संसर्गो धर्मी न वा आद्ये धर्मि
त्वमशक्यनिषेधं द्वितीये व्यशक्यनिषेधमेव निषेधकहेतोराश्रयासिद्धत्वादिति यत्तु प्रतीतिमात्रसिद्धस्य साधनादित्वेऽतिप्रसक्तिरित्युक्तं त
द्व्येवं सति परिहृतमित्याह एतेनेति व्यावहारिकप्रमाणसिद्धस्य साधनदूषणत्वाभ्युपगमेनेत्यर्थः एतेनेत्येतदेव विवृण्वन् व्यावहा

न च व्यतिरेकासिद्धिः अनात्मनः शुक्तिरजतसंसर्गादेः सत्त्वावेदकप्रमाणाविषयस्योभयवादिसिद्धस्य व्यतिरेकोपसंहार
स्य लभ्यसद्भावात् धर्मित्वहेतोः शुक्तिरजतादिसंसर्गे धर्मिणि व्यभिचाराच्च नासौ धर्मी मिथ्यात्वादिति चेत् न एतमेव हेतुं
प्रति धर्मित्वाधर्मित्वयोस्तदयोगात् एतेन प्रतीतिमात्रसिद्धस्याश्रयत्वे दूषणभूषणादेरपि तथाभूतस्य सुलभत्वा
त् सर्ववादविधिनिषेधप्रसंगाद्व्यवस्था स्यात् वादिप्रतिवादिमध्यस्थानां प्रमाणसिद्धमेवेति संमतमालंबनतया त्रिच
तुरकक्षाविश्रान्तस्यानन्तदाभासलक्षणानालिंगितस्याश्रयस्य दूषणभूषणादेश्च तत्र तत्र कथायां गतानामंगीकारात् तादृ
शव्यावहारिकप्रमाणसिद्धस्यैव च व्यावहारिकसत्यत्वेन स्वीकारात् सर्वथाबाधवैधुर्यस्यागमेतरप्रमाणैरसर्वज्ञेन
ज्ञातुमशक्यत्वात्

रिकप्रमाणशरीरमेव दर्शयति वादिप्रतिवादीत्यादिना त्रिचतुरकक्षाविश्रान्तस्येति त्रिचतुरपर्वस्वबाधितस्येत्य
र्थः स्यादेतत् कतिपयपुरुषस्य कतिपयकालं बाधविधुरमित्येव बोधविषयस्य साधनादिभावश्चेदभ्युपेयते तर्हि सिद्धान्तविरोधः यतो व्या
वहारिकसत्त्वयुक्तस्यैव वादिभिः साधनादित्वमंगीक्रियत इत्यत आह तादृशेति ननु किमित्ययं संकोचः आत्यन्तिकमेव सत्त्वं किं न स्वीक्रियते
इत्यत आह सर्वथेति सर्वपुरुषसर्वदेशकालापेक्षयेत्यर्थः तर्हि किं ब्रह्मणोऽपि तादृशं सत्त्वमशक्यज्ञानमित्यत उक्तं आगमेतरेति न त्वागमेन
रपि प्रमाणैः सर्वज्ञेन केनचित्तादृशं सत्त्वं ज्ञायतामित्यत उक्तं असर्वज्ञेनेति सर्वज्ञस्य तु कस्यचित्तादृशं प्रमाणमस्ति प्रपंचविषयमित्यत्र नार्वाग्दृशं प्रमाणमस्ति प्रत्युतागमविरोधादभावनिर्णय इति भावः

CC-0. In Public Domain. Digitization by eGangotri

वि॰ प्र॰
टी॰ न
५३

व्यावहारिकसत्त्वं नाम न सत्त्वविशेषः अपि त्वेवंविधज्ञानविषयत्वमित्यनेनैव भट्टपादोक्तदूषणमप्यपास्तमित्याह एतेनेदमिति संवृ
तिसत्यमिति यदुद्दिश्यते तेन दूष्यते संवृतेनेनु सत्यत्वमिति अत्र च संवृणोतीति न तत्त्वमिति संवृतिरविद्या तस्याः सत्यत्वमयुक्तं तत्र हेतुमाह
सत्त्वभेद इति इदं संवृतिसदिदं परमार्थसदिति वदतां किं सत्त्वविशेषः कश्चित्संवृतिः सत्त्वं नाम स्वीक्रियते उतासदेव हितोपि सत्यशब्देनार्थ
वान्तरत्वमेवाह सत्त्वभेद इति कुतोयं सत्त्वभेदो न कुतोपि प्रमाणादित्यर्थः किमिति प्रमाणाभाव इति विरुद्धत्वादित्याह सत्त्वा चेति विरुद्धता
ज्ञाति व्यक्तिभावो नास्तीत्युक्तं इदानीं सदसतोः परस्परविरुद्धयोः सत्त्वं न जाति संवधोपि न घटत इत्याह सत्यत्वमिति नेत्र दृष्टान्तः नहि वृक्ष
त्वमिति एतेनेत्यस्यैव विवरणं वस्तुतः इति न चात्रानेजन्निष्ठत्वमुपाधिरेकाशादौ साध्याव्यापकत्वात् नाप्यनेतन्निष्ठत्वं तस्यैव साध्यत्वात्

एतेनेदमपास्तं परा ह भेदाच्चाप्यौः संवृतेनेनु सत्त्वं सत्त्वभेदः कुतोन्वयं सत्त्वा चेत्संवृतिः केयं मृषा चेत्सत्यता कथं १ सत्
त्वं न च सामान्यं मृषार्थपरमार्थयोर्विरोधात् नहि वृक्षत्वं सामान्यं वृक्षसिंहयोरिति वस्तुतोऽसत्यस्यैव यावद्बाधं देहात्मभावव
ल्लौकिकवैदिकव्यवहाराङ्गतया सत्यत्वेन व्यवहारात् नायमसिद्धो हेतुः परस्याशिलत्वादिनो रविवादात् नापि विरुद्धः एतत्त
न्तुनिष्ठात्यन्ताभावाप्रतियोगिनि विपक्षे आत्मनि अशिलत्वस्याहृतेनानैकान्तिकोपि विपक्षाद्व्यावृत्तेरेव इह तन्तुषु पट इत्यादिना एव
प्रत्यक्षेण तन्तुनिष्ठतया पटस्यावगमात्तदपह्नवविषयतया कालात्ययापदिष्टतेति चेन्मैवम् ॥

नाप्येतन्निष्ठत्वरहितत्तया प्रतीयमानत्वम् संयोगादौ न च साध्याव्याप्तेः एतेनैतद
वयवानारब्धत्वमपि निरस्तं न च द्रव्यत्वविशेषितं गुणादौ साध्याव्याप्तेः न च द्रव्यत्वविशेषिते साध्ये द्रव्यत्वविशेषितो यमुपाधिः व्यतिरेकव्या
प्त्यसिद्ध्या पक्षेतरत्वादिति स्वरूपासिद्धिं परिहृत्य विरुद्धत्वं परिहरति नापि विरुद्ध इति अत्रत्यात्मापि पक्षत्वस्य सर्ववस्तुस्वरूपतया त
न्तुनिष्ठात्यन्ताभावाभावात् न च तस्मिन्नित्यपर्यवशितं वर्तत इत्यर्थः एतेनैतन्निष्ठगुणादिव्याख्यातं एवमेतदत्यन्ताभावस्यैतन्न तन्तुनिष्ठतास्वी
कारे तस्याप्येतन्निष्ठत्वाङ्गीकारे तु तदभावादेव बाधं शङ्कते इह तन्तुष्विति परिहरति मैवमिति यत्तद्वाचामाभिमतग्रहणेन बाधपरिहा
र इति न ह्येतदुत्थानं यथा ह्याकाशनीलिमग्राहिप्रत्यक्षविरोधेप्याकाशमरूपि विभुत्वादात्मवदित्याद्यनुमानमुदेति तत्त्वकस्य हेतोः दृढ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नन्वनुमानबाधाभिप्रायेण प्रत्यक्षाभासीकरणं सर्वत्र सुलभमिति दह नानुस्मृतानुमानेपि न प्रत्यक्षस्य बाधः स्यादिति गतं कालात्ययापदि
ष्टकथमेतत आह नचैवं सतीति हेतुमाह तत्रतत्रेति अयमभिसंधिः अग्निरनुष्णत्वत्र निषेध्यस्योष्णत्वं क्वचित्प्रमितं न वा न यदि तदा प्र
तियोग्यप्रमित्याऽभावप्रमित्यभावात् अप्रसिद्धविशेषणता न च प्रांतिसिद्धस्य निषेधोऽर्थक्रियायां वाधाभावात् तस्मात्प्रमितमिति वक्त
व्यं न च तदग्निव्यतिरिक्तस्थलेऽस्तीत्युभयवादिसंप्रतिपन्नमस्ति तत्र प्रमाणमतस्तद्विरोधादनुमितिर्नोदेतीत्यनिरूढैव बाधप्रवृत्तिरिति प्रकृ
ते तु न तथोपजीव्यमस्ति किंचित्प्रमाणं येन बाधः स्यादित्याह प्रकृते चेति प्रत्यक्षविरोधं परिहृत्य यदुक्तं पूर्ववादिना प्रपंचः सत्यः प्रामाणिकत्वा
दिति तद्विरोधं परिहरति एतेनेति तस्यैव विवरणं प्रमाणेति नन्वेवं तदेव किं न स्यात्प्रमाणमिति तत्राह यत्रेति अथवा प्रत्यक्षविध्वंसनन्यायं कैमु
पटस्यैतत्तंतुनिष्ठात्यंताभावप्रतियोगित्वमंगीकुर्वता तस्य प्रामाण्यानंगीकारादिह न भस्मिनीलिमेति प्रत्यक्षाभिमतप्रत्य
यबाधेनारूपित्वानुमानप्रवृत्तिवदत्राप्यनुमानप्रवृत्त्युपपत्तेः नचैवं सति दहनशैत्यानुमानादेरप्यप्रतिबद्धप्रसरतया काला
त्ययापदिष्टकथा सर्वत्रास्तमियादिति वाच्यं तत्रतत्रोभयवादिसंमतप्रबलप्रमाणोपरिपंथिनि जाग्रति तस्यानिरंकुशप्र
सरत्वात् प्रकृते च तथाभावाभावात् एतेन प्रमाणसिद्धत्वादिति प्रत्यनुमानविरोधोऽपास्तः प्रमाणसिद्धत्वस्यैवासिद्धेः
यत्र प्रत्यक्षमपि न तत्त्वावेदकं प्रमाणं तत्र का कथा तन्मात्रोपजीविनो वराकस्यानुमानादेः प्रमाणतायाम् यत्तु नेदं तस्य घ
टस्याद्रव्यत्वादेतन्निष्ठबाध्यभेदातिरिक्तभेदवत्त्वानुमानं तदप्यद्वैतागमविरोधात् कालात्ययापदिष्टमित्युपेक्षणीयम् मृत्तिके
त्येवसत्यमि त्याद्यागमेन प्रपंचस्य सत्यतावगमादद्वैतागम एवोपचरितार्थः किं न स्यादिति चेत्॥ तिकन्यायेन संभाव्य मा
नसर्वोनुमाने घटितिदृष्टानियत्रेति असिद्धेर्वेवाविवरणमिदं अनुभवविरोधपरिहाराय तत्त्वावेदकमित्युक्तं यत्तु भेदसत्यत्वेऽनुमानमुक्तं तदनूद्य नि
राकरोति यत्तुनरिति अयं घट एतद्घटत्वे सति एतन्निष्ठबाध्यभेदत्वानधिकरणभेदाधिकरणं न भवति द्रव्यत्वात्पटवदित्यादिना सत्प्रति
पक्षतापि द्रष्टव्या न च मृदनारंभकत्वमुपाधिः व्यतिरेकव्याप्त्यसिद्धेः परसिद्धावसाध्यप्रसिद्धिः ननु कथमद्वैतागमविरोधस्तस्यागमांतरविरो

धेनानन्यत्वादिति शंकते मृत्तिकेत्येव सत्यमित्यादिना

वि.प्र. पौर्वापर्यपर्यालोचनयाद्वैते श्रुतिशेषत्वमितरश्रुतेः स्वीयेन तत्त्वमस्यादिसत्यत्वमपीयं श्रुतिः प्रतिपादयेत् तेषोविरोधः स्यात् अतः
टी.न कारणव्यतिरेकेण कार्यस्यानिर्वचनीयत्वमित्येतावन्मात्रपरा सा श्रुतिरद्वैतश्रुतिशेषत्वप्रधानत्वादनन्यपरत्वमित्यभिप्रेत्याह ननु सा अन्यपरत्वादिति
५४ एकविज्ञानेनेतिवाक्यान्तरश्रुतं भवतीत्यनेनेति शेषः तथा सर्वकारणतया सर्वकार्यैरनन्यत्वप्रदर्शनेनेति सदेव सोम्येदमित्यादिनेति शे
षः अथ कुतो वास्तवसत्त्वमेव न प्रतिपाद्यत इति चेत् तत्राहाविरोधादिमाह एतदात्म्यमिति एतेनेत्यस्य परत्वादित्यर्थः बाधकतर्कसंभवाच्च
शं किन्नामऽप्रयोजकत्वं सत्यत्वानुमानमित्याह दृग्दृश्ययोरिति पूर्ववाद्युक्तामन्यथोपपत्तिमनूद्य दूषयति नचेति —— नायं सावित्रिकईश्व

ननु तस्यान्यपरत्वात् तथाहि एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय ब्रह्मणः सर्वकारणतया सर्वकार्यैरनन्यत्वप्रदर्शनेन तां
प्रतिज्ञामुपपादयति लोकेपि घटरुचकादिकार्याणां मृल्लोहादिकारणादनन्यत्वं दर्शयति मृत्तिकेत्येव सत्यं त्रीणि रूपाणी
त्येव सत्यमित्यादिना न तु तेषां वास्तवत्वमभिप्रेति येन तादात्म्यमिदं सर्वं तत्सत्यं स आत्मेत्यनेन ब्रह्मण एव सत्यत्वप्रतिपादन
२ विरोधात् एतेन मिथ्यात्वानुमानस्यागमविरोधोऽप्यपास्तः दृग्दृश्ययोः संबंधानुपपत्तिप्रसञ्जनात्वानुमानस्य बाधिका न च करण
संबंधादेव संबंधोपपत्तिः ईश्वरज्ञानेऽकरणजन्येपि विषयाणां स्फुरणात् करणजन्यज्ञानेपि योगिज्ञाने सुषुप्तावस्थायामे
नः करणसंबद्धानामतीतानागतानां बाह्यानां च स्फुरणात् न च मनसो बाह्यैरर्थैः संबंधः परजन्यबाह्यमेन इति न्यायपा
न अस्मदादीनां चैन्द्रियिकविभ्रमे शुक्तिर्दिया संबद्धानामेव स्फुरणाभ्युपगमात् अस्मदादिप्रमाणजन्येपि ज्ञाने सोपरैववदत्तर

रज्ञानस्य नित्यस्य तद्विषयाणां च नित्यत्वादस्यसंयोगादित्यर्थः अथ जन्येष्वयं नियम इति नहि तेष्वप्यव्याप्तिरित्याह करणजन्येष्वपीति सुषुप्ताव ५४
स्थायां बाह्यानामनोयोगमात्राद्वेदाग्रेपार्श्वे ज्ञानमितिनार्के कालमत अतीतानागतानां चाविद्यमानत्वादेव संबंधाभावः आह अथ च विषयाल
ङ्गपरिस्फुरतीत्यव्याप्तिरित्यर्थः ननु सुषुप्तावस्थायां कस्य मव्याप्तिर्योगिनां मनो लक्षणेन्द्रियसंबंधादेव तत्रापि नियमोपपत्तिरिति तत्राह न च मन
नः सइति अथ विशिष्टादृष्टवशात्मनःसंबन्धवियन्मनोयोगियोगिज्ञानं विहायायं नियमइति नहितेष्वव्याप्तिरित्याह अस्मदादीनां चेति अधिष्ठान राम
संहितसंबद्धत्वेष्वारोप्यमानस्य संयोगादभावात्संस्कारद्वारा प्रत्यासत्तेरस्याति प्रसंगितादिति भावः अथ विभ्रमनातत्त्वयथा तथा भवतु प्रमा ५४

[illegible]

CC-0. In Public Domain. Digitization by eGangotri

तत्तांशस्येति तद्देशकालविशिष्टांशस्येत्यर्थः एतच्च प्रत्यभिज्ञानस्यानुभवैकत्ववादे न तु चक्षुषा संप्रयुक्तस्तावद्देवदत्तः तस्य च विशेषणं तत्ता अतः
संप्रयुक्तविशेषणताप्रत्यासत्त्या भूतलविशेषणघटाभाववद्वेंद्रियेण किमिति न गृह्यत इति तत्राह न च तत्तेति आत्मद्वारा चायं संबंधः शंक
कनीयः हेतुमाह समवाये तदभावस्येति भावस्येत्यभाववृत्त्याव्याप्तेः समवायस्येंद्रियासंप्रयुक्तस्यापि ग्रहणं परैरंगीक्रियत इत्यत उक्तं समवाये
तदरेति गुणादीनां तु संयुक्तसमवायादिना स्वतंत्रं मतं तेषां द्रव्यतादात्म्येन समवायासिद्धेः संबंधांतरताभावाच्चेत्यपि द्रष्टव्यम् विद्यमाने।
ति विशेषणाच्च प्रत्यभिज्ञायां तत्तायावच्छेदः संयुक्तविशेषणतयेति चक्षुषा संयुक्तः पर्वतस्तस्य विशेषणमग्निरित्यर्थः एतदुक्तं भवति

तत्तांशस्यकरणासंबद्धस्यापि प्रत्यक्षतानभ्युपगमात् न च तत्तायामपींद्रियेण सह संयुक्तविशेषणतालक्षणः सन्निकर्षः सम।
वायेतदभावस्येंद्रियसंप्रयोगमंतरेणापि प्रत्यक्षतायामयं पर्वतोग्निमानित्यत्राग्निमत्त्वस्यापि संयुक्तविशेषणतया प्रत्यक्षता।
पत्तेः प्रत्यक्षधर्मिकानुमानमात्रोच्छेदप्रसंगः अस्तु तर्हि ज्ञानज्ञेययोर्विषयविषयिभावः संबंध इति चेन्न तदनिरूपणात्
तथाहि न तावज्ज्ञानजन्यफलाधारत्वं विषयत्वं विषयनिष्ठफलजनकत्वं च विषयित्वमिति युक्तं विकल्पासहत्वात् तत्फलं ज्ञात
ताव्यवहारो वा नाद्यः अतीतादौ तदभावेनाविषयत्वप्रसंगात् तत्रैव फलजनने प्यनुगतनियमाभावात् ।।समवायाभावातिरिक्त

स्यापि चेत्संयुक्तविशेषणतया प्रत्यक्षत्वं तर्हि प्रत्यक्षे धर्मिणि न क्वाप्यनुमानं प्रवर्तेत सर्वत्र प्रत्यक्षत्वसंभवादिति संबंधांतरमाशंकते अस्तु तर्ही
ति ज्ञानजन्येति ज्ञानेन जन्यं यत्फलं तदाधारत्वं विषयत्वं तादृशफलजनकत्वं च विषयित्वमिति न च युक्तमित्यर्थः विकल्पासहत्वादिति
ष विकल्पेसन्निरूपणासहत्वादित्यर्थः ज्ञाततापाकट्यमेतच्च भाट्टाभिप्रायेण अतीतादाविति फलजननसमयेऽतीतादेरविद्यमानत्वादेव फला
धारत्वानुपपत्तेरेतदेव तज्जनकत्वं ज्ञानस्य न संभवति अतस्तत्राव्याप्तिर्लक्षणस्येत्यर्थः दूषणांतरमाह तत्रैव फलजनन इति अयमर्थः यत्फ।
लं प्रत्याधारत्वं विषयस्योच्यते तत्तत्रैव नान्यत्र जनयति विज्ञानमित्यत्रापि किंचिन्नियामकमस्ति न वा यदि नास्ति तर्हि नियतकार्यायोगः यदि ह भवे
त्सर्वत्र सत्ता चानियमोऽन्यानपेक्षस्यानियामकाद्विभावानां क्वाचित्कत्वस्यासंभवादिति। अस्तु ज्ञानज्ञेययोः संबंधे नियमायोगाच्च ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१ हितीयेदूषणमाह नद्योगेवेति यदि पत्किंचिन्नियामकं स्वभावोऽन्यत्र हासमाश्रीयते तर्हि तदेव विषयत्वनियामकमस्तु कृतं तद्रूपजो विनाभा
नि·सु कतेनेत्यर्थः नद्रुकं कुसमांजलौ स्वभावनियमाभावादुपकारोपि दुर्घटः सुघटत्वेपि सत्यर्थेऽसति का गतिरन्यथेति न द्वितीय इति कोयं व्यवहारो
टी·न पिमतः किं करणकर्षणादिकृते च्छादिः आद्यमत्याह करणकर्षणादेरिति आदिशब्देन भक्षिणादि विवक्षितं तत्सच विभोस्पर्शरहिते चात्मादा
५५ वसंभवादव्याप्तिरित्यर्थः अतिव्याप्तिंचाह कलधौतेति कलधौते रजतं रजनमलस्यापि नान्तरीयकतया रजतज्ञानप्रयुक्तादानादिभाक्त्वमस्ती
ति तद्दपि रजतज्ञानविषयः स्यादित्यर्थः द्वितीयं दूषयति नापीति इच्छाधारस्यात्मैवेति आनात्मवर्गलक्षणमव्यापकमित्यर्थः न चेच्छादि वि
षयत्वं तस्यैव निरूप्यमाणत्वादिविषयत्वस्य लक्षणांतरं शंकते अथ ज्ञानेनेति घट इति ज्ञानात् यद्धानादि ज्ञानं जायते तन्मात्रिविषयत्वं हानादियो

नद्योगेवान्तस्यैव विषयत्वनियामकतोपपत्तेः न द्वितीयः करणकर्षणादेर्व्यवहारस्यात्मादावभावात् कलधौतमला
देरपि नान्तरीयकतया तद्व्यवहारविषयस्य तज्ज्ञानविषयतापत्तेः नापीच्छादिरात्मनस्तत्र तदाधारतया तदन्यस्याविष
यत्वप्रसंगात् अथ ज्ञानप्रतिबद्धहानादिलक्षणज्ञानगोचरत्वं तद्योग्यत्वं वा विषयत्वं न ज्ञानगोचरत्वस्यैव निरूप्यमा
णत्वात् हानादिज्ञानानां च हानादिज्ञानांतरजनकतया निर्विषयत्वप्रसंगात् जनकत्वे वा हानादिज्ञानानुपरमाद्विष
यांतरसंचाराभावः सुषुप्त्यभावश्च प्रसज्येयाताम् व्यवहारयोग्यत्वं विषयत्वमित्यंगीकारे च योग्यतायां योग्यतांतराभ्युपग
मेऽनवस्थानतदनभ्युपगमे योग्यतायाविषयत्वाभावः ।। एतत्त्वमेववायत्तत्पूर्वं ज्ञानप्रति विषयत्वमित्यर्थः एतेनानीतादिसंग्रहोनेन

देतदात्माश्रयेण दूषयति नज्ञानगोचरत्वस्यैवेति किंच हानादिज्ञानानां हानादिज्ञानांतरजनकत्वमस्ति नवा यदि नास्ति तदा हानादि ५५
ज्ञानानां निर्विषयत्वप्रसंगः अस्ति चेत्तदतोऽव्याप्तिरित्याह हानादिज्ञानानामिति प्रथमं दूषयति जनकत्वे वेति ज्ञानांतरजनकत्वेनतज्ज्ञा
नानामपि सविषयत्वसिद्ध्यर्थं ज्ञानांतरजनकत्वे घटादिज्ञानानुपरमादसुषुप्त्यभावश्च प्रसज्येयातामित्यर्थः द्वितीये दूषणमाह व्यवहार राम
योग्यत्वमिति उपलक्षणं चैतत्प्रथमपक्षस्यापि तेनहानादिज्ञानगोचरत्वेपि गोचरत्वांतरमस्ति नवा यद्यस्ति तदानवस्था अथ नास्ति तर्हि तं ५५

स्वविषयत्वमिति शिष्टम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शालिकनाथोक्तलक्षणमवतारयति अलमिह लक्षणान्तरेणेति यस्यां संविदि योऽर्थोऽवभासते सोऽर्थस्तस्याः संविदो विषय इत्यर्थः उक्तं च
पंचिकाप्रकरणे अत्र ब्रूमो य एवार्थो यस्यां संविदि भासते वेद्यः स एव नान्यद्धि वेद्यावेद्यस्य लक्षणमिति तन्न इति तद्दूषयति नैवमिति घटा-
दिद्रव्याणां संविल्लक्षणगुणाधिकरणत्वानुपपत्तेरिति उपलक्षणं चैतद्गुणकर्मसामान्यविशेषाणाम् इदमनिष्टं न भवतीत्यत उक्तं बाह्याना-
मान्तरत्वानुपपत्तेरिति तत्रस्थेनेयुलक्षणस्याव्याप्तिरिति भावः विषयस्य सप्तमीपक्षं निराचष्टे नहि तृतीय इति विषयत्वस्यैव निरूप्यमाणत्वादा-
त्माश्रयप्रसंगादित्यर्थः किंच संविदीति सप्तम्या संविदो विषयत्वाभिधानेऽपि परोक्षमपि स्यादित्याह संविद इति संबंधिमात्रमिति तृतीयपक्षं
निराचष्टे न तृतीय इति संविदीति कोऽर्थः संवित्संबंधीति तथा च नयनाद्यपि न स्यादिति घटज्ञानस्य नयनाद्यपि विषयः स्यादित्यतिव्याप्तिरित्य-

अलमिह लक्षणान्तरेणापरिश्रमेण यस्यां संविदि योऽर्थोऽवभासते स तद्विषय इति लक्षणनिरुक्त्युपपत्तेरिति चेन्मैवं
विकल्पासहत्वात् संविदीति सप्तम्या किमधिकरणं विवक्ष्यते अथ विषयः किंवा संबंधिमात्रं सति सप्तमी वा नाद्यः घटादिद्र-
व्याणां बाह्यानामान्तरसंविद्गुणाधिकरणत्वानुपपत्तेः नहि तृतीयः तस्यैव निरूप्यमाणत्वात् संविदो विषयत्वं घटादीनां च
विषयित्वमिति वैपरीत्यापत्तेश्च न तृतीयः संविज्ञानकनयनादेः संबंधिनो नयनादेरपि तद्विषयत्वप्रसंगात् संविदि भास-
त इति भासमानतया विशेषणात् न नयनादावतिप्रसंग इति चेन्न भासमानतया एवाद्याप्यनिरूपितत्वात् ॥ र्थः न च तस्या-

पि विषयत्वादतिव्याप्तिर्विशेषपरत्वादित्यत आह तथा वस्तुमात्राभिधानापातात् ननु यद्यपि संबंधिमात्रं सप्तम्याः प्रतीयते तथापि भासत इति विशे-
षणात् भासमानतया संबंधि विवक्षितं तथा चाप्रकाशमाननयनादिव्याहतिरिति शंकते संविदीति भानविषयत्वं हि भासमानत्वं तथा चात्मा-
श्रयत्वमिति परिहरति न भासमानतया इति सति सप्तमीपक्षं निराचष्टे न चतुर्थ इति अत्रापि संविदि सत्यां यज्ज्ञानेन स विषय इति वक्तव्यं न-
त्वात्माश्रयत्वमित्यर्थः न च ज्ञाने सति व्यवहारयोग्यत्वमेवार्थस्य भासमानत्वमिति वाच्यं योग्यताया पूर्वोक्तदूषणापातात् सौगताभिमतं लक्ष-
णं शंकते ज्ञानेति घटज्ञानं पटज्ञानमिति यो यं ज्ञानाकारस्तदर्पको यो हेतुः स विषय इत्यर्थः तेन च न नयनादिव्याहतिरित्युक्तं हि भिन्नकालं कथं ग्राह्य-
मिति चेत् ग्राह्यतां विदुः हेतुत्वमेव युक्तिज्ञा ज्ञानाकारार्पणक्षममिति दूषयति नेति ननु यद्यपि नयनादीनां ज्ञानस्वभावभूताकारहेतुत्वमस्ति तथापि

लक्षणांतरं दूषयति नचेतितत्र हेतुः अतीतादीति कर्मनाम कारकविशेषः कारकं च कारणविशेषः कारणं च कार्ये संभवतीति तेन नित्यस्येश्वरज्ञानस्य
तद्विषयस्य च विषयविषयिभावं न व्याप्नोतीदं लक्षणं अतीतादेरविद्यमानादेरेव निमित्तप्राक्सत्त्वलक्षणकारणत्वाभावाद्व्याप्तिरित्य
र्थः उपलक्षणं चैतदनुमानादेः कर्मत्वं च तत्फलभाक्त्वं तच्च दूषितं पुरस्तात् लक्षणांतरं शंकते संबंधांतरमिति ज्ञानस्य विशेषणं विषयइत्युक्ते ज्ञा
नगतसंज्ञादिजातिष्वात्मनि चक्षुरादिषु च समवायकार्यकारणभावसंबंधाभ्यां यथायथं ज्ञानं प्रति विशेषणीभवतीत्यतिव्याप्तिः स्यात् तदर्थं संबंधांतर
मंतरेणेत्युक्तं यद्यपि घटतज्ज्ञानयोः कार्यकारणभावोस्ति तथापि सत्येश्वरज्ञानेऽतीतादौ च संभवमननतिरिक्तश्चेत्यभिप्रायः विशेष्यं चेति तेन विशे

नचतुर्थः भासमानत्वात्तिरूक्तेरेव ज्ञानाकारार्पकोहेतुर्विषयइतिचेन्न ज्ञानतदाकारयोर्भेदाभावेन सर्वेषामपि ज्ञानहेतूनां तदाकारस
मर्पकतया विषयत्वप्रसंगात् दृश्यमानतयातदाकारसमर्पकोविषयइतिचेत् नदृश्यमानतायाएवाद्याप्यनिरूपणात् नचज्ञानकर्म
त्वं विषयत्वं अतीतादिज्ञानस्येश्वरज्ञानस्य च कर्मकारकाजन्यत्वेनाविषयत्वप्रसंगात् संबंधांतरमंतरेण ज्ञानस्य यद्विशेषणं सत
द्विषयो विशेष्यं च तेन विषयीति चेत् न मत्समवेतं रूपज्ञानमित्यत्र व्यभिचारात् संबंधांतरमंतरेणैव मत्समवायस्य रूपज्ञानस्य च
विशेषणविशेष्यभावेपि मत्समवायरूपज्ञानयोर्विषयविषयित्वाभावात् तत्र समवायस्यानुव्यवसायज्ञानविषयत्वेपि रूपज्ञा
नाविषयत्वात् तदेवं विषयविषयिभावानिरूपणात् आत्मन्यध्यस्ततया चासिद्धो प्रपंचस्य सत्यत्वे दृश्यत्वानुपपत्तिर्बाधिकेति
स्थितम् नचभेदस्य मिथ्यात्वे शब्दांतरादेः कर्मभेदप्रतिपादकस्याप्रामाण्यप्रसंगः घटपटादेरिव व्यावहारिकस्यैव भेदमात्रस्य क
र्मणो वस्तुतस्तत्र शब्दांतरादिभिः प्रतिपाद्यमानत्वात्तत्र तद्बाधायोग्यतालक्षणस्य सत्यत्वस्य प्रतिपादनेनैषामौदासीन्यात् ॥

षणेनेत्यर्थः तदेतदतिव्याप्त्या दूषयति नमत्समवेतमिति मत्समवेतमित्यत्र हि समवायो ज्ञानं प्रति विशेषणं नचानयोः संयोगसमवायादिसंबंधांतरम
स्तीत्यतिव्याप्तिरित्यर्थः अस्यैव प्रपंचः संबंधांतरमित्यादिः ननु मत्समवेतं ज्ञानमित्यस्यानुव्यवसायस्य समवायस्य च विषयविषयिभावास्त्यस्यमेव
समवायः तत्र च तल्लक्षणगमनमनुगुणमेवेत्यत आह तत्र समवायस्येति अनुव्यवसायं प्रतिविषयत्वेपि यत्प्रति विशेषणं न तत्प्रति विषयत्वमित्य
र्थः एवं नास्ति घटज्ञानमित्यादावभावस्यापि घटज्ञानादिविषयत्वप्रसंगः प्रतिपादितं बाधकतर्कमुपसंहरति तदेवमिति यत्तु शब्दांतरादप्रामाण्यप्रसं

निरूपितमनुमानमुपसंहरति तदेवमिति तथाविमतः संसर्गः एतद्दृष्टेन तत्संसर्गो न्यान्याबाध्यान्यतरत्वः प्रमेयत्वादित्याद्यपोऽप्यत्र महावि
द्याद्दृष्टव्याः यद्यपीदमनुमानं घटादिमिथ्यात्वं साधयति तथापि न स्वस्य तत्साधयितुमलम् आत्माश्रयात् नाप्यन्येन अनवस्थापातात् तदे
था चनाद्दृष्टसिद्धिः धर्मत्वादीनां च किंपतो हेतूनामस्मिन्ननुमाने नैकान्तिकत्वमित्यभिप्रेत्य प्रत्यवतिष्ठते नन्वस्यानुमानस्येत्यादिना शंकते
जिज्ञासायामिति यदि हि प्रथमानुमानसमसमय एवानन्तानुमानस्फुरणापत्तिः स्यात् तदानुपलब्धिपराहतत्तया मूलक्षयकरी नाचैतदस्ती
त्यर्थः दूषयति यद्यदुक्तसाधनमित्यादिना तत्तदनुमानजातस्य मिथ्यात्वेन साध्येन व्याप्तिकत्वात् व्याप्तिग्रहणकाले सर्वेषामेव स्फुरणप्रसा

तदेवं निरस्तसमस्तप्रत्यनीकमनुमानं प्रपंचमिथ्यात्वे मानमिति सिद्धं नन्वस्यानुमानस्य मिथ्यात्वं किमनुमानान्तरेण सिध्य
ति किंवा स्वेनैव आद्येऽनवस्था तस्य तस्यानुमानस्य मिथ्यात्वसाधनेऽनुमानान्तरापेक्षणात् जिज्ञासायां सत्यां तत्तदनुमानप्र
वृत्तेर्नानवस्था मूलक्षयकरीति चेन्न यद्यदुक्तसाधनं तत्तदुक्तसाध्यमिति व्याप्तिग्रहणसमये तस्य तस्यानुमानस्य मिथ्यात्वानधि
गमे सर्वोपसंहारवती व्याप्तिर्न सिद्ध्येत् अधिगमे च तदधिगमाय तत्तदनुमानान्तरं तदैवापेक्षणीयमिति कथयकथं न मूल
क्षतिः द्वितीये तु स्वात्मनि वृत्तिविरोधः स्वगतमिथ्यात्वस्य स्वेनैव ग्रहणादिति चेन्मैवं शब्दशब्दवत्प्रपंचसत्यत्वानुमानवद।
ध्ययनविधिवच्चाविरोधात् ननु नाध्ययनविधिप्रयुक्तमध्ययनं तस्याध्यापनविधिप्रयुक्तत्वात् तथा हि अध्ययनवि ऽ मूलस्थेते

त्यर्थः स्वेनैव स्वमिथ्यात्वसाधने दूषणमाह द्वितीये त्विति तमिमं माक्षेपं परिहरति मैवं शब्दशब्देत्यादिना यथा हि शब्दशब्दः शब्दत्वाक्रा।
न्तं शब्दजातं विषयीकुर्वन् स्वमपि विषयीकरोति यथा वा सर्वप्रपंचसत्यत्वानुमानं स्वात्मन्यपि सत्यत्वं साधयतीति भवद्भिरभिमन्यते यथा
वा स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिः स्वाध्यायशब्दवाच्यसमस्तवेदराशेरध्ययनं विदधानस्तदंतर्वर्तिनः स्वात्मनोऽपि विधत्ते तेषु यः प
रिहारोद्धारभेदादिः सोऽत्रापि समान इत्यर्थः अध्ययनविधेर्विधायकत्वमुक्तममृष्यमाणः प्राभाकरः प्राह ननु नाध्ययनेति नन्वविहितस्य
कथमनुष्ठानमित्यत आह तस्येति ननु श्रूयमाणो विधिः कथमेतत्प्रयुक्तत्वं तत्राह तथा हीति स्वविषयरूपमध्ययनं स्वविषयाध्ययनम्

विं॰सु॰ टी॰ न॰ ५७

ननुपद्यप्यत्र स्वर्गो दिवत्कामं नित्यं वाजीवनादिवत्किंचिन्निमित्तं न श्रूयते तथापि यथा विश्वजिता यजेत अमावास्यायामपराह्णे पिण्डपि-
तृयज्ञेन चरेदित्यत्र वा श्रूयमाणोपि स्वर्गकाम्यधिकारी कल्पितः तथाहि विश्वजिता यजेतेत्यत्राश्रूयमाणोधिकारी कल्प्यः उत नेति संदेहे —
द्वारमित्यत्र क्रियान्वयं विना कारकाणामिव विषयेणापर्यवसितान्विताभिधानस्य कार्य्यस्याधिकारिणा विनानुपपत्त्यभावात् अनध्याहार इ-
ति प्राप्ते पराह्णातितं कर्तृव्यापारकृतेः कर्त्रा विनानुपपत्तेस्तन्निरूप्यकार्य्यस्याप्यनुपपत्तिरिति सोध्याहर्तव्यः स चासंबद्धकार्य्यसंबंधेन
संबद्धानद्ति स्वसंबंधित्वेन कार्य्यवोद्धा नियोज्यो भवति तत्रापि सर्वकल्पनापौनेरर्थक्यात् यस्य कस्य चित्कल्पनायां विनिगमनाभावात्सर्वाभि-
लषितस्वर्गकामोधिकारी कल्प्यित श्चोदनायां फलाश्रुतेरित्युपक्रम्याधिकरणत्रयेण सस्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वादित्यनेन एवं पि एड
पितृयज्ञे ऽमावास्यायामिति कालपर उत कर्मपर इति संशये कर्मपरत्वात्तदंगत्वमिति पूर्वपक्षे कर्मपरत्वे लक्षणाप्रसंगात् कालपरत्व

धिर्नस्व विषयाध्ययनस्यानुष्ठापनक्षमः नित्यनियोज्यत्वात्तद्यत्र कामो जीवनादिनिमित्तं वान्यः कश्चिन्नियोज्यः प्रतीयते नापि
विश्वजिदादिवत्कल्पयितुं शक्यः अध्यापनविधि — प्रयुक्तित एव तद्धि यस्याध्ययनस्य सिद्धौ नियोगसिद्धेः कल्पका
भावात् न चाध्यापनविधेरपि निर्निर्योज्यता यानुष्ठापकत्वमाचार्यकरणकामस्य नियोज्यस्य प्रतीतेः तथा ह्युपनयीत
पनयीत तमध्यापयीतेति श्रूयते तत्र संमानननोत्संजनाचा ॥ मारायस्वतंत्राधिकारत्वेन स्वर्गकामाधिकार्य्यध्याहृतः पिण्डपितृ

यज्ञः स्वकालत्वादनंगं स्यादित्यत्र तद्वदत्र किं न स्यादित्य तत्राह नापि विश्वजिदादिवदिति ननु तमध्यापयीतेत्यत्रापि न कश्चिन्नियोज्यः
प्रतीयते ऽतो निर्निर्योज्यत्वमुभयोः समानमिति कथमेतत्प्रयुक्तविषयत्वमितरस्य तत्राह न चाध्ययनेति हेतुमाह आचार्यकरणकामस्येति ।
आत्मनोपदाचार्य्यकरणमाचार्य्यत्वसंपादनं तत्कामस्येत्यर्थः नन्वाचार्यकरणकामइत्यपि न श्रूयते इति तत्राह तथा ह्युपनयीतेति श्रू
यते नाम तावत्तापि किमायातमाचार्य्यकरण इति तत्राह तत्र संमाननेति संमाननोत्संजनाचार्य्यकरणज्ञानभृतिविगणनव्ययेषु नियः
इत्ययमर्थः पद्यपि स्वरितजितः कर्त्रभिप्राये क्रियाफल इति कर्तृगामिफलाभिधायिनो नयते रात्मनेपदं सिद्धं तथाप्यकर्त्रभिप्रायार्थोपमारंभः संभ

५८

राम॰ ५७

CC-0. In Public Domain. Digitization by eGangotri

लोकायते चार्वाकं तु हितमानाचार्यो लोकायतेमते शिष्यान्नयते। ते हि सद्युक्तिभिराचार्येण प्रतिष्ठापिता बहवः संतः पूजिता भविष्यंतीत्यात्मने
पदार्थः उत्संजनमुत्क्षेपणं यथा माणवकमुन्नयते उत्क्षिपतीत्यर्थः आचार्यकरणमाचार्यत्वसंपादनं यथा माणवकमुपनयते आत्मानमा
चार्यीकर्तुं माणवकमात्मसमीपं प्रापयतीत्यर्थः ज्ञानं प्रमेयनिश्चयः यथा नयते चार्वी लोकायते तत्त्वमते प्रमेयत्वं निश्चिनोतीत्यर्थः भृतिर्वेतनं यथा
कर्मकरानुपनयते भृतिदानेन समीपीकरोतीत्यर्थः विगणनमृणादेर्निर्यातनं यथा मद्राः करं विनयंते करदानेन निवर्तयंतीत्यर्थः व्ययो धर्मा
दिषु विनियोगः यथा शतं विनयते सहस्रं विनयते धर्मार्थं विनियुंक्त इत्यर्थः अथ कथमेतेष्वित्युक्तम् अजां नयतीत्यादिषु विनिवृत्तये इ
ति तस्मादुपनयीतेति श्रौतमेवाचार्यकरणमित्यर्थः ननु भवतूपनयनस्याचार्यकरणफलं तत्र श्रूयत इति किमायातमध्यापनस्य सनियो
ज्यत्वइति तत्राह उपनयीत तमध्यापयीतेति चेति एकप्रयोगतेति अष्टवर्षं ब्राह्मणमुपनयीत उपनीय च तमध्यापयीतेति श्रुतेरेकप्रयोगता

र्य्येकरणेति सूत्रेणाचार्यकरणेन यतेरात्मनेपदविधानात् उपनयीत तमध्यापयीतेति चोपनयनाध्यापनयोरेकप्रयोगता
वगमात् उपनयनपूर्वकाध्यापनस्याध्याचार्यत्वप्रतीतौ तत्कामिनो नियोज्यत्वावगमात् न निर्नियोज्यताध्यापनविधेः तथाच
स्वविषयस्याध्यापनस्यानुष्ठानं प्रयुंजानोऽध्यापनविधिस्तन्निष्पादकमध्ययनमपि प्रयुंक्ते तेन विध्याक्षेपलक्षणोपादानप्रमा
णेनान्यतरस्वाध्ययनसिद्धेर्नाध्यापनविधिप्रयुक्तमध्ययनमिति॥ वगम्यते वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेतिवदित्यर्थः तथा चै

कदेशस्यैवानुष्ठानात्फलासिद्धिरिति सोपनयनाध्यापनादाचार्यत्वसिद्धिरिति भावः तथा च स्मृतिः उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः सक
ल्पं सरहस्यं च तमाचार्यं प्रचक्षते इति ननु भवतूपनयनाध्यापनयोरेकप्रयोगता तयोरङ्गाङ्गिभावावगमादङ्गेषु तस्याङ्गिनि उपसंहारस्तस्य त्वनि
त्यस्याचार्यकरणस्य कथं नियोज्यविशेषणत्वं न सत्त्रे स्वर्गादिवत्कामिशिरस्कत्वं प्रतीयते इत्यत आह तत्कामिन इति रात्रिसत्रन्यायेन फलत्वं विपरि
णम्यते इति भावः नन्वाध्यापनविधिः स्वविषयमध्यापनं विहाय कथमध्ययनं प्रयुंजीतेत्याशंक्याह तथा च स्वविषयस्येति ननु विधिर्हि स
र्वत्र स्वविषये तदंगे वा पुरुषमनुष्ठापयति न चाध्ययनस्याध्यापनांगत्वे किंचन श्रुत्यादीनामन्यतममत्र प्रमाणमस्ति न चोपकारमात्रादंगत्वे

पेति तार्तीयप्रमाणाभावेऽपि चातुर्थिकमस्ति प्रमाणमित्यर्थः

दोहनधनार्जनादेरप्यंगत्वप्रसंगात् न चैतत्युक्तं हि यस्मिन्प्रीतिः पु
रुषस्य तस्य लिप्साऽर्थलक्षणाऽविभक्तत्वादिति तत्राह तेन विध्याक्षे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वि॰सु॰
टी॰न॰
५८

समाधानमुपक्रमते अत्रोच्यत इति अत्र तावदध्यापनविधेरपि समानमेव निर्नियोज्यत्वमुपनयनस्यांगत्वेन तत्र श्रूयमाणस्यापापश्लो
कश्रवणवदर्थवादत्वादुपसंहारायोगादंगीकृत्यापितावदुपादानमन्यथैवोपपद्यात् दूषयति भवतु नामेति हेतुमाह कामाधिकारे इति अ
धिकारो नियोगः एष हि प्राभाकरराद्धान्तः अन्यतोऽप्रवृत्तः खलु पुरुषः शास्त्रेण प्रवर्त्तनीयस्तथा च काम्यनियोगेषु फलवदेव करणांशे
परागत एव प्रवृत्त इति कर्त्तव्यतासु तु शास्त्रेण प्रवृत्त इति अस्तु प्रस्तुते किमायातमित्यत आह अध्यापनस्यापीति ननु भवतु करणांश
ध्यापने कामतः प्रवृत्तिस्तदंगेऽध्ययने किमिति विधिर्न प्रवर्त्तयति ज्योतिष्टोमांगेष्विव दीक्षणीयादिषु न च दृष्टार्थत्वाद्विधेः यत्त्वेतन्नि
यमो येनाध्ययन जन्यादृष्टस्यावघातादिष्विवान्यतोऽप्राप्तस्य विद्यमानत्वादित्यत आह न चाध्यापनेति ननु श्रुत्यादिप्रमाणाभावेऽपि तत्प्रयुक्तत्व

अत्रोच्यते भवतु नाम सनियोज्यताध्यापनविधेस्तथापि नाध्यापनविधिप्रयुक्तताऽध्ययनस्य सिद्ध्येत् कामाधिकारे करणांशे
रागस्यैव प्रवर्त्तकत्वात् अध्यापनस्यापि काम्यत्वात् न हि षयरागेणैव तन्निष्पादकेऽप्यध्ययनेऽनुष्ठानेऽलाभात् अध्यापनविधे
रनुष्ठापकत्वकल्पनानुपपत्तेः न चाध्यापनांगत्वादध्ययने विधितः प्रवृत्तिराशंकनीया तत्र श्रुत्यादीनामन्यतमप्रमाणस्यादर्श
नात् न चाध्यापनविधिप्रयुक्तत्वादध्ययनस्य तदंगत्वं प्रयुक्तेर्व्यभिचारात् न हि भिन्ने जुहोति स्कन्ने जुहोतीत्यादौ भेदना
दिना प्रयुज्यमानो होमस्तदंगमंगीक्रियते तत्प्रयुक्तेरध्ययनस्याध्याप्यसिद्धेरंगत्वेन प्रयुक्तिः प्रयुक्तौ च तदंगत्वमिति परस्परा
श्रयता च किंचाध्ययनविधावधिकारिणमंगीकुर्वता नियोज्यः कस्मान्न स्वीक्रियत इति वाच्यम् ॥ लक्षणोपादानप्रमाणात्तदंगत्व

युक्तमिति तत्राह न चाध्यापनविधाविति भिन्ने जुहोतीत्यादौ भेदनादीनां निमित्तत्वेन नैमित्तिकहोमं प्रति प्रयोजकत्वमस्ति अथ च नांगत्वं
भेदनादीनां निमित्तत्वेनाननुष्ठेयतया अंगत्वानुपपत्तेः अतः प्रयुक्तिर्व्यभिचारिणीत्यर्थः अंगीकृत्य प्रयुक्तिमेतदुक्तं भवतु नामेत्याह तत्प्रयुक्तेरि
ति रागस्यैवोभयत्र प्रयोजकत्वादिति भावः नन्वंगत्वात्प्रयुक्तिरित्यत आह अंगत्वेन प्रयुक्तिरिति किं च नोपादानात्मकं किंचिन्मानं मेयानिरूपणात्
तस्माच्छ्रुत्यादिषट्केणाविनियोगे न चावहननेयत्नप्रोक्षणादेः रर्थत्वमुपादानलभ्यमिति तन्न श्रुत्यैवापूर्वसाधनत्वे व्रीह्यादिगते विनियोगात् तथापि कथ

५८

पूर्ववादी नियोज्यानंगीकारे कारणमाह अनुष्ठानसिद्ध्यर्थं इति दूषयति अधिकार्य्यपीति अनुष्ठानार्थमधिकार्य्यपेक्षा न त्वेतदन्यतः सिद्धं किमर्थ
मधिकार्य्यपेक्ष्यत इत्यर्थः शंकते अधिकारीति अयमभिसंधिः यद्यपि कार्य्यमेव नियोगापरपर्य्यायं वाक्यार्थस्तथापि तदेवेष्टसाधनतानिबंधनं
यथाहुः फलसाधनता तत्र कारणं तेन कार्य्यतेति तच्चेष्टसाधनत्वं कस्येति भोक्तारमधिकारिणमाकांक्षमाणं न तावत्पर्य्यवस्यति यावन्नाधिका
रिविशेषप्रतीतिरिति तदेतन्नियोज्येपि तुल्यं नियोगस्यापि नियोज्यव्यतिरेकेण पर्य्यवसानादित्यपि परिहरति नियोज्येपीति आपाद्य दूषणमि
दं त्वाधानादिनियोगेषु तेरनंगीकारात् किं च विषयसिद्धिहरस्त्वसिद्धिर्हि विधेः पर्य्यवसानं सा चेदन्यतोपि सिद्धा पर्य्यवसित एव विधिरित्यधिका

अनुष्ठानसिद्ध्ये नियोज्योऽपेक्षितव्यः तच्चान्यत एव सिद्धमिति नासावंगीक्रियत इति चेत्तर्हि अधिकार्य्यपि नापेक्षणीयः अनु
ष्ठानस्यान्यत एव सिद्धेः अधिकारी विधिपर्य्यवसानायापेक्ष्यत इति चेत् नियोज्येपि तुल्यं तेनापि विना नियोगापर्य्यवसानात्।
अन्यतोपि विषयानुष्ठानसिद्धौ च नियोगसिद्धौ का नाम विधेरपर्य्यवसानवाचोयुक्तिः किं च तन्मध्यापयीतेति चनायमध्यापने
विधिः तदर्थत्वेनाध्यापनस्य याजनवत्प्राप्तत्वात् उक्तं हि षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका याजनाध्यापने चैव वि
शुद्धाच्च प्रतिग्रह इति तस्माद्यथैतयाऽन्नाद्यकामं याजयेदित्यादिषु याजनं न विधीयते किं तु एतयान्नाद्यकामो यजेतेति वाक्या
र्थः तथेहाप्यष्टवर्षं ब्राह्मणमुपगच्छेत्सोऽधीते इति वाक्यार्थः स्वीकार्य्यः न चालौकिकनियोगार्थत्वेनाध्यापने विधिः याजनेपि तथाप्रसंगात्

र्थपेक्षापि निर्निबंधनेत्याह अन्यतोपीति अध्यापनस्याविधेयत्वमंगीकृत्यैतदुक्तं तदेव नास्तीत्याह किं चेति तत्र किं तदर्थं यदध्याप
नं तदेव विधेयमुतालौकिकनियोगार्थः कश्चिन्नाद्य इत्याह तदर्थत्वेनेति अध्ययनाध्यापनयजनयाजनदानप्रतिग्रहात्मकानां षण्णां कर्म
णां मध्ये त्रीणि जीविकाजीवनसाधनं तान्येवाह याजनेत्यादिना ननु यदि न विधानं कथं तर्हि उपनयीताध्यापयीतेति विधीयत इत्यत आ
ह तस्माद्यथैतयेति एतयाऽवेष्ट्या यथा हि नतो वद्यथा श्रुति याजनं विधानं गम्यकं तदर्थत्वेनान्तत्वस्य तएव प्रवृत्तत्वात् तत्प्राप्तप्रयोज्यरूपसा
क्षात्कर्तृव्यापारयागपरो विधिस्तथेहाप्यस्तौ प्राप्तप्रयोज्यमाणवकव्यापारावुपगमनाध्ययने विधीयेते इत्यर्थः न द्वितीय इत्याह न चालौकिकेति

सिंहावलोकितेन अध्यापनविधेयत्वपक्षमेवदूषणांतरमाह अपि चाध्ययनमिति सान्वयः सवंशः विरोधा [illegible] दिति काम्यं हि कामनाधीनं का
मनाहि कादाचित्की उपायांतरादपि तत्फलप्राप्तौ यदा स्वविषयं नानुष्ठापयति तदा नित्यमध्ययनं कथं प्रयुंजीत अविद्यमानस्याप्रयोजक
त्वात् अथ स्वयमपि यावत्प्र-योज्यं विद्यमानं तदा काम्यत्वविरोध इति अलं वा गुरुभिर्विवादेन भवत्वध्ययनं ध्यापनविधिप्रयुक्तं तथापि स एवाध्या
पनविधिर्दृष्टांत इत्याह अस्तु वेति तदेवमनुमानं प्रपंच मिथ्यात्वे प्रमाणमभिहितं अथागममपि प्रमाणयति तत्रैकमेवेति पूर्वपक्षोक्तदूषणमनू
^म

अपि चाध्ययनं नित्यं योनधीत्य हि जो वेदानन्यत्र कुरुते श्रमं स जीवन्नेव शूद्रत्वमाशु गच्छतीति सान्वय इत्यादिना ऽकरणे प्रत्यवाय
स्मरणात् अध्यापनं चानित्यं काम्यत्वात् तथा च कथं नित्यमनित्येन प्रयुज्येत विरोधात् तस्माद् ध्ययनविधिप्रयुक्तमेवाध्ययनमि
ति न दृष्टांतासिद्धिः अस्तु वाध्यापनविधिप्रयुक्तमध्ययनं तथाप्यध्यापनविधिरखिलवेदवाक्याध्ययनं विदधानः स्ववाक्याध्याप
नमपि विधत्त इति स एव दृष्टांतो भविष्यतीत्यलमतिविस्तरेण, तत्रैकमेवाद्वितीयमित्याद्यागमोपि तत्र प्रमाणं न चाद्विती
यशब्दस्य सजातीयवस्त्वंतरनिषेधपरः संकोचे कारणाभावादेकत्वविशेषणेनैव सजातीयस्य निषिद्धत्वात् सजातीयमात्र।
निषेधपरत्वे चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञानस्य वाचारंभणशब्दस्य ऐतदात्म्यमिदं सर्वमित्याद्युपसंहारस्य च बाधप्रसंगात्
न चैकमित्येकत्वसंख्याविधानपरं तत्रैव तस्य व्युत्पत्तेरिति वाच्यं एकं रूपमेकासंख्या एकोऽभाव इत्यादावपि प्रयोगात् ॥

द्य दूषयति न चेति संकोच इति अद्वितीयमित्यत्र द्वितीयमात्रवाचिनो द्वितीयशब्दस्य द्वितीयविशेषत त्विचनिषेधकनञ्समस्तद्विशेषनिषेधे वा
संकोचे प्रमाणाभावादित्यर्थः अन्यतः सिद्धत्वाच्च नानेन तन्निषेध्यमित्याह एकत्वविशेषणेनेति किं च सजातीयमात्र निषेधपरत्वे समस्तद्वैतनि
षेधपरताप्रतिपादकोपक्रमपरामर्शोपसंहाराश्च विरुद्ध्येरन्नित्याह सजातीयेति नन्वेकशब्दो न सजातीयनिषेधपरोऽपि तु एकत्वसंख्या
भिधानपरः यथाह मानमनोहरकारस्य कत्वसंख्यामाचष्टे तत्रैव लोके व्युत्पत्तेः लोकशक्तेश्च वेदे बाधकत्वादिति तत्राह न चैकमिति संख्यारहि

यत्तु नेनैवोक्तं आनंत्यं पुनरुभयांताभाव एव तत्रैव लोके व्युत्पन्नेरिति तन्न दष्यनूद्य दूषयति आनंत्यमपीति तत्र हेतुः पूर्वापरेति अस्तिनावच्छि
न्नमाकाशमनंतं चेति प्रयोगः तत्र यद्यनंतपदेनैव पूर्वापरकालावच्छेदरूपोभयांतोऽभिधीयते तन्निषेधश्चानंतपदेनोच्यते तदानित्यशब्द
पुनरुक्तः स्यादित्यर्थः अयं देशकालकृतोन्तः उभयांतस्तथापि पुनरुक्तिरिति भावः यत्तु पूर्वपक्षिणाव्युत्पन्नभावाभिहितं तं दूषय
ति नचान्योन्याभावेति सर्वत्र यभाववाचकशब्दानां प्रतियोगिवाचकशब्दव्युत्पत्तित एव व्युत्पत्तिस्तत्कुतो हेतो यौगिकत्वाद्यौगिकानां चा
वयवव्युत्पत्तित एव व्युत्पत्तेः समुदायव्युत्पत्त्यनपेक्षणात् नहि तान्तपदस्यावच्छेदत्वयेव्युत्पत्तेर्नञस्तन्निषेधव्युत्पत्तेश्चात्र पृथक् समुदायस्य
व्युत्पत्त्यपेक्षेत्याह अन्तशब्दस्येति यत्तु नेह नानेत्यत्र ब्रह्मणि नानात्वनिषेधादेकं ब्रह्मेति सिद्ध्यतीति तन्नु द्वैतनिषेधस्युक्तत्वान्निषेधतिनेह
नानेति अयमभिसंधिः प्रसक्तं हि सर्वत्र निषिध्यते नाप्रसक्तं यत्तु क्वचिदप्रसक्तस्यापि निषेधो यथा नांतरिक्षे न दिवि इत्यत्र गत्यंतरं नास्ति न च

आनंत्यमप्युभयांताभाव एव तत्रैव तस्य व्युत्पन्नेरित्यपि न पूर्वापरकालानवच्छेदस्यैवेहानन्तपदेन विवक्षायां नित्यमाकाशम
नंतं चेति प्रयोगानुपपत्तिप्रसंगात् नचान्योन्याभावाधिकरणत्वानधिकरणत्वभावो दोषः अंतशब्दस्य देशतः कालतो वस्तुतश्च
परिच्छिन्नेव्युत्पन्नत्वात्तस्य नञ्समासे त्रिविधस्याप्यंतस्य निषेधकतोपपत्तेः पृथग्व्युत्पत्त्यनपेक्षत्वात् नेह नानास्ति किंचनेति च न ब्र
ह्मणि नानात्वं निषिध्यते अप्रसक्तत्वात् नहि लोकतः श्रुतितो वा वादिप्रसिद्धितो वा ब्रह्मणि नानात्वं प्रसक्तं येन प्रतिषिध्येत ॥
नानाशब्दस्य भावप्रत्ययांततयाभावाच्च नेन नानात्वनिषेधः तन्निषेधे वा संकोचे कारणाभावात् सजातीयविजातीयस्वगतनाना
त्वनिषेधाद् ब्रह्माद्वैतमेव पर्यवस्येदिति स्वर्गवत् घटकुड्यप्रभानदूतः प्रसज्येत ॥ तत्रापि निषेधपरत्वं अर्थवादो ह्ययं रुक्मोपधानस्य रु

क्मस्तुपदधातीत्यनेनैकवाक्यत्वात्तस्याद्यथा कथं च न तत्स्तुतावेव तात्पर्यं अत्र तु द्वैतनिषेधपरत्वमिति विशेषस्यं तद्दिहापि प्रसक्तद्वैतप्रपंचनिषेध
परत्वं युक्तं नाप्रसक्तेश्वरनानात्वनिषेधपरत्वमिति किंच नानात्वनिषेधपरत्वे नानाशब्देन ह्योकयोरित्यत्र द्वित्वैकत्ववत् नानात्वं लक्षणीयं न च
विनाकारणं सा युक्ता अतिप्रसंगात् प्रत्यक्षादिविरोधस्तु कारणं हदि विपरिवर्तमानं पुरस्तादेव निरस्तं तदनेनाभिसंधिनाह नानाशब्दस्येति भवतु
नानाशब्देन नानात्वाभिधानं गोशब्देन गोत्वस्येव तथापि संकोचे कारणाभावात् समस्तप्रतियोगिकनानात्वनिषेधाद्द्वैतसिद्धिरित्याह नन्विषे

वि॰सु॰
टी॰न
९०

पात्तुस्त्रुमंतरस्यान्यथासिद्धिरुक्तापूर्वपक्षिणातामनुवादपूर्वकं दूषयति नचैवं दृश्यादिनाप्रत्यक्षयोग्यं खल्वैन्द्रियकबुद्धिर्नातोप्रतीपत्तेईश्वरस्य
नींद्रियोनतथेतिनबुद्धिरित्यभिप्रायेणापंमायाशब्दइत्यर्थः नीरूपत्वादबाह्यत्वादनवतारप्रकरणत्वाच्चनयोगीन्द्रियापेक्षयेतिभावः पत्नीश्वरश
क्तयोर्वेत्युक्तंतत्राह मायाशक्तीति असंगतिमेवाह इंद्रियेतितत्रहि दशशतहरयोऽस्ययुक्ताइतीन्द्रियाणिहरिशब्देनोच्यंते तद्बाहुल्याभिधानेने।
श्वरशक्तिप्रतिपादनोपयोगीत्यर्थः उत्तरत्रतेषां हरीणामीश्वरमात्रतयाबोधनमपितत्रसेविरुद्धमतेतेषांभिन्नत्वाभ्युपगमादित्याह अयंवैहरय
इति नचनिमित्तत्वाभिप्रायेणसामानाधिकरण्यानुपपत्तेरितिभावः यत्तु मृत्योः समृत्युमित्यभेददर्शनस्यविधिस्तिनसत्तुतिनेतुहेतनिषेधप
रमितितत्राह मृत्योरितियदिह्यभेदप्रतिपत्तिमात्रंविधिस्तिनंतदाहेतनिषेधोव्यर्थः प्रत्युतानर्थकरस्त्राहेतनत्वंतिप्रसक्तेरितिभावः किंच

नचैवंद्रोमायाभिरितींद्रियद्वारकबुद्धिरुपाधावीश्वरस्यभेदावभासनइत्येतावन्मात्रमिदंवाक्यंनतुद्वैतनिषेधपरमितियुक्तं ईश्व
रस्यनित्यानुमेयस्यैन्द्रियकबुद्धिवृत्तिविषयत्वानंगीकारात् मायाशक्तिविशेषाभिधानेनयुक्तात्वस्यहरयः शतादशेतिवाक्यशेषो
नसंगच्छेत् इंद्रियबाहुल्याभिधानस्यमायाशक्तिविशेषाभिधानेप्रत्युपयुक्तत्वात् अयंवैहरयोयंवैदशचसहस्राणिवहूनिचा
नंतानिचेतिवाक्यशेषेसर्वस्येश्वरात्मकत्वप्रतिपादनविरोधाच्च मृत्योः समृत्युमितिचनाभेदप्रतिपत्तिविधिः नेहनानास्तिकिंच
नेतिद्वैतनिषेधवैयर्थ्यात् अनुपासनप्रकरणत्वाच्च पूर्वापरालोचनायां चास्यप्रकरणस्यनिष्प्रपंचब्रह्मात्मत्वप्रतिपत्तौतात्प
र्याधिगमात् ननुपूर्वापरवाक्यानामुपासनपरतापिदृश्यते आयुर्होपासतेऽमृतंविज्ञायप्रज्ञांकुर्वीतसर्वस्यवशीसर्वस्येशानः

अन्नादोवसुदानोविंदतेवसुयएवंवेदेत्यादिश्रवणादितिचेन्नैवं प्रसंगागतत्वादुपासनानुवादस्यनिष्प्रपंचब्रह्मात्मज्ञानप्रकरणोत्क
र्षश्चोपासनापरत्वेस्यादित्याह अनुपासनेति अस्यैवप्रपंचः पूर्वापरेति ननुतंदेवाज्योतिषांज्योतिरायुर्होपासतेऽमृतमितिविज्ञायशास्त्रतःप्रज्ञांतांसा राम
न्कारलक्षणांसंपादयेदितिचतथासर्वस्यवशीसर्वस्येशानः अन्नादोऽन्नमासमंतादद्वसुदानोधनप्रदइतियावेदसवसुधनंविंदतेलभतेइति ९०
नत्वैवपूर्वोत्तरभागयोरुपासनाश्रवणादुपासनाप्रकरणमेतदितिचोदयति ननुपूर्वापरेति प्रसंगागतत्वादितिनिष्प्रपंचब्रह्मप्रकरणस्य

किंच तमेव धीर इति तमेव मन्य इति चैवकाराभ्यां यस्मिन्पंच पंचजनाः पंच प्राणादयः आकाशश्च प्रतिष्ठित इति पूर्ववाक्यारोपिताकाशादिप्रपंचव्या
वर्तनान्निष्प्रपंचब्रह्मपरत्वमेवेत्याह तमेव धीर इति निष्प्रपंचब्रह्मपरत्वेपि तस्य साक्षात्कारविधिपरत्वं भवत्विति नेत्याह प्रज्ञामिति यत्तु सर्वस्य वशी
त्यादिगुणकं यं सर्वे वेदा उपासनं विधत्त इति तत्राह सर्वस्य वशीत्यादेरिति प्रतिपादितं खल्विदं कामादीतरत्र तत्र चापतनादिभ्य इत्यत्र उपजीव्या
विरोधं परिहरति आगमस्येति तस्येति प्रत्यक्षस्य एतदुक्तं भवति निषिध्यमानं तदीयपारमार्थिकत्वं नापेक्षते यच्चापेक्ष्यते सांव्यवहारिकं रू
पं तन्न बाध्यत इति ननु सांव्यवहारिकमपि रूपमागमेन बाध्यमेवेतरथाऽद्वैतानुपपत्तेरतस्तत्रैवोपजीव्यविरोधो दुर्निवार इति तत्राह सांव्यवहा
रिकेति यथा तेषां वास्तवत्वज्ञानं तत्त्वप्रतिपत्तिविरोधि न तथा सांव्यवहारिकाकारज्ञानमिति भावः तदेतदखिलमद्वैतश्रुतीनामन्यथासिद्धिः यथ
तमेव धीरो विज्ञायेति च यस्मिन्पंच पंचजना इति च पूर्वोदिताकाशादितत्त्वाधारतयास्य प्रपंचताप्रसक्तावधारणस्य तन्निवारणप
रत्वात् प्रज्ञां कुर्वीतेति च प्रज्ञाशब्देन विज्ञानशब्दाभिधेयपरोक्षज्ञानातिरिक्तसाक्षात्काराभिधानांगीकारे तस्यानवधिसुखरूपात्मसा
क्षात्कारतया फलत्वेन विधेयत्वानुपपत्तेः सर्वस्य वशीत्यादेः स्तुतिपरतया गुणविधानार्थत्वाभावात् आगमस्य च स्वरूपप्रतीतौ पदपदा
र्थसंबंधावगमे च प्रत्यक्षादिसापेक्षत्वेपि तस्य तद्विषयस्य च पारमार्थिकत्वांशस्यानुपजीव्यत्वात्तद्बाधनेपि विरोधाभावात् सांव्यवहारि
कभेदाभावस्य ज्ञानोदयनांतरीयकतया श्रुतिबाध्यत्वाभावात् तथा व्यावहारिकभेदसापेक्षतया श्रुतेरप्रामाण्यप्रसंगः न च तर्हि स्यादि
वाक्येषु परस्परपराहतिः सामान्यविशेषभावेनेच्छाविकल्पेन वाऽव्यवस्थितविकल्पेन वाऽविरोधोपपत्तेः ॥ परिभावनव्यवस्थितत्वेन तस्य शा
लिकनाथापि कथयंत यत्तुक्तं तस्यैव च वेदस्य परस्परपराहत्योपहतत्वमुक्तं तत्परिहृतमिति चेति सामान्यविशेषभावेनेति भिन्नविषयत्वस्योपल
क्षणमिदं मुख्यसामान्यविशेषभावाभावात् यथाहवनीये जुहोतीति होममात्राधिकरणतया प्राप्तस्याहवनीयस्य पदे जुहोतीति विशेषविधानात्
तदितरहोमविषयतया संकोचः न हि तथेह हिंसामात्रविषयतया निषेधः प्रवर्तते येन विशेषे संकोचमर्हेदपि तु रागप्राप्तहिंसायां तावन्नापि निषे
धोपपत्तौ न क्रतुप्रकरणेपि निषेधपदप्रक्षेपकल्पनात्तस्यां प्रमाणाभावात् प्रत्युत पदर्थ्यप्रवृत्तिस्तदर्थः प्रतिषेध इति न्यायेनानृतवदनाज्यभा
गादिप्रतिषेधस्येवास्यापि क्रत्वर्थत्वं स्यात् तथा च विधिप्रतिषेधयोरनयोर्ग्रहणाग्रहणवद्विकल्पः स्यादित्यनर्थपरंपरैव स्यात्तस्माद्दुर्णीतविभि

CC-0. In Public Domain. Digitization by eGangotri



कर्मकांडज्ञानकांडयोर्विरोधं परिहरन्ति नचेत्यादिना विद्याऽविद्यावस्थाभेदेनाभिन्नभिन्नवस्तुप्रतिपादनयोरविरोधः कर्मतत्त्यागविधानयोः श्रुति
द्वयविद्वत्पुरुषविषयत्वाच्चक्षुद्धांतःकरणैः परोक्षज्ञानवान्नाविद्वान् यथाहि नहिंस्यात्सर्वाभूतानीति फलांशे निषिद्धस्य श्येनेनाभिचरन्यजेतेत्य।
स्यानवबुद्धप्रतिषेधवाक्यार्थपुरुषं प्रति प्रवृत्तिर्विनरस्यान्विनरं प्रत्तीति विभागस्तद्वदिति भावः वाद्यर्थमुपसंहरन्ति तदेवमिति अनिर्वचनीयानाद्यवि।
द्येत्युक्तमुपक्रमप्रत्यवतिष्ठते नन्विति ननु सर्वेषामेव मोक्षवादिनामनित्याशुचिदुःखरूपसंसारे नित्यशुचिसुखरूपात्माभिरतिनिदानमविद्याप्र
सिद्धैव किमत्रवक्तव्यमित्यत आह नहिज्ञानाभावेति ननु सामान्येन सिद्धा विद्या या उपपत्तिबलाद्दनाद्यनिर्वचनीयत्वमायातीत्यत आह उपप
न्नावेति अभाव एव प्रसिद्धिं निदर्शयति ज्ञानेति प्रागभावप्रध्वंसयोरिति सप्तमी व्यावहारिका व्यवहारकर्त्तारःतेषां व्यवहारो परलंभादित्यर्थः।

नचकर्मज्ञानकांडयोर्भेदाभेदविषयतया कर्मानुष्ठानतत्त्यागप्रतिपादकतया च विरोधः विद्याविद्यावस्थाभेदेन विद्वदविद्व
त्पुरुषविषयतया चाविरोधात् तदेवं मिथ्यात्वे लक्षणप्रमाणयोरुपपन्नत्वादनिर्वचनीयानाद्यविद्याविलसितएवायमात्मनि द्वै
तप्रपंचः स्थलमनिप्रपंचेन ४ ननु भोः के यमनिर्वचनीयाविद्यानाम नहिज्ञानाभावव्यतिरेकेणकाचिदविद्या प्रसिद्धा उपपन्ना
वा ज्ञानप्रागभावप्रध्वंसयोरेव न जानामीत्यविद्यात्वेन लोके व्यावहारिकव्यवहारोपलंभात् अविद्येति च विद्यापदेन समस्य।
मानस्य च नञः स्तदभावस्तद्विरोधी तदन्यो वार्थाः स्युः पे पः आद्ये विद्याभावस्यापि वेद्याभाववन्नानिर्वचनीयता हितीये तु संशय।
विपर्यासादेर्विद्याविरोधिनो गुणा — तरस्य वानानिर्वचनीयतोपपत्तिः प्रसिद्धं भावस्वभावत्वस्य व्याकोपात् नतृतीयोपि विद्यातिरि
क्तस्य समस्तस्याविद्यात्वप्रसंगात् न चास्या लक्षणं प्रमाणं वापश्यामः न ताव ज्ञान निवर्त्यमज्ञानं पूर्वज्ञानस्यापि तन्निवर्त्यस्याज्ञान
त्वप्राप्तेः अनादित्वविशेषणाद्दोषइति चेन्न ज्ञानप्रागभावेव्यभिचारात् ९ एवं प्रसिद्धाभावमेवाभिधायोपपत्त्यभावमाह स्याविद्येति अ

विद्येत्यत्र नञ स्तावदर्थत्रयं संभवति तत्र निर्वचनीयाभावाभावयोरेवांतर्भवतिनानिर्वचनीयः कश्चिदविद्याशब्दार्थ इत्यर्थः विद्यार्भवस्यापीति
यथावेद्यस्य घटादेरभावोनानिर्वचनीयोभावाभावविलक्षणत्वाभावाधिकारात् निर्वचनीयस्तथा ज्ञानाभावस्यापि नानिर्वचनीयत्वमित्यर्थः विद्यावि
रोध्यविद्येति द्वितीयपक्षं निषेधति द्वितीयेत्विति एवमविद्याशब्दान्नावदनिर्वचनीयानाद्यविद्याप्रतीत्यभावमुक्त्वा लक्षणप्रमाणानिरूपणादपितद



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीये तु प्रागभावेऽतिव्याप्तिमाह अनादित्वे इति तृतीयेऽसंभवमाह अनादीति आधुनिकैः पार्थिवपरमाणुविशेषगुणानां पाकजत्वां-
गीकाराच्चिरंतनग्रहणं नहि तस्मिन्निति तैरेव चिरंतनैस्तेषामीश्वरज्ञाननिमित्तकविनाशांगीकारादतिव्याप्तिर्लक्षणस्येत्यर्थः तदु-
क्तलक्षणस्यापीति त्वदुक्तलक्षणस्य श्यामत्वादेः सत्त्वोक्तः चतुर्थं शंकते अथेति किमिदमनिर्वचनीयत्वं नाम अनन्तावन्निर्वचनाविषय-
त्वं अनेनैव प्रकारेण निरुच्यमानत्वात्तस्यापि सदसद्विलक्षणत्वं परस्परविरुद्धयोर्भावाभावयोरुभयवैलक्षण्यस्याप्यसंभवात् असंभवी दल-

अनादिभावत्वे सति ज्ञाननिवर्त्यमज्ञानमिति चेन्न अनादेर्भावस्यात्मवन्नित्यत्वेन निवर्त्यत्वानुपपत्तेः अथ चिरंतनम-
तानुसारेणानादेरेव भावस्य परमाणुगतश्यामत्वादेरिव निवर्त्यत्वमुच्यते तर्हि तस्मिन्नेवेश्वरज्ञाननिवर्त्येऽतिव्याप्तिः
तदुक्तलक्षणस्यापि तस्याज्ञानत्वाभावात् अथानाद्यनिर्वचनीयमज्ञानं तदपि न निर्वचनागोचरताया भावाभावविलक्षण-
तायाश्चासंभवित्वात् भ्रमोपादानमज्ञानमित्यपि न आत्मन्यतिव्याप्तेः भ्रमोपादानत्वे भ्रमस्य सत्यत्वप्रसंगात् तन्नात्मोपादा-
नमिति चेन्न भ्रमस्यापि स्वरूपसत्यत्वात् विषयापहारादि तत्र मिथ्यात्वव्यवहारो न स्वरूपापहारात् तथात्वे चैतावन्तं का-
लमिदं रजतमित्यभादित्यनुभवविरोधः अस्तु वा युक्तिं किंचिदविचारितरमणीयं लक्षणं तथापि तत्र किं प्रमाणं अज्ञोहमि-
त्यनुभव इति चेन्न तस्य ज्ञानाभावविषयत्वेनाप्युपपत्तेः अनादित्वभावत्वयोस्त्वदभिमतयोरस्यानुभवस्योदासीन्याच्च ।

क्षणमित्याह निर्वचनेति भ्रमोपादानमज्ञानमिति आत्मनोपि हि जगद्भ्रमाधिष्ठानत्वमंगीक्रियते भवद्भिरन्यथा जन्माद्यधिकरणाद्य-
नारंभप्रसंगात् अंगीकृतमस्माभिश्चात्मनो विभ्रमस्य समवायिकारणत्वमिति भावः आत्मनि लक्षणाव्याप्तिं शंकते सत्योपादानत्व इति नाय-
मनिष्टप्रसंग इति परिहरति न भ्रमस्यापीति ननु स्वरूपमात्रसत्यत्वे कथं मिथ्याज्ञानत्वप्रसिद्धिरित्यत आह विषयेति स्वरूपस्याप्य-
पहारे प्रत्यभिज्ञाविरोधमाह तथात्वे चेति अनादित्वेति अज्ञोहमिति ज्ञानराहित्यमेव प्रतीयते न तु तस्याज्ञानस्यानादित्वभावत्वे अ-
तोनेदमभिमतसाधकमित्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



स्यादेतत् अस्तितावत्सुप्तोत्थितस्यएतावंतंकालंनकिंचिदवेदिषमितिपरामर्शः सचसुषुप्तिकालीनमज्ञानानुभवंगमयति अननुभूते परामर्शायोगात् सचानुभवस्तत्रप्रमाणमितितदेतद्दूषयति नापीतिसुषुप्तिकालीनज्ञानाभावगमकतयात्वन्मतेताबदन्यथासिद्धमुस्म न्मतेतूत्थानानंतरकालीनमनुमानंपूर्वकालीनज्ञानाभावविषयमित्युभययथापिविवक्षितासिद्धिरित्याहत्वन्मतइतियात्तुवेदांतपक्षे ऽन्यथासिद्धिरुक्तासानयुक्ताधर्मिप्रतियोगिज्ञानाधीनज्ञानस्यज्ञानाभावस्यसुषुप्तौनिर्विशेषचिन्मात्रादप्रतीतेरितिशंकते ननुकथ

नापिसुप्तोत्थितस्यनकिंचिदवेदिषंगाढंमूढोहमासमितिपरामर्शानुपपत्तिसिद्धः सुषुप्तिकालीनोनुभवःप्रमाणंत्व न्मतेज्ञानाभावस्यापिसाक्षिसिद्धस्यपरामर्शोपपत्तेः अस्मन्मतेचेदानीमेवज्ञानाभावस्यानुमीयमानतयापराम र्शसंप्रतिपत्तेः ननुकथंज्ञानाभावस्यनिर्विकल्पकचैतन्यगोचरतयासिद्धिः तत्सिद्धेर्धर्मिप्रतियोगिज्ञानप राधीनत्वात् सुषुप्तौचतदसंभवादितिचेन्नज्ञानाभावस्यापिस्वरूपेणभेदादिवन्निर्विकल्पकसिद्धस्यसविकल्प कदशायांधर्मिप्रतियोगिज्ञानपराधीनतयास्फुटतरव्यवहारविषयत्वोपपत्तेः नचासिद्धंतत्कालीनेधर्मिण्या त्मनिज्ञानाभावस्येदानीमेवानुमीयमानत्वासिद्धिः प्रतिपन्नेहिप्रातश्चत्वरादौधर्मिणिसायंसमयेतत्रगजाभा वानुमानमुपलभ्यतइतिवाच्यम्॥ ॥६॥ ॥ ॥६॥ ६॥ श्री ॥ ॥ ६॥ ६॥ ६ ॥

मिति प्रथमंनिर्विकल्पकानुभूतस्यापिपश्चात्सविकल्पकविषयतयाविशिष्टव्यवहारहेतुत्वंभवतिनचनित्यसायेसतया निर्विकल्पकाविषयत्वंभेदसादृश्यादिभिर्व्यभिचारादितिपरिहरति नज्ञानाभावस्यापीति ननुभवन्मतस्यपक्षेऽन्यथासिद्धि स्तस्यसेतुकथमनुमानंतमस्यसौषुप्तिकात्मनस्तदानीमननुभवात् तस्मिन्धर्मिणिज्ञानाभावानुमानायोगात् यथाहिप्रातश्चत्व रेगजोनासीदित्यत्रप्रातःकालीनचत्वरानधिगमेगजाभावानुमानाभावइतिशंकां निराकरोतिनचासिद्धइति ॥ ॥ ॥ ६२



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नचवाच्यमित्युक्तं तत्र हेतुमाह संप्रतिपन्नेति यद्यपि सुषुप्तिसमयेतत्कालीनात्मनो न ज्ञानमस्ति तथाप्युत्तरकाले संभवत्येवानुमानेन तत्
स्य ज्ञानं तथा ह्युत्तिष्ठतस्य संप्रतिपन्नोदयास्तमययोरंतरालकालानुभवानिद्राकालात्पूर्वोत्तरास्तमयोदयकालयोस्तत्कालत्वेन हेतुनान्तरालकालव
त्वमनुमाय तत्स्याप्यात्मवत्स्वकालत्वेनेतरकालवद    नुमाय तस्मिन् धर्मिणि ज्ञानाभावानुमानमप्रत्यूहमित्यर्थः उक्तं च तात्पर्यपरिशुद्धा
वुदयनाचार्यैरपवर्गप्रकरणे पूर्वापरावस्थयोरेकत्वप्रत्यभिज्ञानेन मध्यावस्थायामपि तत्सामान्येनोपनया  दिति अभ्युपगम्य धर्मिसि
द्धिं हेत्वसिद्धिं शंकते भवत्वित्यादिना अंतरालकालीनात्मा दुःखादिज्ञानाभाववान स्मर्यमाणतदानींतनदुःखादित्वादिति हेतुः पथि गच्छतस्तृणादिस्पर्शे
ष्वनंतरमस्मर्यमाणेष्वनैकांतः नियमेनेति विशेषणेपि निर्विकल्पकानुभूतेनुदितसविकल्पके नैकांत इत्यर्थः उभयवादिसिद्धत्वादिति विशेष

संप्रतिपन्नोदयास्तमयवद्दिवादपदयोरप्युदयास्तमययोरंतरालकालमनुमायकालात्वेन लिंगेनानुमिते धर्मिण्यात्मनि ज्ञा
नाभावानुमानोपपत्तेः भवत्वेवं धर्मिसिद्धिस्तथापि न ज्ञानाभावानुमाने लिंगमस्ति अस्मर्यमाणत्वस्य नियमेनास्मर्यमाणत्व।
स्य वा पथि गच्छतस्तृणस्पर्शादौ निर्विकल्पकानुभूते चानैकांतिकत्वादिति चेन्न ज्ञानसामग्रीवैकल्पलक्षणलिंगाज्ज्ञानाभावानु
मानोपपत्तेः तदेवकुतः सिद्धमिति न वाच्यं तत्सिद्धेरुभयवादिसिद्धत्वात् अन्यथा वेदांतिनामपि सुषुप्तिकाले घटपटादिविशे
षज्ञानाभावानुमानेन स्यात् ज्ञानाभावस्य निर्विकल्पकसाक्षिवेद्यत्वानंगीकारात् न चावस्थाभेदसंभिन्नभावरूपाज्ञानपरामर्शे
सामर्थ्यसिद्धत्वदनुभवादेवतद्विरोधिनो ज्ञानस्याभावानुमानं भावरूपाज्ञानस्य तत्परामर्शस्य च परं प्रत्यद्याप्यसिद्धत्वात् ॥ ॥

विज्ञानोपरमस्य परत्वया प्यंगीकारादित्यर्थः अतश्चैवमंगीकर्तव्यमित्याह अन्यथेति ननु नास्माकं सामग्र्यभावात्तदनुमेयमपि तु साक्षिसिद्धमिति तत्राह
ज्ञानाभावस्येति तत्काले निर्विकल्पकवेद्यत्वेपि न तावत्तोत्तरकाले विशिष्टव्यवहार इत्यनुमानमेव शरणमित्यर्थः तेन च न पूर्वोत्तरयोर्व्याघातः ननु
परामर्शवलाद्भावरूपाज्ञानसिद्धौ तद्बलात्तद्विरोधिघटादिज्ञानाभावानुमान    मस्त्वन्यत्तेन सामग्र्यभावादितिवैषम्यमिति तत्राह नचा
वस्थेति अवस्थाभेदः सुषुप्तिरूपावस्थाविशेषस्तेन यद्विशेषितं भावरूपमज्ञानं तत्परामर्शसामर्थ्येन सिद्धो यस्तदवस्थाज्ञानानुभवो न किंचि

दैतावंतं कालमवेदिषमित्येवंविधस्मरणादिति योजना॥

CC-0. In Public Domain. Digitization by eGangotri

१ वि॰सु॰ स्यापदीपावलीकृतमनुमानमुद्भावयति यत्तु कैश्चिदिति हेतुमेव समर्थयते अभावो हीत्यादिना अभावस्येति भाट्टाभिप्रायेण प्रत्यक्षस्येति तार्कि
टी॰न॰ काभिप्रायेण संप्रतिपन्नवदिति शुक्तिरूप्यसंसर्गवदित्यर्थः॥ मानागम्यत्वेन तत्साधनायानुमानप्रयोगो व्याहतोऽनुमानप्रयोगे च मानागम्यत्वव्या
६३ हतमिति दूषयति तदत्यन्तेत्यादिना ननु यथात्मनोऽनुमानेनावेद्यत्वसाधनेपि न वेद्यत्वप्रसक्तिस्तद्वत्प्रमाणेनैवाप्रामाणिकत्वसाधनेपि न
प्रामाणिकत्वप्रसक्तिरिति तत्राह नचात्मनइति प्रमाणनिवर्त्यत्वादितिहेतोरनैकान्तिकतां चाह नच प्रमाणेति संस्कारस्य हि कार्यापवर्गि।

यत्तु कैश्चिदनुमानं रचितं तेन तावदज्ञानं ज्ञानाभावः अभावमानागम्यत्वात् संप्रतिपन्नवत् अभावो ह्यभावस्य प्रत्यक्षस्य वावि
षयः परेणोच्यते अज्ञानं च न मानगम्यं माननिवर्त्यत्वात्संप्रतिपन्नवदिति तदस्येनानुमन्यते अज्ञानस्य मानागम्यत्वेन तत्।
त्साधनायानुमानप्रयोगायोगात् एतन्मानागम्यत्वे वा मानागम्यत्वमवतोति स्ववचनव्याघातात् न चात्मनोऽनुमानेनावेद्यत्वसाध
नइव न स्ववचनव्याघातादिदोषापत्तिः तत्र वृत्तिव्याप्यत्वेपि फलाव्याप्यत्वेनाविरोधात् इह च वृत्तिव्याप्यत्वानंगीकारात् न च
प्रमाणनिवर्त्यस्य प्रमाणागम्यत्वनियमः प्रत्यभिज्ञानप्रमाणनिवर्त्यस्य तद्धेतोः संस्कारस्य नित्यपरोक्षतया साक्षिसिद्धत्वाभा
वेनानुमानगम्यत्वानंगीकारात् न च त्वदुक्तमर्थं न जानामीत्यादिव्यवहारोत्पत्तेः सुषुप्तज्ञानमानेनावासंभाव्यमानोऽतिरिक्त
मेवज्ञानाभावादज्ञानं गमयति अवगतेंऽशेऽवगतत्वादेव न जानामीति व्यवहारायोगादनवगतेंशे चानवगतत्वादेवप्र ६२
श्नानुपपत्तेरिति सुक्तं त्वदुक्तमर्थं प्रमाणतो न जानामीत्येवं परतयापि व्यवहारोपपत्तेः । त्वात् तत्कार्य्यप्रत्यभिज्ञानप्रमाणनि

वर्त्यत्वं अथ च साध्यं नास्तीत्यर्थः अनुव्यवसायनिवर्त्येन च तद्धर्म्येन परसंमतेन व्यवसायेनानैकान्तं द्रष्टव्यं विवरणकारोक्तार्थापत्तिमाशं
क्य निषेधति न चेत्यादिना युक्तमित्यंतेन ननु सामान्याकारं ज्ञानमनूद्य विशेषांशेऽज्ञाने प्रश्न इति तत्राह अवगतेंशइति तत्र स्वसत्तावाधो राम॰
ज्ञातश्चाज्ञातश्च वक्तव्यः न चैतज्ज्ञानाभावपक्षे घटते ज्ञानेन विरोधादस्मत्पक्षे तु नित्यचैतन्यस्याज्ञानसाधकत्वाद्विरोध इति भावः ननु ६३
क्तमित्युक्तं तत्र हेतुमाह त्वदुक्तमर्थमिति नाशंको ज्ञानाज्ञानविषयत्वमर्थस्यापि तु तत्रैव प्रमाणज्ञानाभाववदितरज्ञानयोः सहवर्तनं ब्रूमः न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न केवलमत्रैवेयं गतिरपि तु सर्वत्रैवेदृश्यस्थलइत्याह प्रतिवादीति प्रमाणानवगतस्यकस्यमनुवाद इत्याशंकायां वायं ग्रन्थः आगमं निषे
धतिनायीति तदानीं प्रलयकाले ऽसन्नासीत्सदपि नासीदिति प्रतिषेधे किं नहि तम आसीदित्येका श्रुतिः मायांत्वित्यपरा इन्द्रो मायाभिरित्यप्य
न्या प्रलयकालेपि संसारिणां ज्ञानाभावास्तेऽत्र तमः शब्दाभिधेयाः नत्वदभिमतमज्ञानमित्यर्थः इतरश्रुत्योरन्यथासिद्धिमाह मायाशब्देन चे
ति प्रकृतिं स्वभावभूतामित्यर्थः उपसंहरति तदेवमिति एतदेवाज्ञानं मोऽस्त्वित्यर्थः लक्षणं श्लोकेन संगृह्णाति अनादीति पूर्वज्ञानादेः
प्रतिवादिवाकादवगतार्थस्यानुवादपुरःसरं प्रमाणासंभवेन सर्वैर्वादिभिर्निराकरणांगीकारात् नापि नासदासीन्नोसदा
सीदिति पक्षस्य तम आसीन्मायां तु प्रकृतिं विद्यादिन्द्रो मायाभिरित्याद्यागमस्तत्र प्रमाणं तमः शब्देन सांसारिकपुरुषाणां प्रल
यकालीनज्ञानाभावस्यैवोच्यमानत्वात् मायाशब्देन च परमेश्वरज्ञानशक्तेरेव तत्स्वरूपभूतायाः संकीर्तनात् तदे
वमनिर्वचनीयाज्ञाने लक्षणप्रमाणयोरसंभवान्नाहमज्ञानमस्तीत्येतदेवाज्ञानमिति सिद्धं अत्रोच्यते नतावल्लक्षणास
भवस्तथाहि अनादिभावरूपं यद्विज्ञानेन विलीयते तदज्ञानमिति प्राज्ञा लक्षणं संप्रचक्षते अनादित्वे सति भावरू
पविज्ञाननिरस्यमज्ञानमिति लक्षणमिह विवक्षितं नतावदिहाव्याप्तिः सर्वेषामप्यज्ञानानामुक्तरूपतयानुगमात् ना
प्यतिव्याप्तिः अनादेर्भावस्यात्मनो ———— निवर्त्यत्वाभावेन ज्ञाननिवर्त्यत्वस्याप्यभावात् तदन्यस्य च परमा
णोस्तद्गतश्यामत्वादेश्च स्वरूपतोनंगीकृतत्वाद्रूपत एवानादित्वानंगीकारात् नचासंभवित्वं भावाभावविलक्षणस्याज्ञा
नस्याभावविलक्षणत्वमात्रेण भावत्वोपचारादात्मवस्तुनादिभावत्वेनानिवर्त्यत्वानुमानानुपपत्तेः नचैवंविधमानासंभवः यतः
प्रागभावस्यात्मनश्च यथायथं विशेषणे व्यावृत्तिः संगृहीतं लक्षणं विवृणोति अनादित्वे सतीत्यादिना ननु चिरंतनमतानुसारेण पार्थिवपरमाणु
विशेषगुणेष्वतिव्याप्तिरुक्तेति तत्राह अन्यस्य चेति एतच्च हि तीयपरिच्छेदे विवरिष्यते पश्चानादित्वे सति भावरूपं तदनिवर्त्यं यथात्मेत्यनुमान
विरोधादसंभवीदं लक्षणमिति तत् दूषयति नचासंभवित्वमिति अयंभावः किमिदं भावत्वं हेतूकृतं किं वस्तुत्वं उताभावविलक्षणत्वं नाद्यः अ
सिद्धेः नहि तीयः वस्तुनस्यैवोपाधित्वादिति प्रमाणाक्षेपं परिहरति नचैवंविधइति॥ ॥ ॥ ० ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



श्लोके नानुमानं संगृह्णाति देवदत्तेत्यादिना देवदत्तप्रमेति धर्मिनिर्देशः तत्स्थेत्यादि साध्यनिर्देशः मात्वादिति हेतुनिर्देशः अविगीताअ
विप्रतिपन्ना यज्ञदत्तप्रमेति दृष्टान्तः संगृहे विवृणोति विगीतमित्यादिना इत्थमत्र प्रयोगः देवदत्तप्रमाणज्ञानमेतन्निष्ठप्रमाणाभाववत्त्वानधि-
करणानादिनिवर्तकं प्रमाणत्वात् यज्ञदत्तप्रमाणवदिति अत्र चाभाववत्त्वानधिकरणेत्येवालमनादिनिवर्तकमित्युक्ते प्रागभावमादा-
यार्थान्तरतानतदर्थं प्रमाणाभाववत्त्वानधिकरणेत्युक्तं तावति चाप्रसिद्धविशेषणता प्रमाणाभाववत्त्वानधिकरणस्यानादेर्ज्ञाननिवर्त्यस्यान-
नङ्गीकारादात्मनश्चतन्निवर्त्यत्वानङ्गीकारात् तदर्थं देवदत्तनिष्ठेत्युक्तं यज्ञदत्तनिष्ठप्रमाणे हि देवदत्तनिष्ठत्वे सति प्रमाणाभाववत्त्वान-

॥ देवदत्तप्रमा तत्स्थप्रमाभावातिरिक्तिणः अनादेर्ध्वंसिनी मात्वाद्‌ विगीतप्रमा यथा ॥१॥ विगीतं देवदत्तनिष्ठप्रमाणज्ञानं देवद-
त्तनिष्ठप्रमाऽभावातिरिक्तानादेर्निवर्तकं प्रमाणत्वाद्यज्ञदत्तादिगतप्रमाणज्ञानवदित्यनुमानम् येनु प्रमाप्रमाप्रागभावनिवृ-
त्तिरेव नतु निवर्तकेति मन्यन्ते तान्प्रति देवदत्तप्रमा तन्निष्ठप्रमाभावातिरिक्तानादिनिवृत्तिप्रयोक्तव्यं नचैतद्‌ समवेत-
त्वमेतद्‌ अन्यसमवेतत्वं वा तत्रोपाधिः साध्याव्याप्तेः एतत्समवेतसुखदुःखेच्छाद्वेषप्रयत्नानामेतन्निष्ठप्रमाभावा-
तिरिक्तानादेः स्वप्रागभावस्य निवर्तकत्वेन साध्ये विद्यमानेपि त्वदुक्तोपाधेरभावात् नच विवादपदमनादेर्भा-
वस्य निवर्तकं न भवति पदार्थत्वात् संप्रतिपन्नवदिति प्रत्यनुमानविरोधः सत्ताद्रव्यत्वाद्यनिवर्तकत्वेन सिद्धसाधनत्वात्

धिकरणानादेस्तत्प्रागभावस्य निवर्तके सुप्रसिद्धमेव साध्यमिति नाप्रसिद्धविशेषणता साध्यवैकल्ये पूर्वज्ञानसुखादिव्यवच्छेदायानादिग्रह- णंप
क्षे चैतन्निष्ठप्रमाणज्ञानाभाववत्त्वानधिकरणत्वमेतन्निवर्त्यस्यानादेरेतन्निष्ठत्वानधिकरणत्वेन न संभवति अन्यनिष्ठप्रागभावे प्रत्यन्यनिष्ठस्यानिवर्त-
कत्वात् तस्मादेतन्निष्ठत्वे सति यत्प्रमाणज्ञानाभाववत्त्वानधिकरणं अनादिज्ञाननिवर्त्यं च तद्‌ विमतज्ञानमेवेति तत्सिद्धिः ननु भावनिवृत्तिरेवभा-
वः नहि भावव्यतिरेकेण भावनिवृत्तिर्नाम संभवतीति केषांचिन्मतं तथा च यज्ञदत्तप्रमाणस्य स्वप्रागभावनिवृत्तित्वात् निवर्तकत्वलक्षणसाध्याभावा-
त्साध्यविकलो दृष्टान्त इति तत्राह येत्विति व्याप्यत्वासिद्धिं परिहरति नचैतदिति सत्प्रतिपक्षमाशंक्य परिहरति नच विवादपदमिति संप्रतिपन्नवदिं-

६४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हितीयंशं कत्तेनन्विति नचविगीताप्रमाऽभावातिरिक्तैतन्निष्ठानादिनिवर्तकत्वानधिकरणंप्रमात्वात् यत्तद्दत्तप्रमावत् इतिप्रसाधनादप्रसि
द्धविशेषणत्वभावाद्भवतिप्रतिप्रयोगइतिवाच्यंदेवदत्तनिष्ठंप्रमाणज्ञानंदेवदत्तनिष्ठानाद्यभावानिवर्तकत्वाश्रयताभावानधिकरणंप्रमाणज्ञा
नत्वात् यत्तद्दत्तप्रमाणज्ञानवदित्याभाससमानयोगक्षेमत्वात् नचदेवदत्तप्रमादेवदत्तनिष्ठत्वेसतिदेवदत्तप्रमाभावातिरिक्तानादिनिवर्तकत्वा
नधिकरणंप्रमात्वात् यत्तद्दत्तप्रमावदितिसत्प्रतिपक्षतातन्निष्ठनिवर्तकत्वानधिकरणत्वस्योपाधेः एतत्त्वखादौचव्यतिरेकसिद्धिः अभाव

ननुसंप्रतिपन्नात्मादिपदार्थातिरिक्तस्याभावस्याभावातिरिक्तस्यचानादेर्नैनिवर्तकमितिविशेषणादिदमदूषणमितिचेन्न
तस्यैतवाप्रसिद्धतयाऽप्रसिद्धविशेषणत्वापत्तेः किंचनकिंचिदवेदिषमितिपरामर्शसिद्धसौषुप्तिकानुभवोप्यत्रप्रमाणम् नच
ज्ञानाभावविषयोयमनुभवः अभावप्रतीतेर्धर्मिप्रतियोगिबोधपराधीनतयातदभावेनतस्यानुभवितुमयोग्यत्वात् नच
भेदसादृश्यादिवत्स्वरूपेणाभावस्यापिनिर्विकल्पकबुद्धिबोध्यतानतथात्वेसादृश्यादिवदेवभावत्वापत्तेः निर्विकल्पकबु
द्धिबोध्योभावइतिपरैरलक्षणांगीकारात् नायंसुषुप्तिकालीनानुभवजः परामर्शः किंतूत्थितस्येदानीमेवसौषुप्तिकज्ञानाभावा
नुमानमितिचनवाच्यं तदनुमापकलिंगासिद्धेः नचसामग्र्यभावोलिंगंतस्याप्यसिद्धेः नचज्ञानाभावेनतत्स्यानुमानं अन्यो
न्याश्रयतापत्तेः सामग्र्यभावाज्ज्ञानाभावानुमानम् तदभावाच्चसामग्र्यभावानुमानमितिनचैवंसतिवेदान्तिनामपिज्ञाना
भावानुमानासंभवः अवस्थाभेदसंभिन्नभावरूपाज्ञानसंवेदनादेवसुषुप्त्यवस्थापातहितदहस्यज्ञानस्यतत्सामग्र्याश्चा
भावानुमानात् त्वयापिगत्यंतराभावादेवमेवज्ञानाभावानुमानस्यावश्यमभ्युपेयत्वात् ॥ विलक्षणाज्ञानेप्रत्यक्षमपिप्रमाणमाह किंचे
तिउत्थितस्यनकिंचिदवेदिषमितिपरामर्शोऽनुन्नीतोयः सौषुप्तिकानुभवः सोपिप्रमाणमित्यर्थः ननुकिमितिनिर्विकल्पकानुभवायोग्यत्वंयाव
नाभेदसादृश्यादिवत्संभवउक्तस्तत्राह नचभेदसादृश्येति ननुकिमितिभावत्वापत्तिः नहिनिर्विकल्पकबुद्धिबोध्यत्वसाम्यात्सादृश्यभेदयोरैक्यमि
तितत्राह निर्विकल्पकेति यत्तुतेनोक्तमस्यानुपक्षेतुनायंपरामर्शइत्यादितदनूद्यदूषयतिनायमित्यादिना ननुकिमितिसामग्र्यवैकल्यलक्षण लिं
गासिद्धिः यावताज्ञानाभावेनैवशक्यानुमानंनहेतुकल्प्यमितितत्राहनचज्ञानाभावेनेति। पच्चतेनोक्तमन्यथाभवतामपिघटपटादिज्ञानाभावानुमानंनस्या

दितितदनूद्यपरिहरति नचैवंसतीति ममत्वभावरूपाज्ञानवत्त्व
द्भयाभावः शक्यानुमानइत्यर्थः नवापीपमेवगतिरित्याह त्वया
पीति

वि॰सु॰ पत्वेवंविधाज्ञानस्यतत्परामर्शस्यचमांप्रत्यसिद्धिरितितत्राह नचैवंविधमपीति परामर्शस्याप्युपलक्षणमिदंतस्यापिसमर्थनात् अर्थो
टी॰ न॰ पत्तिमपिप्रमाणयतित्वदुक्तमर्थमित्यादिना पूर्वपक्षस्याशयमनूद्यनिषेधति नन्वित्यादिनात्वदुक्तमर्थंप्रमाणतोनजानामीतियदिदंज्ञानंतत्ता
६५ वत्प्रमाणमेवयथार्थानुभवत्वात्तथाचैतज्ज्ञानविषयांतर्गततत्त्वेनहिविषयभूतस्यार्थस्यापिप्रमाणतोज्ञातत्वात्तन्निषेधवचनविरोधइ
त्याह त्वदुक्तेर्थइति ननुप्रमाणतोनजानामीत्यस्यायमर्थः एतद्ज्ञानत्वग्राहिप्रमाणव्यतिरिक्तंप्रमाणाज्ज्ञानंनास्तीतितत्राह एतद्वतिरिक्ते
ति अत्राप्येवंविधज्ञानस्यपूर्वनिर्दिष्टाद्वतिरिक्तप्रमाणत्वादेवतद्विषयत्ववचनंव्याहतमित्यर्थः ननुसामान्यतःप्रमितस्यविशेषतोनधिगमो

नचैवंविधमज्ञानमघाप्यसिद्धमितिवाच्यंतत्प्रमाणस्यदर्शितत्वात् त्वदुक्तमर्थंनजानामीतिव्यवहारान्यथानुपपत्तिरपिभावरू
पाज्ञानसद्भावेमानं नचप्रमाणतोनजानामीत्येवंपरतयापिव्यवहारोपपत्तिः त्वदुक्तेर्थेप्रमाणज्ञानंममनास्तीत्यस्यविशिष्टविष
यज्ञानस्यप्रमितत्वात् तद्विशेषणतयार्थस्यापिप्रमाणेनाधिगतत्वात् स्ववचनव्याघातापत्तेः एतद्वतिरिक्तप्रमाणज्ञानंत्वदुक्तेर्थे
ममनास्तीतिवक्तोवचनव्याघातदोषानुषंगएवास्यापिज्ञानस्यपूर्ववदेवप्रमाणजन्यत्वात् नचसामान्यतःप्रमाणेनार्थस्याधिग
मेपिविशेषानधिगमाद्दोषः विशेषस्याप्यधिगमानधिगमयोः पूर्वोक्तदोषानतिवृत्तेः ननुभावरूपमप्यज्ञानंज्ञाननिरस्यमभ्युप
गम्यतेभवद्भिस्तत्कथंज्ञायमानेर्थेनजानामीतिव्यवहारःमैवमस्मन्मतेऽज्ञानस्यसाक्षिसिद्धतयाप्रमाणाबोध्यत्वात् प्रमाणज्ञा
नोदयात्प्राक्कालेऽज्ञानंतद्विशेषितोऽर्थःसाक्षिसिद्धोऽज्ञातइत्यनुवादगोचरोभवतिभवतिचप्रश्नार्हइत्यविरोधात् उक्तंचसंप्रदा ४५
यविद्भिः सर्ववस्तुज्ञाततयाऽज्ञाततया वा साक्षिचैतन्यस्यविषयएवेतिकिंचतमआसीन्मायांतुप्रकृतिंविद्यादित्याद्यागमो

ज्ञावनाक्षमाहतिरितितत्राहनचसामान्यत इति पूर्वोक्तेति पूर्वपक्षसमयोक्तेत्यर्थः ननुत्वन्मतेपिकथंज्ञायमानेऽर्थेनजानामीति व्यवहारः यावत्
तोज्ञानाभाववदज्ञानमपिज्ञाननिवर्त्यमेवेतिचोदयति नन्विति नतत्राज्ञानविवर्तकंप्रमाणज्ञानंतद्बोधकमपितुसाक्षिचैतन्यंनचतदज्ञाननिवर्त
कंतत्साधकत्वादितिपरिहरति मैवमितिप्रमाणाबोध्यत्वादिति अभावव्यावृत्तेरेवानुमानादिप्रमाणैर्बोध्यमानत्वादितिभावः यतएवपूर्वंप्रमाण राम
ज्ञानंनोत्पन्नं साक्षिणैवाज्ञानविशिष्टतयैवार्थोनिर्ज्ञातइत्यतएवानुवादप्रश्नौघटेते इत्याह प्रमाणज्ञानोदयादिति आगममपिप्रमाणयति किंचत ६५

CC-0. In Public Domain. Digitization by eGangotri

यत्तु जीवानां तात्कालिकज्ञानाभावस्तमःशब्दाभिधेय इति तन्न नासदासीदित्यभावस्यापि प्रतिषेधादित्याह नचतम इति नच प्रागभावप्रध्वंसव
योस्तानाद्यनंतस्य सद्भावादशक्यनिषेधत्वेतिवाच्यं तयोरप्युत्पत्तिविनाशवत्तायाः साधयिष्यमाणत्वात् मायाशब्दस्यान्यथासिद्धिमुक्त्वा निराचष्टे
नचपरमेश्वरेति ईश्वरज्ञानस्य नित्यस्य ज्ञाननिवर्त्यत्वानंगीकारादिति भावः उपसंहरति तदेवमिति पंचममपि मतं शक्यसमर्थनमित्याह।
भ्रमोपादानमिति नचात्मनीति कूटस्थस्य तस्य विपरिणामादिविकाराभावात् अविद्यावेशवशाद्विकारे प्राप्ताप्राप्तविवेकेन तस्यैव विकारः नचैवं सांख्य
सिद्धांतसंगतेरिहगंधिता परमेश्वराध्यस्तानिर्वचनीयाविद्यापरिणामस्य विवर्तापरनाम्नः स्वीकारादीदृशमेव हेतुत्वमभिप्रेत्य तस्माद्वा एतस्मादा

नचतमःशब्देन ज्ञानाभावः कथ्यते तेनासदासीदित्यभावव्यावर्त्यतम आसीदिति प्रतिपादनात् नचपरमेश्वरज्ञानशक्तिर्माया
भूयश्चान्ते विश्वमायानिवृत्तिः मायामेतां तरंतिते तरंत्यविद्यां विततां योगोमायामित्यादिना ज्ञाननिवर्त्यमायाशब्दप्रयोगदर्शनात्
तदेवं लक्षणप्रमाणयोरुपपन्नत्वादनादिभावरूपाज्ञानमस्तीति सिद्धं किंच भ्रमोपादानमज्ञानमिति लक्षणेपि न दोषः न
चात्मन्यतिव्याप्तिः तस्य केवलस्य कूटस्थस्य कस्याप्यनुपादानत्वात् सत्योपादानत्वेच विभ्रमस्यापि सत्यत्वप्रसंगात् नचवि
भ्रमोपि रूप्यतः सत्यस्तथात्वे प्रमाणज्ञानवदेव विषयापहारलक्षणबाधस्याप्यसंभवप्रसंगात् नचैतावंतं कालमिदं रजत
मित्यभादित्यनुभवविरोधः अनिर्वचनीयस्यापि विभ्रमस्याभावाविलक्षणतया तथात्वेनानुसंधानोपपत्तेः ॥ ६ ॥

त्मन आकाशः संभूत इत्यादिसृष्टिश्रुतयस्तथा जन्माद्यस्य यतः प्रकृतिश्चेत्याद्यधिकरणान्यपि अत एव धातुसमीक्षायां ब्रह्मविवर्तकाण्डे भर्तृ
हरिभिरभिहितमशुद्धतत्वप्रपंचस्य नहेतुरनिवृत्तितः ज्ञानज्ञेयादिरूपस्य मायैव जननी ततइति परिणामित्वमात्रं चात्रोपादानत्वमभिप्रेतं यत्तु वि
भ्रमस्यापि स्वरूपेण सत्यत्वान्नेदमनिष्टमिति तत्राह नचविभ्रमोपीति यदि हि घटादिज्ञानवत्स्वरूपेण सत्यो विभ्रमः स्यात्तर्हि तद्वदेव य
थार्थोपि स्यादित्यर्थः अत एवाहुराचार्याः सदसद्भ्यामनिर्वाच्याविद्यावेद्यैः सह भ्रम इति प्रत्यभिज्ञाविरोधमुक्तं परिहरति नचैतावन्तमि
ति। ननु सद्विलक्षणस्यासतः कथमासीदिति प्रतिसंधानविषयत्वमिति तत्राह

१
दि॰ सु॰
टी॰ न॰
६६

नचस्वरूपसत्तएवेति भ्रमोपादानाज्ञाने प्रमाणमाह विगीतइति अत्राव्यतिरिक्तस्यानेनत्वानधिकरणपदं प्रक्षेप्तव्यं अबाध्यत्वानधिक
रणोपादानइत्युक्ते ऽप्रसिद्धविशेषणता सर्वत्रोपादानकारणस्यद्रव्यस्य परैर्बाध्यत्वानङ्गीकारात् तदर्थमेतज्ज्ञानकारणेत्युक्तं एतज्ज्ञानकारण
त्वानधिकरणोपादानइत्युक्ते व्याहतिस्तदर्थमबाध्यत्वानधिकरणेत्युक्तं तत्रश्चाबाध्यत्वानधिकरणाबाध्याज्ञानोपादानकत्वसिद्धिर्विभ्रमस्यह
ष्टांतेत्वेतज्ज्ञानकारणातिरेकमादायसाध्यप्रसिद्धिः अंतिमसमर्थनमुपसंहरति तस्मादिति इत्यस्यास्त्वनुमानार्थापत्तिशब्दैः प्रसाधिता अविमर्क्ते ।
परेऽविद्याभावाभावविभागदाखघासास्ताम्लाप्तिवैतन्यवेद्याऽविद्यानादिःस्तोकनास्तेकृतनाते वादिभ्रान्त्यापादिताभावभावादेभिर्मानैः केवलंमे
दितात्रशास्त्रैकगम्येपि यथाद्यपूर्वैःऽपरप्रमाणान्निरूपणापिभेदः यथाचरजतरंगयोरभागं परे प्रमिण्वंति पराऽनुबंधात् विभ्रमोपादानमज्ञानमि

नचस्वरूपसत्तएवासौदितिप्रतिसंधानंएतावंतंकालमिहादर्शमुखमासीत्स्फटिकश्चलोहितआसीदित्याद्यनुसंधानदर्शना
त् प्रयोगश्चविगीतोविभ्रमः एतज्ज्ञानकारणाबाध्यातिरिक्तोपादानःविभ्रमत्वात् देवदत्तादिविभ्रमवत् । दर्शितएवचसत्योपा
दानत्वेसम्यक्प्रसंगोविपक्षेबाधकस्तर्कः तस्माद्यदुपादानोविभ्रमस्तदज्ञानमितिसिद्धं ननुतथाप्यसंभविलक्षणंसर्वप्रत्यया
नां यथार्थत्वेनविभ्रमाणामेवाभावात् विगीताःप्रत्यया यथार्थाःप्रत्ययत्वात्संप्रतिपन्नवदित्यनुमानात् अन्यथान्याकारस्यप्र।
त्ययस्यास्यालंबनतायामनुभवविरोधात् संविदांस्वविषयव्यभिचारेचानाश्वासप्रसंगात् ।। इत्युक्तं तत्रविभ्रमाणामेवाभावादुपादानत्वम

संभवीत्यत्याभिवादिनः प्रत्यवतिष्ठंते ननुतथाप्यसंभवीति किमिदंविभ्रमत्वेनविवक्षितंकिंयथार्थज्ञानविशेषः यथास्माकं उतायथार्थज्ञानं ना
द्यः तदुपादानस्यात्मनोऽतःकरणस्यवा अविद्यात्वाभावात् नद्वितीयइत्याह सर्वप्रत्ययानामिति विभ्रमाणामेवाभावादिति ज्ञानानामयथार्थ।
त्वाभावादित्यर्थः ननुकुतःसर्व प्रत्ययानांयथार्थत्वसिद्धिरित्यनुमानादित्याह विगीताइतिअंशतःसिद्धसाधनतानिवृत्त्यैविगीतग्रहणं अयथार्थ
व्यवहारहेतुभूतज्ञानानांपक्षीकरणात्वनांशयासिद्धिः विपक्षेबाधकमाह अन्यथेति भासमानतयाहिविषयत्वं ननुसत्तयानापिकारणतयाऽ
तिप्रसंगात् नचरजतज्ञानेशुक्तिकाचकास्तितथाचाचेत्यमानशुक्तिकालंबनत्वकल्पनायां विरुद्धत्वेवरजतानुभवइतिभावः तथाचनयदीयस्यासत्र एम
त्रमोयएवार्थइत्यादिना विषयलक्षणमुक्तोक्तेनान्यस्यान्यथाभानंप्रतीत्यैवपराहतं परस्मिन्भासमानेपिनपरंभासतेयतइति बाधकांतरमाह संवि ६६

तदप्युक्तं यदि स्वार्थं परित्यज्य कापि बुद्धिः प्रवर्तते व्यभिचारवती स्वार्थे कथं विश्वासकारणमित्यपसिद्धान्तापत्तिरपि वाधिके स्यादत्र
सतोपीति यदि चवहिरसदिदं प्रतीयेत न साकारतापि विज्ञानस्य स्यात् तदप्युक्तं अयथार्थत्व पक्षे च ज्ञाने साकारमापत्तेदिति तदेवं संविहितेधाता
ख्यासासत्त्वात्ति प्रसंगात्त्वा बाधकानुक्ताकारणानिरूपणं दर्शयन् अकारणककार्य्यप्रसंगमपि वाधकं वप्राति असतश्चेति तदप्युक्तं अयथार्थस
वोधस्यतोन्यतावास्तिकारणमिति नन्वन्वयव्यतिरेकाभ्यां चक्षुरवसीयते कारणमिति तत्राह चक्षुरादेरिति असत्त्वं ह्यारोप्येणापि संप्रयोगादित्तित
त्राह देशांतरेति देशान्तरनिवेशिनो रजतादेः स्वरूपेणासतश्च नष्टपुत्रादेरिति योजना ननु दोषदूषितात्साद्देरस्ति मिथ्याप्रत्ययजननसामर्थ्यमि
तितत्राह दोषाणां चेति स्वाभाविकशक्तिप्रतिवंधमात्रं दोषकृत्यं नत्वतिशयाधानमित्यर्थः ननु दावदाहोपहतवेत्रवीजानां हरिद्राजलावसिक्त

असतोपि संसर्गादेरवभासमानतायामसत्ख्यातेरपि स्तावसरतया सौगतमतानुप्रवेशप्रसंगात् असतश्च संसर्गादेः स्फुरणका
रणानिरूपणात् चक्षुरादेश्च संप्रयुक्तमात्रग्राहित्वात् देशान्तरनिवेशिनः स्वरूपासतश्च संप्रयोगायोग्यत्वात् दोषाणां च स्वार
सिककार्य्यप्रसवशक्तिप्रतिरोधमात्रहे‾तुत्वात् मूषिकाघ्रातशालिवीजादौ तथा दृष्टत्वात् दावदहनदग्धवेत्रवीजात्कद।
लीकाण्डजन्मनो दग्धस्य वेत्रवीजत्वेन दोषाणां विपरीतकार्य्यकारणताप्रत्यनुदाहरणत्वात् सर्वत्र च प्रतीयमानयोः संसर्गिणोः
संसर्गव्यवहारस्यासंसर्गाग्रहनिवंधनत्वात्संसर्गज्ञानस्यापि हेतुत्वकल्पनायां गौरवात्॥ हरिद्रांगारपरिप्लुष्टहारीतमांसस्य च दशरात्रं

कांस्यपात्रोषितस्य सर्पिषश्च दृष्टं विपरीतं रंभाकाण्डारंभकत्वं मरण — कारणत्वं चेति तत्राह दावदहनेति दोषाणां विपरीतकार्य्यकारणतां प्रति
दावदहनदग्धवेत्रवीजात्कदलीकाण्डजन्मनोनुदाहरणत्वात्कुतः दग्धस्यावेत्रवीजत्वेनेति योजना उक्तं हि भस्मकादिषु कार्य्यस्य विघातादेव दो
षत्वेति ननु संसृष्टव्यवहारदर्शनात्संसर्गज्ञानपूर्वकत्वमितरत्रैवानुमीयत इत्यत आह सर्वत्रेति सुषुप्त्यादौ सर्वत्र संसृष्टव्यवहारप्रसक्तिवा
रणाय प्रतीयमानयोरित्युक्तं नन्विदं विपर्ययस्थलमात्रलोभेन सकलसमीचीनव्यवहारवर्त्तिसंसर्गज्ञानजातहेतुपरिहरणं अल्पस्य हेतो
र्वहु हातुमिच्छन्विचारमूढः प्रतिभासि मे त्वमिति न्यायमनुसरतीत्यत आह संसर्गज्ञानस्यापीति ॥ ८ ॥ ॥ ६ ॥

वि॰ सु॰ टी॰ न॰ ६७ नन्वयथार्थज्ञानानंगीकारे नेदं रजतमिति बाधकबोधेन किं वेद्यमिति तत्र ह्य असंसर्गाग्रहेति ननु सर्वमेतदिदं रजतमिति संसर्गज्ञानादि प्रत्य
यविरुद्धमित्याशंक्याह नेदमेकं ज्ञानमपि तु ग्रहणस्मरणात्मकमगृहीतविवेकं ज्ञानद्वयमित्याह इदमिति प्रत्ययस्य चेत्यादिना इदमिति प्रत्यया
स्य ग्रहणरूपत्वादित्युत्तरत्रान्वयः अस्य च ज्ञानस्य स्वप्रकाशस्यापि स्वं स्वविषयस्य चेतरस्मादविवेचकत्वस्य वक्ष्यमाणस्यानाकलितविशेषत्व
स्य च सिद्ध्यर्थं दोषदूषितेत्युक्तं भवत्येवमेतद्रजतमित्यत्र काचार्तेति परिशेषात्स्मृतिरित्याह रजतमिति असंनिहितत्वेनासंप्रयोगादप्रत्यक्षत्व
मगृहीतव्याप्तिकत्वादननुमेयत्वमस्यासंभवि अननुभूतरजतस्य च प्रत्ययोनोत्पद्यते तस्मात्सदृशदर्शनसमुद्बुद्धसंस्कारस्य संजायमानेयास्मृ
तिरेवेतिभावः तदुक्तं परिशेषात्स्मृतिरेषेतिनिश्चयो जायतेतरामिति ननु स्मृतेर्गृहीतग्रहणस्वभावायास्तद्रूपतया नग्रहणाद्धृष्यमाणाच्चगव

सं॰ असंसर्गाग्रहप्रसंजितसंसर्गव्यवहारमात्रबाधनादेव बाधकस्य बाधकतोपपत्तेः इदमिति प्रत्ययस्य च दोषदूषितचक्षु
र्जन्यतयानाकलित–विशेषस्य सामान्यमात्रग्रहणरूपत्वात् रजतमिति चासंनिहितविशेषविषयस्य संप्रयोगलिंगा
द्यजन्यतया संस्कारमात्रकारणत्वेन स्मरणत्वात् तस्य च दोषहेतुकत्वेन तदंशागोचरतया स्वविषयाविवेचकत्वात्।
तयोश्चान्योन्यसंसर्गसाकांक्षसामान्यविशेषालंबनयोः स्वरूपतो विषयतश्चागृहीतासंसर्गयोर्निरन्तरोत्पन्नयोः॥

यादिस्मृतिवत्स्वार्थस्य स्वस्य च किमिति न विवेचकत्वमिति तत्राह तस्य चेति दुष्टमनोयोगित्वात् तद्देशकालवैशिष्ट्यं न गृह्णातीत्य विवेचक
त्वमित्यर्थः तथापि कथं स्वरूपतो विषयतश्च विभिन्नाभ्यामाभ्यां संसृष्टप्रवृत्तिरित्यत आह तयोश्चेति सामान्यविशेषेति इदमिति सामान्य
मात्रं रजता कारो विशेषः नन्विदं ज्ञानमिदमिति प्रवर्तयतु रजतज्ञानं च रजतं किमिति रजतार्थिनः पुरोवर्तिनि प्रवृत्तिस्तत्राह स्वरूपतो वि
षयतश्चेतिस्यादेतत् किमिदमेकैकव्यवहारहेतुरुतमिलितम् नाद्यः पृथक्पृथग्देशप्रवृत्तिप्रसंगात् नद्वितीयः क्षणिकज्ञानयोर्मेलनायो
गादित्यत आह निरंतरोत्पन्नयोरिति यद्यपि मेलनं न संभवति तथापि नैरंतर्येणोत्पत्तिरेव तथाविधप्रवृत्तिहेतुरित्यर्थः विनश्यदविन श्रम॰ ६७

६७

CC-0. In Public Domain. Digitization by eGangotri

ननु यथार्थज्ञानानामपि विभ्रमत्वे सर्वेषामेव किमिति न विभ्रमत्वसिद्धिरिति तदनुपपत्तिरेव विपर्यये प्रमाणमित्यत आह स्वरूपेणेति न
दुष्टं नयनदीध्यासंनिहितं रजतशकले रजतमनिर्भवति यादृशी सत्यामेव ज्ञानध्यवसायादि यमपि तादृक्कारि स्फुरति साधारणं हि रूपं तत्स्याज्ञानस्य
विद्यते तेन तत्साम्यप्रतिभानात्समानतामेव मन्यन्ते ननु स्वव्यवहारप्रवृत्तिरपि युज्यते चातः न हि निवारणकारणाद्बाधकाभावोऽयं बाधकस्या
पीति वृत्तवादसंगतिगर्भमपूर्वपक्षमुपसंहरति प्रत्ययानामित्यादिनाऽनेन पीतः शंख इत्यादिप्रत्यया अपि व्याख्याताः तेषु ग्रहणाविवेक
समाश्रयणात् स्वप्नसंशयोश्च स्मरणाविवेकत्वमिति सिद्धान्तयति नैतत्सारमित्यादिना श्लोकं विवृणोति विगीतेति ननूभयसंमता यथा।

स्वरूपेणायथार्थयोर——ययथार्थव्यवहारप्रवर्तकयोर्विभ्रमत्वप्रसिद्धेरणुपपन्नेः तदेवं प्रत्ययानां यथार्थत्वेन स्वरूप
तो विभ्रमत्वाभावात् विभ्रमोपादानमज्ञानमिति लक्षणमलक्षणमेवेति अत्रोच्यते नैतत्—सारं यतः स्वीकारे विभ्रमाणां।
स्यात्स्वीयसिद्धान्तबाधना——अनभ्युपगमे तेषामाश्रयासिद्धिरुद्धता ॥ विगीतविभ्रमाभ्युपगमे सिद्धान्तविरोधात् अन
भ्युपगमे हेतोराश्रयासिद्धेरनुमानानुदयात् अयथार्थव्यवहारहेतोर्ज्ञानस्य पक्षीकरणाद्दोषः इति चेत् नयथार्थस्यापी
श्वरज्ञानस्य सर्वव्यवहारहेतोरयथार्थव्यवहारं प्रत्यपि हेतुत्वपातत्वनार्किकाणां सिद्धसाधनत्वात् इदं रजतमित्यत्रापी
दमंशविषयस्य हन्ति ज्ञानस्यायथार्थव्यवहारहेतोरप्यधिष्ठानविषयस्य वेदान्तिभिर्यथार्थत्वाङ्गीकारात् —र्थव्यवहारहेतुज्ञा

नमात्रपक्षीकरणादुभयपरिहार इति गंगापुरीयं मतं शंकते अयथार्थेति अयथार्थव्यवहारहेतोर्यथार्थत्वसाधने तार्किकाणां तावदीश्वर।
ज्ञानमादायार्थान्तरमिति दूषयति नयथार्थस्यापीति भवतु तान्प्रति तात्पर्यं प्रति तु किमायातमिति तत्राह इदं रजतमित्यत्रेति अयमर्थः इदं र
जतमित्यत्रेदमित्यन्तः करणपरिणामः प्रत्यक्षः रजतमिति तु रजतरूपसंस्कारानुरंजितेदमंशावच्छिन्नात्माविद्यापरिणामः तयोरेकसाक्षि
वेद्यत्वेनैकफलत्वादेकं ज्ञानत्वमिति हि सिद्धान्तः ततश्चेदमंशज्ञाने सिद्धसाधनमिति अन्यथाख्यातिवादिनामपीदमंशज्ञाने समानमेतत्
सर्वज्ञाने धर्मिण्यभ्रान्तं प्रकारे तु विपर्यय इति न्यायात् धर्मिप्रयुक्तदूषणपरिहारायमरीचिन्त्यन्तरमाह॥ ६॥ ॥ ६ ॥ ॥ ६ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१
वि॰सु॰
टी॰न॰
९८

ज्ञानत्वमिति यथार्थेऽवृत्तित्वमात्रसाधने सिद्धसाधनतानर्थमात्रग्रहणं तथा ज्ञानवृत्तित्वादित्युक्ते सत्तायामनैकान्तिकत्वं स्यादयथार्थव्यवहा
रेऽपि तस्याः प्रवृत्तेस्तन्निवृत्त्यर्थमात्रग्रहणं अत्र मात्रशब्देन किमयथार्थवृत्तित्वाभावमात्रं विवक्षितं किं वाऽयथार्थवृत्तित्वानधिकरणं प्रथमे
प्रत्याहमेवं मात्रशब्देनेति अयथार्थो हि व्यवहारस्तवापि संमतस्तत्र च ज्ञानत्वस्यावृत्तिरस्तीत्यर्थोऽन्तरमित्यर्थः ज्ञानत्वमनुभवमात्रवृत्ति।
ज्ञानमात्रवृत्तित्वादित्याभाससमानयोगक्षेमतावद्दृष्टव्या हि तौ यंशंकते अयथार्थेति अत्र दुष्टसामग्र्यप्रसूतमात्रवृत्तित्वमुपाधिः न च सा
धनव्यापकता दुष्टसामग्रीप्रसूतग्रहणस्मरणयोरपि ज्ञानत्वस्य वृत्तेः व्यवहारत्वसत्त्वादिना व्यतिरेकसिद्धिः मात्रग्रहणं तु व्यर्थमेव विष

ज्ञानत्वं यथार्थमात्रवृत्ति ज्ञानमात्रवृत्तित्वात्प्रमात्ववदिति विवक्षितमिति चेन्नैवं मात्रशब्देनायथार्थवृत्तित्वावृत्ति विव
क्षायामयथार्थव्यवहारे ज्ञानत्वस्य वृत्त्यभावेन सिद्धसाधनत्वात् अयथार्थवृत्तित्वात्यन्ताभावाधिकरणत्वविवक्षितमिति
चेत्तन्न दुष्टसामग्र्यप्रसूतमात्रवृत्तित्वस्यैवोपाधेः यथार्थशब्देन च सदृर्थविवक्षायां नायं सर्पइत्यादिबाधविरोधा
न तु च्छव्यावृत्त्यर्थविवक्षायां चास्मान्प्रति सिद्धसाधनत्वात् किं वा यथार्थप्रत्य योऽसौ न्यस्य प्रत्ययस्य यथार्थत्वेन स्व
सालंबनत्वाय कश्चिदप्ययथार्थप्रत्ययोऽभ्युपेयः तथा सति तत्रैव हेतोरनैकान्तिकता अयथार्थत्वेन तस्य प्रत्ययस्य कं
ठोक्त एव व्यभिचारः अयथार्थप्रत्ययोऽस्तीत्यतादृशः प्रत्ययो नास्ति किंतु व्यवहारमात्रं पदार्थानामसंसर्गाग्रहनिबंधनमि
ति चेन्नैवं सर्वत्र संसर्गव्यवहारस्य व्यवह्रियमाणपदार्थसंसर्गज्ञानपूर्वकत्वनियमात्॥ अव्याप्तेरणुपाधित्वात् किं चोभयोरप्यनु

मानयोः साध्यगतयथार्थशब्दस्य कोऽर्थः किं सत्यमुतासद्व्यावृत्तत्वमिति विकल्पक्रमेण दूषयति यथार्थशब्देनेत्यादिना ननु भवन्मतेऽप्यस
त्वां प्रति सिद्धसाधनत्वमन्यथाख्यातिवादिनं प्रति किं दूषणमिति तन्न दृष्टं सर्वसाधारणं दूषणं वक्तुमुपक्रमते किं चेत्यादिना अयथार्थः प्रत्ययो
स्तीति वाक्यजन्यात्तत्प्रयोगमूलभूता वा प्रतीतिरस्ति न वा आद्ये यथार्था यथार्था वा उभयथाप्येतत्प्रत्ययविषयेणैव तत्प्रत्ययेन वानैकान्ति।
कत्वमुक्तानास्ति पक्षं शंकते अयथार्थेति असंसर्गाग्रहमात्रात् संसृष्टव्यवहारो न युक्तः संसर्गज्ञानमंतरेण संसृष्टव्यवहारानुत्पत्तिनियमादिति
त्प

[illegible]
एम॰
९८

९८

CC-0. In Public Domain. Digitization by eGangotri

एवंनियमानंगीकारे बाधकमाह अन्यथेति गामानयेति हि उत्तमवृद्धेनोक्ते मध्यमवृद्धस्य प्रवृत्तिं दृष्ट्वा बाल इत्थमाकलयति नूनमनेन पद-
कदंबेनैतावदर्थविषयं ज्ञानं संसृष्टप्रवृत्तिहेतुभूतमुत्पादितमिति पश्चादावापोद्वापाभ्यां पदार्थविशेषेषु पदविशेषसामर्थ्यं गृह्णाती-
ति व्युत्पत्तिपरिपाटी तदत्रापि संसृष्टव्यवहारस्यासंसर्गाग्रहादेवोपपत्तौ संसृष्टपदार्थविषयप्राथमिकज्ञानानुमानानुदयात् तन्मार्गे सं-
गतिग्रहायोगात्तच्छब्दप्रामाण्येनेत्यर्थः न केवलं शब्दप्रामाण्यस्यैवायं वियोगोऽपि त्वनुमानस्यापीत्याह एवमिति यथा हि शब्दो नित्यश्चा-
क्षुषत्वात् घटवदित्यनुमानाभासे संसृष्टव्यवहारोऽसंसर्गाग्रहमात्रात् न हि नित्यः शब्दः अनित्यत्वधर्मव्यतिरिक्तत्वे सति श्रावणत्वात् शब्दत्ववदि।
अन्यथा मध्यमवृद्धव्यवहारेऽप्यसंसर्गाग्रहादेव तदुपपत्तेर्व्युत्पित्सोः संसर्गज्ञानानुमानाभावाच्छब्दप्रामाण्यभंगप्रसंगः ए-
वमनुमानाभासस्थलेसदनुमानेऽप्यसंसर्गाग्रहादेव संसर्गव्यवहारोपपत्तेरनुमानोच्छेदः प्रत्यभिज्ञाप्रामाण्योच्छेदश्च ज्वालैक-
त्वव्यवहारवत्सर्वत्र प्रत्यभिज्ञायामसंसर्गाग्रहादेव संसर्गव्यवहारोपपत्तेः यत्र दोषशंका नास्ति तत्र संसर्गज्ञानानुमानादुप-
पद्यत एव शब्दप्रामाण्यम् अन्यथान्यथाख्यातिवादिनोऽपि विपर्ययशंकया व्युत्पत्तिविरहाच्छब्दप्रामाण्यभंगप्रसंगो दुर्वा-
र इति चेन्नैवं तत्र संसर्गज्ञानानुमाने लिंगानिरूपणात् तथा हि किं दोषाभावः संसर्गज्ञाना- नुमापकः किं वा व्यवहारमात्र-
मुताविसंवादिव्यवहारः नाद्यः दोषाभावस्य संसर्गज्ञानस्य च व्यभिचारित्वात् सत्यपि दोषाभावे सामग्रीवैकल्ये संसर्गज्ञानानु-
न्यत्रापीत्यर्थः प्रत्यक्षेऽप्याह प्रत्यभिज्ञेति तत्र हेतुः ज्वालैकत्वेति दोषशंकासदसत्त्वाभ्यां नियममन्यथाख्यातिवादिप्रतिबंद्याशंकते यत्र दोषस्या-
दिना अन्यथाख्यातिवादिनामपि उत्तमवृद्धप्रयुक्तशब्दात्संसृष्टज्ञानमनुमाय तत्र बालस्य व्युत्पत्तिरित्यभिमतं तथा सति यथा क्वचिद्विपर्य-
येऽपि विपर्ययशंका तथान्यत्रापि विपर्ययशंका निरवकाशेति इतरथा तन्मार्गेण व्युत्पत्तेरभावात् शब्दप्रामाण्यभंग एव विपर्ययशंकोपशमश्च
तत्र दोषशंकोपशमात्तदस्मिन्मतेऽपि समानमित्यर्थः दूषयति मैवमिति अस्माकं व्यवहारः संसर्गज्ञानपूर्वकः न पुनरसंसर्गाग्र-
हादित्यत्र न किंचिल्लिंगमस्तीत्यर्थः संभवति लिंगानि विकल्प्य दूषयति लिंगाभावमेवोपपादयति तथा हीत्यादिना यत्र दोषाभावस्तत्र संसर्गज्ञा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१
त्रि॰सु॰
टी॰न॰
६६

ननु न दोषाभावमात्रात्संसर्गज्ञानमनुमिनुमः किंतु तद्युक्तसामग्रीसद्भावात् तथा च न व्यभिचारः यस्मिन् सति भवत्येव कार्यमिति सामग्रीलक्ष
णादिति तत्राह न च दोषाभावेति भवेदेवं यदि सामग्र्येव ज्ञायेत न त्वेतत्तस्याः कार्यैकगम्यतया संसर्गज्ञानलक्षणकार्यज्ञानतत्सामग्री
ज्ञानयोः परस्पराश्रयप्रसंगादित्याह सामग्र्या इति इदं रजतमिति न हि तत्र संसर्गज्ञानं तवाभिमतमिति भावः विनापीति अविसंवादिव्य
वहारस्यापि संसृष्टयोरर्थयोरसंसर्गाग्रहादेवोत्पत्तिसंभवात् न संसर्गज्ञानं विना काचिदनुपपत्तिर्येन तदनुमापयेदित्यर्थः अत्र च विसं
वादिव्यवहारादेषमार्थसंसृष्टयोरित्युक्तं तेनैतदुक्तं भवति असति संसर्गेऽसंसर्गाग्रहात् उत्पद्यमानो व्यवहारो विसंवादी न तु सत्यविसंवादीति

न च दोषाभावविशिष्टसामग्रीसद्भावेन संसर्गज्ञानानुमानं सामग्र्याः कार्यैकसमधिगम्यत्वात् सति संसर्गज्ञाने साम
ग्र्यनुमानं तदनुमाने च संसर्गज्ञानमिति परस्पराश्रयप्रसंगात् नापि द्वितीयः इदं रजतमित्याद्ययथार्थव्यवहारे व्य
भिचारात् नापि तृतीयः विनापि संसर्गग्रहं संसृष्टयोरसंसर्गाग्रहादेव तदुपपत्तेः त्वन्मते घटत्वतद्व्यक्त्योः समवायस्या
प्रत्यक्षतया संसर्गाग्रहेऽपि संवादिव्यवहारदर्शनेनानैकान्त्याच्च व्यवहाराविसंवादस्य च देशान्तरकालान्तराधीनाधिगम
तया व्यवहाराधिगमसमयेऽनधिगतत्वेनातल्लिंगत्वात् बालस्य मध्यमवृद्धस्य वापि संसर्गज्ञानानुमानानुदयेप्यु
त्पत्तिविरहप्रसंगात् न च प्रतीतिविरोधः ॥ न केवलमस्योक्तवर्त्मनांशिकमनैकान्त्यमपि तु स्पष्टमेव त्वन्मत इत्याह त्वन्मत इति घट इति घट
त्वतद्व्यक्तिसंसृष्टव्यवहारस्तावदविसंवादी न चात्र व्यवहारसमये संसर्गज्ञानमस्ति तत्संसर्गस्य समवायस्य त्वन्मते प्रत्यक्षत्वानंगीकारात्
अनुमानस्य चाविसंवादिव्यवहारलिंगतया प्राप्तसिद्धेः तन्न तत्राविसंवादिव्यवहारस्य संसर्गज्ञानपूर्वकत्वं व्यभिचरतीत्यर्थः स्वरूपासिद्धिं चाह व्य
वहारेति अविसंवादित्वस्य कालान्तराधिगम्यत्वात् मध्यमवृद्धवर्तिज्ञानानुमानसमये दुरधिगमतया लिंगत्वाभावेन संगतिग्रहणायोगात्
पुनरपि स एव दुरात्मा शब्दप्रामाण्यभंगप्रसंग आगत इत्यर्थः एवमनुमाने दूषिते यत्तु रजतज्ञानस्यान्यालंबनत्वेनुभवविरोध इति बाधकत्व

राम॰
६६

नन्वकिं रजताकारप्रतीतिं प्रति शुक्तेरालंबनत्वेऽनुभवविरोधः इदंमात्रस्य वा आद्येनांगीकारपरास्त इत्याह रजतेति द्वितीयं दूषयति इदमाकारस्यापि
ति प्रतीतिमेवाभिनयति इदं रजतमिति अनाश्वासप्रसंगपूर्वोक्तं परिहरति न चेति येन हि नियामकेन क्वचिद्धि संवादिव्यवहारजनकत्वेऽपि सं
विदां न सर्वत्र तत्त्वं कथा प्रवृत्त्युच्छेदः सनास्मन्मतेऽपि दंड वारित इत्याह विसंवादीति किं च बोधकतया स्वतः प्रमाणत्वात् ज्ञानानामव्यभिचा
रस्य चानुमानमात्रागतया प्रमाणमात्राननुप्रवेशित्वात् सितासित व्यभिचारेऽपि चक्षुषः प्रामाण्यापी कारान्न नानाश्वासशंकापि न तृतीयं बाध
कं परिहरति न चासत इति नानिर्वचनीयवादिनामयं दोष इत्यर्थः एतेन साकारताप्रसंगोऽपि परिहृतः अन्यथाख्यातिवादिनां तुल्यदोषत्वाव
रजताकारायाः प्रतीतेः शुक्तिकालंबनत्वानभ्युपगमात् न हि रजतं शुक्तिरिति परैरपि प्रतीतिरूपेयते इदमाकारस्य तु रजतज्ञा
नालंबनत्वमनभ्युपगच्छतस्त्वैव प्रतीतिविरोधः इदं रजतमिति सामानाधिकरण्येन पुरोवर्त्तिन्यंगुलिनिर्देशपुरःसरमा
दानादिव्यवहारदर्शनात् न च संविदां विषयव्यभिचारादनाश्वासप्रसंगः विसंवादिव्यवहारजनकत्वपक्ष इवास्मन्मतेऽप्याश्वा
सोपपत्तेः न चासतः संसर्गादेरवभासाभ्युपगमादसत्ख्यातिप्रसंगः आस्मानस्य संसर्गादेः सद्विलक्षणत्वावदसद्विलक्षणत्वा
त्यागमप्यंगीकारात् न चायथार्थज्ञानजन्मनि करणाभावः दोषदूषितचक्षुरादेस्तत्करणत्वोपपत्तेः ज्ञानानामाजानतो
यथार्थव्यवहारजनकत्वेऽपि दोषवशादयथार्थव्यवहारहेतुत्वं चैवं दुष्टानां करणानां विपरीतज्ञानहेतुतापि अपि संभ
वात् यथा च दवदाहस्य वेत्रबीजविनाशकत्वे रूपान्तरजनकत्वं तथा दोषाणामपि यथार्थज्ञानप्रतिबंधकत्वमयथार्थज्ञान
हारेऽप्यसमानयोगक्षेमत्वमिति द्रष्टव्यं यस्तु कारणाभावाद्विप र्यासापलापस्तं परिहरति न चायथार्थेति ननु समीचीनज्ञानहेतुभ्यो नयना
दिभ्यः कथमसमीचीनज्ञानजन्म न हि जातु कुटजबीजाद्दूर्वांकुरप्ररोह इत्याशंक्य तत्र प्रतिबंद्या परिहारमाह ज्ञानानामिति आजानतः स्वभा
वतः फलतु दोषोपहतेभ्योऽपि न मिथ्याज्ञानजन्म प्राप्नकार्यप्रतिबंधकमात्रत्वात् दोषाणामित्युक्तं तत्परिहरति यथा च दवदाहस्येति दवो व
नवह्निः तेन योदाहस्तस्येत्यर्थः माभूद्वनवह्निदग्धवेत्रबीजादनुदाहरणं मा च भूत्तेषां वेत्रबीजत्वादाहस्यैव तावद्भयकारकत्वमनुमन्तव्यं

CC-0. In Public Domain. Digitization by eGangotri

१

वि·सु· यत्संसर्गज्ञानस्यापि संसृष्टव्यवहारहेतुत्वे कल्पनागौरवात् संसर्गाग्रह एव सर्वत्र संसृष्टव्यवहारहेतुरित्युक्तं तत्राह सर्वत्र चेति प्रमाणबलात्प्रा

टी·न· प्तगौरवं न दोषः प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि बालाग्रशतभागोपि न कल्प्यो निष्प्रमाणक इति न्यायादिति भावः तदेवं संसर्ग।

७० ज्ञाने संसृष्टव्यवहारान्यथानुपपत्तिं प्रमाणमभिधाय बाधान्यथानुपपत्तिमपि प्रमाणयति असंसर्गेति उपपादनासंभवात्तदनुपपत्तिरपि संसर्ग

ज्ञानसाधकेति शेषः अंगीकृत्य तद्दोषं बाधं तद्धेतुत्वं ज्ञानस्य निरस्तम् इदानीं स एव तु न घटतेऽव्याप्तेरित्याह न च व्यवहारेति अस्ति हि विरक्त।

स्यापि कस्यचित्पुरोवर्तिनीदं रजतमिति भ्रान्तिर्नेदं रजतमिति बाधश्च न च तत्र व्यवहारोऽतदर्थित्वात् अतोऽव्याप्तिरित्यर्थः लक्षणान्तरं शंकते

सर्वत्र चासंसर्गाग्रहादेव संसर्गव्यवहारमभ्युपगच्छतः शब्दलिंगादिप्रामाण्यभंगस्य दर्शितत्वादेककल्पनागौरवस्यादूष
णत्वात् असंसर्गाग्रहमात्रस्य व्यवहारप्रसञ्जकत्वादेव तन्मतसंजितायथार्थव्यवहारबाधकत्वेन बाधकस्य बाधकत्वोपपादनासंभ
भवात् न च व्यवहारस्य विच्छेदो बाधः अतदर्थिनां तत्र व्यवहारानुदये नेदं रजतमित्यादिज्ञानस्याबाधकत्वप्रसंगात् नतद
र्थिनां च व्यवहारविच्छेदकस्य बाधकत्वे चौरादिज्ञानस्यापि तद्विच्छेदकस्य बाधकतापत्तेः न च तद्योग्यता विच्छेदो बाधः
नहि च्छेदसमयान्तरे पुनस्तत्र व्यवहाराभावप्रसंगात् योग्यताप्रतिबन्धो बाधः स्यादपि तु विवेकज्ञानवेलायां हेत्वभावादेव फ
लासिद्धौ प्रतिबंधकल्पनानवकाशात् न चाग्रहणनिवृत्तिर्बाधः सर्वग्रहणानां तथात्वेन बाधरूपत्वप्रसंगात् ॥ तदर्थिनामिति।

चौरादीति यदा हि कश्चित्क्वचिद्देशे यागे चौरादिज्ञानाद्विच्छिन्नोद्योगो भवति तत्र चौरादिज्ञानस्य यागादिबाधकत्वं स्यादित्यर्थः ननु येयं व्यव

हारयोग्यता पुरोवर्तिनो रजतताभिमानात्तद्विच्छेदो बाधस्तथा च नाव्याप्तिरपि विरक्तस्यापि योग्यतानपायादिति तत्राह न च तद्योग्यतेति न ७०

हि योग्यताप्रतिबंधमात्रं बाधः तथात्वे प्रतिबंधापाये पुनरपि तत्रैव भ्रमिष्यतीति तत्राह योग्यतेति सति पुष्कलकारणे कार्यानुत्पत्तिर्हि शक्ति

प्रतिबंधकल्पिका सा चात्र नास्ति विवेकाग्रहणेन विवेकाग्रहस्य निरासादित्यर्थः लक्षणान्तरं दूषयति न चाग्रहेति सर्वाणि हि ज्ञानानि स्वप्राग राम·

भावनिवर्तकानि निवृत्तिर्वेति बाधकत्वं बाधत्वं वा स्यात्तथा च सर्वेप्यभ्रान्ताः स्युरित्यर्थः न च विवेकाग्रहनिवृत्तिर्बाधः सर्वभेदज्ञानानां बाधक ७०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अन्यथोपपत्तिनिराकरणमुपसंहरति अत इति परिणतानाज्ञाननिवृत्तिर्वाधस्तथा च तत्परिणामरूपमिथ्याज्ञाननदर्थौ विनानवाध
सिद्धिरिति खंडनकार्थः पत्नुपरिशेषान्स्मृतिरित्युक्तं तद्दूषयति रजतगोचरेत्यादिना असंप्रयुक्तविषयत्वेसाक्षात्कारित्वेऽनुपपन्नमि
ति शंकते नन्विति दूषयति नप्रत्यभिज्ञायामिति येषां हि प्रत्यभिज्ञानमेकं ज्ञानं नेप्यानन्नापि वेत्ससु प्रवेत्यर्थः॥ तत्र चक्षुषा संस्कारद्वारा प्र
त्यासत्त्यां वा ग्रुपत्वेऽत्रापि सा समेत्याह तत्र संस्कारेत्यादिना प्रत्यभिज्ञावदेवतत्रोल्लेखव्यथार्थत्वप्रसंगवारणाय दोषकलुषितेत्युक्तं य
द्यपि सर्वप्रत्यययाथार्थ्यमप्रामाणिकं नापि विपक्षेकश्चिद्बाधकस्तर्कस्तथापि समारोपसद्भावे किं प्रमाणं नहि परपक्षप्रतिषेधमात्रात्स्व
पक्षसिद्धिरित्यधिकविवक्षया शंकयति तथापीति श्लोके नानुमानं संगृह्णाति नयनमिति अत्र नयनविशेषः पक्षः साध्ययोर्निधानत्व्यःकार

अतो न व्यवहारनिवारणेन बाधकस्य बाधकतोपपत्तिः रजतगोचरविज्ञानस्य च दोषदूषितलोचनजन्यत्वयापरिशेषा
सिद्धेः संस्कारमात्रजन्यत्वेन स्मृतित्वकल्पनायोगात् ननु संयुक्तत्वेन रजतज्ञानप्रत्यकारणस्य रजतस्य ननु गोचरत्वस्वे।
त्र साक्षात्कारिज्ञानेनजनकस्यैव विषयत्वादितिचेन्न प्रत्यभिज्ञायां तत्ताया अपि गोचरत्वात् तत्र संस्कारसचिवमिंद्रियं त।
त्तांगोचरयतीति संस्कारोपस्थापितत्तांतत्तायादतिचेदत्रापि तर्हि संस्कारोपनीतं रजतं दोषकलुषितेंद्रियेण विषयीक्रिय
तइति न दोषः तथापि समारोपे किं प्रमाणमितिचेदुच्यते नयनं नयनोत्पन्नतसम्यग्ज्ञानातिरिक्तिणः ज्ञानस्य कारणं नत्वाद्य
थैव नयनांतरम् १२ एतच्चक्षुरेतच्चक्षुर्जन्ययथार्थज्ञानातिरिक्तज्ञानजनकं चक्षुष्ट्वादिति पत्वाद्यावचक्षुरंतरवदिन्द्रियांतरवच्च॥

णमित्यंतापतिज्ञातत्वादितिनयनत्वादिंद्रियत्वादेतिहेतुः यथैव नयनान्तरमिंद्रियांतरं वेति दृष्टान्तः एतदेव विवृणोति एतच्चक्षुरित्यादिना एत
तच्चक्षुर्जन्ययथार्थज्ञानत्वानधिकरणज्ञानजनकमितिचसाधनीयं अन्यथा पूर्वकालेतज्जन्ययथार्थज्ञानातिरिक्तज्ञानजनकत्वस्योत्तरकाले
संभवेन सिद्धसाधनत्वात् तत्र चक्षुर्मात्रपक्षीकरणे चक्षुरंतजन्ययथार्थज्ञानत्वानधिकरणेनैतच्चक्षुर्जन्ययथार्थज्ञानेनार्थांतरतात्तन्निवृत्त्यर्थं।
मेतच्चक्षुर्ग्रहणम् एवं साध्येपि दृष्टव्यम् यथार्थज्ञानत्वानधिकरणज्ञानजनकमित्युक्ते प्राभाकराणामप्रसिद्धविशेषणताविरहस्ता च त
ना

CC-0. In Public Domain. Digitization by eGangotri

१
वि॰ सु॰
टी॰ न॰
७१

वादे वैतच्चक्षुर्जन्यत्वे सति यथार्थज्ञानत्वानधिकरणत्वमस्तीति नाप्रसिद्धविशेषणत्वं साध्यवैकल्यं व्याहतिर्निरूप्येय यथार्थपदं पक्षेत्वेन
चक्षुर्जन्ययथार्थज्ञानत्वानधिकरणत्वमेतच्चक्षुर्जन्यत्वानधिकरणत्वात्संभवति व्याघातात् तस्माद्यथार्थज्ञानत्वानधिकरणं किंचि-
च्चक्षुर्जन्यं ज्ञानं सिद्ध्यतीति चाक्षुषायथार्थज्ञानसिद्धिः एवं लिंगाभासादिकमपि पक्षीकृत्य साधनीयं सत्प्रतिपक्षतामाशंक्य दूषयति
न च चक्षुरित्यादिना यथार्थज्ञानजनकत्वे सत्यतिरिक्तज्ञानजनकं न भवतीत्युक्ते व्याप्यत्वासिद्ध्याबाधानैकांतिकतेस्यातां तन्निवृत्त्यर्थं चक्षु-
र्जन्येत्युक्तं चक्षुर्जन्ययथार्थज्ञानजनकत्वे सत्यतिरिक्तज्ञानाजनकत्वं चक्षुर्जन्ययथार्थज्ञानजनकत्वाभावाद्व्यतिरिक्तज्ञानाजनकत्वा

न च चक्षुश्चक्षुर्जन्ययथार्थज्ञानजनकत्वे सत्यतिरिक्तज्ञानजनकं न भवति इंद्रियत्वात् घ्राणवदिति प्रकरणसमता
मनस्यनैकांतिकत्वात्तस्य साधारणकारणस्य चक्षुर्जन्ययथार्थज्ञानजनकत्वे सत्यतिरिक्तरसादिज्ञानजनकत्वात्।
चक्षुषश्चक्षुर्जन्ययथार्थज्ञानजनकत्वे सत्यतिरिक्तरसादिज्ञानाजनकतया सिद्धसाधनत्वाच्च न च वहिरिंद्रियत्वादि
ति विशेषणान्नानैकांतिकता तत्रापि सिद्धसाधनतायास्तादवस्थ्यात् न च यथोक्तयथार्थज्ञानजनकत्वे सत्यतिरिक्त
ज्ञानजनकत्वात्यंताभावाधिकरणतया साध्यस्य विवक्षितत्वाद्दोषः घ्राणादिषु चक्षुर्जन्ययथार्थज्ञानाजनकत्व
स्यैवोपाधेः सत्वात्॥ ॥ ) ह्याद्यः पक्षो व्याहतः द्वितीयस्तु सिद्धत्वयथार्थज्ञानजनननिवारणेन सिद्ध्यतीत्यर्थः अनैकांति
कतामेव दर्शयति तस्येति सिद्धसाधनतां चाह चक्षुष इति मनस्यनैकांतिकतापरिहाराय विशेषणमाशंक्य दूषयति न चेति प्रका- ७९
रान्तरेण सिद्धसाधनतापरिहारमाशंक्य निषेधति न च यथोक्तेति अतिरिक्तज्ञान जनकत्वाभावमात्रं न साध्यं किंतु तदत्यन्ताभा-
वस्तथा च न सिद्धसाधनं अयथार्थज्ञानजनकत्वादिना मतिरिक्तज्ञानजनकत्वात्यन्ताभावासिद्धेः अत्र च वहिरिन्द्रियत्वादित्येव हे- राम
तुः अन्यथा मनस्यनैकांतं तत्र हेतुः घ्राणादिष्विति॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ७१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ननु यत्र वस्तुजन्ययथार्थज्ञानाजनकत्वं नास्ति तत्र वस्तुजन्ययथार्थज्ञानजनकत्वे सत्यतिरिक्तज्ञानजनकत्वात्यन्ताभावाधिकरण
त्वमपि नास्तीति व्यतिरेकः क्व निश्चित इत्यत आह न च व्यतिरेकेति न च तत्रात्ममनोरिन्द्रियत्वमुपाधिः आन्तरपदस्य पक्षमात्रव्यावर्तक
तया पक्षेतरत्वात् तथा प्रमाणात्वमनुभवाद्यावृत्त अनुभवत्वातिरिक्तत्वे सति ज्ञानत्वावान्तरजातित्वात् स्मृतित्ववत् प्रमानुभूत्योश्चलस्खल
स्तृणभावांगीकारादिष्टसिद्धिः पूर्वं चाक्षुषविभ्रमसद्भावे प्रमाणमुक्तं इदानीं शाब्दविभ्रमं साधयति विवादपदानीति पदमात्रपक्षीक
रणे गामानयेत्यादिषु यथार्थज्ञानजनकेषु सिद्धसाधनता तदर्थं विवादपदग्रहणं आकांक्षासन्निधिमन्त्वेति पदानीत्यर्थः पदानां देव
दत्तोयमधीत इति वक्तृविशेषानुमापकतयाप्यन्वयप्रतिपत्तिजनकत्वेन सिद्धसाधनता तत उक्तं स्वस्मारितेति पदकदंबकत्वात्पदसमूह

न च व्यतिरेकोपसंहारस्थलाभावः मनसश्च वस्तुजन्ययथार्थज्ञानजनकस्यातिरिक्तज्ञानजनकतया व्यतिरेकोपसंहारभू
मित्वात् विवादपदानि पदानि स्वस्मारितपदार्थान्वयप्रतिपादकानि आकांक्षासन्निधिमत्पदकदंबकत्वात् गामानयेत्या
दिपदकदंबवत् न च योग्यतावत्त्वमुपाधिः साध्येन समव्याप्त्यभावात् आकांक्षासन्निधिरहितपदेषु योग्यतावत्त्वेपि सा
ध्याभावात् न चाकांक्षादिमत्त्वे सति योग्यतावत्त्वमुपाधिः व्यर्थविशेष्यापातात् ऽऽत्वादित्युक्ते उग्रास्तुरगाः खदिर इत्यादिपद

समूहेष्वनैकान्तिकता तदर्थमाकांक्षाग्रहणं तावत्युक्ते गामानय प्रसादं पश्य इत्यत्र साकांक्षयोरप्यसन्निहिततया परस्परमन्वयप्रतीत्यजन
कयोर्गां पश्येत्यनयोरनैकान्तिकता तन्निवृत्त्यर्थं सन्निधिमदिति तावत्युक्ते चायमेति पुत्रो राज्ञः पुरुषोपसार्यतामिति वाक्ये राज्ञ इति पुरुष इति
च पदयोः सन्निधिमत्त्वेपि निराकांक्षेण परस्परमन्वयप्रतीत्यजनकयोरनैकान्तिकता तदर्थमाकांक्षाग्रहणं किं समव्याप्तिवादिनायमुपाधि
र्दीयते विषमव्याप्तिवादिना वा नाद्य इत्याह साध्येनेति तदेव विवृणोति आकांक्षेति ननु न वयमन्वयप्रतीतिजनकत्वे योग्यतावत्त्वमात्रमुपा
धिं ब्रूमः किं तर्ह्याकांक्षासन्निधिमत्त्वविशेषितं तथा च समव्याप्तिरस्त्येवेत्यत आह न चाकांक्षेति हेतुमाह व्यर्थविशेष्येति आकांक्षासन्निधिम
त्त्वेपि शब्दिकविद्योग्यताभावापराधेनान्वयप्रतीतिर्न स्यात् ततः साध्यव्याप्तिसिद्ध्यर्थं योग्यतावत्त्वमुपादेयं न चैतदस्ति तादृशां सर्वेषां पक्षत्वादे

त्वसाध्याभावनिर्णयस्थलत्वाभावात् अतः पक्षमात्रव्यावर्तकतया पक्षेतरत्वमित्यर्थः ॥

वि॰सु॰ टी॰न॰ ७२

नदेवविवृणोति नद्याकांक्षासंनिधीत्यादिना द्वितीयं दूषयति नचेति अत्रापि पक्षेतरत्वमेवोपाधिर्व्यतिरेकस्य साध्यव्यतिरेकेणाव्याप्तेनि
र्णीयात् जरद्गवादिवाक्यानामपि सत्त्वात् खदिरस्तुरगइत्यादिपदानामाकांक्षाद्यभावादेवान्वयप्रतीत्यजनकत्वादित्यभिप्रेत्याह य
द्योग्यार्थमिति आभाससमानयोगक्षेमतामाशंक्य निषेधति नचेति नेदं जलमिति समनंतरबाधकप्रमाणविरोधात् प्रमितिजनकत्वानुमा
नकालातीतं नैवं प्रतीतिमात्रजनकत्वानुमाने किंचिद्बाधकमस्ति उक्तानां सद्विहिरोधादीनां प्रागेव परिहृतत्वादित्यभिप्रेत्याह तत्रबाधके
ति शशविषाणखपुष्पमित्याद्यसमर्थेऽन्यतायोग्यप्याकांक्षासन्निधिमान् शब्दो ज्ञानं करोतीति भट्टवार्तिकार्थः योग्यतारहितस्याप्याकां
क्षासन्निधिमत्त्वेसति योग्यताभावेनान्वयज्ञानाजनकत्वमुभयवादिसंप्रतिपन्नस्थले दृष्टमस्ति अयोग्यार्थविषयाणा
माकांक्षासंनिधिमत्पदानां सर्वेषां पक्षीकरणात् नचयोग्यतावत्त्वस्य विषमव्यापकत्वेनोपाधिता यद्योग्यार्थं तदित्थं प्र
तिपत्तिजनकं न भवतीति व्यतिरेकोपसंहारस्य लक्ष्यपूर्वोक्तन्यायेन दर्शयितुमशक्यत्वात् नचविवादपदानि पदानि स्वस्मा
रितार्थान्वयप्रमितिजनकानि आकांक्षासन्निधिमत्पदत्वात् गामानयेति पदवदित्याभाससमानयोगक्षेमता तत्रबाधकप्रमा
णविरोधेन कालात्ययापदिष्टत्वात् प्रतीतिमात्रसाधने तु बाधाभावात् उक्तं चैतद्दृढाचार्यैः अत्यन्तासत्यपि ज्ञानमर्थे शब्दः क
रोतीति हीति विपक्षे च प्रतिपक्षप्रतिपत्तौ न निराकरणाय कथारंभः संभवो बाधकः तथाहि शब्दोऽनित्य इति शब्दस्यानित्यत्वे
वादिना प्रतिपादिते यदि न तत्प्रतिवादी प्रतिपद्येत तदा वादिना परिषदां च विज्ञानस्यापि स्वयमविज्ञानेऽविज्ञानेनासति
सादि मतः प्रतीतिजनकत्वानंगीकारे प्रतिवादिवाक्याच्छब्दोऽनित्य इत्यादेरयोग्ययोः शब्दानित्यत्वयोः संसृष्टप्रतीत्य ग्रहस्थानमापद्येत ७२
नुपपत्तौ तदुत्तरवाद्यभावेन तन्निराकरणाय तत्कथकरणादेरूपकथानारंभप्रसंगो बाध इत्याह विपक्षे चेति एतदेव विकल्पपूर्वकं विवृणोति
तथाहीति यदि नवुद्धेन वुद्धेन वेत्यपि द्रष्टव्यम् आद्येन निराकरणमशक्यमित्यपि द्रष्टव्येन केवलमप्रतिबुद्धस्य निराकरणमशक्यमिति
तदहस्यानापत्तिश्चेत्याह तदा वादिनेति इदं च विशेषणं अविज्ञानं चाज्ञानमिति सूत्रस्य चकारानुकृष्टोऽर्थोऽविज्ञातार्थोऽतिव्याप्तिपरिहारप्र राम
योजनं परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थमिति सूत्रं त्रिरभिहितमपीति वादिनेति शेषः॥ ॥७॥ ६॥ ७२

द्वितीये प्रतिपत्तौ वेति तस्यैव प्रपंचः नहि शब्दस्येति दूषणांतरमाह किंचेति एकं शब्दादिकमधिकृत्य विरुद्धधर्मविषयिण्यौ प्रति।
पत्तौ हि विप्रतिपत्तिर्न पुनर्भिन्नाधिकरणेनाप्यविरुद्धार्थविषयिण्यौ नित्य आत्मा अनित्या बुद्धिरित्यनयोर्नित्य आत्मा विभुश्चेत्यनयोर्वा
विप्रतिपत्तित्वाभावात् संप्रं विप्र‾ त्यां सानंगीकारे न भवेत् नापि व्यवहारद्वयमात्रमप्रतिपत्तौ विरुद्धधर्मविप्रतिपत्तित्वाभावात् प्रमिति
त्वे च विरुद्धधर्माध्यासेनार्थस्यैव भेदापत्तिरित्यर्थः ननु तादृशधर्मद्वयस्य प्रस्तुतधर्मिव्यतिरिक्तनिष्ठतयाऽग्रहणात्तथाव्यवहार इति चेन्न

प्रतिपत्तौ वा विपर्ययाभ्युपगमप्रसंगः नहि शब्दस्यानित्यत्वज्ञाने तन्नित्यत्ववादिनो यथार्थं किंचैकाधिकरणविरुद्ध
धर्मद्वयप्रतिपत्तिलक्षणा विप्रतिपत्तिरेव भवन्मते न भवेत् तत्र कुतस्तरां कथाप्रवृत्तिः कुतस्तमां च विप्रतिपत्तिनिरासः अपि
च सर्वस्य वाक्यस्य संसर्गप्रतीत्यजनकत्वेऽनृतापार्थकनिरर्थकभेदो न स्यात् समुदायार्थप्रतीतौ सत्यामपि यदर्थो
बाधितो भवति तद्वाक्यमनृतमुच्यते यथा नद्यास्तीरे पंच फलानि संतीति विप्रलंभकवचनं यत्रावयवार्थप्रती।
तौ सत्यामपि समुदायार्थाप्रतीतिस्तदपार्थकं यथा दशदाडिमानि षडपूपाः कुंडमजाजिनमित्यादि अव।
यवार्थप्रतीतेरपि यत्राभा

एकनिष्ठत्वाप्रतिपत्तौ व्याप्तिग्रहाभावादनुमानानुदयादिति बाधकांतरमाह अपि चेति सर्वस्येति वाक्यमात्रस्येति यावत् अनृता
दीनां प्रसिद्धं विवेकं दर्शयन्नितदभावापादनाय समुदायार्थेत्यादिना अत्र चानृतशब्देन प्रतिज्ञासंन्यासो निरनुयोज्यानुयोगो
ऽसिद्धिविशेषश्च विवक्ष्यते अपार्थकमाह यत्रेति पौर्वापर्यायोगादप्रतिसंबद्धार्थमपार्थकं वर्णक्रमानिर्देशवन्निरर्थकमित्यस्य पा

CC-0. In Public Domain. Digitization by eGangotri

वि॰सु॰ टी॰न ७३

कश्चिदपीति एतेषु मध्ये कश्चिदपोऽप्यर्थः संसर्गप्रतीतिमनुमानेनापलपन्सत्प्रतिपक्षयतियदसदिति दूषयतीमेवमिति नचपदस
तदपरोक्षतयानप्रकाशत इति साध्यं न वा व्यर्थविशेषणत्वात् किं च तादात्म्यप्रतीतेनवायस्यायमप्रकाशः साध्यते उभयथापि दूषणम्।
माह तादात्म्यस्य चेत्यादिना ननु तादात्म्यं तावत्प्रतीयते अन्यत्र शुक्तिरजते च प्रतीयेते तेषां चासंसर्गाग्रहाद्प्रतीतेपि विशिष्टतादा
त्म्येन व्यवहार इति तत्राह असंसर्गाग्रहेति आश्रयाप्रतीतौ तन्निष्ठतया हेतोरप्यप्रतीतावसिद्धिः स्यात् तथोक्तं एकदेशदर्शनेन ख

वस्तुन्निरर्थकं यथा नित्यः शब्दः कचटतपानां गजडदबत्वात् खछठथवदिति स चायमनुतापार्थकादिभेदः क्व
चिदपि शब्दस्य संसर्गप्रतीत्यजनकत्वेन संभवतीत्यलमतिविस्तरेण यदसत्तत्प्रकाशते यथा गगनकुसुमम् असच्च
शुक्तिरजततादात्म्यमिति चेत् मैवं गगनकुसुमस्यापि तत्त्वज्ञानप्रतीयमानत्वेन दृष्टान्तस्य साध्यविकलत्वात् तादा
त्म्यस्य च प्रतीतावन्यथाख्यातिस्वीकारात् अप्रतीतावाश्रयासिद्धेः असंसर्गाग्रहबलेन च न व्यवहारस्तत्रासत्त्वाप्रती
तौ हेतोरपक्षधर्मत्वात् तस्मात् रजतादिविभ्रमे पुरोवर्तिशुक्तिशकलादि रजतात्मनावभासत इति सिद्धं भवत्वेवं
विभ्रमसद्भावः विभ्रमालंबनं तु किमसत्सदेव वा किं वोभयात्मकमुतोभयविलक्षणमिति विवेचनीयम् ॥ ० ॥

त्वनुमापकमिति भाष्यकारैरप्येकदेशदर्शनादेकदेशान्तरे बुद्धिरिति एतेन शुक्तेः रजताकारेण न प्रकाशते न रूपेण सत्त्वात् यथा ७३
घटः पटरूपेणेति गुरारिरप्यपास्तः प्रमाणस्मृतिवि वक्षायां सिद्धसाधनत्वात् भ्रान्तिविवक्षायां तु वा प्रसिद्धविशेषणता साध्यविकल
श्च दृष्टान्त इत्यादेश्च वादार्थमुपसंहरति तस्मादिति आरोपं निरूप्यारोप्यं निरूपति भवत्वेवमित्यादिना सदेवेत्यन्यथाख्यात्यात्म राम
ख्यात्योर्निर्देशः उभयात्मकमिति तु भेदाभेदवादिनाऽन्यथाख्यातिविशेषस्य उभयविलक्षणमिति तु सिद्धान्तस्य ॥ ६ ॥ ७३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रथममसत्त्व्याप्तिं निराचष्टे नन्वावृत्तिरित्यपरोक्षेति शाब्दप्रतीतिर्व्यावृत्तेर्न ननु यद्यपि शशविषाणादौ प्रवृत्तिप्रतीतीनदृष्टेन यथाप्यसा-
हि शेषे रूप्यादौ किं न स्यातामिति शंकेते क्वचिदिति सतः खल्वयं सामान्यविशेषभावो न त्वसत इति परिहरति नेति अयथा सत्त्वे नाम न
निःस्वभावत्वं येनेदं दूषणं स्यात् अपि तु सहेलक्षणे न तत्राह सहेलक्षणेति असतोप्यापरोक्ष्यं संपादयन्नसहायो ऽन्तरेणापीति यद्यपि
निःस्वभावमसत्त्वे यत्तथापि तत्र सत्त्वे यस्य सामर्थ्यमंतरेण स्वकारणविशेषात्समनंतरप्रत्ययादासादितः प्राप्तः स्वभावविशेषो येन वि-
ज्ञानेन तत्तथा तादृशविज्ञानमेवाविद्यायाः सत्प्रकाशनशक्तिलक्षणाया असत्प्रकाशनशक्तिमदिति योजना एतदुक्तं भवति यद्यप्यपि पा-

नन्वावृत्सत् असतोऽपरोक्षावभासानर्हत्वात् तदादिस्वापप्रवृत्त्यनुपपत्तेश्च क्वचिदसद्विशेषेऽपि प्रतिभा-
सप्रवृत्तौ किं न स्यातामिति चेन्न विशेषाधिकरणत्वेनुच्छत्वानुपपत्तेस्तस्य निःस्वभावत्वात् सहेलक्षणेऽपि मा-
त्रेणासत्त्वाभिधाने मायावादिमतप्रवेशात् अंतरेणापि ज्ञेयसामर्थ्यं निःस्वभावेऽप्यसति स्वकारणविशेषसमा-
सादितस्वभावविशेषविज्ञानमेवाविद्याऽसत्प्रकाशनशक्तिमदिति चेत्तर्हि वक्तव्यं किमस्याः शक्तेः शक्तामि-
ति यद्यसदेव किमेतस्याः कार्यमुत्तेतज्ज्ञाप्यं नाद्यः असतोऽकार्यत्वात् प्रकाशनशक्तित्व्याघाताच्च न द्वितीयः

तिसहकार्यालंबनसमनंतराख्येभ्यः प्रत्ययेभ्यश्चक्षुर्भ्योऽग्निं तेभ्य उत्पद्यंत इति स्थितिस्तथापि भ्रांतिस्थले ह्यालंबनप्रत्ययस्याऽस-
त्त्वात् अनर्थक्रियासमत्वात् एव तत्संयुक्तस्याधिपतेश्च सुराद्देस्तत्सहकारिणश्चालोकस्य सहकारिप्रत्ययस्याभावेऽपि समनंतरप्र-
त्ययलक्षणपूर्वज्ञानमात्रात्स्वभाववैचित्र्यवशाद्धि ज्ञानमुत्पद्यते स्मृतिज्ञानमिव विषयमंतरेण सामग्रीमात्रप्रयोज्यमिति तदेतद्दू-
षयति तर्हि वक्तव्यमित्यादिना प्रकाशनशक्तित्वेति व्यंजकत्वात्प्रमाणस्य प्रमेयोत्पादकत्वमयुक्तमित्यर्थः ८७ ॥ ॥

प्रकाशांतरेति एतज्ज्ञाप्यमिति कोर्थः एतज्जनितज्ञानस्य विषय इति तथा च यद्यन्यथाशक्त्याजन्यं ज्ञानं तत्किं ज्ञानांतरमाश्रयभूतमेव वा।
नाद्यः अस्य ज्ञानमंतरेण द्वितीयज्ञानानुपलब्धेरुपलब्धौ वाऽनवस्थानाच्चेत्यर्थः द्वितीयं शंकते तदेवेति दूषयति नविज्ञानाश्रयामि
ति स्यादेतत् सत्यमाश्रयविषयसापेक्षा शक्तिर्विषयाभावे न भवेत् शक्तिरेव तु तत्साक्षिण्यते किं तर्हि विज्ञानमात्रमेव तत्स्वतस्तथाविध
मेव रूपं कारणविशेषादाहितं येन परिनिष्पन्नशक्तिरूपमपि तदसत्प्रकाशं भवतीति शंकते अस्तु तर्हीति दूषयति न सदसतोरिति ननु शून्य
वादिना कथं विज्ञानसत्त्वमभिमतं येन सदसतोरिति शक्यवचनं स्यात् सत्यं शून्यवादिविशेषोयं का तर्हि शून्यवादिनाविज्ञेयस्य सर्वथा

प्रकाशांतराभावात् अनवस्थानाच्च तदेव विज्ञानमसतः प्रकाश इति चेन्न विज्ञानाश्रयां शक्तिं प्रति विज्ञानस्यैव
शक्तशक्यतया विषयत्वानुपपत्तेः न ह्येकस्यैकदैव सिद्धतया शक्त्याश्रयत्वमसिद्धतया च तद्विषयत्वं संभवति यु
गपदेव सिद्धसाध्यत्वविरोधात् शक्यमेव तर्हि शक्तेर्माभूदिति चेन्न शक्तेः कस्य कुत्रेति शक्तशक्यनिरूपणाधी
ननिरूपणत्वात् अस्तु तर्हि स्वकारणविशेषासादितस्वभावभेदं विज्ञानमेवासतः प्रकाश इति चेत् न सदसतोः
संबंधानिरूपणात् असदधीननिरूपणत्वं ज्ञानस्य तत्संबंध इति चेत् ॥ ॥ ९ ॥ ॥

शून्यत्वांगीकारात् योगाचारेण हि बहिः शून्यता वेद्यस्यांगीकृता अनेन त्वंतरेपीति ततो विशेषः यथा चैतत्तथा भद्दशंभुना तत्तदभियु
क्तवचनान्युदाहरता अस्याप्यभावमिच्छंति ये माध्यमिकवादिन इत्यत्रोपपादितं संबंधानिरूपणादिति यद्यपि आविद्यात्मका श
क्तिः स्वीकृता स्यात्तदा सांवृतः कोपि संबंधः नामापि परिहरतः कोनु नामानयोः संबंधः स्यादित्यभिप्रायः असत्प्रकाशोयमिति य
दिदमसदधीननिरूपणत्वं ज्ञानस्य तत्तेनासतानास्य संबंध इति शंकते असदधीनेति ॥ ॥ ७७ ॥ ॥ ॥

दृश्यत्वतिनतदधीनेति संबद्धयोर्हि निरूप्यनिरूपकभावो दृष्टः नहि ज्ञातु धौतकलधौतकलशधवलिम्ना नालफलकालिमा निरू
प्यमाणो दृष्टचर इत्यर्थः भवतु संबंधांतरमपि संयोगादिलक्षणमिति नेत्याह असत्त्वेति अथ घटस्य प्रकाश इतिवत् किं न स्यादिति
तत्राह ज्ञानजन्येति असत्त्वाद्धेतोर्ज्ञानजन्यातिशयानाधारत्वात् अपरोक्षज्ञानविषयभावानुपपत्तेः घटादिवदिति दृष्टांतः व्यतिरेके शंक
ते अयमसदनुभव इति अयमर्थः अस्ति तावदयं निरूप्यनिरूपकभावनियमः तेन हेतुना तेनासता नस्य ज्ञानस्याविनाभावः कश्चि
दस्ति मूलभूत इति विकल्प्यते इति परिहरति मैवमुत्पत्तेरिति अयमभिसंधिः त्रिविधो ह्यविनाभावः सौगतसमये स्वभावः कार्य
मनुपलब्धिश्च यदाह कीर्तिर्न्यायबिन्दौ त्रिरूपाणि त्रीण्येव लिंगान्यनुपलब्धिः स्वभावः कार्यं चेति तत्रानुपलब्धिरर्थाभावावेदि

तत्तदधीननिरूपणत्वस्यापि        संबंधांतराधीनत्वादसतश्च निरूपाख्यत्वात्संबंधाधारतानुपपत्तेः ज्ञानजन्या
तिशयानाधारत्वाच्च घटादिवत् असतो ज्ञानविषयत्वानुपपत्तेः अयमसदनुभव इत्यसत्ता विना नानुभवो निरू
प्यत इति तेनाविनाभावः संबंध इति चेत् मैवम् अतदुत्पत्तेरतदात्मनश्चानुभवस्य तदविनाभावासंभवात्
तस्मात्स्वप्रत्ययासादितस्वभावभेदं विज्ञानमेवासत्प्रकाश इत्यसत्त्वानिवादिनामसत्प्रलाप इत्यारोप्यमाणं ना
ऽसत् ॥

का यथा यदुपलब्धिलक्षणप्राप्तं सन्नोपलभ्यते सोऽसद्व्यवहारविषयः यथान्यत्र क्वचिद्दृष्टः क्वचिद्देशविशेष उपलब्धिलक्षणप्राप्तो घ
टपटादिर्नोपलभ्यते नोपलभ्यते च शशविषाणादिरर्थ इति साधर्म्यवत्प्रयोगः स्वभावकार्ययोरव्यानुभावबोधकौ यथा वृक्षशिंशपात्वयोः
यथा वाग्निधूमयोरिति तदप्युक्तं कीर्तिना कार्यकारणभावाद्वा स्वभावाद्वा नियामकादविनाभावनियमोऽदर्शनान्न तु दर्शनादिति अन्वयव्यति
रेकाभ्यां न भवतीत्यर्थः नहि इह ज्ञानस्यासल्लक्षणार्थबोधकस्वाभाव्यादनुपलब्धिताद्रूप्येणासदसतोः स्वभावस्वभावित्वाभावाच्च न स्वभावा
विनाभावः उक्तं हि न्यायबिन्दौ स्वसत्तामात्रभाविनि साध्यधर्मे हेतुः स्वभाव इति विज्ञानस्यासदुत्पत्त्यभावाच्च न कार्यकारणभाव इति अस
त्वानिनिराकरणमुपसंहरति तस्मादिति

ति॰सु॰ टी॰त ७५ समन्व्याप्तिं निराकरोति नापीति न वयमत्रैव सत्वं ब्रूमः येन बाधविरोधः स्यादपि त्वन्यत्रेति शंकते यत्रेति भवेदेवं यद्यन्यत्र सत्वे प्रमाणं स्या
न्नतु नास्तीति परिहरति न तत्रेति संभावितप्रमाणानि विकल्प्य दूषयति भ्रांत्यनुभवेत्यादिना प्रत्य समर्थापत्ति वोऽन्यर्थः भ्रमात्तु प
पत्तिं दूषयति न तृतीय इति अयं तावत् संसर्गस्याप्यपरोक्षप्रतीतिमंगीकुर्वतो रजतस्यापि तथा प्रतीतिसंभवान्न सन्नापेक्षेति इदं चिन्त
मनुपपत्ताव पीत्यपि तत्रैव तत्सत्वेति सन्निधेरित्यर्थः ननु पयन्यत्राप्यसत्वे नैव तत्रापि बाधः स्यान्नत्वेन इत्लितनो नूनमवगा।

नापि सत् नेदं रजतमित्यादिबाधविरोधात् तत्र बाध्यते न तोऽन्यत्रास्तीति चेत् न तत्र प्रमाणानिरूपणात् न
ह्याहि भ्रांत्यनुभवस्तत्र प्रमाणमनुबाधानुभवः किंवा भ्रमानुपपत्तिः बाधानुपपत्तिर्वा असत्ख्यात्यनुपपत्तिर्वा ना
द्यः तस्य पुरोवर्तिरजतसत्तामात्रगोचरत्वात् संनिहिततत्सत्तायामौदासीन्यात् न द्वितीयः बाधानुभवस्यापि पुरोव
र्तिन्यारोपितभावविषयत्वे देशांतरतत्सत्तानावेदकत्वात् न तृतीयः रजता वभासस्य यथाप्रतीतपुरोवर्तिरज
तसत्तां विनानुपपत्तावपि देशांतरे तदोपसत्तामंतरेणानुपपत्त्यभावात् न चतुर्थः बाधस्य प्रसक्तप्रतिषेधात्मनस्तत्रै
वतत्स नाक्षेपकतयाऽन्यत्र तत्सत्तानाक्षेपकत्वात् न च बाध्यमन्यत्रापि तस्यासत्वे तत्रापि कुतो न तस्य बाधः
स्यादिति तत्र तस्याप्रसक्तेरेव बाधाभावोपपत्तेः तत्सत्ताध्यवसायायोगात् ॥ त्क्वामोऽन्यत्र सदिति तत्राह न च बाध्यमित्यादि ७५

नाहेतुमाह तत्र तस्येति बाधाभावस्त्वन्यथा सिद्ध इत्यर्थः ननु न वयं रजतबाधान्यथानुपपत्त्या रजतसत्वं ब्रूमः अपि तु तादात्म्यमात्र
बाधो धर्मिभूतं रजतं कापि परिशिनष्टीत्याशंक्य निषेधति नेदमिति अयमर्थः कथमिदमवधार्य्येत तादात्म्यनिषेधो येन धर्मिनिषेध राम॰
इति यदि हि धर्मिणो रजतस्य मानांतरेणान्यत्र सत्त्वमवसीयेत तदा प्रसक्तस्यापोदमंशस्येवाबाध इत्यवधार्येत न त्वेतदस्तिन हि दूरस्थस्याव ७५
रणेभेदाग्रहात्परस्परारोपितत्वारोपेनेदिधृति पुत्रः विवेकग्रहात्तदा ॥ ६ ॥ ८७ ॥ ८७ ॥

त्म्याथनिषेधेन तत्रैवानंतरप्रतीतिवद्रजतयोरस्तिप्रतीतिः एतदुक्तं भवति प्रसक्तयोस्तादात्म्यांशनिषेधे धर्मिणोस्तत्रैव समनंतरप्रतीत्या
व्याप्तस्तन्निवृत्तौ निवर्तत इति न च तत्र संनिहितयोस्तादात्म्यारोप इह तु सन्निहितासन्निहितयोरिति वैषम्यम् ॥ एतादृशे पुनस्तादात्म्या
रोपासंप्रतिपत्तेः ——— द्वावेतौ नैक इतिवद्बाधनाच्च असतः ख्यात्यनुपपत्तिरिति पंचमपक्षं निषेधति नापि पंचम इति असतः
एव संसर्गस्यापरोक्षतया ख्यातिरिति यस्य मतं तस्य कानुपपत्तिः सतो रजतस्य प्रतीतावित्यर्थः न्यायकल्पतरावुदीरितमाशंकते अ
थाधुनिकस्येति न संसर्गोऽत्र प्रतीयते येनासतः प्रकाशमानता स्यात् तद्दृष्टांतेन रजतस्यासत्त्वनिषेधेनापि तु शुक्तिरजतयोः स्वरू

नेदं रजतमिति पुरोवर्तिनि रजततादात्म्यनिषेधात्मबाधानुभवो रजतमर्थान्क्वापि परिशिनष्टीति चेन्न तथा सति
वनस्पत्योरिव विविक्तयोर्द्वयोरप्यत्रैवानंतरं प्रतीतिप्रसक्तेः नापि पंचमः असतः संसर्गस्येव रजतस्याप्यसतः ख्या
त्युपपत्तेः अथाधुनिकस्य कस्यचिन्मतानुसारेणेदं रजतमिति ज्ञानमिदमाकाररजताकारयोर्न संसर्गग्राहकमपि
तु तयोरेकज्ञानसंसर्गिणोर्भेदाग्रहाद्यथार्थव्यवहारो गृह्यमाणयोर्भेदाग्राहि सविकल्पकमेकं विज्ञानं विभ्रम
इति भ्रमलक्षणाभ्युपगमात् तथा च नासतः कस्यचित्ख्यातिरिति कश्चिद्ब्रूयात्तं प्रति ब्रूयात् ॥ ६ ॥ ६ ॥

पमात्रग्राही इदमेकं विज्ञानमित्यर्थः तर्हि किं तत्संसृष्टव्यवहारो निर्निबंधनो न भेदाग्रहनिबंधन इत्याह अपि त्विति कथं तर्हि ख्या
तिर्भेदस्तत्राह गृह्यमाणयोरिति एकं विज्ञानमित्यख्याते भेदः सविकल्पकमिति च वस्तुमात्रग्राहिणो निर्विकल्पकाद्विवेचितो नेदं
रजतमित्यादिभ्रमश्च भेदाग्राहीति व्यावृत्तिः घट इत्याद्येकैकवस्तुग्राहिविज्ञानमितरस्मादिदं न गृह्णाति उक्तरूपं चातस्तन्निवृत्त्यर्थं
गृह्यमाणयोरित्युक्तम् एकैकेन ज्ञानेन तु भेदवत्पटादेरप्यग्रहणाद्व्यावृत्तिः फलितमाह तथा चेति तदेतद्दूषयति तं प्रति ब्रूयादिति

नि·सु·
टी·न·
७६

एकज्ञानोपरोहस्वीकारेपि संसर्गज्ञानापलापस्तस्मात् अख्यातिवादिनि संसर्गज्ञानापलापिन्युक्तं शब्दानुमानप्रत्यक्षाप्रामाण्यप्रसंगदो
षमत्राप्याह मध्यमवृद्धेत्यादिना किंचैकस्मिन्नेव घटे स एवायं घटो न भवतीति विभ्रमे लक्षणमव्यापकं विद्यमानभेदग्रहादिति विशेष
णोपि दूरगिरिशिखरतरुनिकरमात्रग्राहिप्रत्ययेति व्याप्तिरिति दूषणम् एतन्मतदूषणमुपसंहरति इतिगुरुमतेति किंचकरणदोषा
पादमनावलंबिनाज्ञावदित्युक्तं न पुनः भाष्यवार्त्तिकविरोधेनापसिद्धान्तापातादित्याह किंचकरणभक्षेत्यादिना द्वितीयसूत्रे दुःखज

मध्यमवृद्धव्यवहारेप्येकज्ञानोपारोहितयोः संसर्गिणोरसंसर्गाग्रहादेव व्यवहारोपपत्तौ वालस्य संसर्गज्ञानानुमा-
नानुदयाच्छब्दप्रामाण्यभंगप्रसंगादेवमनुमानाभासइव सदनुमानेप्यसंसर्गाग्रहादेव संसर्गव्यवहारोपपत्तेरनुमानो
च्छेदः प्रत्यभिज्ञाप्रामाण्योच्छेदश्च ज्वालैकत्वव्यवहारवत्सर्वत्र प्रत्यभिज्ञायामसंसर्गाग्रहादेव संसर्गव्यवहारोपपत्ते
रिति गुरुमतनिरसने नैव गुरुमतपरिमोषणनिपुणमतेर्मतं निरस्तमिति किंचकरणभस्यास्य चरणमतमवलंब्यैवम
न्यथाख्यातिमन्यथावर्णयतो द्वितीयसूत्रे मिथ्याज्ञानविवेचनवेलायामिहात्मनि मिथ्याज्ञानमनेकप्रकारं वर्त्त
ते तद्यथा ऽनित्ये नित्यमिति सभये निर्भयमित्यादिभाष्यविरोधः कः पुनर्विपर्ययो ऽतस्मिंस्तदिति प्रत्ययइत्युद्योत-
कारवार्त्तिकविरोधश्च प्रसज्येतेति वध्यतां वध्यतां वालोनानेनाश्लिजीवतास्वपक्षहानिकर्तृत्वाद्यः कुलांगारतां
गत इति न्यायविषयतामयं नातिवर्त्तते तस्मादसत्ख्यात्यनुपपत्तिरपि नान्यत्रसत्तावेदिकाः रोपितस्य कुत्रचेदारोपि
तमन्यत्रभवद्भवेत् ॥

न्यप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापायेतदनंतरापायादपवर्गइत्यात्मनीत्यधिकरणेसप्तमी अत्र
ह्यनित्येइत्यादिसप्तम्याश्राधाराधेयरूपसंबंधग्राहित्वं विभ्रमस्य कंठोक्तमितिभावः स्वपक्षहानीति प्रल्हादं प्रति हिरण्यकशिपु प·
वचने अंतिमपक्षोक्तदूषणमुपसंहरति तस्मादिति तदेवंसाधारणेनारोपितस्यान्यत्र सत्वेनाख्यातिरुक्तमिदानीं विशेषतो दूषयि ७६

अन्यथाख्यातिं निराकरोति नतावदिति ननु यदि नदुष्टस्य स्य विप्रकृष्टदृष्टत्वं कुतस्तर्हि दोषस्य दोषत्वमिति तत्राह अतो दोषो पीति प्राप्तकार्यप्रतिबंधकत्वे सति विपरीतकार्यनिष्पादको दोषः तदिहाप्यसदनिर्वचनीयं वा सत्त्वेन भासयतीत्यर्थः दृष्टानुसारादिति असंसर्गावभासकत्वस्य ज्ञानेत्वयेव स्वीकारादित्यर्थः आत्मख्यातिमवतारयति अस्तु तर्हीति तत्र युक्तोप ह स्वरूपेणासत इत्यादिनानन्वस्य सत्त्वकल्पने नेदं रजतमिति बाधविरुद्धमिति नेदं रजतमिति अथ किमितीति नदयति निषेधतो त्यत आह द्वयोर्बाधकल्पनायामिति अनुभवमपि प्रमाणयति नेदं रजतमिति नन्विदंता निषेधे सत्यनिदंतया विप्रकृष्टसंभवत्वम्

न तावद्देशांतरादौ तस्यासन्निहितस्य द्रष्टुमयोग्यत्वात् दुष्टकरणं विप्रकृष्टमपि द्रष्टुं शक्नोतीति चेत् न दुष्टकरणस्य पुंसः सर्वदर्शित्वप्रसंगात् अतो दोषोऽप्यसदनिर्वचनीयं वा दर्शयति दृष्टानुसारात् न देवं न देशांतरादावारोप्यसद्भावः अस्तु तर्हि बुद्धौ स्वरूपेणासतो गगनारविंदादिवत् प्रतिभासान्नेदं रजतमिति बाधस्येदंतामात्रगोचरत्वात् द्वयोर्बाधकल्पनायां कल्पनागौरवान्नेदं रजतमिति च रजते बाधादर्शनात् न चेदंता निषेधे सत्यनिदंतया बहिरपि व्यवस्थोपपत्तौ कुतः संविदाकारतेति सांप्रतं व्यवहितस्यापरोक्षसंविदे कर्मतरेणापरोक्षत्वानुपपत्तेः संविदाकारो रजतं संप्रयोगमंतरेणापरोक्षत्वात् संवेदनवदिति प्रयोगोपपत्तेः ननु संप्रयोगो नाम किमिंद्रियसंयोगादिविशेषः किं वा संबंधमात्रं नाद्यः रूपादिनानैकांत्यात्

तत्सन्निधानं त्वात्मरूपप्रत्ययात्मकं कुतस्त्यमिति तत्राह न चेदंता निषेधे सतीति हेतुमाह व्यवहितस्येति संप्रयोगरहितस्येति यावत् संविदाकारतायामनुमानमपि प्रमाणमाह संविदाकारो रजतमित्यादिना घटादेरनुमेयस्य च व्यवच्छेदार्थं संप्रयोगमंतरेणेत्याद्युक्तं यदत्र न्यायदीपावल्यां दूषणमुक्तं तदनुवदति नन्वित्यादिना रूपादिनेति ॥ ६ ॥ ६ ॥

संयोगमंतरेणापरोक्षतारूपादेः समवायमंतरेण च शब्दव्यतिरिक्तस्य सर्वस्य तथापि संविद्रूपतानाक्षीत्यनैकांत्यं न च तत्रापि संवि
द्रूपत्वमेव सर्वस्य संविद्रूपतांगीकारात् इति वाच्यं तथा सति विपक्षासंभवे तत्संप्रयोगमंतरेणेति विशेषणवैयर्थ्यात् संबंधमात्र
विवक्षायां तद्राहित्यविशेषणासिद्धं चेत् अत्येनाध्यासिकसंबंधस्वीकाराद्रजतसंवेदनयोः अत एव दृष्टांतस्य साधनवैकल्यं चेत्तत्राह द्वि
तीये त्विति तर्हि बाधमप्याह धीरूपत्वे चेति तदेतत्परिहरति पूर्ववादीमेव मित्यादिना न संबंधमात्रराहित्यं विवक्षितं किं त्विंद्रियसंबंध

द्वितीये तु विशेषणासिद्धिः दृष्टांते साधनविकलता च न ह्याध्यासिकसंबंधं विनास्माकं रूप्यं तद्धीश्चापरोक्षा धीरू
पत्वे च रजतादेर्भ्रांतिं विनापि दर्शनप्रसंग इति चेन्नैवम् इंद्रियसन्निकर्षानधीनापरोक्षत्वस्य विवक्षितत्वात् संवेदा
नस्य चेंद्रियसंबंधमंतरेणैव स्वतःसिद्धतया साक्षिसिद्धत्वेन वा साधनवैकल्याभावात् न च धीरूपत्वे रजतादेर्भ्रांतिं वि
नापि दर्शनप्रसंगः धियोऽन्यत्वेपि घटादिवद्भ्रांतिं विनापि दर्शनप्रसंगस्य तुल्यत्वात् ततो धीरूपमेव रूप्यमिति चेन्न
इत्युक्तं अत्यन्तालीकायामपि बाह्यतायाः प्रतिभासवदत्यंतासतोपि रजतादेः प्रतिभासोपपत्तेः न च नेदं रजतमि
तीदंतामात्रमेव बाध्यते कल्पनालाघवादिति न्याय्यं इदं रजतमिति प्रतिपन्नविशिष्टरजतस्य नेदं रजतमिति बा
धस्य चानुभवसिद्धतया कल्पनीयत्वाभावात् अत एव कल्पनालाघवन्यायानवतारात् न च संविदैक्यमन्तरेणाप
रोक्षत्वानुपपत्तिः बाह्यतावत्तदुपपत्तेः॥

राहित्यं तेन नानैकांतिकतासिद्धी इत्यर्थः साधनवैकल्यं परिहरति संवेदनस्य चेति रूप्यज्ञानस्येत्यर्थः स्वतःसिद्धतयेति बौद्धाभिप्रा
येण साक्षिसिद्धतयेति स्वाभिप्रायेण तर्कविरोधं परिहरति न चेति पूर्वपक्षमुपसंहरति तत इति न तावदसतः ख्यात्यनुपपत्तिर्बहि
ष्ट्वतदभावादित्याह अत्यंतालीकाया इति न च न्याय्यमित्युक्तं तत्र हेतुः इदं रजतमिति कल्पनायां हि लाघवमनुसरणीयं न चात्र क
ल्पनाप्रमाणमार्गागतत्वादितरथाऽतिप्रसंगादहं रजतमिति प्रतीतिप्रसंगाच्चेति भावः अनुपपत्यंतरं परिहरति न च संविदैक्यमि

नत्वेवमप्रामाणिकत्वमुक्ताप्रमाणबाधं चाह किंचारोपितमित्यादिना सयदि ब्रूयादान्तरं तत्वस्तु सद्धतो तदाह हारितितं प्रत्याह॥
तहीति अपसिद्धान्तापत्तिरित्यर्थः यत्तनुमानमुक्तं तद्धेतुहेतुं नैकान्तिकमित्याह संप्रयोगमित्यादिना सत्वाविनिराकरणमु
पसंहरति तस्मादिति असत्तु तर्हि सदसदात्मकमारोपितं यथाहुः स्वरूपपररूपाभ्यां नित्यं सदसदात्मके वस्तुनि ज्ञायते किंचि
द्रूपं कैश्चित्कदाचनेति तत्राह नापि सदसद्रूपमिति ननु यद्यपि परमार्थविषयत्वमुभयोस्तथाप्युभयाकारस्य सतोऽर्थस्यै।
किंचारोपितं वुद्धौ चेत् गुंजापुंजादौ दहनसमारोपे देहदाहप्रसंगः वुद्धावपि तस्यान्तान्विकत्वादप्रसंग
इति चेत्तर्हि न तद्धेतुः सत्वान्तरिमत्यं नासदनिर्वचनीयं वा स्यान्तुगत्यन्तराभावात् संप्रयोगमंत
रेणापरोक्षत्वादिति हेतुर्वहिष्ट्वप्यबुद्ध्याकारेवर्तत इति सव्यभिचारः तस्मात्रासत्वापि सत्समारोपि
तं नापि सदसद्रूपं विरोधात् अविरोधे वा न भ्रान्तिबाधौ द्वयोरपि परमार्थविषयत्वात् उभयाका
रस्यैकारप्रतिभासो भ्रम इति चेत् तर्हि बाधस्यापि भ्रमत्वप्रसंगः तस्याप्येकाकारविषयत्वात्॥
सर्वज्ञानानां च सर्वात्मनानवभासकत्वाद्भ्रान्तित्वप्रसंगो दुर्वारः स्यात् तस्माद्गत्यन्तराभावादनिर्व
चनीयमारोपितमिति सिद्धम् ननु किमिदमनिर्वचनीयत्वं किं निरुक्तिविरहः किंवा निरुक्तिनि
मित्तस्य विरहः
काकारग्राहित्वात् पूर्वज्ञानं भ्रान्तमित्याशंकते उभयाकारस्येति तर्ह्यसदाकारमात्रग्राहिणो बाधकस्यापि स्याद्भ्रान्तित्वमि।
त्याह तर्हीति अस्त्वेवं चेदं सर्वज्ञानानामेवैवं भावात् भ्रान्तित्वप्रसक्तिरित्याह सर्वज्ञानानां चेति आरोपितमनिर्वचनीय
मित्युपसंहरन्तं तदाक्षिपति नन्विति ॥ ९ ॥ ॥ ७१ ॥ ९ ॥ ७७१ ॥

वि॰ सु॰ टी॰ न॰ ७८

किं निरुक्तिविरहोऽनिर्वचनीयत्वं किं वा निरुक्तिनिमित्तस्य विरहः किं वा ज्ञानबाध्यत्वं अथवा प्रतिपन्नोपाधौ निषेधप्रतियोगित्वमि
तित्तत्र प्रथमं निषेधति नाद्य इत्यादिना निरुक्तेर्निमित्तमिति निर्वचनसंबंधि हि निर्वचनीयत्वं निमित्तं ज्ञानमपि भवति कारणत्वा
संबंधित्वात् तथा विषयतयार्थोपि तयोर्विरहश्चेदनिर्वचनीयत्वं विवक्षितमित्यर्थः ज्ञाननिमित्तविरहं दूषयति नाद्य इति विषय
ज्ञाने हि शब्दप्रयोगे निमित्तत्वं तया प्यस्तु पेयत इत्यर्थः अर्थविरहपक्षं दूषयति न द्वितीय इति अर्थविरह इति कोर्थः किं स
न्नर्थो नास्तीति न ह्यसन्नेवार्थ इत्यसत्त्यातित्वमेवन पुनरनिर्वचनीयत्वमित्याह अर्थस्यापीति अथासन्नर्थो नास्तीति न हि सन्नेवार्थ इ

नाद्यः इदं रजतमित्यादिनिरुक्तेरंगीकारात् न द्वितीयः विकल्पासहत्वात् तथा हि निरुक्तेर्निमित्तं ज्ञानमर्थो वा नाद्यः
रजतादिज्ञानस्य निरुक्तिनिमित्तस्य मायावादिभिरप्युपगमात् न द्वितीयः अर्थस्यापि सतो विरहेऽसत्त्यातिप्रसंगा
त् असतोपि विरहे सत्त्वप्रसंगात् उभयविरहस्य च परस्परविरुद्धयोर्लोकसिद्धयोरन्यतरनिषेधस्येतरविधिना
न्तरीयकत्वनियमदर्शनादेवानुपपत्तेः भावाभावयोरलौकिकयोः स्वकपोलपरिकल्पितयोर्निषेधसमुच्चयांगी
करणे तु लौकिकसदसतोरनिषेधात् न निरुक्तिनिमित्तार्थासंभवः अतो न सदसद्विलक्षणमनिर्वचनीयं नापि
ज्ञानबाध्यत्वं बाध्यत्वशब्देन निवर्त्यत्वांगीकारे पूर्वज्ञानस्य संस्कारस्य चोत्तरविज्ञाननिवर्त्यत्वादनिर्वाच्यता

तिसत्त्यातित्वमेवेत्याह असतोपि विरह इति नन्वभयोरप्यर्थयोर्विरहोर्थ———विरहस्तथा चनार्थीन्तरत्व[प्रात:]
तितत्राह उभयविरहस्य चेति तत्र किं लोकप्रसिद्धसदसतोर्विरहोऽनिर्वचनीयत्वं उतस्वमतसंकेतितयोर्नाद्य असंभवादि
त्याह लोकसिद्धयोरिति द्वितीये आह भावाभावयोरिति निषेधयोः समुच्चयः निषेधसमुच्चयः तृतीयं निषेधति नापि ज्ञानबाध्य राम
त्वमिति तत्र वक्तव्यं किं बाधकज्ञाननिवर्त्यत्वं किं वा बाधकज्ञानविषयत्वं किं वा कालत्रयनिषेधप्रतियोगित्वं तत्र प्रथमं निषेधति ७८

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयं दूषयति अथवा बाध्यत्वं नामेति अधिष्ठानयाथात्म्यज्ञानं हि त्वन्मते बाधकं तथा च सप्तैवातिव्याप्तिः अस्मन्मतेऽपि नेदं
रजतमित्यत्राधिष्ठानमपि स्फुरतीत्यर्थः तृतीयमुत्थाप्य दूषयति मैवमिति त्वन्मतेऽनिर्वचनीयरजतस्याज्ञानेनैवाविद्ययोत्पन्नत्वात्प्र
त्यभिज्ञायमानत्वाच्च न कालत्रयेऽप्यभावः शङ्कांगीकारेऽतोऽव्याप्तिः कस्मिंश्चिदपि लक्ष्येऽवर्तमानत्वादित्यर्थः अतिव्याप्तिं चाह
लौकिकेति तृतीयपक्षोक्तं दूषणं चतुर्थेऽप्यतिदिशति एतेनेति अतिदिश्यमानामव्याप्तिमेव विवृणोति पुरोवर्त्तिनीति अधि

विश्वस्य चेश्वरज्ञाननिवर्त्यत्वादनिर्वाच्यत्वं स्यात् इति लक्षणस्यातिव्याप्तिः अथवा बाध्यत्वं नाम बाधकज्ञानविषयत्वं
तदा शुक्त्यादेर्ब्रह्मणश्चानिर्वाच्यत्वं स्यात् तयोरधिष्ठानतया बाधकज्ञानविषयत्वात् अथ नाभूदस्ति भविष्य।
तीति कालत्रयसत्तानिषेधो बाधस्तद्विषयत्वं च बाध्यत्वमिति मैवं मायाविवर्त्तस्य पुरोवर्त्तिरजतस्य तथाविध।
निषेधविषयत्वानंगीकाराल्लक्षणस्याव्याप्तेः लौकिकपरमार्थरजतस्यात्र तथाविधनिषेधविषयत्वांगीकारा
दनिर्वाच्यत्वापत्तिरिति लक्षणस्यातिव्याप्तेश्च एतेन प्रतिपन्नोपाधौ निषेध्यत्वमनिर्वचनीयत्वमित्यपास्तं पुरो
वर्त्तिनि प्रतिपन्नस्य रजतस्याधिष्ठानज्ञानेन मायायां विलीयमानायां तत्परिणामतया स्वयमेव विलीयमानस्य ने
दं रजतमिति निषेधाविषयत्वात् किं चात्र प्रमाणं ख्यातत्वे सति बाध्यत्वानुपपत्तिः असतो नरशृंगादेरख्याना
त्सतश्च चिदात्मनो बाधाभावात् उभयस्य चेह दर्शनादिति चेत् ॥ ष्ठानयाथात्म्यज्ञानेनाधिष्ठानाज्ञानमेव बाध्यते।

तत्परिणामरूपयोस्तु ज्ञानज्ञेययोः स्वयमेव विलय इति हि तव समयः तथा च रूप्यादेर्निषेध्यत्वाभावादव्याप्तिर्लक्षणस्येत्यर्थः एवं
लक्षणमाक्षिप्य प्रमाणं प्रतिक्षिपति किं चात्र प्रमाणमित्यादिना अर्थापत्तिं शंकते ख्यातत्वे सतीत्यादिना अनुपपत्तिमेव स्फोरय
ति असतो नरशृंगादेरित्यादिना इमामर्थापत्तिं मानमनोहरकारोक्तान्यथाप्युपपत्त्या दूषयति न देशान्तरेत्यादिना ९७ ॥

Nepal Sanskrit University...

वि॰सु॰
टी॰न
७९

अनुदयमप्याह किंचेति यद्यसतो न भानं कथमसत्पदं बोधकं स्यात् यदि चाबोधकमसत्पदं कथमपार्थकं नाम निग्रह
स्थानं न भवेदिति भावः निरर्थकं चात्रापार्थकत्वेन विवक्षितं नत्वसतोऽभानादित्यत्रासत्पदस्याबोधकत्वेपीतरपदानां बोधकत्वा
त्कथमपार्थकतानत्राह प्रयुक्तपदानामिति इदमपि तेनैवोक्तं यदाह असतो भासनायोगादित्यादिनाशंकाप्रथमेत्वसत्पदस्या
बोधकत्वेऽसतो भासनायोगादित्यनेन व्याघातः अन्यथानर्थकत्वे प्रयुक्तपदानां संभूयकारित्वनियमादिति यत्तु तेनैव द्विती
येऽसत इति कोर्थ इत्यादि दूषणमुक्तं तदाह किंचेदं सद्विलक्षणमित्यादिना प्रथमं दूषयति नाद्य इति यत्सत्तायुक्तं तदबाध्यमि
तिव्याप्तिः कदृष्टान्ततावच्चप्रपंचेन सत्तायुक्तत्वेपि बाध्यत्वेन व्यभिचारभूमित्वात् नापि ब्रह्मणि तस्याबाध्यत्वेपि निर्धर्मकत्वेन स

नदेशांतरे सत्वात्त्यानेरिहासत्वाद्बाधस्यापि संभवात् अन्यथाप्यनुपपत्तेः किंचासतो भानमनुपपन्नमित्यसत्
असतोपि तच्छुक्त्यादिज्ञानात् अन्यथा त्वपार्थकत्वं वा कस्य प्रयुक्तपदानां संभूयकारित्वनियमात् किंचेदं सद्विव
क्षितं किं सत्तायुक्तं अथाबाध्यं उत ब्रह्मस्वरूपं वा आद्यः सत्तायुक्तस्य प्रपंचस्य भवन्मतेबाध्यत्वपायत्तेत्तदबाध्यमि
त्यव्याप्तेरसिद्धेः न द्वितीयः यदबाध्यं तदबाध्यमिति साध्याविशिष्टत्वापत्तेः न तृतीयः सिद्धसाधनत्वात् अर्था
न्तरत्वाच्च किंचान्यथैवोपपत्तिरभ्यूहनीया सद्विलक्षणत्वे नृशृंगवत्ख्यात्यनुपपत्तेः असद्विलक्षणत्वे चात्मवद्बा
धायोगादुभयविलक्षणस्योभयानुपपत्तेः ।। नाप्युक्तत्वाभावादिति भावः द्वितीयेत्वसतो बाधाभावादिति कोर्थः योयमबाध्य
त्वस्य बाधाभावादिति तथा च साध्याविशिष्टत्वमित्याह न द्वितीय इति यद्ब्रह्मस्वरूपं तदबाध्यमिति हि तृतीयः पक्षः तथा चास्या
र्थस्यास्माभिरंगीकारात्सिद्धसाधनं प्रपंचस्यानिर्वचनीयत्वापर्यवसानादर्थांतरं चेत्यर्थः त्रीणि हि दूषणानि अर्थापत्तेः अन्य
थैवोपपत्तिरन्यथाप्युपपत्तिरनुदयश्चेति तत्रान्यथाप्युपपत्तिमनुदयं चोक्त्वाऽन्यथैवोपपत्तिमाह किंचेति सद्विलक्षणत्वेऽसद्विल राम
क्षणत्वे उभयवैलक्षण्ये चानुपपद्यमानाभ्यां ख्यातिबाधाभ्यां सदसदात्मकत्वमेव रजतादेः सिद्धमित्यर्थः ॥ ॥ ७९

७८

स्यादेतत् सद्विलक्षणत्वे नृशृंगवत् ख्यात्यनुपपत्तिरित्युक्तमयुक्तं सद्विलक्षणस्यासत्प्रतियोगिकतयाऽनेकत्वानापेक्षस्य कल्पना
गौरवेणाभानाभावप्रतिप्रयोजकत्वायोगात् एवमसद्विलक्षणेऽपि तस्मात् सत्त्वमेवाभाने प्रयोजकं न हि निरपेक्षं लघिति तथा
बाधाभावेऽपि सत्त्वमेव प्रयोजकं लघुत्वात् एवं तद् दृढबाधो दृश्यमानः सद्विलक्षणत्वं गमयति ख्यातिश्चासद्विलक्षणमिति तदेतद्धा
शंकानिषेधति न च वाच्यमित्यादिना उक्तान्यथोपपत्तिमेव दूषयन्नाह असतोपीति एवमर्थापत्तिं दूषयित्वाऽनुमानं शंकते

न च वाच्यं सदसत्त्वे बाधाभावाभानप्रयोजके न तु तद्विलक्षणत्वे गौरवादिति असतोऽपि तत्सदात्मत्वाभिमानेन सतोऽपि
प्रपंचस्य बाध्यत्वदर्शनेनोक्तानरत्वात् तदेवं नार्थापत्तिरनिर्वचनीये प्रमाणम् अस्तु तर्ह्यनुमानम् विवादपदम्
निर्वाच्यं भ्रमविषयत्वात् यन्नैवं तन्नैवं यथात्मा न चाप्रसिद्धविशेषणः पक्षः शुक्त्यादीनामसद्व्यावृत्तिरिक्ताश्रित
त्वानुमानवत्सामान्यतः प्रसिद्धिविशेषपरिशेषाभ्यां तत्प्रसिद्ध्युपपत्तेरिति चेत् न शुक्त्यादावात्मनि च विपक्षे वर्त
मानतया विरुद्धत्वात् गुणत्वलिंगेन क्वचिदाश्रितत्वप्रसाधनवदनिर्वाच्यत्वसाधने लिंगाभावात् अथैतद्दो
षपरिजिहीर्षया विमतं सदसद्विलक्षणं दोषप्रयुक्तभानत्वात् आत्मनि सिद्धतादात्म्यवदिति प्रयुञ्जीत तदप्य
सत् दृष्टान्तस्य साध्यविकलत्वात् ॥

अस्तु तर्हीति नन्वहि भ्रमविषयत्वं हेतुरधिष्ठानतयाभ्रमे प्रतिभासमाने शुक्त्यात्मादौ वर्तत इति विरुद्ध इत्याह न यतत्वा
द्वाविति किं च यथा तत्र गुणत्वेन सामान्यतः क्वचिदाश्रितत्वसाधनं नैवमनिर्वाच्यत्वस्य सामान्येन साधने लिंगमस्ति किंचि
तत्तो वैलक्षण्यमित्याह गुणत्वेति अप्रसिद्धविशेषणतापरिहाराय अन्वयव्यतिरेक्यनुमानं न्यायरत्नदीपावलीस्थं शंकते अथैतद्दो

CC-0. In Public Domain. Digitization by eGangotri

चि·सु
टी·न
८०

साध्यवैकल्यमेव विशदयति नहि शुक्तीति अथ तादात्म्यस्य प्रथमं युक्त्या सदसद्वैलक्षण्यं प्रसाध्य तद्दृष्टान्तेन प्रपंचस्य तत्साध्यते तर्हि सैव युक्तिरत्रैवोपन्यस्यतामलमनेन रज्जुसर्पमारणन्यायेनेत्याह अथ — भावरूपतयेत्यादिना भवतु वा यथा कथंचिद्रजतथापि हेतुरेवायं न घटत इत्याह किं चेत्यादिना भानशब्देन ज्ञानमभिधीयते प्राकट्यं वेत्यर्थः प्रथमेऽनैकान्तिकतामाह नाद्यो ज्ञानस्येति अधिष्ठानज्ञानस्यादोषजन्यत्वादितरस्य च ज्ञानत्वानङ्गीकारादसिद्धिरित्यर्थः द्वितीये स्वरूपासिद्धिरित्याह नद्वितीय इत्यादि

नहि शुक्तिरजततादात्म्यस्य सदसद्वैलक्षण्यं परीक्षकैरभ्युपगम्यते येनोभयवादिसिद्धतया तस्य दृष्टान्तता स्यात् अथ भावरूपतयाऽपरोक्षत्वेन भानोद्बाधाच्च तस्य सदसद्वैलक्षण्यं युक्त्या साध्यते तदा रजतस्यापि तथा तत्साधयितुं शक्यमिति व्यर्थोऽयं वक्रबन्धविधिप्रयासः किं चेदं दोषप्रयुक्तभानत्वं किं दोषजन्यज्ञानविषयत्वं उत दोषजन्यप्राकट्याश्रयत्वं नाद्यः ज्ञानस्यैकत्वेन तज्ज्ञानविषयाधिष्ठाने व्यभिचारात् नद्वितीयः प्रतिवादिनं प्रत्यसिद्धत्वात् नहि देशकालव्यवहितस्य रजतादेर्दोषजन्यभानाश्रयत्वमुपपद्यतेऽभ्युपेयते वा परैः किं चेदमनिर्वचनीयत्वं न भ्रान्तिज्ञानानुकूलं नापि बाधकज्ञानानुसारि भ्रान्तौ सदिदं रजतमिति सत्त्वेन बाधे च नेदं रजतमित्यसत्त्वेन स्फुरणात् अपि चानिर्वचनीये रजतशब्दो न जातिनिबन्धनस्तत्र जातेरभावात् ॥ ९ ॥ ६ ॥ ६ ॥

नापद्यपि तन्मते भ्रमस्य साक्षिवेद्यतास्वीकारात्स्यैवापरोक्ष्यं तथापि विषयावच्छिन्नाभिव्यक्तचैतन्यरूपप्राकट्यं नास्तीत्यपि द्रष्टव्यं किं च यदुपपादनायेदमनिर्वचनीयत्वमाद्रियते ताभ्यामेव भ्रान्तिबाधाभ्यां विरोधादयुक्तमेतदित्याह किं चेदमिति रजतशब्दप्रयोगानुपपत्तिरप्यनिर्वचनीयत्वबाधिकेत्याह अपि चानिर्वचनीये इति तत्र वक्तव्यं किमयमनिर्वचनीये रजते रजतशब्दो जातिनिबंधनः किं वोपाधिनिबंधनः किं वा डित्थादिशब्दवद्यदृच्छा इति विकल्प्याद्यं निषेधति न जातिनिबंधन इति ॥ ७ ॥ ७१ ९ ॥

राम
८०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंगीकारेबाधकमाह भावेवेतिरजतत्वाधिकरणंहि रजतंनामतदिदमपिचेत्तथाविधंतद्धदेवाबाध्यमपिस्यादित्यर्थः हितीयंनिषेधतिनापीति हेतुमाह अखंडशब्दत्वादिति अयौगिकत्वात् यथाहिपाचकइत्यत्रावयवशक्त्यापचिक्रियासंबंधाभिधानेननद्युक्तेवतेनैनैवंरजतशब्दस्यास्ति एवुलादिवत्कर्त्रादिविहितप्रत्ययाभावादित्यर्थः अथयथाऽखंडत्वेपिजातिशब्दस्योपाधिवाचकत्वेनहूत्किंनस्यादित्यत आह उपाधेरितितृतीयंनिषेधति नाप्यस्मादीति यद्यप्यस्मादैनसर्वत्रानुगतःकश्चिज्जातिरुपाधिर्वाथोस्तियेनसाधारणशब्दत्वंतथापिविभीतकत्वविदेवनत्वादिभिरवांतरधर्मैःशक्यःसंगतिग्रहस्याकाशादेश्चानादिवृद्धव्यवहारप्रसिद्धतयाइहतुनतथाविधमपिकिंचिदस्तिभ्रांतिसिद्धस्यप्रतीतिमात्रजीवनत्वात्प्रतीतेश्चप्रत्यात्मदृष्टत्वात्

भावेवास्यरजतत्वदेवाबाध्यत्वप्रसंगात् नाप्यौपाधिकःपाचकादिशब्दवत् अखंडशब्दत्वात् उपाधेरनिरूपणाच्च नाप्यस्मादिशब्दवद्रूढः स्वभ्रांतिमात्रसिद्धस्यान्यत्रादृष्टचरत्वेनरजतस्यतेनागृहीतसंबंधत्वात् किंचानिर्वचनीयंचेद्रजतंतेनप्रतीयेततथाहिकिंदुष्टेंद्रियेणतत्प्रतीतिरुतसंस्कारात्। अथवासाक्षिचैतन्यात् नाद्यःतस्यप्रतिभासमात्रशरीरतयासंप्रयोगायोगपत्वात् नहितीयैःननुभूतेसंस्काराभावात् नतृतीयःइंद्रियान्वयव्यतिरेकानुविधायिनःकेवलसाक्षिवेद्यत्वासंभवात् नचा ॥ इतोऽगृहीतसंगतिकत्वादप्रयोगएवात्ररजतशब्दस्यप्रसज्जेतेत्यर्थः अनिर्वचनीयत्वेरजतस्यप्रतीत्यनुपपत्तिरपिबाधकेत्याह किंचानिर्वचनीयंचेदिति इन्द्रियेणप्रतीतिरितिप्रथमंपक्षंनिराचष्टे नाद्यइति इंद्रियव्यापारात्पूर्वमेवनिर्वृत्तपश्चादिंद्रियसंप्रयोगाज्ज्ञायमानंहींद्रियकंनचैवंप्रतीतिमात्रशरीरंरजतमित्यर्थः अननुभूतइति प्रतीतिसमसमयशरीरस्यपूर्वानुभवाभावात्संस्काराभावेनततःप्रतीतिरित्यर्थः साक्षिवेद्यतांनिराचष्टे नतृतीयइति यत्रहींद्रियादिव्यापाराभावेप्यापरोक्ष्यंयथाऽज्ञानादेस्तत्साक्षिवेद्यंनामइहतुतथात्वप्रसंगात्तेनचेहतथाभावइत्याह इंद्रियान्वयेति ॥ ॥ ०७ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वि॰सु॰ टी॰न॰ ८१

ननु यद्यप्यधिष्ठानविषयतयाऽन्वयव्यतिरेकयोरन्यथासिद्धत्वान्न रजतज्ञानमिन्द्रियजं तथापि तद्विद्यापरिणामइति तानु
द्धितसंसर्गो रूप्यतेन तथापि संसर्गज्ञानस्वीकारान्नाख्यातिप्रसक्तिरित्यत आह नच संसर्गेति किंचेन्द्रियान्वयव्यतिरेकयोरधिष्ठानो
पक्षयेस्पर्शेनेनापि न क्षुहेनादृष्टभ्रमप्रसंगः नचजेन सादृश्याग्रहादप्रसंगो विसदृशेपि नदूषेरिति ज्ञानद्वित्वाभ्युपगममेवप्र
कटयति इदमाकारेत्यादिना रजततंसर्गेति तज्ज्ञानाकारा विद्यापरिणामस्याप्युपलक्षणं पूर्वपक्षमुपसंहरति तदित्यमि
ति तत्रलक्षणं श्लोकेन संगृह्णाति प्रत्येकमिति यत्प्रत्येकं सदसत्त्वाभ्यां सत्त्वेनासत्त्वेन सदसत्त्वेन च विचारपदवीं विचारमार्गं न

धिष्ठानविषय— तयान्वयव्यतिरेकयोरन्यथासिद्धिः तथासति ज्ञानद्वयस्वीकारेणाख्यातिमतानुमति
प्रसंगः नच संसर्गप्रतीतेरभ्युपगमान्नाख्यातिप्रसंगः तथापि विज्ञानद्वयाभ्युपगमेनाख्यातिप्रसंगस्य दुर्वारत्वा
त् इदमाकारविषयमिन्द्रियजन्यं ग्रहणं रजततत्संसर्गविषयं साक्षिचैतन्यमित्यभ्युपगमात् तदित्थं लक्षणप्रमा
णयोरनिरूपणान्नानिर्वचनीयावभासो विभ्रमइति अत्रोच्यते प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं न यत् गा
हते तदनिर्वाच्यमाहुर्वेदान्तवेदिनः १३ सत्त्वेनासत्त्वेन च विचारासहत्वे सति सदसत्त्वेन च यद्विचारं न सहते त
दनिर्वाच्यं न चैवमसत्यव्याप्तिरतिव्याप्तिर्वा ॥ गाहते न प्रविशति तदनिर्वचनीयमिति वेदान्तवेदिन आहुरिति योजना

अत्र सदसत्त्वाभ्यां विचारपदवीं न गाहते यत्तदनिर्वाच्यमित्युक्ते सदसतोरतिव्याप्तिः तयोरप्युभयप्रकाराभ्यामनिर्वाच्यत्वादत उ
क्तं प्रत्येकमिति तयोः प्रत्येकं विचारसहत्वात्तावन्मात्रोक्ते समुदितयोः सदसतोरतिव्याप्तिः तदर्थं सदसत्त्वाभ्यामित्युक्तं संगृहीतं लक्ष राम॰
णं विवृणोति सत्त्वेनासत्त्वेनेत्यादिना एतदुक्तं भवति न प्रकारत्रितयप्रतियोगिकाभावत्वमनिर्वचनीयत्वं किंतु प्रकारत्रयप्रति ८१
योगिकाभावत्रयवत्त्वमनिर्वचनीयत्वमिति ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अव्याप्त्यभावमाह सर्वभ्रमेति अतिव्याप्त्यभावमाह सदादीनामिति एवं च सति यदुदयनेन तात्पर्यशुद्धौ हि द्वितीयस्तत्र विपर्यय
विचारावसरे गर्जितं किमिदमनिर्वचनीयत्वं किं निरुक्तिविरह एवेत्यादि तदस्थाने एवानाकलिततदभिसंधिना संभ्रान्तमित्याह
एवं च सतीति अकाण्डताण्डवितं अनवसरनर्तनं तत्र हेतुः निरुक्तेरिति न निरुक्तिमात्रस्य तन्निमित्तस्य वाभावोऽनिर्वचनीयत्वं किंतु स
दादिप्रकारे निश्चित्य वक्तुमनर्हत्वमित्यर्थः यत्तत्रापि तेनोक्तं तत्सूचयन्निराकरोति न च परस्परेति समुच्चयानुपपत्तौ हेतुः अन्य
तरनिषेधस्येति न च युक्तमित्युक्तं तत्र हेतुमाह निषेधसमुच्चयस्येति अनुपपन्न इति कोऽर्थः यदि प्रमाणयुक्त्याघातेन सह त

सर्वभ्रमगोचराणां तथाभावनियमात् सदादीनां च तत्तद्विचारसहत्वेन परैरभ्युपगमाच्च एवं च सति निरु
क्तिविरहः किं वा निरुक्तिनिमित्तस्य च विरह इत्यादिविकल्पोऽकाण्डताण्डवितं निरुक्तेर्निमित्तभूतायाः प्रतीतेस्त
दालम्बनस्य चार्थस्य व्यवहारगोचरत्वेऽपि सदसत्त्वादिप्रकारे निश्चित्य वक्तुमनर्हत्वाङ्गीकारात् न च परस्परवि
नु रुद्धयोः सदसत्त्वयोर्निषेधसमुच्चयोऽपपन्नोऽन्यतरनिषेधस्यान्यतरविधिनान्तरीयकत्वादिति युक्तं निषेध
समुच्चयस्य तात्त्विकत्वानङ्गीकारात् तत्तत्प्रतियोगिदुर्निरूपतामात्रप्रकटनाय तद्द्विलक्षणत्वाभिलापः
न हि स्वरूपतो दुर्निरूपस्य किंचिदपि रूपं वास्तवं संभवति तथा सति तस्यापि तात्त्विकत्वप्रसंगात् न चैकत
रनिषेधोऽन्यतरविधिनान्तरीयकः आनिर्वचनीयवादिनं प्रति व्याप्त्यसिद्धेः ॥ ६ ॥ ६ ॥ ६ ॥ ७ ॥

इति सिद्धमेवेदमस्माकमद्वैतवादिनामिति भावः कस्तर्हि सदसद्विलक्षणशब्दार्थस्तत्राह तत्तत्प्रतियोगीति प्रतियोगिसत्त्वा
दिः किमुत्तरकोटौ तत्र तदपेयमाश्रीयते तद्विधानं अपरथाऽसंभवादित्याह न हि स्वरूपत इति स्वरूपेण सदसत्त्वादिभिर्दुर्नि
रूपस्य प्रपञ्चस्य यो यः सदसद्विलक्षणत्वं धर्मः तस्य कथं सदादित्वेन निरूपणसंभवः तथात्वे वा तदाश्रयस्यापि तथात्वप्रस
ङ्गादित्यर्थः किं चाङ्गीकृत्य व्याप्तिमिदमुक्तं सैव नास्तीत्याह न चैकतरेति ॥ श्री ॥ ६ ॥ ॥ ॥ ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

चि॰ सु॰ तृतीयमपि लक्षणं समर्थयते ज्ञानबाध्यत्वं वेति पूर्वज्ञानादौ ज्ञानबाध्यत्वलक्षणाभावं दर्शयितुं बाधस्वरूपमाह बाधो हि नामे
न॰ टी॰ ति अभावबोधनप्रकारमेवानुकरोति नासीदात्माधिकरणज्ञानसंस्कारो वेति यत्त्वीश्वरज्ञाननिवर्त्यत्वस्वीकारादतिव्याप्तिरिति
८२ तत्राह ईश्वरज्ञानेन चेति अत्यन्ताभावबोधनं हि बाधः ननु ध्वंसकरणमित्यर्थः एतेनेत्यस्यैव विवरणं धर्मितयेति यत्तु बाधलक्षण
मनूद्याव्याप्त्यतिव्याप्तिभ्यां दूषयांबभूव तदपि परिहर्तुमुपक्रमते अत एवेति यत एव निषेधोऽभावबोधनमत एवेत्यर्थः अव्या।

ज्ञानबाध्यत्वं वाऽनिर्वचनीयत्वं न च पूर्वज्ञानसंस्कारयोरतिव्याप्तिस्तयोर्ज्ञाननाश्यत्वेपि ज्ञानबाध्यत्वाभावात्॥
बाधो हि नाम प्रतिपन्नोपाधावभावबोधनं न च पूर्वज्ञानस्य तत्संस्कारस्य वा प्रतिपन्नोपाधावात्मनि नासीदात्माधि
करणज्ञानसंस्कारो वेत्यभावो बोध्यते ईश्वरस्य ज्ञानेन च मुद्गरप्रहारेणेव घटादेः प्रपंचस्य प्रध्वंस एव क्रियते ना
भावबोधनमतो नातिव्याप्तिः एतेन बाधकज्ञानविषयत्वाच्छुक्त्यादेर्ब्रह्मणश्चानिर्वाच्यत्वप्रसंग इत्यपास्तं धर्मि
तया बाधकज्ञानप्रतिपन्नत्वेपि बाध्यमानाभावप्रतियोगित्वाभावात् अत एव प्रतिपन्नोपाधौ नाभूदस्ति भविष्य
तीति कालत्रयसत्तानिषेधो बाधस्तद्विषयत्वं च बाध्यत्वमिति केचिदाचार्याः न चाव्याप्तिरतिव्याप्तिर्वा शुक्तिश
कले प्रतिपन्नस्य रजतस्य कालत्रयेपि तत्र सत्ताभावस्य नेदं रजतमिति बाधेन बोध्यमानत्वात् लौकिकपरमा
र्थरजतस्य देशान्तरीयसत्त्वेन प्रमितस्य तत्रासत्त्वबोधनस्याशक्यत्वात् तस्य शुक्तिकाशकले कालत्रयासत्त्व
बोधनमिति चेन्न तस्यात्राप्रसक्तेः ॥

व्याप्तिं निराकर्तुमाह शुक्तिशकले प्रतिपन्नस्येति नहि नेदं रजतमित्यस्यायमर्थः यदिदा ८२
नीं रजतं तन्न भवतीति भावः नन्वयं निषेधो किं लौकिकपरमार्थरजतविषयस्तथा च तत्रैव तावदतिव्याप्तिः अत्र वासिद्धिरिति तत्राह
लौकिकपरमार्थेति तत्रेदं वक्तव्यं किं यत्रेदं सत्त्वेन प्रमितं तद्धा देशे तत्रैव निषेधः किं वा शुक्तौ न तावद्देशान्तरे तत्र सत्ताया ग्राहकप्रमा राम
णविरोधादित्यभिप्रायाह हि तीयं शंकनेन तस्य शुक्तिकाशकलेति अत्रानपनीतस्य न निषेधः संभवतीति परिहरति न तस्येति ॥ ॥ ८२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ननु यद्यपि तस्याचनस्यास्याः प्रसक्तिस्तथापि रजताभासः प्रतीतस्तद्द्वारा रजतत्वस्यास्यात् तदपि प्रसक्तमिति शंकते रजताभा
से इति तत्र किं प्रसक्तालेर रजताभासत्वयावभासस्तत्प्रसक्तिः उत्तरैवगत्या तथाभूतस्य स्वरूपेण नाद्य इत्याह मेवं रजताभासे
ति द्वितीयं शंकते प्रतिपन्नेतितत्किं प्रतिपन्नशुक्तिकाद्युपाधौ रजतादेः कालत्रयसत्तानिषेधरूपबाधविषयत्वमंगीकृतं र
जतादेराभासत्वमिष्टं तथा चाप्युक्तेवाव्याप्तिः परिहृतेत्याह एवं तर्हीति ननु तथापि तद्द्वारा लौकिकरजतप्रसक्तिर
रजताभासप्रसक्तिरेव न तत्प्रसक्तिरिति चेन्नैवं रजताभासस्य इदमप्रीतेरिदं रजतमित्येव प्रतीतेश्च प्रतिपन्नोपा
धौ निषेधात्तदाभासत्वापत्त्या निश्चीयते इति चेत् एवं तर्हि नाव्याप्तिः प्रतिपन्नोपाधौ तस्य निषेधस्य त्वयांगी
कारात् अत एव न देशान्तरादौ प्रमितस्य लौकिकपरमार्थरजतस्य तन्निषेधप्रतियोगित्वं आभासविषय
त्वात्तस्य अन्यथा जगति रजतमेव न स्यात् तस्माल्लौकिकपरमार्थरजतमेव नेदं रजतमिति निषेधप्रति
योगीति पूर्वाचार्यवाचोयुक्तिरपि पुरोवर्तिनि रजतार्थिनः प्रवृत्तिदर्शनाल्लौकिकरजतात्मत्वेनापरोक्षत
या प्रतीतस्य कालत्रयेऽपि लौकिकरजतमिदं न भवतीति निषेधप्रतियोगितामंगीकृत्य नेतव्या नचैवं सत्य
प्यसत्त्वेऽपीति तेत्याह अत एवेति आभासविषयत्वादित्याभासविषयत्वेन त्वया अंगीकारादित्यन्यथाव्याप्तेः प्रसक्तिः॥
इत्यर्थः न केवलं तदंगीकारः अनुपपन्नश्च लौकिकरजतनिषेध इत्याह अन्यथेति रजततदाभासयोरैक्याध्यासाद्रजताभास
सम्यग्ज्ञानविषयत्वप्रतीतिद्वयाभावाच्चाप्रसक्तस्यैव सम्यग्ज्ञानस्य निषेध इति वक्तव्यं तथा च यत्र यत्र प्रमितं तत्र सर्वत्र निषे
धः स्यादित्यर्थः नन्वेवं सति विवरणकाराचार्यवचनविरोध इत्यत आह तस्मादिति ननु लौकिकपरमार्थरजतात्मत्वेन चेत्प्र
तीतं निषिध्यते तर्ह्यन्यथाख्यात्यापातः देशान्तरस्थरजतस्यात्र प्रतीतस्य निषेध इति हि तेषामपि मतमित्यत आह नचैवं सतीति।

CC-0. In Public Domain. Digitization by eGangotri



संसर्गवदिति संसर्गस्य सदसद्विलक्षणत्वांगीकारादेव नावद्यन्यथाख्यात्यादिवादिभ्यः सिद्धसद्भेदः संसर्गिणस्तु लौकिकपरमार्थ
रजतत्वयाप्रतीतस्यापि सदसद्विलक्षणत्वस्वीकारान्न प्रसिध्यतीति नतरां भेद इत्यर्थः लौकिकपरमार्थरजतप्रतिषेधादेवानिर्व्याप्तिः
परिहृतेत्याह एवं च सतीति लक्षणं समर्थयित्वा ऽर्थापत्तिं तावत्प्रमाणमाह प्रमाणं चेति अन्यथाप्युपपत्तिमुक्तां परिहरति न
च देशांतरेत्यादिना ननु दृष्टाक्षस्यात्मत्र सदन्यत्वप्रतीयत इति नेत्याह नहि भूमाविति एवं प्रतीतेरन्यथाप्युपपत्तिं परिह

संसर्गवत्संसर्गिणोपि ख्यातिबाधान्यथानुपपत्त्या सदसद्विलक्षणत्वांगीकारात् एवं च सतीति कुतो ऽनिर्व्या
प्तिः प्रमाणं च तत्र ख्यातत्वे सति बाध्यत्वान्यथानुपपत्तिः न च देशांतरे सत्त्वादत्रासत्त्वाच्च ख्यातिबाधयोरन्यथा
प्युपपत्तिः अन्यत्र सत्ता या इह प्रतीत्यहेतुत्वात् नहि भूमावंभोरुहं सदिति दृष्टाक्षस्यापि नभसि नद्वभासते ॥
अप्रतीतत्वादेव च बाधायोगात् न चासतो ऽभाने शब्दस्यापार्थकत्वप्रसंगः अपरोक्षभानाभावस्येह विवक्षितत्वा
त् परोक्षभानस्य चानिराकरणात् न च सच्छब्दार्थानिरुक्तेर्यत्सत्तद्वाध्यमिति व्याप्त्यसिद्धिः त्वयापि हेतौ तत्त्वेस
दसतीइति तत्त्वव्यवस्थापयता परैः व सत्त्वेन व्यवस्थापितत्वे तस्यैव मयापि व्यवहारदशायामबाध्यत्वोक्तेः न चा
न्यथैवोपपत्तिः सत्त्वयोरेवाबाधाभानप्रयोजकत्वोपपत्तौ न दितरवैलक्षण्यस्य तत्प्रयोजकत्वकल्पनायां गौरवा

त्ववाधस्यापि तां परिहरति अप्रतीतत्वादेव चेति सत्त्वसतो भानाभावे ऽसत्पदप्रयोगस्यापार्थकत्व प्रसंगइति तत्परिहरति न
चासत इति नासतो भाने मात्रं प्रतिषिध्यते ऽपि त्वपरोक्षभानं तथा च नान्यथोपपत्तिरपार्थकत्वं चेत्यर्थः यत्तु सच्छब्दार्थस्त्रिधा
विकल्प्य दूषणमुक्तं तत्परिहरति न च सच्छब्दार्थेति शुक्तिरूप्याद्यपेक्षया ऽबाध्यत्वं च घटादौ व्याप्तमित्यर्थः दूषणांतरं परि





Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वसत्त्वभाने न प्रयोजकम् असतोपि तुच्छव्यावृत्तज्ञानात् नापि सत्त्वमबाधायां सतोपि प्रपंचस्याबाधांगीकारादित्युक्तमिति तत्राह ।
न चासत्तापीत्यादिना पूर्वोक्तमेव परिहारमत्राप्याह परोक्षतयेति नन्वबाध्यत्वे सत्त्वं प्रयोजकमंगीकुर्वता सद्वैलक्षण्यं बाध्यत्वे
प्रयोजकं स्वीकर्तव्यं तथा च प्रयोजकगौरवं स्यात् एवमितरत्रापि अन्यस्थले सत्त्वबाध्यत्वे प्रयोजकं सत्त्वं च प्रतीताविति लाघ
वमिति न्यायरत्नदीपावलीयमाशंक्य तत्रापि व्यतिरेकेऽसद्वैलक्षण्यमबाधप्रयोजकं सद्वैलक्षण्यं चाभाने प्रयोजकमिति

न चासतोपि तत्प्रदानप्रतिभासनात् सत्तायुक्तस्यापि प्रपंचस्याबाधाभ्युपगमात् तयोरप्रयोजकत्वं अपरोक्ष
तयाभानस्य व्यवहारदशायां चाबाध्यस्येह विवक्षितत्वात् ननु सत्त्वासत्त्वयोरेवाबाध्यत्वाभानप्रयोजकत्वे
यत्सद्वैलक्षण्यं तद्बाध्यं यदसद्वैलक्षण्यं तत्ख्यातिरिति व्यतिरेके गौरवं स्यात् सत्त्वासत्त्वयोस्तु ख्यातिबाधप्रयो
जकतायां लाघवमिति चेन्न एवं तर्हि व्यतिरेके गौरवस्य तुल्यत्वात् अख्यात्यबाध्यत्वयोः सदसद्वैलक्षण्य
स्य प्रयोजकत्वांगीकारात् एवमपि प्रयोजकत्वविनिगमनायां को हेतुरिति चेत् पक्षान्तरे ख्यात्यसंभवः न
था हि न तावत्सत्त्वाद्बाध्यस्तस्य ख्यातिः तस्येहासत्त्वात् सतश्च ख्यातौ भ्रांतिबाधयोरनुपपत्तेश्च असत्त्वे चा
परोक्षतयाभानानुपपत्तेः अनुमानमप्यत्र प्रमाणं विमतं मतमनिर्वचनीयं बाध्यत्वात् यन्नैवं तन्नैवं यथा ब्रह्मेति

गौरवं समानमित्याह मैवं तर्हीति नन्वेवं समानगुणदोषत्वे किमित्यन्यतरपक्षे पक्षपात इति शंकते एवमपी
ति विनिगमनानिर्णयः सत्त्वभानप्रयोजकमिति पक्षे बाध्यस्यापि सत्त्वात् स्फुरणमुतासत्त्वात् नाद्यः इत्याह न तावत्सत्त्वादिति
दूषणान्तरमाह सतश्चेति असत्त्व इति पाठे द्वितीयपक्षनिषेधः तत्त्वार्थः स च दूषितपक्षात् पक्षान्तरपरिग्रहसूचकः द्वितीयं
निषेधति असत्त्व इति द्वितीययोजनायां तत्रैव हेतुः तदेवमर्थापत्तिमुक्त्वानुमानमपि प्रमाणयति अनुमानमपीति विमतमिति

CC-0. In Public Domain. Digitization by eGangotri

वि·सु· अत्र च सदसद्विलक्षणत्वमनिर्वचनीयत्वं साध्यमिति न साध्याविशिष्टता प्रसिद्धिमन्यथा ख्यातिवादी शंकते संसर्गस्येति परिह
टी·न· रति नेति असन्निहितत्वाधनिवारणाय परोक्षत्वेऽप्युक्तं सामान्यतोदृष्टानुमाने नानिर्वचनीयत्वं साधयन्नप्रसिद्धविशेषणतां परिहरति स
८४ कालत्वेनेति धर्मत्वाद्धेतोः सदसत्त्वयोरेककालत्वेन संसर्गनिषेधे एकनिष्ठसंसर्गाभावे एकाधिकरणात्यन्ताभाव इति यावत् तस्मिन्सा
धिते रूपरसवदनिर्वचनीयत्वं सिद्धं भवतीति योजना संग्रहं विवृणोति विवादाध्यासित इति अत्र च भावत्वाभावत्वे सत्त्वासत्त्वे स
कधर्मिनिष्ठो यावत्यन्ताभावौ तत्प्रतियोगिनौ धर्मत्वात् यौ धर्मौ नावेकधर्मिनिष्ठात्यन्ताभावप्रतियोगिनौ यथा रूपरसौ तथा चामू

संसर्गस्यैव बाधत्वादुज्जनस्य बाध्यत्वमसिद्धमिति चेन्न द्वयोरपरोक्षतया प्रतिभासमानयोः संसर्गमात्रनिषेधे वन
स्पत्योरिव विविक्तयोः बाधोत्तरकालमुभयोरपि इहावभास प्रसंगात् न चाप्रसिद्धविशेषणः पक्षः यस्मात् एककालत्वेन सं।
सर्गनिषेधे सदसत्त्वयोः धर्मत्वाद्रूपरसवत्सिद्धानिर्वचनीयता १४ विवा— दाध्यासिते सदसत्त्वे एकधर्मिनिष्ठात्यन्ताभा
वप्रतियोगिनौ धर्मत्वात् रूपरसवदिति अनिष्टोक्तिर्धर्मिनिष्ठतया सामान्यतः सिद्धस्य सदसद्विलक्षणस्य
केवलव्यतिरेकिणोऽरजते धर्मिनिष्ठतयोपसंहारादप्रसिद्धविशेषणत्वाभावात् ॥ १ ननु तथेति प्रयोगः भिन्नाधि
करणनिष्ठात्यन्ताभावप्रतियोगितयार्थान्तरता निवृत्त्यर्थं एकधर्मीत्युक्तं सत्त्वमसत्त्वानधिकरणनिष्ठात्यन्ताभावप्रतियोगि धर्म
त्वात् रूपादिवदिति तु प्रयोगशरीरं न चार्थान्तरता सत्तोऽसत्तो वोभयात्यन्ताभावद्वयाधिकरणत्वाभावात् मिलितयोश्चैकत्वाभा ८४
वादेकत्वे वा सदसद्द्वितभूततायास्तूभयाभावाधिकरणत्वायोगात् अनेन भूतत्वे च सिद्धं तः समीहितमिति काचंतरता न च प्रमे
यत्वादौ व्यभिचारः तेषामपि वेदान्तिमते पूर्वोदितन्यायेनैवात्मनिष्ठात्यन्ताभावप्रतियोगित्वात् न चैवं परीत्यानुमानधर्मत्व राम·
हेतोरूपादावनैकान्तिकत्वात् अपरे त्वेवमेतदनुमानं समर्थयामासुः सत्त्वमसत्त्वानधिकरणानात्मनिष्ठात्यन्ताभावप्रतियोगि अना ८४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्मनिष्ठात्यंताभावप्रतियोगित्वाद्रूपादिवदित्यत्रविवक्षितं तेन चैतन्यपरित्यक्तं भवति धर्मत्वहेतोर्वाच्यत्वादिनाव्यभिचारः अथ तत्स्या पि निर्धर्मके ब्रह्मण्यभावेनाव्यभिचारः नहि तस्मिन्नेव ब्रह्मणि निर्धर्मके तयोरसाध्यसिद्धेः न जडानिर्वाच्यत्वासिद्धिरित्यर्थो नरत्वास्यादिति न च व्याघातः परस्परविरुद्धयोरपि नित्यत्वानित्यत्वयोरिव शुक्तिरजतादिसंसर्गे युष्माकं तत्संभवात् अतएव विवा दाध्यासिते सत्त्वासत्त्वे एकानात्मनिष्ठसंसर्गाभावप्रतियोगिनी न भवतः परस्पराभावरूपत्वात् नित्यत्वानित्यत्ववदिति न सत्प्रतिप क्षतापि आरोपितसंसर्ग एवोभयव्यावृत्त्यासाध्यविकलत्वादिति तदेतदसमीचीनं मिथ्यात्वादेरपि सर्वधर्मविधुरे ब्रह्मण्यप्रवृ त्तेर्व्यभिचारभूमित्वात् न चार्थान्तरता निर्धर्मके ब्रह्मण्यसत्ताभावस्याप्यवृत्तेः वृत्तौ वासत्त्वस्यापि वृत्तेरनर्थान्तरत्वात् कथं तर् हि सत्त्वासत्त्वयोस्तत्तदत्यन्ताभावरूपयोर्ब्रह्मण्येव वृत्तेर्न किमत्र चित्रं प्रत्यायकश्रुतौ सत्त्वापरस्परप्रतिक्षेपरूपभावाभाव

**नचानिर्वचनीयत्वे सदिदं रजतमिति भ्रमानुभवविरोधः अधिष्ठानेदंतासंसर्गवत् सत्तासंसर्गस्यापि अनिर्वचनीयस्यैव भ्रमेऽनुभवात्**

योः संयोगादेरेकवृत्तित्वेपि स्वस्वस्मिन्नेव च मेयत्वाद्यवृत्तेरात्माश्रयात् प्रसाधयिष्यते चायमर्थः व्याघातस्तु नियमानंगीका रेणात्रैव परिहृतः न चानित्यत्वानित्यत्वव्यावृत्तेरारोप्यसंसर्ग उदाहरणं अत्यन्ताभावरूपस्य तस्य नित्यतायाः परैरंगीकृतत्वात्॥ नहि सत्ता तत्र जातिरूपिणी स्वरूपसत्त्वांगीकारात् अस्तित्वात्मकस्य च तस्याभावेपीष्टेरिति एतेन सामान्यादीनां नित्यत्वव्या वृत्तेस्तत्र यथान्यासमेवास्तु त्वनुमानमलमतिवैदग्धीप्रकटनेन केवलव्यतिरेकिणा इति पंचमी ननु सदिदं रजतमिति सा त्त्वानुभवबाधितमिदं सद्वैलक्षण्यानुमानमिति तत्राह नचानिर्वचनीयत्व इति यथा हि पुरोवर्त्तिनो रजतस्य पुरोवर्त्यधिष्ठानारो पात्पुरोवर्त्तित्वप्रतिभासः तथा सद्विलक्षणरजतस्य सदधिष्ठाने समारोपितत्वात्सद्बुद्धिर्बाध्यत्वेन न पुनः सत्त्वादिति परिहरति अ

CC-0. In Public Domain. Digitization by eGangotri



अथवासदिदं रजतमिति प्रातीतिकसत्त्वमनुभूयते पारमार्थिकव्यावहारिकसद्विलक्षणं चानिर्वचनीयत्वं साध्यत इति नानुभववि-
रोध इत्याह अपि चेत्यादिना सदसद्विलक्षणतायां भ्रान्तिबाधानुभवविरोधो लाघवमित्यतस्तत्र भ्रान्तिविरोधं परिहृत्य बाधविरोधं
परिहरति नचनेदमिति नेदं रजतमिति कोऽर्थः नेदं मदभिमतं रजतमिति तथाचार्थक्रियासामर्थ्यलक्षणसत्त्वस्यैव निषेधात् न
तद्विलक्षणानुमानं विरुणद्धीत्यर्थः सदसद्विलक्षणमनिर्वचनीयत्वमनेन निर्वाहावसरत याच पूर्वोदितलौकिकपरमार्थर
जतविषयत्वनिषेधेन न विप्रतिषेधशंकापीति भावः दोषान्तरमुक्तं परिहरति नचानिर्वाच्य इति रजतानुभवसंस्कारं जिता स्वविद्या र
जतत्वाकारेण विवर्तते अननुभूतरजतस्य भ्रान्त्यनुपपत्तेः सचानुभवः सविकल्पक इति शब्दोल्लेखवान् तथाच तत्संस्कारंजि

अपि च ब्रह्मणीव पारमार्थिकसत्तायाः प्रपंच इव च व्यवहारिकसत्तायाः अभावेपि प्रातिभासिकसत्तास्वीकारेण
सदिदं रजतमित्यनुभवो न विरुध्यते न चनेदं रजतमित्यसत्त्वानुभवविरोधोऽर्थक्रियासामर्थ्यलक्षणसत्त्वस्यै
व तत्र निषिध्यमानत्वात् नचानिर्वाच्ये रजतशब्दप्रयोगायोगः सविकल्पकरजतानुभवसंस्कारजन्यतया रजत
भ्रमस्य तद्वाचकशब्दोल्लेखोपपत्तेः नचानिर्वचनीयत्वे रजतस्य प्रतीत्यनुपपत्तिः शुक्त्यवच्छिन्नात्मचैतन्य
स्याविद्याविवर्त्ततया चैतन्येऽध्यस्तत्वातेन प्रतीत्युपपत्तेः नच संप्रयोगाभावादपरोक्षत्वानुपपत्तिः अध्यस्तस्या
परोक्षतायाः संप्रयोगानपेक्षत्वात् ॥ ८५

ताविद्यातद्वृत्तिवत्तच्छब्दप्रयोगेपि हेतुः एतदुक्तं भवति रजतबुद्धिवद्रजतजा
तीयबुद्धिरप्युदेति ततश्च तच्छब्दप्रयोग इति परस्यापि शुक्त्यादौ रजतत्वजात्याद्यसंभवात् तत्संस्कार एव शरणमिति भावः यात्तुप्र
त्यायकानुपपत्त्या प्रतीत्यनुपपत्तिरुक्ता तां परिहरति नचानिर्वचनीयेति शुक्त्यवच्छिन्नयच्चैतन्यं तदविद्यापरिणामो हि रजतं न
तु केवलशुक्त्यविद्यापरिणामः शुक्तेरविद्याकार्यस्य स्वकारणाविद्याप्रत्याश्रयत्वायोगात् तदुक्तमाचार्यैरिष्टसिद्धिकारैः शुक्त्याव
स्थात्ममोहोत्थारूप्यधीः शुक्तिमोहजा कथ्यते मृद्घटस्यात्मजातो मृज्जा यथा घट इति ततस्तेनैव चैतन्येन रजतमपि वेद्यमित्यर्थः ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रजतस्य शुक्तिसामानाधिकरण्योपपादनाय शुक्त्यवच्छिन्नेत्युक्तं नन्विन्द्रियसंप्रयोगाभावे कथमपरोक्षतेत्यत आह नच संप्रयोगेति
न केवलमस्माकमयं नियमभङ्गोऽपितु भवतोऽपीत्याह अन्यथेति ननु न देशान्तरस्थं रजतं रजतज्ञानविषयोऽपितु पुरोवर्ति वस्तु तच्चेन्द्रियसं
युक्तमिति नेन्द्रियसंप्रयोगादेवापरोक्षं तदीदमस्मन्मतेऽपि समानमिति प्रौढिमारूढः प्राह अधिष्ठानेति नन्विन्द्रियान्वयव्यतिरेकयोः सा
तोः कथं तदभावे यथैवं परिहृतिरित्यत आह तयोरिति अधिष्ठानग्राहकेन्द्रियग्राह्यतामन्तरेणाऽऽरोप्यस्यापरोक्षतायां बाधक
माशङ्क्य परिहरति नचैवं सति नेत्रारोप्याधिष्ठानयोरेकेन्द्रियग्राह्यत्वनियमात् भ्रमानुदयः अपितु सादृश्यजन्यभ्रमेषु सादृश्या

अन्यथा भवतोऽपि रजतनत्संसर्गयोरपरोक्षत्वाभावापातात् अधिष्ठानसंप्रयोगादेवापरोक्षत्वमस्मन्मतेऽपि तु
ल्यं अन्यत्र स्वपक्षपातात् नचेन्द्रियान्वयव्यतिरेकानुविधायित्वं रजतस्य तयोरधिष्ठानग्रहणेनान्यथासिद्ध
त्वात् नचैवं सति स्पर्शनेनाधिष्ठाने गृहीतेऽपि चाक्षुषो रजतविभ्रमः स्यादिति वाच्यं सादृश्यदर्शनजन्ये विभ्रमे
तेनैवेन्द्रियेण सादृश्यस्य ग्रहणनियमात् अन्यथा नवापि तिक्तो गुड इति विभ्रमो न भवेत् आरोप्यस्य रसस्य रस
नेन्द्रियग्राह्यतया द्रव्यग्राहकस्पर्शनेन्द्रियागोचरत्वात् तस्मात्तत्राधिष्ठानग्रहण एवेन्द्रियस्योपयोग इति त्वयापि व
क्तव्यं तथाच ननत्प्रसक्तेपि दंडवारितं नच ज्ञानद्वयांगीकारादख्यातिप्रसंगः इदमंशावच्छिन्नसाक्षिचैतन्यस्यैवाधिष्ठा
धिष्ठानयोरेकेन्द्रियग्राह्यतानियमात् तदभावापराधादित्याह ॥ नज्ञानफलभूतस्य स्वमायाविवर्तरजतादिसिद्धत्वात् ॥ ६ ॥

सादृश्येति यदि च कस्मैचित्समानेन्द्रियग्राह्यत्वनियमदुराग्रहादुक्तरीतिर्न रोचेत तं प्रति बाधकमाह अन्यथा नवापीति विभिन्नेन्द्रियग्राह्य
तामेव हेतुमाह आरोप्यस्येति तदेवमधिष्ठान एवेन्द्रियोपयोगमुपपाद्य ज्ञानद्वयांगीकारादख्यात्यापत्तिमुक्तां परिहरति नच ज्ञानेति कोऽयं ज्ञान
भेदः किं ज्ञप्तिभेद उतान्तःकरणवृत्तिभेदः नाद्य इत्याह इदमंशेति उभयोरपीदमंशावच्छिन्नैकसाक्षिवेद्यत्वेन फलभेदाभावादित्यर्थः

CC-0. In Public Domain. Digitization by eGangotri

१
वि.सु. द्वितीयेमाह अंतःकरणेति नचैकत्वांतःकरणपरिणामोऽपरत्राविद्यापरिणामइतिज्ञानभेदः अविद्यापरिणामस्यज्ञानाभासत्वेनज्ञा
टी.न. नत्वासिद्धेः उक्तंहिअविद्यावृत्तेःसहभ्रमइति वादार्थमुपसंहरन् समन्वयोपयोगमाह तदेवमित्यादिना भेदप्रपंचस्याविद्यापरिणाम
८६ तयाशुक्तिरूप्यादिवदनिर्वचनीयारोपितत्वात् तदधिष्ठानाद्वैततत्त्वसिद्धिःफलमित्यर्थः॥इत्यनिष्टविपरीतबुद्धितत्तुच्छसद्विषय
वादद्भूषणात् व्यक्तमुक्तमिहतत्तद्युक्तिभिः शक्यनिर्वचनतानिवारणं वेदांतवाक्यजन्याद्द्वितीयात्मविज्ञानादित्युक्तंतदसंगतंसि
द्धेऽर्थेवेदस्यप्रामाण्याभावादिति कार्य्यवादीप्रत्यवतिष्ठते ननुकथमिति ननुभवतुलौकिकानांकार्य्येशक्तिग्रहोवैदिकानांतुकिमा
यातमित्यतआह लोकावगतेति निर्णीतंखल्विदंप्रमाणलक्षणे आकृत्यधिकरणेतदर्थचिंतया तथाहि स्वरवर्णलोपागमादिवै

अन्तःकरणवृत्तिलक्षणज्ञानद्वयानंगीकारात् तदेवंलक्षणप्रमाणयोरनिर्वचनीयेरजतादिविभ्रमेसंभवात्
तदद्वैतप्रपंचविभ्रमोपिवेदान्तवाक्यप्रमाणजन्याद्धिष्ठानाद्वितीयात्मविज्ञानाद्विलीयते इतिसिद्धं ननुकथं
वेदान्तवाक्यानांसिद्धार्थबोधकत्वम् सकलपदानांलोकेकार्य्यएवसंगतिग्रहणात् लोकावगतसामर्थ्यः श
ब्दोवेदेपिबोधकइतिन्यायात्॥ ८९

लक्षण्यात् अनध्यायादिधर्मभेदाल्लौकिकवैदिकव्यपदेशाच्चस्पष्टभेदरूपादिशब्दसादृश्यपोऽच्च गोशब्दादेरपिलोकवेदयोर्भेद
सद्भेदादश्ववालादिशब्देष्वर्थान्तरदर्शनात् उतानावेदेवगवावहन्ति तेजोवैघृतमित्यादिषूत्तानवहनादिविपरीतलिंगाच्चार्थभेदइ राम
तिप्राप्यप्रतिविदधेप्रत्यभिज्ञयातावदैक्यंगवादिपदानामवगम्यते नचस्वरवर्णलोपागमादिवैषम्यमात्रात् प्रत्यभिज्ञायमा ८६
नशब्दस्वरूपभेदः तथार्थोपिसएवप्रत्यभिज्ञायमानत्वात् उत्तानवहनादिस्तुस्तुतिर्नगवादिभेदप्रतिपादकं तस्माद्भेदकाभा
वादभेदावगमाच्च शब्दार्थयोरैक्यमेवलोकवेदयोरिति लोकवेदाधिकरणेस्थितम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वात्मदीयस्वतंत्रप्रवृत्ति+३॥

नन्वस्तु लोकगृहीतसंगति शब्दानां वेदेपि बोधकत्वं कथमेतावता क्षिप्तार्थबोधकत्वाभावस्तत्राह लोकेचेति अयमर्थः गामानये-त्युत्तमवृद्धवचनश्रवणसमनंतरं मध्यमवृद्धस्य गवानयनं दृष्ट्वा सुप्तिसुरित्थमाकलयति बालः ज्ञानपूर्विकेयमस्य प्रवृत्तिः स्वतंत्रप्रवृत्तित्वादिति तथैव स्वात्मदृष्टांतेन प्रवर्त्तकप्रत्यये शब्दपूर्वकत्वं चानुमाय तस्मिन्शब्दानंतरभाविनि शब्दस्य शक्तिं गृह्णाति तदनु च प्रयोगांतरेषु गां बधानाश्वमानयेत्यादिष्वानयनगोशब्दयोरुद्वापेन तदर्थयोरप्युद्वापात् प्रक्षेपे च प्रक्षेपदर्शनात् अन्वयव्यतिरेकाभ्यां गवादिविशेषेषु पदविशेषस्य सामर्थ्यं गृह्णाति सर्वत्र च कार्यान्वयाव्यभिचारात्तदन्वितपदार्थेषु सामर्थ्यं गृह्णाति न

लोके च प्रवर्त्तकवचनश्रवणसमनंतरं श्रोतुः प्रवृत्तिमुपलभ्य प्रवृत्तिलिंगेन प्रवर्त्तकप्रत्यये पदसमुदायस्य सामान्यतः सामर्थ्यमधिगम्य पुनरावापोद्वापाभ्यां च प्रत्येकं कार्यान्विते पदानां संगतिग्रहणात् आनयनादिलक्षणकार्य्यविशेषे व्यभिचारेपि कार्य्यमात्रस्य सर्वत्राव्यभिचारात्तदन्वितस्वार्थेषु पदानां सामर्थ्याधिगमात् न चांतरेणापि व्यवहारं पुत्रस्ते जात इत्यादिवाक्यश्रवणसमनंतरं श्रोतुर्मुख॥ ६ ॥ ६ ॥

पुनः पदार्थमात्रे नाप्यन्यमात्रान्वितेषु प्रथमावगताव्यभिचारिकार्य्यान्वयपरित्यागे प्रमाणाभावादिति ननु कथं कार्य्यान्विते सामर्थ्यग्रहः यावता पश्यानय बधानेत्यादावन्यदन्यत्कार्य्यं प्रतीयते ऽतो व्यभिचाराद्गवादिवदेव शब्दविशेषाभिधेयत्वमेव न सर्वशब्दसामर्थ्यप्रतियोगित्वमिति तत्राह आनयनादिलक्षणेति प्रकृत्यभिधेयबंधनादिव्यभिचारेपि प्रत्ययाभिधेयानुगतकार्य्यमात्रं न व्यभिचरतीत्यर्थः ननु यत्र प्रवृत्तिलिंगमवलंब्य संगतिग्रहः तत्रैवं भवतु यत्र तु मुखविकासादिलिंगाद्धर्षहेतुसिद्धार्थमनुमाय शब्दस्य संगतिग्रहः यथा पुत्रस्ते जात इत्यादिषु तत्रावश्यकार्य्यमंतरेणैव सिद्धार्थे शब्दशक्तिराश्रयणीयेति तत्राह न चांतरेणापीति॥

१
वि·सु· नच वाच्यमित्युक्तं तत्र हेतुमाह परिशेषेणेति अयमभिसंधिर्नेतावत्प्रवर्त्तकवाक्ये क्वचित्सिद्धार्थे वा कार्येषु प्रवर्त्तकविशेषानुमा
टी·न· पकानयनादिप्रवृत्तिवदस्ति हर्षहेतुविशेषानुमापकं प्रत्यक्षलिंगं मुखविकासादि तद्धर्षहेतुमात्रमनुमापयति न तद्विशेषस्तु
८७ परिशेषात्प्रार्थनीयः नचैवं संभवति पुत्रजन्मवदेव सुखप्रसवादेरनेकस्योपलभ्यमानत्वात् विनिगमनाभावादतः पुत्रशब्द
स्य संगतिग्रहो दूरोत्सारित इति यथाहुः नायाः प्रमाणपारायणे नच परिशेषेण तत्प्रतिपादकताध्यवसानं भूतभविष्यद्वर्त्त
मानानामसन्निहितव्यवहितानां संभवात् पारिशेष्यावधारणाया अत्यंतदुष्करत्वादिति स्यादेतत् अस्ति प्रभिन्नकमलोदरेम

विकासादिना लिंगेन हर्षमनुमाय तद्धेतुप्रत्यये वाक्यस्य सामर्थ्यसामान्यतोऽधिगम्यावापोद्वाराभ्यां पुनः
पुत्रादिपदानां तत्तयाद्यर्थविशेषेषु संगतिग्रहो दृश्यते इति वाच्यं परिशेषावधारणानुपपत्तेः प्रियासुखप्रस
वादेरपि हर्षहेतोः संभवात् यत्र च प्रभिन्नकमलोदरे मधूनि मधुकरः पिबतीति प्रसिद्धपदसमभिव्याहारा
त्प्रसिद्धेतरपदार्थोऽप्रसिद्धमधुकरपदार्थः समधिगतविभक्त्यर्थश्चायं मधुपानेकर्त्तारं पश्यति तं मधुकरशब्द
वाच्यत्वेन प्रत्येति तत्रापि न कार्यपरताव्याकोपस्तादृश्या अपि व्युत्पत्तेर्व्यवहारनिबंधनप्रथमकार्यव्युत्पत्तिनि ८७
बंधनतया तदानुगुण्येन व्यवस्था

धूनि मधुकरः पिबतीत्यादिवाक्यं श्रृण्वतः पुरुषस्य मधुकरप्रातिपदिकार्थमात्रम
जानतः समयांतरे सरसीरुहोदरविपरिवर्त्ति मधुकरमधुपानमवलोकयतः प्रसिद्धपदसमभिव्याहारबलान्मधुकरशब्दस्य म राम·
धुकरशब्दार्थे सिद्धे संगतिग्रह इति तत्राह यत्र चेति किमिति न कार्यपरताव्याकोप इति तत्राह तादृश्या अपीति सोपि हीतरपदानां ८७
संगतिगृहीत्वा तत्समभिव्याहारादस्य संगतिं गृह्णाति इतरपदानां च व्यवहारबलात्प्रवर्त्तककार्यान्विते प्रथममेव संगतिर्गृहीतव्या
न हि तत्रापि प्रसिद्धपदार्थसमभिव्याहारः शक्यपरिग्रहः अनवस्थादोषप्रसंगात् तथा चोपजीव्यैकप्रयोजकानुगुण्येनात्राप्य
व्याहृतकार्यान्विते शक्तिग्राह्येत्यर्थः ॥

CC-0. In Public Domain. Digitization by eGangotri

कथं न ह्यगृहीतसंगतिकानां सिद्धार्थे प्रयोगः पुत्रस्ते जात इत्यादिपदानां तत्राह पुत्र इति नन्वभिधेयाविनाभूते प्रवृत्तिर्लक्षणोच्यते इति लक्षणा लक्षणात् अभिधेयकार्यान्वयसंबंधः सिद्धार्थान्वयस्य लिलक्षयिषितस्य वक्तव्यस्तत्राह परस्परान्वयस्येति कार्यान्वयस्य परस्परान्वयविशेषत्वादित्यर्थः उक्तं च नाथेन कार्यान्वयो हि परस्परान्वयाव्यभिचारीति विवक्षितत्वात् कार्यान्वयवत् परस्परपदार्थान्वयविवक्षया पि लक्षणया लोकः शब्दं प्रयुंक्त इति अर्थलक्षणया परिहृत्य वाक्यैकदेशलक्षणया च परिहरति पुत्रस्ते जात इति यथा हि द्वारं विध्रियतामिति प्रयोक्तव्ये द्वारमिति वाक्यैकदेशं प्रयुंक्ते न चैतावता विध्रियतामिति नाध्याहरंतीति व्यवहर्तारः न हि तत्पश्येति वक्तव्ये का

पुत्रस्ते जात इत्यादेस्त्वसिद्धार्थप्रयोगस्य लाक्षणिकत्वेनाप्युपपत्तेः परस्परान्वयस्य कार्यान्वयाव्यभिचारात् पुत्रस्ते जातस्तं पश्येति वक्तव्ये पि कार्ये विध्रियतामिति पदावधीरणेन द्वारमिति प्रयोगवत् प्रयोगोपपत्तेः ननु न कार्यान्वितेपदानां सामर्थ्यमध्यवसातुं शक्यं कार्यस्य कार्यान्तराभावेन कार्यपदस्य कार्यान्वितस्वार्थाभिधायित्वानुपपत्तेः योग्येतरान्विताभिधाने च प्रयोजकद्वैविध्यापातादिति चेन्न कार्यान्वयान्वयिनि कार्यपरपदार्थान्विते वा पदशक्तिग्रहणाभ्युपगमे प्रयोजकद्वैविध्याप्रसक्तेः॥ ॥ यद्येतद्व्यतिरेकेण पुत्रस्ते जात इत्येवं प्रयुंक्ते ऽध्याहारात्तद्वाक्यं पूर्णमित्यर्थः। उक्तप्रयोजकस्य कार्यपदे व्यभिचारं शंकते नन्विति ननु तस्य योग्येतरान्विताभिधायित्वं भवत्वित्यत आह योग्येतरेति अनुगतं प्रयोजकं दर्शयन् परिहरति न कार्येति कार्यान्वयः कार्यस्वरूपोन्वयः तदन्वयि तदाधारः स च कार्यमितरत्र भवति संबंधस्य द्व्याधारत्वात् तत्र सामर्थ्यं सर्वपदानामस्ति च कार्यपदस्येत्यर्थः नयविवेककारोक्तं प्रयोजकमाह कार्येपरेति कार्यपरं यत्पदं तस्यार्थः तेनान्विते सामर्थ्यमिति तथा च न प्रयोजकभेदः कार्यपदस्यापि कार्यपरगवादिपदार्थान्वितकार्यशक्तित्वादितरेषामपि कार्यपरलिङादिपदाभिधेयकार्यान्वितगवादिनिष्ठशक्तित्वादित्यर्थः॥ अत्र रत्नदीपावलीकृतः

CC-0. In Public Domain. Digitization by eGangotri

१
वि.सु.
टी.न.
८८

प्रथमं प्रयोजनकं दूषयांबभूव स्तदनुवदति यत्त्वित्यादिना संबंधद्वयप्रसंगादिति कार्य्यान्वयेप्यत्रैकः संबंधस्तदन्वयीप्यत्रापरइ
त्यर्थः किंच कार्य्यान्वयेप्यत्र कार्य्यस्य विशेषणत्वमन्वयस्य च विशेष्यत्वं अन्वयीत्यत्र चान्वयस्य विशेषणत्वं कार्य्यस्य च विशे
ष्यत्वमिति युगपदेव विशेषणत्व विशेष्यत्वे प्रत्येकमनयोरन्योन्यापेक्षयास्यातामित्याह युगपच्चेति उभयमप्यस्तु को दोष इत्य
त आह न चेति शक्यगोचरत्वप्रसंगादिति विशेषणस्यैव क्रियान्वयित्वनियमात्कार्य्यस्य च विशेषणत्वाभावात् अन्वयवत एव
व शक्तिगोचरत्वं न तु कार्य्यस्येत्यर्थः तदेतत्परिहरति तदसदिति नात्र कार्य्यस्यान्वयं प्रति विशेषणत्वोपलक्षणत्वे विवक्षिते

यत्तु कैश्चिदुच्यते कार्य्यान्वयान्वयिनि इत्यत्र किं कार्य्यं विशेषणमन्वयस्य किं वोपलक्षणं नाद्यः अन्वयस्य
कार्य्यविशिष्टस्य कार्य्यान्वये सति कार्य्यस्य संबंधद्वयप्रसंगात् युगपच्च कार्य्यान्वययोर्विशेषणताविशेष्य
तानापत्तेन न चैतत्सर्वमुपपन्नं अलौकिकत्वात् नापि द्वितीयः कार्य्यस्य शब्दशक्यगोचरत्वप्रसंगादिति
तदसत् कार्य्यान्वयान्वयिनीति कार्य्यस्य संबंधव्यावर्त्तकमात्रतया विवक्षितत्वात् तत्र यथा गवादिपदार्था
नामेकार्य्यरूपाणां तत्संबंधनिरूपकत्वात्तथैव कार्य्यस्यापि संबंधस्योभयनिष्ठत्वात् इतरथा योग्येतरान्वय ८८
पक्षेप्यन्वययोग्येनेतरेणान्वयस्य विवक्षितत्वात् ॥ ९९, ऽपि तूभयानुगतव्यावर्त्तकत्वमात्रं विवक्षितं न चैतदसिद्धमि

त्याह तत्र यथेति कार्य्येतरेति तत्संबंधस्योभयनिष्ठत्वादितरवदेव कार्य्यमपि निरूपकमित्यर्थः एतदेव प्रतिबंद्या साधयति इत राम.
रथेति योग्येतर इत्यत्रान्वयं प्रतीति वक्तव्यं यत्किंचिद्योगतायाः अन्वयानुपपादकत्वात् तथा चान्वययोग्येनेतरेणान्वित इत्यत्रा ८८
प्यन्वययोग्यान्वययोरुक्तदूषणानतिवृत्तिः अन्वयविशेषितयोग्यविशेषितत्वात् अन्वयस्योपलक्षणत्वे त्वभिहितान्वयवाद
त्वापात इत्यर्थः एतेन व्यावर्त्तकत्वप्रयुक्तदोषोपि परिहृत इत्यभिप्रायः ॥ ॐ ॥ ॐ ॥ ॐ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विशेषविवक्षायामप्युपलक्षणपक्षेन दोष इत्याह उपलक्षणपक्षेपीति कार्य्योपलक्षितोन्वय इति कोर्थः कार्य्यविशेषितोपलक्षितत्व विशेषितोऽन्वय इति तेन चोपलक्षितत्वमप्युपलक्षणमेवानवस्थानात् ततश्च परंपरया कार्य्यस्यान्वयशरीरविनिवेशितया स्वरूपश क्तिगोचरत्वमित्यर्थः यद्विशेषोपलक्षणत्वापराधादेवान्यतमननुप्रवेश इत्याशयः तद्दूतित्यत्वलक्षणमपि न सिद्धेत् तत्र हि स्वप्रत्यु त्युपलक्षितसत्तायोगित्वमनित्यत्वमिति लक्षणे प्रत्युते विनाशस्योपलक्षणतया सत्तान्वयात् केवलसत्तायोगित्वमनित्यत्वमिति ।

अन्वयस्य विशेषणोपलक्षणपक्षयोरुक्तदोषानुषंगमुत्स्यायास्थात् उपलक्षणपक्षेपि कार्य्यस्य शक्यशक्तिविषयत्वेन आह त्यते कार्य्योपलक्षितत्वस्यान्वयविशेषणतया कार्य्यस्यापि परंपरया शक्यशक्तिमत्तियोगित्वोपपत्तेः एवमनभ्युपग च्छतः स्वप्रत्युत्युपलक्षितसत्तायोगित्वमनित्यत्वमित्येवमादिलक्षणमपि न निर्वहति प्रत्युतेः कार्य्यान्वयेसत्तायोगित्व मात्रस्यैव लक्षणत्वादात्मादेरप्यनित्यत्वापत्तेः स्वयमेव चानुभूतिरनुभूतित्वव्यवहारहेतुः प्रकाश इति प्रतिज्ञायमोक्षदशा यांव्यवहारहेतुत्वाभावात् लक्षणस्याव्याप्तिमाशंक्य व्यवहारहेतुत्वमुपलक्षणमित्यंगीकृत्योपलक्षितत्वमपि कल्पि तार्थ्यं यथा विनाशोपलक्षितसत्तायोगित्वमनित्यत्वमिति स्वकीयग्रन्थे निबद्धत्वात् एतेन विवादपदानि पदानि तत् कार्य्यान्वयान्वयितिशक्तिमंति पदत्वात् कार्य्यपदवदित्यनुमानमपास्तं विशेषणोपलक्षणपक्षयोरुक्तदूषणो द्धरणात् कार्य्यपदस्यापि कार्य्यान्वयान्वयितिशक्तिमत्त्वेन दृष्टांतस्य साध्यविकलत्वात्॥ ॥ स्यात् तथा चात्मादेरनित्यत्व

मित्यतिव्याप्तिस्तदेतदाह एवमनभ्युपगच्छतइति कार्य्यलक्षणं दूषप्रसंगतां परिहरति स्वयमेवेति सिद्धेत्युत्पत्तिदूषणेन कार्य्यव्यु त्पत्तिसमर्थनेन च तर्कबाध विपक्षबाधकतर्काभावाभ्यामनुमानमपि दूषितमित्याह एतेनेति यज्ञेनेत्यादौ लिङादिव्यवच्छेदा य विवादपदग्रहणं इतरथा दृष्टान्तासिद्धेः दृष्टान्तस्य साध्यवैकल्यं तावाह कार्य्यपदस्यापीति विशेषणोपलक्षणेत्येतदादिर्वा यं ग्रंथः

१
चि.सु. स्वपक्षेऽनुमानन्दूषयन्बाधमप्याह विवादपदानीति कार्य्यभावार्थपदयोः सिद्धसाधनतानिवृत्त्यै विवादपदग्रहणं ननु विज्ञानमानंदं
टी.न. ब्रह्मेत्यादीनिपदानि सिद्धब्रह्मस्वरूपपर्य्यवसन्नानि विध्यश्रवणात् विधिसन्निधिश्रवणाभावाच्च द्रष्टव्यइत्यादेश्चविधित्वं नसंभवति
८९ उपयुक्तमुपयोक्ष्यमाणं वा संस्काराहं यथाहुः भूतभाव्युपयोगं हि द्रव्यं संस्कारमर्हतीति नचात्र प्रोक्षितव्रीहीणामिव विज्ञानसंस्कृतस्या
त्मनः क्वचित्क्वचनो विनियोक्ष्यमाणत्वं शुद्धबुद्धब्रह्मात्मतत्त्वज्ञानस्य समस्तप्रवृत्तिविरोधित्वात् नापि कुम्भविषाणादिवद्विनियुक्तत्वे
येन चात्मानुभासनेनैव ज्ञानेनात्मा संस्क्रियते नापि सुवर्णविभूषादितिवदात्मनाप्यस्यदितिविनियोगभंगः दर्शनस्य प्रमाणपराधी
नतयाः विधेयत्वात् साक्षात्कारस्य फलतया विधानानर्हत्वात् विधिपरत्वे च ब्रह्मासिद्धेरतिस्पष्टोव्यभिचार इतितत्राह नचावि
विवादपदानि पदानि कार्य्यपराणि पदत्वात्कार्य्यपदवदिति प्रयोगसंभवाच्च नच विज्ञानमानंदं ब्रह्मेत्यादिपदेषु व्य
भिचारः तेषामपि द्रष्टव्यइत्यादिविधिशेषतया कार्य्यपरत्वात् नदेवं सकलपदानां कार्य्यपरत्वात् न सिद्धे ब्रह्मणि वेदा
न्तवाक्यानां प्रामाण्यमिति अत्रोच्यते नतावत्सिद्धे प्राथमिक व्युत्पत्त्यसंभवः प्रागुक्तीन न्यायेन पुत्रस्ते जात इत्यादिवाक्यादपि
व्युत्पत्तिसंभवात् नचतत्र पारिशेष्यावधारणानुपपत्तिः यतः दृष्टचैत्रसुतोत्पत्ते स्तत्पदाकितवाससा चातोहारेण यात
ज्ञानमिति अयमभिसंधिः यद्यपि मयाप्यत्र संस्कारपक्षोऽनुपपन्नस्तथापि सुवर्णभरणसंकुशो मा (स्वपरिशेषविनिश्चितेः २५
दिवद्विनियोगभंगेन किंचिदस्ति बाधकं नच दर्शनाविधेयत्वं बाधकं ध्यानत्वात्तस्य विधेयत्वमायुष्मतापि अनुमन्यते यथाह स्मृतिः निदिध्या
सितव्य इति नच ब्रह्मासिद्धिः पूपादिवत् सिद्धेरपि संभवात् ततस्तद्विधिविषयापेक्षितमात्मानं सत्यज्ञानादिरूपं समर्थयन्ति संत्यसू
निपदानि नकार्य्यपरतामतिवर्तन्ते । सर्ववेदान्तप्रत्ययतया चाश्रूयमाणस्यलेशपि समर्थयन्नेव विधिमिति उपसंहरति तदेवमिति
प्राथमिक व्युत्पत्तो सिद्धे सिद्धायां प्रसिद्धार्थपदसमभिव्याहारात् व्युत्पत्तिः स्वत एव सिध्यतीति तां समर्थयते नतावदित्यादिना प
रिशेषोपपत्तिं श्लोकेनोपनिबध्नाति दृष्टेत्यादिना दृष्टाचैत्रसुतोत्पत्तिर्येन नस्य दृष्टचैत्रसुतोत्पत्तेस्तत्पदेन तस्य पुत्रस्य पदेनांकि
राम. ८९

सोतत्पदांकितवासास्तेनतत्पदांकितवाससावार्त्तोहारेण सह यातस्याविदितार्थभाषस्यचपुंसःपरिशेषविनिश्चितेःसंभवादित्यर्थःअत्रचविज्ञातपुत्रजन्मविहायाविज्ञातहर्षहेतुकल्पनमयुक्तमितिदर्शयितुंदृष्टेत्यादिविशेषणंविज्ञानादपिप्रियासुखप्रसवाद्विशेषदर्शनार्थंतत्पदांकितेति अस्यैवश्लोकस्यार्थंविवृणोति योहीत्यादिना यत्तुतत्पदांकितवाससेति विशेषणस्यप्रयोजनमुक्तंतद्दूशयतिशंकानिरासपूर्वकंतच्चप्रियेति तत्र किंपुत्रजन्मैव तत्सूचकं किंवान्यत् आद्येसंभावनामात्रात्त च्छंका आद्येप्रथमप्रतीतपुत्रजन्मपरित्यागेकारणाभावात् तत्रैवसंगतिग्रहोयुक्तः द्वितीयंनिषेधति पुत्रपदांकितेति तृतीयंनिषेधति नचविद्यमानतेति विशेषनिर्णयकारणाभा

योहिपरिदृष्टचैत्रप्रहर्षहेतुपुत्रजन्मा पुत्रपदालिप्तकुंकुमांकितपटप्रदर्शकेनवार्त्ताहारेणसह चैत्रसकाशंगतः तस्यदिष्ट्यावर्द्धसे चैत्रपुत्रस्तेजातइतिवार्त्ताहारव्याहारश्रवणसमनंतरंसमुन्मीलत्पुलकसकलकलेवरमुत्फुल्लगंडयुगलमुल्लसितनयनयुगलंचैत्रमवलोकयतस्तत्प्रमोदलिंगेन सएवनूनमनेनमदवलोकितःसुतसंभवःप्रमोदहेतुरेतस्माद्वाक्यादधिगतइतिपरिशेषावधारणोपपत्तेः नचप्रियासुखप्रसवस्यापिसंभवात्पविशेषावधारणानुपपत्तिःपुत्रपदांकितपटप्रदर्शनवत्प्रियासुखप्रसवसूचकाभावात् नचविद्यमानतामात्रेणतत्रापिशंकावकाशः कार्येव्युत्पत्त्युच्छत्रदंडाद्याहरणलक्षणान्तवकार्येदर्शनेनशंकाप्रसरस्यदुर्निवारत्वात् एवमुक्तरीत्यासिद्धेपिप्राथमिकव्युत्पत्तेः संभवात्प्रभिन्नकमलोदरेमधूनिमधुकरःपिबतीत्यादिप्रसिद्धपदसमभिव्याहारेपि संभावनामात्रेण चेद्विपरीतशंकोदयस्तर्हि गवानयनवद्देवदत्त्वा ॥ व्याहारनिबंधनव्युत्पन्नावपिसिद्धार्थपरतानव्याद्यानयनमपितेनक्रियतइति तेषामपिशब्दार्थनाशंकयाअनिर्णयःस्यादित्यर्थः एतेनतदपिनिरस्तं यदाह भवनाथः नचस्वाधिगततत्प्रियेतद्वीरिति स्फुटत्वादवधृतिस्तत्रैवानेकस्यसंभवादिति एवंसिद्धेप्राथमिकव्युत्पत्तिसमर्थनेनतत्पूर्वकप्रसिद्धार्थसमभिव्याहारनिबंधनव्युत्पत्तिरपिसमर्थितेत्याह एवमुक्तरीत्येति॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri



यत्तु सिद्धार्थेपरपदप्रयोगो लाक्षणिक इत्युक्तं तत्राह मुख्यार्थेति ननु प्रथमं प्रयोक्तुः व्युत्पत्तिकाले पुत्रादिपदानामावापोद्वारेण का-र्यान्वितस्वार्थे संगतिग्रहः पुत्रं पश्येत्यादि कार्य्यवाक्येषु कृतस्तदनुरोधात्तु प्रयोगसमयेपि सिद्धार्थे प्रयोगो लाक्षणिक इति तत्राह न च प्रथमेति इत्यादिप्रयोगेष्विति सिद्धार्थप्रयोगेष्वित्यर्थः किंच प्रथमप्रयोगेयतरविशेषकार्यान्विते व्युत्पन्नस्यान्यत्र योग्येतरमात्रान्विते प्रयोगो लाक्षणिक इति यदि ब्रूषे तर्हि लोके घातव्यात्मककार्ये व्युत्पन्नस्य वेदे तस्य लाक्षणिकतया कार्यत्वानंगीकारात् लिङादेर्लाक्षणिकत्वं प्रसज्येत तथा काम्यनियोगे फलदात् नियोगे व्युत्पन्नस्य नित्येषु लाक्षणिकतापातः तथा नित्यनैमित्तिकविधिषु स्वतंत्र-

मुख्यार्थविषयतया सिद्धेपि प्रयोगायोगे लाक्षणिकत्वकल्पनानुपपत्तेः न च प्रथमावगतकार्यान्वयानुरोधेन
लक्षणाश्रयणम् । प्रथममपि पुत्रस्ते देशांतरादागतः पुत्रस्ते गच्छति पुत्रस्ते सुखी पुत्रस्ते निरामय इत्यादिप्र-
योगेष्वावापोद्वाराभ्यां पुत्रादिपदानां स्वस्वार्थे व्युत्पत्तेरुपपत्तेः प्रथमव्युत्पत्त्यनुसारेण च लक्षणाश्रयणे लो-
के भावार्थकार्ये व्युत्पत्ते वैदे तदसंभवात् यजेतेत्यादिशब्दानामबोधकताप्रसंगः कामाधिकारे च प्रथमं का-
मसाधनेपि नियोगे लिङादिपदानां व्युत्पत्तेः नित्य — नैमित्तिकाधिकारे लाक्षणिको लिङादिप्रयोगः स्यात् ए- ६०
वं नित्यनैमित्तिकयोः स्वतन्त्रकार्यपदशक्त्यधिगतेरंगवाक्ये परार्थकार्ये लिङादिपदप्रयोगो मुख्यो न स्यात् ॥

कार्ये गृहीतसंगतिकस्य तदंगप्रयाजादिषु परतंत्रकार्ये लाक्षणिकतापातः यद्यप्यनुवादाशंकया न स्फुटिति नियोगांतरबोधकत्वमंगवाक्यगतलिङादेरिति प्राभाकरसिद्धांतस्तथाप्यंगनियोगाभिधायित्वमिष्यत एवारादुपकारकांगवाक्येषु इतरथा तदुपकारासंभवात् अनन्यविषयत्वाच्च सन्निपत्योपकारकेषु तदुभयाभावादनुवादकत्वमेवेति तदेतदाह प्रथमव्युत्पत्तीत्यादिना अबोधकत्वेति अपूर्वस्य वाच्यभावार्थसंबंधादृष्टेर्लक्ष्यत्वस्याप्यभावादित्यर्थः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतेषांसंग्रहायानुगतरूपे व्युत्पत्तिरिति दूषेन हि सर्वसंग्रहार्थं योग्येतरान्विते व्युत्पत्तिरित्येव स्वीकुरुस्व सर्वानुगतप्रयोजकला
भात् लाघवाच्चेत्याह अथावधीरितेति अवधीरितः परित्यक्तः भावार्थरूपकामसाधनादिविशेषो येन तत्तथोक्तं एवं सतीत्यस्यैव वि
वरणमन्वितमात्रस्येति द्वितीयप्रयोजकं दूषयति नचेति किं कार्य्यपरं यत्पदं तदर्थेनान्वितइति विवक्षितमुत कार्य्यपरायः पदा
र्थस्तदन्वितइति विवक्षितमिति विकल्प्य आद्यं दूषयति सर्वपदानामिति ननु कार्य्यपरत्वेपि न कार्य्यपर्य्यायता कार्य्यपद
मुख्यवृत्त्या तत्परमितरत् गौण्या अथवा कार्य्यपदमव्यवधानेन तत्परमितरद्व्यवधानेनेत्यवान्तरविशेषादित्याशंक्यपरिह

अथावधीरितभावार्थकामसाधनत्वतंत्रविशेषं कार्य्यमात्रं व्युत्पत्तिगोचरः सर्वत्र तस्याव्यभिचारात् लाघवा
च्चेति मतं तन्नहीहापि योग्येतरान्वितपदशक्तेरव्यभिचाराल्लाघवाच्चेति समः समाधिः। एवं च सति कार्य्यान्वयान्व
यिनि पदशक्तिरित्यपास्तं अन्वितमात्रस्य प्रयोजकत्वे संभवति कार्य्यान्वयान्वयिनीति कल्पनायां गौरवात् न च का
र्य्यपरपदार्थान्वितस्वार्थे शक्तिः विकल्पासहत्वात् तथाहि कार्य्यपरत्वं पदधर्मः किं वा पदार्थधर्मः नाद्यः सर्वपदानां
लिङादिपदवत्कार्य्यपरत्वे पर्य्यायतापत्तेः अथ पर्य्यायतापरिहाराय मुख्यगौणसाक्षात्परम्परादिभेदेन कार्य्यपरतां वि
शिंष्यात् नतर्ह्येकप्रयोजकत्वलाभः मुख्यादिविशेषणानां सर्वपदेष्वेकरूपताभावात् नहि सिंहो देवदत्त इत्यादौ सिं
हादिशब्दानां मुख्यगौणयोस्तत्परत्वमेकरूपं तथा सति देवदत्तादेरपि केसरादिमत्त्वप्रसंगात् नापि द्वितीयः पदा

रति नतर्हीति नहि मुख्यवृत्त्या तत्परत्वमेव जघन्यवृत्त्या तत्परत्वमेवमितरद ॥ र्थानां कार्य्यावबोधकत्वेन तत्परत्वाभावात्॥ ६॥
पीत्यर्थः तदेव निदर्शयति नहीति किमिति तथा न स्यादित्यत आह तथा सतीति मुख्यवृत्त्या तत्परत्वं हि केसरादिमत्त्वमादाय तदेव चेत्त
त्परत्वं गौणेपि स्यात् स्यादेव केसरादिमत्त्वमपीत्यर्थः द्वितीये किं पदार्थानां कार्य्यपरत्वं कार्य्यबोधकतया उत साधकतया नाद्यः प
दार्थानां बोधकत्वाभावात् बोधकत्वे वा धूमादिवत् लिंगतयाऽनुमेयत्वप्रसंगादित्यभिप्रेत्याह पदार्थानामिति॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

१
वि.सु द्वितीयं शंकते अथेति दूषयति न हीति अयमर्थः न कार्य्यस्य कार्य्यशेषत्वं भेदाभावात् न सत्तदन्वितार्थाभिधायितां गवादिपदानां नोक्तरूपत्वा
टी.न. नेति निषेधवाक्येषु साध्याभावं दर्शयन् अनैकांतिकतां स्फोरयति न हि तत्रेति प्राप्ताया हननक्रियायास्तन्निषेधादनिष्टसाधनताववो
९१ धाद्यत्पुरुषस्यौदासीन्यं तद्व्यतिरेकेणेत्यर्थः एतदुक्तं भवति सर्वत्र भावार्थनिष्ठो विधिर्द्ध्यादावपि भावार्थनिष्ठ एव स ताविधेरन्यतः
प्राप्तत्वात्तस्याप्राप्तशक्तिमात्रमुपसंक्रामति यदाग्नेयोऽष्टाकपालो भवतीत्यादावपि द्रव्यदेवतासंबंधानुमितयागविषयत्वमेव तद्वि
भावेन भावार्थः ततस्तद्व्यावृत्तौ तद्व्याप्तविधिरपि व्यावर्तेतेत्यत इदमाह अनुष्ठेयमिति किंच प्रागभावो ह्यत्र नत्राभिधेयः प्रध्वंसे चैवं
र्थ्यक्षणिकत्वात्क्रि —— याया: स्वत एव निवृत्तेः सत्त्वानादित्वेनानुष्ठेयत्वमाह हननेति ननु यथा नेक्षेतोद्यंतमादित्यमित्यत्र नेक्षिष्य इति सं
कल्पविधिपरत्वं व्यवसितं तदुत्सर्गकर्मणोऽप्यधिकरणे तद्वदिहापि पर्युदासवृत्त्या हननविरोध्यहननसंकल्पो विधीयतामथवाऽहन

अथ कार्य्यशेषत्वं कार्य्यपरत्वं पदार्थानां न हि कार्य्यशेषत्वं कार्य्यपदार्थस्य नास्तीति तदन्विताभिधायिकारकप
दानां कार्य्यपरपदार्थान्विताभिधायित्वं नस्यादिति न किंचिदेतत् यत्तु नरनुमानं कार्य्यपराणि पदानि पदत्वात्का
र्य्यपदवदिति तदपि न पिबेन्न हन्यादित्यादिनिषेधवाक्यस्थपदै रनैकांत न हि तत्र प्राप्तक्रियानिवृत्त्यौदासीन्य
व्यतिरेकेण किंचिदनुष्ठेयमवबोध्यते हननप्रागभावस्यानादित्वेनाननुष्ठेयत्वात् न हन्यामिति संकल्पस्य विधायक
प्रयत्नस्य वा विधानाभ्युपगमे तस्याप्रतीयमानतया लक्षणाप्रसंगात् ॥ ९,नोद्यतदेहेन्द्रियादेर्विधायकसामग्रीघटकत्वं

वन प्रयत्नमन्तरेण नाकस्मादौदासीन्यं भवतुमर्हतीति स एवात्र विधीयतामिति तत्राह नेति न तावदत्र संकल्पः श्रौतः किमिति न 59
श्रौतः यावता तदन्यतद्विरोधि तदभावाय यथायथं नञोऽर्थाः स्मर्यंते तद्विरोधी च संकल्प इति चेन्न अभावस्यैव मुख्यार्थत्वात् इतरयो राम.
स्तु तदनुषंगादेव लक्षणादिवृत्त्यंतरेण प्रयोगोपपत्तेः इतरथाऽनेकत्र शक्तिकल्पनाप्रसंगात् एवं प्रयत्नोऽपि न श्रौतः श्रौतसंभवे च ल ९१
क्षणा न युक्ता एतेन नञः प्रकृत्यर्थसंबंधेनाहननं कुर्य्यादिति कल्पनमपि प्रत्युक्तं नेक्षेतेत्यत्र तु तस्य व्रतमित्युपक्रमादनुष्ठेयार्थवि
धिपरतावगमात् लक्षणयापि पर्युदासवृत्तिराश्रितेति वैषम्यादित्यर्थः ॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तत्किमिदानीमकस्मादेवहननोन्मुखानां देहे द्विषाणां ततउपरमइतिनेत्याह प्राप्तेति अयंभावः इष्टसाधनत्वज्ञानात्प्रवृत्तिरनिष्टसाध
नत्वज्ञानाच्चनिवृत्तिरितिस्थितेततरमेवसमर्थयिष्यतेतदिहयद्भ्यादितिप्रकृतिप्रत्ययाभ्यांरागतः प्राप्तहननेइष्टसाधनतामनूद्यतत्वे
ति निषिध्यते ऽनर्थसाधनताचबोध्यते तत्रापिप्रत्ययस्यविरोधात् सहइष्टसाधनताभावंबोधयितुमशक्नुवानः प्रतिषेधस्तदधिग
मायतामनर्थसाधनतामेवावेदयति ततश्चविरलरागस्यानिष्ट साधनताज्ञानादौदासीन्यमितितिनिवृत्तंनिषेधवाक्यमतोनविधिना
तत्किंचित्कृत्यमितियत्तुविज्ञायादिपदेष्वेवविधिनिष्ठतोपपादनेनव्यभिचारवारणं तद्दूषयति नचेति नचवचनीयंस्वर्गकामादि

प्राप्तक्रियायाइष्टसाधनत्वाभाववोधादेवनिवृत्तेर्वाक्यस्यचरितार्थत्वोपपत्तेश्च नचविज्ञानमानंदंब्रह्मेत्यादि
वचसांप्रतिपत्तिशेषत्वंविकल्पासहत्वात् तथाहिकिंशाब्दीप्रतिपत्तिर्विधेयाउतभावनात्मिकाअथसाक्षात्कारल
क्षणानाद्यः तस्याः स्वर्गकामोयजेतेत्यादिशब्दादिवद्विदितपदपदार्थसंगतेः स्वयमेवोत्पत्तेः नद्वितीयः ज्ञानप्र
कर्षहेतुत्वस्यान्वयव्यतिरेकसिद्धत्वेनभावनायाअविधेयत्वात् नतृतीयः साक्षात्कारस्यब्रह्मरूपत्वेननित्यत्वे
नाविधेयत्वात् अंतःकरणपरिणतिरूपत्वेचानंदसाक्षात्कारतयाफलत्वेनविधेयत्वानुपपत्तेः द्रष्टव्यइत्यादिपदा

वाक्येष्वप्यध्ययनविधितएवबोध नमिति यतोऽत्रापिसएवशक्नोतीतिप्रयत्नविध्यपेक्षानव ʻʻ नांचार्द्ध्येनयाप्युपपत्तेः
य काशादित्यध्ययनविधेरक्षर ग्रहणमात्रविश्रांतत्वाच्च अन्वयव्यतिरेकेति गांधर्वशास्त्रादौषड्जादिस्वरग्राममूर्छनासाक्षात्कारइ
त्यर्थः तृतीयेपिसाक्षात्कारः किंब्रह्मस्वभावभूतः किंवांतःकरणपरिणामरूपः नाद्यइत्याह साक्षात्कारस्येति द्वितीयंदूषयतिअंतः
करणेति नहिफलंविधेयंयथाहुः तस्यलिप्सार्थलक्षणेतिभावः तत्किंप्रमतप्रगीतमिदंद्रष्टव्यइत्यादिवाक्यमित्यतआह द्रष्टव्य
इत्यादिपदानामिति अर्हेकृत्यतृचश्चेति कृत्यप्रत्ययानामर्हार्थेविधानात्कृत्याः प्राङ्ण्वुलइतितव्यादीनांकृत्यसंज्ञत्वाच्चेत्यर्थः
एवंचसतिसिद्धेर्थेव्युत्पत्त्यसंभवेनवेदांतानामपि आत्मज्ञानव्युत्पत्तिविधिनैकवाक्यतयाकार्यपरत्वंशालिकनाथोक्तं फलितं यत्त्वेते

न परमानंदादित्वस्यानुभवपराहतत्वात्॥

CC-0. In Public Domain. Digitization by eGangotri

१

न्या·सु· अभिभवकल्पनायाश्चायुक्तेर्निर्विकारत्वस्य च विज्ञानादिविकारवत्तया अयुक्तेर्नोनंदादिपरत्वमित्युक्तं तत्सर्वं चतुर्थपरिच्छेदे एवाचार्येण
टी·न· तुच्छीकरिष्यते ननु युक्तिरियं परैस्तावदभिहितं प्रमाणमभिधीयतामिति शंकते अथापीति तत्रतावत्कार्य्यस्यापि पदशक्तिगोचरतामंगीकृ
९२ त्यानुमानमाह विवादेति श्लोकेन कार्यान्विते सिद्धसाधनतां व्यवच्छेदाय विवादाध्यासितग्रहणं कार्यान्वयरहितद्रव्यमर्थः व्यतिरेकासिद्धि
मेव विवृणोति यत्कार्यमिति ततश्च पक्षेतरत्वमिति भावः केचिदिदमेवानुमानमुद्भाव्य दूषयांबभूवुः तदसत् कार्यान्वयोपाधिहतत्वात्।
गवादिव्यक्त्यानैकान्त्याच्च आकृतिः शब्दार्थ इति हि स्थिताः शब्दार्थविद इत्यादिना तत्रोपाधिः परिहृतः अनैकान्त्यं परिहर्तुमुद्भावयति न

अथापि सिद्धार्थव्युत्पत्तौ किं मानमिति चेदुच्यते विवादाध्यासितः सिद्धः शब्दव्युत्पत्तिगोचरो मेयत्वान्न्यायगम्यत्वात्तथा
भिमतकार्यवत् ॥१६॥ न च कार्य्यत्वमुपाधिः व्यतिरेकासिद्धेः यत्कार्यं न भवति नासौ शब्दव्युत्पत्तिगोचरो यथा संप्रतिपन्नमि
ति व्यतिरेकव्याप्तेः परं प्रतिदर्शयितुमशक्यत्वात् न चाकृतेरेव शब्दार्थत्वाद्व्यक्तेस्तदभावात्तत्रानैकान्तिकमिति चेन्मैव
म् आकृतेः शब्दार्थत्वेपि तस्या एव शब्दार्थत्वमिति नियमानंगीकारात् व्यक्त्याकृतिजातयः पदार्थ इत्यक्षचरणपक्षस्या
तिभिरंगीकारात् आकाशादिपदानां च व्यक्तिवचनतया मीमांसकैरप्यभ्युपगमात् व्यक्तिशब्दस्य च व्यक्तिवाचकत्वात् न
नु तत्रापि व्यक्तित्वोपाधेरेव वाच्यत्वं न व्यक्तेस्तस्यालक्ष्यत्वादिति चेन्मैवं क्वचिच्छब्दान्तरवाच्यस्यैव शब्दान्तरलक्ष्यत्वा

न्याकृतेरिति किं नैयायिकादिसाधारणमिदमनैकान्तिकत्वं किं वा मीमांसकं प्रत्येव नाद्य इत्याह आकृतेरिति आ (( भ्युपगमात्॥ ९ 52
कृतिराकारः सास्नादिमत्त्वं सूत्रे विवक्षितं द्वितीयेपि सकलशब्दानां जातिवाचकत्वे तेषामप्यसिद्धं जातिरहितेष्वपि भावादित्याह आकाशादी
ति ननु तथापि गवादिव्यक्तिष्वनैकान्तिकत्वस्य कः परिहारस्तत्राह व्यक्तिशब्दस्येति व्यक्तिशब्देनापि न व्यक्तिरभिधीयते किंतु सर्वव्यक्तिष्व याम·
नुस्यूतव्यक्तित्वोपाधिरेवेति शंकित्वा परिहरति मैवं क्वचिदिति अस्ति मीमांसकानामभ्युपगमः शब्दान्तरवाच्यमेव शब्दान्तरलक्ष्यमि ९२
ति तथा च व्यक्तेरपि यत्किंचिच्छब्दवाच्यत्वं मन्तव्यं इतरथा लक्षणानुपपत्तेरित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्विसंनियममनभ्युपगच्छन्न्ः किमुत्तरं देयमिति तत्राह व्यक्तिरिति व्यक्तिः शब्दवाच्या न भवतीत्यत्र यस्याव्यक्तेः शब्दवाच्यत्वं
निषिध्यते सा तावद्व्यक्तिशब्देनाभिधेया इतरथा कस्यायं निषेधः स्यात् तत्स्वपरस्परव्याघात इत्यर्थः न च तत्रापि व्यक्तिशब्दलक्षित।
स्य शब्दवाच्यत्वनिषेध इति वाच्यं यतः किं नाम तल्लक्षितमिति पर्यनुयोगे लक्षणापरंपराश्रयणमंतरेण निरुत्तरतापाता दिति यत्ता
दवोचाम कार्यस्य शक्तिगोचरत्वमंगीकृत्येति तदुद्घाटयति अंगीकृत्येतदिति तत्र कार्ये संगतिग्रहणपरिपाटीं दर्शयति पूर्ववादी
नन्विति प्रवृत्तिदर्शनादिति स्वतंत्रस्य प्रवृत्तिदर्शनादितियावत् इतरथा बलवदनिलसलिलौघेनानुह्यमान प्रकृतौ वनैकांतिक

व्यक्तिः शब्दवाच्या न भवतीति स्ववचनव्याघाताच्च तस्मात्सिद्धं सिद्धे ब्रह्मणि वेदान्तानां प्रामाण्यमिति अंगीकृ
त्येतदवोचाम कार्ये प्रामाण्यमेव शब्दस्यानुपपन्नं तत्र संगतिग्रहणायोगात् ननु कथं तत्र संगतिग्रहणायोगः प्रवृत्तिद
र्शनात् प्रवर्तकज्ञानमनुमाय तस्य च प्रवर्तकज्ञानत्वादेवात्मीयप्रवर्तकज्ञानवत्कार्यविषयकतामध्यवसाय तत्र शब्दा
न्वयव्यतिरेकानुविधायितया तस्य शब्दजन्यत्वावगमेन तत्रैव शब्दशक्तेर्ग्रहणात् न च स्वात्मनि प्रवर्तकबोधस्ये
ष्टसाधनविषयत्वात्परप्रवृत्तावपि तदेव प्रवर्तकतयानुमीयते न कार्यमिति वाच्यं अतीतानागतविषयेष्विष्टसा
धनज्ञानेषु प्रवर्तकत्वव्यभिचारात् अथ कृतिसाध्येष्टसाधनज्ञानं प्रवर्तकं तर्हि कार्यमेव नामांतरेण प्रवर्तकं त्व
याप्यंगीकृतं तस्यैव कृतिसाध्यत्वात् कृतिसाध्यं प्रधानं यत्तत्कार्यमभिधीयते इत्यभिधानात्

((तस्यादिति नन्विष्टसाधन
ज्ञानादेवात्मनि प्रवृत्तिर्दृष्टा न कार्यज्ञानादतस्तदेव परत्राप्यनुमीयते ऽतो विरुद्धो हेतुः साध्यविकलश्च दृष्टांत इतीमांशंकां निषेधति न चे
ति तदेवेति ज्ञायमानतया विवक्षितं तेन न पूर्वापरव्याघातः तत्र किमिष्टसाधनताज्ञानं प्रवर्तकं किं वा कृतियोग्यताविशेषणविशिष्टं त।
ज्ज्ञानं आद्यमाह अतीतानागतेति द्वितीयं शंकते अथेति कृतिः पुरुषप्रयत्नस्तेन साध्यं यदिष्टसाधनं तज्ज्ञानमिति योजना तर्हीति प्रतिपत्ति
कार्यस्य चैवं रूपत्वादित्याह तर्हीति यद्यपि भावार्थस्य कृतिसाध्यत्वमस्ति तथापि कार्योपाधित्वान्न प्राधान्येन तदस्तीति भावः एतदेव शा
लिकनाथवचनेन द्रढयति कृतिसाध्यमिति कृतिसाध्यं कार्यमित्युक्ते भावार्थेतिप्रसक्तिस्तदर्थं प्रधानमित्युक्तं प्राधान्यं चेदं कृत्युद्देश्यत्व

CC-0. In Public Domain. Digitization by eGangotri

१

वि·सु· तावतिचोक्ते फलेपि स्यात्तदर्थं कृतिसाध्यमित्युक्तं तत्र कृतिसाध्यत्वं कृत्यन्वयव्यतिरेकरूपानुमानगम्यं कृतिप्राधान्यं च मानसप्रत्यक्ष
टी·न· मितिप्रत्यक्षानुमानगम्यं वा लिनस्वात्मनिकार्य्यं यथौदनः पाकश्चेत्यर्थः भवतु कार्य्यस्याप्येवंविधत्वं तथापि न कार्य्यताज्ञानात्प्रवृ
९३ त्तिरितिशंकते तथापीति नेष्टसाधनताज्ञानं प्रवृत्तेर्हेतुरपितु कार्य्यताज्ञानमेव तज्ज्ञानाच्च प्रवृत्तिरित्याह मैवमिति अत्रापि वा कार्य्यमाह
कागतं तद्वचनमेव प्रमाणमित्याह उक्तंहीति अयमर्थः हितसाधनताकार्य्यतयोः पूर्वंभेद उक्तः अनंतरं हितसाधन एव किमिति कार्य्य
तामतिनोऽन्यत्रेतिशंकापरिहरंत आहुः शालिकनाथाः किंचिति सत्यमस्त्वयं नियमः किंत्वयं तत्र विशेषः यत्कर्म कार्य्यतां व्रजेत् तत्स्वयं
क्लेशरूपमेव कथं तर्हि तस्य कार्य्यत्वं न हि दुःखाकारस्य कार्य्यत्वमुपपद्यते यथाहुः अकर्त्तव्यो दुःखफल इत्यत आह फलसाधनतानते

तथापि कृतिसाध्येष्टसाधनज्ञानमेव प्रवर्त्तकं न केवलं कार्य्यज्ञानमिति चेन्नैवम् इष्टसाधनतावबोधस्य
कार्य्यावबोधं प्रतिहेतुतया ऽन्यथासिद्धेः उक्तं हि किंतु स्वयं क्लेशरूपं कर्म यत्कार्य्यतां व्रजेत् फलसाधनता
तत्र कारणं तेन कार्य्यतेति ननु चिकीर्षैवेयमस्मैदं कार्य्यमिति ननु तदतिरिक्तं कार्य्यं नामात्र किंचित्प्रतीयते
इतिचेत् मैवं अन्तरेणापि कार्य्यधियं समीहितसाधनतामात्रावबोधात् सुधामरीचिमंडलोदयादौ चिकीर्षोदया 53

ति तस्यैव विवरणं तेन कार्य्यतेति अथवा फलसाधनता तत्र कथं कारणं यावता प्रवृत्तिं प्रत्येव कारणं तद्धि ((अप्यनुपपत्तेः ॥१ं
केचित्तत्राह तेनेति तेन कार्य्यतासंभवति तत्प्रवृत्तिरिति अतएव तैरुक्तमिति ज्ञापककोटिनिविष्टा फलसाधनताकार्य्यतामनुरु राम·
ध्यते तत्वसौ तदात्मैवेति ननु कार्य्यसिद्धिरेव कुतः प्रमाणात् तत्तावत्ममेदं कार्य्यमिति बुद्धिः प्रमाणं तस्याश्चिकीर्षामात्र तयार्थासाध ९३
कत्वादितिशंकते तन्विति कोस्याभिसंधिः किं कार्य्यमेव नास्तीति उत तत्रेयं प्रमाणं न भवतीति नाद्यः तदनंगीकारे चिकीर्षायाएवानु
त्पत्तिप्रसंगात् न चेष्टसाधनतामात्रावबोधात्तदुपपत्तिः सुरतारंभपरिश्रांतसुंदरीसमीहितसाधनेपि सुधामरीचिमंडलोदयेमत्ता
यमारूढतरंगसंगमे वा असाध्यस्वभावे चिकीर्षाभावादित्याह मैवमंतरेणेति द्वितीये त्वनन्यगतिकत्वादेषैव भविष्यति प्रमाणमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवत्वियमिच्छातिरेकिणी तथापि कृतियोग्यतामेवालंबते न तदतिरिक्तं किंचित्कार्य्यमस्तीत्यत्राह नचास्या इति साधयितुं योग्यत्वमस्ति दुःखादेरपि न कार्य्यबुद्धिविषयत्वमिति तदतिरिक्तमेवास्या विषय इत्याह कृतियोग्ययोरिति अस्तु तर्हीष्टसाधनत्वमेवास्या विषय इति तत्राह नापीति तत्र हेतुः अतीतेति ननु यद्यपि साधने पि दर्शनात्फलमात्रमस्यालंबनं न भवति नाप्युभयमेकैकव्यभिचारात् तथाप्युभयानुगतमिच्छागोचरत्वमात्रमस्यालंबनमित्याशंक्य पूर्वोक्तव्यभिचारमेवाह अभिलाषेति परिशेषादतिरिक्तमेवालंबनमित्युपसंहरति तस्मादिति ननु भवत्वतिरिक्तं तथापि कथं कार्य्यत्वमिति तत्राह स एवेति तथापि कथमस्य शब्दार्थत्वमिति तत्रा

न चास्याः कार्य्यधियः कृतियोग्यतामात्रमालंबनं कृतियोग्ययोरपि दुःखतत्साधनयोस्तदर्शनात् नापि समीहितसाधनं अतीतवर्त्तमानयोः समीहितसाधनयोस्तदभावात् नापि फलमेव तत्साधने पि दर्शनात् नापि फलतत्साधनयोरनुस्यूतमभिलाषगोचरतामात्रमस्या आलंबनं अभिलाषमात्रगोचरे पि सुधामरीचिमंडलादौ तदभावस्य दर्शितत्वात् तस्मादेभ्योतिरिक्त एव कश्चिदाकारः कार्य्यधीगम्यः स एव चाकारः कृतिसाध्यः कृत्युद्देश्यः कार्य्यमित्युच्यते स एव प्रवर्त्तकतया स्वात्मन्यधिगतत्वाच्छब्दशक्तेर्गोचरः तथापि कथमलौकिके नियोगे वैदिकलिङ्गादिशब्दानां व्युत्पत्तिरिति चेत् उच्यते यद्यपि लोकव्युत्पत्त्यनुसारेण क्रियायाः कार्य्यत्वं प्राप्तं तथापि वेदे स्वर्गकामो यजेतेति नियोज्याभिधायिना स्वर्गकामपदेन समभिव्याहारान्नियोज्यः स च कार्य्यं यः स्वकीयत्वेनावबुध्यत इति न्यायात् ॥

ह स एवेति स्वात्मनीति बालस्येति शेषः कार्य्यमात्रस्य शब्दार्थत्वे पि नियोगस्य शब्दार्थत्वमयुक्तं अलौकिकत्वेन तत्रागृहीतसंगतिकत्वादिति शंकते तथापीति अलौकिकत्वे पि विमर्शात्मकतर्कतः संभाविते संगतिग्रहमुपपादयति यद्यपीत्यादिना क्रियाया इति भावार्थस्येत्यर्थः स्वर्गकामो यजेतेत्येतन्नियोज्यसमर्पणपरं न तु फलपरमिति हि गुरुमतं तथा च षष्ठाद्ये राद्धान्तितमतस्तत्समर्पकपदेन समभिव्याहारात् सहपाठात् क्रियातिरिक्तं नियोगमवगमयंतीति लिङ्गादय इत्युत्तरेण सम्बन्धः ॥ श्रीः ॥ श्रीः ॥ श्रीः ॥

CC-0. In Public Domain. Digitization by eGangotri

१
वि·सु· ननुकर्त्रपेक्षत्वात्कार्य्यस्य तत्समर्पकत्वमेव स्वर्गकामादिपदस्येत्यत आह नियोज्यः स चेति यः कार्य्यं स्वकीयत्वेन बुध्यते स नियोज्य इ
टी·न· ति व्यापारान्नियोगसंबंधबोद्धा नियोज्येन भवितव्यमितरथा कर्तृत्वानुपपत्तेरित्यर्थः। तथापि भावार्थसंबंधबोद्धैव नियोज्यो भवतु कु
९४ तो नियोगसिद्धिरिति तत्राह तस्येति स्वर्गकाम इति काम्यस्वर्गविशिष्टत्वात् सिद्धे च कामाभावात् साध्यस्वर्गविशिष्टः प्रतीयते नियोज्यः
एवंविधस्य च भावार्थक्रियायाममेदं कार्य्यमिति कार्य्यतावबुद्ध्यनुपपत्तेस्तत्र हेतुः क्षणध्वंसिन्या मितिमर्दनादिव्यापारस्य कालान्तर
भावी सुकं नद्युक्तं लिङ्गादिस्तत्र कार्य्यं चेत्क्रियामेवावबोधयेत् न समन्वयो नियोज्येन तदानीमेव हीयत इति ननु कथमस्य नियोगत्व
आज्ञादिर्नियोगः न चापौरुषेये वेदे सा संभवति अत एव च नापूर्वत्वमिति तत्राह तच्च स्वात्मनीति अथवा अपूर्वस्य शब्दार्थत्वे नियोग

तस्य च कथं संबंधात् साध्यस्वर्गविशिष्टस्य क्षणप्रध्वंसिन्यां क्रियायां कालान्तरभाविस्वर्गसाधनयोग्यतावैधुर्य्येण
कार्य्यतावुद्ध्यनुत्पत्तेः क्रियातोतिरिक्तं कालान्तरभाविफलसाधनं नियोगमेव नियोज्यं प्रति लिङ्गादयः कार्यमवग
मयंति तच्च स्वात्मनि पुरुषं नियुंजानं नियोग इति मानान्तरापूर्वतया अपूर्वमिति च व्यपदिश्यते न च फलजनक
तया फलं प्रति शेषत्वात् अपूर्वस्य प्राधान्यप्रच्युतिः स्वसिद्ध्यनुकूलनियोज्यलाभायैव फलशेषतावलंबनात्॥

स्य वा कार्यता कथमिति तत्राह तच्च स्वात्मनीति पुरुषाभिप्रायरूपप्रैषाद्यभावेपि परस्परव्यभिचारिषु तेष्वनुगतप्रवर्तकत्वरूपो नियोग
शब्दार्थः स चात्रापि संभाव्यत इत्यर्थः स्यादेतत् स्वर्गसाधनत्वयोग्यतावलेन स्वल्पलौकिकनियोगांगीकारः तथा च वरघातायकन्योद्वह
नं यतः कृतिसाध्यं प्रधानं यत्तत्कार्य्यमभिधीयत इति ———————— कार्य्यलक्षणमायुष्मन्मतेन तत्र स्वर्गं प्रति साधनतया तच्छे राम·
षस्य प्राधान्यमिति तत्राह न च फलेति यदि परसिद्ध्यर्थमयं व्याप्रियेत तदास्य प्राधान्यविघातः न तु तदस्ति न हि स्वर्गोस्य स्यादिति नि ९४
योगव्यापारोपि तु कथं कारं मामयं साधयेदिति तदर्थमेव स्वल्पयमस्मै स्वर्गं ददाति गर्भदासोपकर्तेव स्वामी तथा च कुतः प्राधान्यप्र
च्युतिरित्याह स्वसिद्धीति संविदधानस्य संविदधानं योगक्षेमं कुर्वत इत्यर्थः॥

58

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वात्मसिद्धीति अनुष्ठानं विना नियोगासिद्धेः कर्त्रा विना च तस्यासिद्धेः अधिकारिणं विना कर्त्तुरभावान्नियोज्यं विना च तदभावात् अ
कामानुगुणेत्व कामिनि नियोगत्वायोगात् तदिदमानुकूल्यम् अपि भिन्नक्रमः स्वर्गादिकं कुर्वदपि प्रधानमिति प्रतिपादितं तत्कोपसंहारपू
र्वकमुपपादितं नियोगशब्दार्थप्रतिवेदी ग्रहणपूर्वकमुपसंहरति तदेवमिति यूपादीति यथा खलु यूपाहवनीयादौ यूपं तक्षति यूप
मष्टास्रीकरोति यूपमनक्ति अहीदिति सूर्य आहवनीयमादधातीत्यादिवाक्यपर्य्यालोचनया संस्कार्यौ कौचन दार्वग्निविशेषौ यू
पे पशुं निबध्नाति आहवनीये जुहोतीत्यत्र यूपाहवनीयशब्दार्थाविति निर्णीयते आदिशब्देन यववराहादिग्राह्यं विवादेति कार्य्याभि।

स्वशेषभूतगर्भदासोपकारायसंविदधानस्य स्वामिन इव प्राधान्यानुपरोधात् तदुक्तं स्वात्मसिद्ध्यनुकूलस्य नियो
ज्यस्य प्रसिद्धये कुर्वत्स्वर्गादिकमपि प्रधानं कार्य्यमेव न इति तदेवमलौकिकत्वेपि नियोगस्य यूपाहवनीयादिव
त्पदान्तरसमभिव्याहाराल्लिङ्गादीनां तत्र संबंधग्रहणोपपत्तेरुपपन्नं तत्राम्नायस्य प्रामाण्यं प्रयोगश्च विवाद
ध्यासिता लिङ्गादयः एतत्क्रियातिरिक्तकार्य्याभिधायिनः कार्य्याभिधायित्वात् आनयेत्यादिपदवदिति विप
क्षे यागातिरिक्तकार्य्यानभ्युपगमात् यागस्य च स्वर्गसाधनत्वानुपपत्तेः स्वर्गकामो यजेतेत्यादिवाक्यानाम
प्रामाण्यप्रसङ्गो बाधक इति ॥

धायिन इत्युक्ते भावार्थाभिधानेन सिद्धसाधनतानतिवृत्त्यर्थं क्रियातिरिक्तेत्युक्तं तथा चाप्रसिद्धविशेषणतानतिवृत्त्यर्थमेतत्पदं क्रि
यान्तराभिधायिपदेषु च सुप्रसिद्धं साध्यपक्षे चैतदभिधेयक्रियातिरिक्तकार्य्यत्वमेतदनभिधेयत्वे सति क्रियात्वाद्वा एतदभिधेयत्वे सति क्रि
यात्वानधिकरणत्वाद्वा आद्यमभिधायकत्वसाधनत्वाहतं द्वितीयं सिध्यत् क्रियात्वानधिकरणकार्य्यनियोगमादाय सिध्यतीति
नियोग सिद्धिः

CC-0. In Public Domain. Digitization by eGangotri



तदेतत्कार्य्येत्युत्पत्तिसमर्थनं दूषयितुमुपक्रमते उच्यतइति समीहितसाधनतायाइति तद्बोधपरं विषयेण विषयिलक्षणात् तत
श्चतस्यैव परत्राप्यनुमानेन तत्रैव शब्दशक्तिः ननु कार्य्ये इत्यभिप्रायः इष्टसाधनतावबोधस्य भूतादौ प्रवर्त्तकत्वव्यभिचारं पूर्वोक्तम
नूद्य श्लोकेन परिहरति कार्य्यस्येति यादृशमिष्टसाधनत्वं कृतियोग्यताविशिष्टं तवकार्य्यज्ञाने हेतुस्तादृशमेव प्रवृत्तिहेतुराश्रीयते।
मया ततः कुतो व्यभिचार इति योजना श्लोकं विवृणोति येनापीति ननु कृतियोग्येष्टसाधनज्ञानमेव कार्य्यज्ञानं न त्वनयोर्धूमाग्निवो

अत्रोच्यते भवेदेष्टमनोरथोपदिष्टात्मन्यपि कार्य्यबोधस्य प्रवर्त्तकत्वमध्यवसीयेत समीहितसाधनतायाएव तु
स्तान्मनि प्रवर्त्तकत्वाध्यवसायात् न च भूतादौ व्यभिचारः यतः कार्य्यस्यावगते हेतुर्यादृशं हितसाधनं प्रवृत्तेस्तादृश
हेतुर्व्यभिचारस्ततः कुतः ९७ येनापि हि कार्य्यावबोधस्यैव प्रवर्त्तकत्वमभ्युपेयते ऽभ्युपेयते एव तेनापीष्टसाधनता
ववोधस्य कार्य्यावबोधं प्रति हेतुता नतद्भावे कार्य्यबोधानुपपत्तेः तत्रापीष्टसाधनतामात्रस्य भूतादौ व्यभिचारात्
कृतियोग्येष्टसाधनताज्ञानमेव कार्य्यताज्ञानहेतुरित्यभ्युपेयतत्वाच्च तादृगिष्टसाधनबोध स्यैव प्रवृत्ति।
हेतुत्वोपपत्तौ किमन्तरगडुना कार्य्यावबोधेन न चेदृगिष्टसाधनज्ञानमेव कार्य्यताज्ञानं तस्य तज्ज्ञानं प्रति हेतुत्वा
भ्युपगमात् न च ममेदं कार्य्यमिति चिकीर्षामपहाय कार्य्यज्ञानं नाम किंचिदुपलभामहे न च चिकीर्षैव कार्य्य 54
धियमन्तरेणानुमन्यमानानां कस्य पतीति युक्तं कृतियोग्येष्टसाधनतावबोधादेव चिकीर्षाया अप्युपपत्तेः॥९८

धवज्जन्यजनकतायदाह यथा खल्वेकधीवेद्यत्वे व्याकृतितो व्यक्तिधीरुक्तेति तथाच तस्य प्रवर्त्तकत्वाश्रयणमस्मदनुकूलमेवेति त रास.
त्राह न चेति हेतुमाह तस्येति फलसाधनतातत्र कारणं तेन कार्य्यतेति स्वीकारात् हेतुहेतुमतोरैक्यमनुपपन्नमित्यर्थः यत्तु ममे ९५
दं कार्य्यमिति बुद्धेः परिशेषात् कार्य्यविषयत्वमुक्तं तदप्यसिद्धं तस्याश्चिकीर्षारूपत्वादित्याह न च ममेदमिति यत्विष्टसाधनता
मात्राच्चिकीर्षानुमन्ते तद्धेतुः कार्य्यस्वीकर्त्तव्यमिति तदपि विशिष्टेष्टसाधनस्वीकारात्परिहृतमित्याह न चेत्यादिना॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेवं कार्य्यस्याप्रवर्त्तकत्वं प्रमाणाभावं चोक्त्वा तल्लक्षणमुक्तं दूषयति नचकृतीति फलमपि हि कृतिसाध्यं कृत्युद्देश्यतया प्रधानं चातस्तत्रा ति-
व्याप्तिरित्यर्थः ननु व्यवधानेन कृतिसाध्यत्वं विवक्षितं नच तत्फलेऽस्ति नियोगव्यवधानात्तस्येति शंकते अथेति नहीं सिद्धिर्धात्वर्थस्येव
साक्षात्कृतिलक्षणप्रयत्नसाध्यत्वात् नियोगस्य तद्व्यवधानादिति दूषयति मैवमिति किमिदं साध्यैकस्वभावत्वं किं साधनानर्हत्वाधिकर-
णत्वं किंवा सिद्धत्वानधिकरणत्वं आद्ये प्रागभाववत् समुत्पन्ने नियोगेऽव्याप्तिरित्याह प्रागभाववेति द्वितीयं दूषयति नचसदेति एवंल-
क्षणकेन नियोगेन सिद्धार्थस्य प्रवृत्तिरेवानुपपन्ना व्याघातात्फलासिद्धिः पूर्वोक्तयोग्यताविरहश्च नचाऽसत्त्वात्मसिद्धानुकूलस्येत्या।

नच कृतिसाध्यं प्रधानमिति कार्य्यलक्षणमुक्तं फलेऽतिव्याप्तेः अथ साक्षात्कृतिसाध्यत्वं विवक्षितं नच तत्फलेऽ
स्तीति मतम् मैवं नियोगतद्भावनाव्याप्तेः भावार्थस्यैव साक्षात्कृतिसाध्यत्वात् अथ साध्यैकस्वभावत्वं न प्रागभाव
वत्सु व्यभिचारात् नच सदासाध्यैकस्वभावत्वं यागाद्यनुष्ठानोत्तरकालमपि तस्य साध्यैकस्वभावत्वे कदाचिदपि नि-
योगासिद्धौ स्वर्गासिद्धिप्रसंगात् अस्तु वा यत्किंचिदविचारितरमणीयं लोके कार्य्यं तथापि कथं वैदिक लिङ्गादि
शब्दादलौकिकनियोगस्य प्रतिपत्तिः मानांतरानधिगते तस्मिंल्लिङ्गादेः संगतिग्रहणायोगात् अधिगमे वा तो
मानांतरापूर्वमपूर्वमिति गीयते इति स्वकपोलकल्पितापूर्वत्वभंगप्रसंगः नच कार्य्यमात्रेऽवसितसंगतिका लिङ्गा-
दि शालिकपाकेवलं विलपितमेव स्यादित्यर्थः सर्वकार्य्यमात्रस्य लक्षणानि दूषयित्वा (( इयः शब्दो नियोज्याभिधायि ॥ ७ ॥
तद्विशेषं नियोगं दूषयति अस्तु वेति नादृशो नियोगः किं प्रमाणांतरेण न गृहीतः किंवा गृहीतः उभयथापि दूषणमाह मानांतरेत्यादि-
ना ननु नात्यंतमलौकिकत्वमस्य यावता कार्य्यता कारणं लोकप्रसिद्धस्यैव सतो विशेषमात्रनिर्णयो वाक्याद्विशेषविमर्शोद्भवति य-
थाहुः श्रुत्यपि रपिकार्य्येऽर्थे व्यवहारानुसारिणी किंतु निर्धारणमात्रं वेदवाक्यविमर्शजमिति तदेतत्पूर्वपक्षावसरोक्तमनूद्य दूषयति नचे

CC-0. In Public Domain. Digitization by eGangotri

वि·सु· तत्र युक्तमित्युक्तं तत्र हेतुमाह अनुपपत्तीति अर्थापत्तिः खल्वनुपपत्तिः तथा च मानान्तरगम्यत्वात् पूर्वेण न निवारणमित्यर्थः पूर्ववा
टी·न· दिहृदयं शंकते नन्विति अपूर्वत्वं निर्वाहयति तर्कस्येति यद्यपि तर्कः स्वयं न प्रमाणं तथापि तद्विषयः प्रमाणविषय एव तथा चोक्तदो
९६ षानुषंग इत्याह मैवमिति तदेव दर्शयितुं तर्कस्वरूपमाह तथाहीति एकाभ्युपगमेनेति व्याप्याहार्य्यारोपेणेत्यर्थः अनेन चानुमाने
ति व्याप्तिः परिहृता नियतप्रसंजने तर्क इत्युक्ते यद्यनित्यः स्यान्मूर्त्तः स्यादित्यादिप्रसंगाभासे इति व्याप्तिस्तदर्थं प्रमाणान्तरे स्यादुक्तं नि

स्वर्गकामादिपदसमभिव्याहारसामर्थ्यात् क्रियातिरिक्तमेव कार्य्यमवगमयति आशुतरविनाशिन्याः क्रियायाः का
लान्तरभाविस्वर्गादिसाधनताऽनुपपत्तेरिति युक्तं वक्तुं अनुपपत्तिवेद्यत्वे मानान्तरगोचरत्वप्रसंगात् ननु नेयमर्थापत्तिः
तर्क एवायमुपन्यस्तः तेन तर्काधिगते नियोगसंगतिग्रहः संगच्छते तर्कस्यामानत्वात् प्रमाणानुग्राहकस्तर्को ननु
प्रमाणमिति हि परीक्षका इति चेत् मैवं तर्कगोचरत्वेपि प्रमाणान्तरगोचरत्वस्यापरिहार्यत्वात् तथा हि प्रमाणान्तरा
धिगतव्याप्यव्यापकभावयोरेकाभ्युपगमेन द्वितीयस्य नियतप्रसंजनरूपस्तर्कः यथा यद्य    यं वह्निमान्न स्याद्धूमवा
नपि न स्यादिति तथा चायमत्र यल्लिङ्गादिः क्रियातिरिक्तकार्याभिधायी न भवेत्तदा न स्वर्गकामपदेन समभिव्याह्रियेत
समभिव्याह्रियते चायं तस्मात् क्रियातिरिक्तकार्याभिधायक इति प्रसंगरूपस्तर्कः द्वयोरापाद्यापादकभावयोस्तद्भा
वयोश्च धूमवत्त्ववह्निमत्त्वयोस्तद्भावयोरिव मानान्तरगोचरता कथं न स्यात् न चापाद्यापादकभावोपि क्रियातिरिक्त ६६

यत्तत्पदं तु व्यर्थमिव उदाहरति यथेति प्रकृतस्थले व्याप्यापाद्यापादके विवेचयति तथा (( कार्यस्याप्रसिद्धत्वेन तदभावस्याप्रसिद्धत्वात्
चेति अस्य च विपर्य्ययपर्य्यवसानं दर्शयति समभिव्याह्रियते चायमिति कथं न स्यादिति इतरथा मूलशैथिल्यादिति भावः अभ्युपगम्यापा वाम·
द्यापादकभावं प्रमाणान्तरगोचरत्वप्रसक्तिरुक्ता स एव नास्ति अप्रसिद्धविशेषणत्वादित्याह नचेति अत्र हि क्रियातिरिक्तकार्य्यानभिधा ९६
यकत्वमापादकं स्वर्गकामपदासमभिव्याहारश्चापाद्यस्तत्रातिरिक्तकार्य्यस्याप्रसिद्धत्वादेव तदनभिधानमप्रसिद्धमेवेत्यर्थः॥ ६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवंतर्कगोचरत्वेपिप्रमाणानांतदग्राह्यत्वमापादितमिदानीमप्रमाणरूपत्वमपित्वस्मिने तर्कस्यशक्यसमर्थनं स्मृतिव्यतिरिक्ताप्रमाण-
ज्ञानस्यभवनानंगीकारात् स्मृतेश्चाननुभूतचरतयाःऽनुपचितसंस्कारेऽनुपपत्तेरित्याह अप्रमाणभूतेत्यादिना ननुवयमेतल्लक्षणं
नकक्षीकुर्मः यत्संस्कारमात्रजन्यज्ञानंस्मृतिरिति येनाननुभूतेसंस्काराभावात्स्मृत्यनुपपत्तिःस्यात्किंतुसापेक्षंज्ञानमितिशंकते
नन्वितिमह्नः न तर्केचलक्षणंवर्त्यते अस्तिचात्रेति यदिदमस्यसापेक्षत्वंतत्किंस्वोत्पत्तौउतविषयावबोधे आद्येपियत्किंचिदपेक्षा
उतज्ञानापेक्षा आद्येआह नाद्यइति यनेनद्वितीयोपिनिरस्तः लिंगज्ञानसापेक्षस्याप्यनुमानस्यास्मृतित्वात् द्वितीयंनिरस्यति विषये-

अप्रमाणभूतश्चतर्कःस्मृत्यनुभवभेदेनज्ञानद्वैराश्यवादिनास्मृतावंतर्भवतीतिवाच्यं नचात्राननुभूतेनियोगे
स्मृतिःसंभवतिसंस्कारजन्यायाःस्मृतेस्तदभावेऽभावात् ननुपूर्वानुभवजन्यसंस्कारमात्रजन्यंज्ञानंस्मृतिरितिन
ब्रूमः किंतुसापेक्षंज्ञानमस्तिचात्रप्रमाणानुग्राहकतयातर्कस्यतदपेक्षानततोनोक्तदोषइति चेन्मैवंविकल्पास-
हत्वात् तथाहि किमुत्पत्तौसापेक्षत्वमुतविषयावबोधेनाद्यःप्रमाणज्ञानानामपींद्रियलिंगादिसापेक्षतयास्मृ-
तित्वप्रसंगात् नद्वितीयःविषयावबोधेपिसापेक्षत्वेस्मृतेः प्रदीपवज्ज्ञानत्वाभावप्रसंगात् अपसिद्धांतापत्तिश्च
प्रमाणमनुभूतिःसास्मृतेरन्यास्मृतिःपुनःपूर्वविज्ञानसंस्कारमात्रजंज्ञानमुच्यतेइति शालिकनाथवचनविरोधा-

त्ति विषयावबोधेविषयव्यवहारजननेकारणेनकार्यलक्षणात् तत्रसापेक्षत्वेप्रदीपवज्ज्ञानत्वंनस्यादित्यर्थः प्रमाणमनुभूतिरिति प्र-
माणसामान्यलक्षणं अनुभूतेर्लक्षणमाह सास्मृतेरन्येति स्मृतिव्यतिरिक्तंज्ञानमित्यर्थः तेनचस्मृतेःप्रामाण्यंनिवारितंस्मृतेरपिलक्ष-
णमाह स्मृतिःपुनरित्यादिना अनुमानप्रत्यभिज्ञादिव्यावृत्त्यर्थमात्रग्रहणमितिप्रकरणशालिकाप्रमाणपारायणश्लोकार्थः॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

१

वि॰सु॰ एवमनुपपत्तिमंगीकृत्यापूर्वेत्वक्षतिरुपादिता इदानीमनुपपत्तिरेवनास्त्यन्यथैवोपपत्तेरित्येतत्प्रतिवंदीपूर्वकमाह नचार्थापत्तीति
टी॰न॰ यथाहियजेतेत्यत्र कृतिसाध्यनियोगाभिधायिना लिङ्गकृतिनियोगयोः प्रतीतेरुभयोश्चैकपदत्वेनसाध्यसाधनभावप्रतीतेर्भावा
९७ र्थविषयकत्वेन तज्जनकत्वनियमात्कृतेर्नियोगस्यचाभावार्थत्वात् प्रकृत्यभिधेयभावार्थमुत्पादयतद्वारानियोगसाधनताकृतेर्भव
ञ्चिरंगीक्रियते तथाक्रियायाएवक्षणिकाया अप्यपूर्वावांतरव्यापारायाः फलसाधनत्वोपपत्तौ नस्वतंत्रनियोगव्यतिरेकेणका।
चनानुपपत्तिरित्यर्थः यत्तुनत्वत्रकैश्चिदुक्तमपूर्वकल्पनायामपिसाधनसाधनतैवयागस्यनतुसाक्षात्साधनतायागस्येति न
त्कल्पनायामपितदवस्थैवानुपपत्तिरिति तन्नव्यापारतयैवकल्पनातेनचाव्यवधानाद्यदिचतत्कल्पनामात्राद्व्यवधानंतर्ह्यवगुर

नचार्थापत्तिगम्यत्वमपि कृतेर्भावार्थजननद्वाराऽपूर्वेसाधनत्ववत्क्रियायाएवापूर्वावांतरव्यापारायाःस्व
र्गसाधनत्वोपपत्तेः अपिचयोब्राह्मणायावगुरेत्तंशतेनयातनयादित्यत्रावगुरणकर्मणःक्षणिकस्यापिदुरि
तापूर्वजननद्वाराकालांतरभोविशतयातनाफलसाधनत्ववत्क्षणिकाया अपियागक्रियायाअपूर्वजननं।
द्वारास्वर्गसाधनताकिंनस्यात् नन्ववगुरणेदुरितापूर्वकल्पनाकामाधिकारेक्रियातिरिक्तनियोगसिद्धुत्तर ५७

णादावपिस्यादिति प्रतिवंदींगृह्णाति अपिचेति यःपुरुषोब्राह्मणायावगुरेत्उद्यम्यशस्त्रमुद्यमेनउद्यमनायुधंतदेवा((कालीना ॥
वगुरणं शतेनयातनयातनां इत्थंभावेतृतीयायावत्सरत्रातेनदुःखमुत्पादयेत्ततःशतगुणयातनामनुभावयेत् अथवाशतेनसंवत्सरे राम॰
णयातयात् तावतःसंवत्सरान् पितृलोकंनप्रजानातीति वाक्यशेषात् अत्रहि कालांतरभोविशतयातनादेः क्षणिकावगुरणादिसाधन ९७
मिति किंचिद्दुरितापूर्वंकल्पनीयमितिनचतद्विशेषोंतदुःखफलतयाश्रकाश्यत्वेनाशक्यार्थत्वात् यत्त्ववगुरणेतादृशापूर्वकल्पनमेव
काम्येषुवाक्येषुस्वतंत्रनियोगंगमयति तमंतरेणतदनुपपत्तेरितिनयविवेककारेणोक्तं तदुद्भावयति तन्त्विति ॥ ६ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तन्निष्पन्नरकालतामेव दर्शयति तथाहीत्यादिना अदृष्टत्वस्य कल्पनानुपपत्तेः कामाधिकारसिद्धो नियोगोऽत्र कल्प्यत इत्यर्थः अन्य
त्र सिद्धत्वे वहेतुः तन्निष्पत्तीति सत्यमन्यत्र दृष्टं कल्प्यते तत्तु तत्रावान्तरव्यापारत्वेनैव दृष्टं न तु स्वतंत्रत्वेनेत्यभिप्रेत्य परिहरति मैवमित्या
दिना अयं च कृतेर्भावार्थजननद्वारेत्यस्य प्रपंचोऽपि अत्र च यागादिधात्वर्थस्य नियोगं प्रति विषयत्वाङ्गीकरणं करणत्वाङ्गीकरणं चाग
मकमित्याह अत एव चेति एतदेव भवनाग्यवचनेन द्रढयति कृतीति कृतिः प्रयत्नः तत्साध्यो नियोगस्तयोर्मध्यस्थो यागदानहोमा
दिधात्वर्थो विषयो मतः छिन्नो वंधनकर्मणो विषय इत्युच्यते कृतिं नियोगादौ घटयतो धात्वर्थस्य युज्यते विषयत्वं तथा कार्यैः सं

तथाहि तत्राशुतरविनाशिन्याः क्रियायाः कालान्तरभाविफलसाधनत्वासामर्थ्यात् दतिरिक्तापूर्वस्य फलसाधनत्वे स्थिते
पश्चादवगुरणेऽपि कालान्तरभाविशतयातना फलमपि दुरितापूर्वद्वारैवेति कल्प्यते तथाऽसति कथं नियोगासिद्धिः तन्निष्पन्न
तरकालीनत्वाद् तत्कल्पनाया इति चेन्मैवं कृतिसाध्ये नियोगे प्रतीते कृतेर्भावार्थैकविषयत्वात् नियोगस्य चाभावार्थ
रूपत्वात् साक्षात्कृतिसाध्यत्वासंभवात् भावार्थं साधयन्ती कृतिर्नियोगं साधयतीति यथा कल्प्यते अत एव चाघटितस
घटकतया भावार्थोऽपि विषयः करणं च नियोगं प्रतीति गीयते यथाहुः कृतितत्साध्यमध्यस्थो यागादिर्विषयो मतः
कार्यैः संघटिताकारे करणत्वेन संमत इति तथा लोकावगतसामर्थ्यैर्लिङादिशब्दैरधिगतफलसाधनभावायाः क्रि
याया नियोगमन्तरेणाऽपि स्वजन्यापूर्वावान्तरव्यापारद्वारा फलसाधनत्वसंभवे तदृष्टान्तावष्टंभतस्त्वावगुरणेऽपि दुरि
तापूर्वकल्पनायां संभाविन्यामलौकिकवेदसिद्धनियोगकल्पनानुपपत्तेः ११ घटिताकारे स एव च विषयः तस्मिन्नेव करण
त्वेन च संमत इति श्लोकयोजना एतदुक्तं भवति प्रतिपन्नुपाधौ विषयत्वं सिद्धुपाधौ करणत्वमित्यस्ति तयोर्भेद इति दृष्टान्तमुक्त्वा दा
र्ष्टान्तिकमाह तथा लोकावगतेत्यादिना गवानयनादिक्रियैव तावत्फलसाधनत्वेनाधिगता लिङादिशब्दैः तद्वदिक्षणिकत्वादनुप
पन्नं तद्वावान्तरव्यापारवत्यास्तस्या एव साधनत्वमास्थेयं एवं दृष्टमनुगृहीतं भवति इतरथा हि दृष्टहानिरदृष्टकल्पना प्रसज्येयातामतस्त
वत दृष्टान्तेनावगुरणेऽपि तत्कल्पनासिद्धेर्न नियोगेन विनानुपपत्तिरित्यर्थः॥

University Valmeeki Campus, Kathmandu

वि·सु·
टी·न·
९८

युक्तं चैतदिति तथात्वं प्रतिक्रियाकार्यवाचकत्वमात्रेण व्यवहारोपपत्तौ अलौकिकबहुकल्पनाप्रसंगादित्याह इतरथेति अपूर्वस्येति
अपूर्वस्य फलं प्रति साधनत्वकल्पनेत्यर्थः यागस्येति अपूर्वफलयोरेकैकैव भावनाऽऽएकमेव करणमेकैकैव च भोक्ष्यतेति हि तेषा
मभ्युपगमः उपलक्षणं चैतत् यागस्य नियोगं प्रति विषयत्वकल्पनायाः प्रतिपत्त्यनुबंधितया तस्याकरणत्वादपि प्राथमिकत्वा
त् एवं प्रतिबंदीं समर्थ्याग्नेयादिप्रतिबंद्यापि क्रियाया एव फलसाधनतामुपपादयति किंचेति आग्नेयोऽष्टाकपाल ऐंद्रं दधि ऐ
न्द्रं पय इति यागत्रयं दर्शत्रयं नाम आग्नेयोष्टाकपालो यागः आज्यहविष्कश्चोपांशुयागः अग्नीषोमीयैकादशकपालयागश्चेति
पौर्णमासत्रयं एतेषां च परमं दर्शपूर्णमासापूर्वं प्रति करणत्वं दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति विधिना बोधितं तत्र स्वाणि ।

इतरथा त्वत्प्रक्रियाकार्यवाचकत्वभंगोऽपरिक्लृप्तनियोगवाचकत्वकल्पनाऽपूर्वस्य फलसाधनत्वकल्पनाया
गस्य च फलनियोगयोः करणत्वकल्पना चेति गौरवं प्रसज्येत किंच यथा तवाग्नेयादीनामुत्पत्त्यपूर्वावांतरव्या
पाराणां परमापूर्वसाधनभावस्तथास्मन्मतेऽप्यपूर्वावांतरव्यापारा यागा एव क्रिया याईश्वरप्रसादावांतरव्यापारा
या वा फलसाधनतोपपत्तेर्न नियोगकल्पनावकाशः न चोत्पत्त्यपूर्वाणामेव परमापूर्वसाधनत्वमाग्नेयादीनां तु त
त्साधनसाधनत्वेनैव नियुक्तं वक्तुं प्रमाणाभावात् तथा हि

98

कानामुदीच्योपकारोपघटनेऽप्यवांतरव्यापाररूपाणि षडपूर्वाणि कल्प्यंते न च तावताऽऽग्नेयादीनां साधनताभाव इतिमतमपि
संप्रतिपन्नं तथात्राप्यस्मन्मते क्रियैवापूर्वावान्तरव्यापारा स्वर्गसाधनं न त्वपूर्वं अपवेश्वरप्रसाद एवापूर्वस्थानेऽभिषिच्यतां तस्य श्रु राम·
तिस्मृतिपुराणगणनिर्णीतत्वादित्यर्थः यथा चास्मन्मते तत्तद्देवता यागावैयर्थ्ये देवतावाप्रयोजयेदित्यधिकरणाविरोधश्च तथा फल ९८
मत उपपत्तेरित्यत्र वर्णितं वाच्चस्पतिमिश्रैः ननु नाग्नेयादिषडपूर्वाणामवांतरव्यापारत्वं अपितु तान्येव परमापूर्वं प्रति साधनं। आग्नेया
दीनि तु तत्साधनानीत्याशंकां दूषयति न चोत्पत्तीत्यादिना ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधिकारवाक्यं फलसंबंधबोधकं वाक्यं नियोज्यसमर्पकं वा उत्पत्तिवाक्यं कर्मस्वरूपबोधकं आद्येपिपक्षे दर्शपूर्णमासाभ्यामित्यनेनवा
यजेतेत्यनेनवाप्रथममेमाह दर्शपूर्णमासाभ्यामित्यस्येति आग्नेयादिकर्मसमुच्चयवाचकत्वादुत्पत्त्यपूर्वानभिधायकत्वादित्यर्थः द्विती
यं निषेधति यजेतेतिचेति भावार्थविशिष्टपरमापूर्वाभिधायकत्वादित्यर्थः उत्पत्तिवाक्यैरितिपक्षंदूषयति नापीति एषहितेषामभ्युपग
मः आग्नेयादिवाक्यैरपूर्वांतराणिनाभिधीयंते प्रधानापूर्वसन्निधिपठितत्वयातदनुवादाशंकयाकुंठितशक्तित्वात् केवलंकर्मस्वरूपमा
त्रं तत्र शाब्दं योग्यतावैधुर्याभावाच्च प्रकरणिनान्वितनाभिधानं कारणांतरवशाच्चापूर्वाणांकल्प्यत्वमिति सोयंभज्येतैवमभ्युपगच्छतइ

किंदर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेत्यधिकारवाक्येनैषांपरमापूर्वसाधनत्वमवगतमुताग्नेयोऽष्टाकपालइत्याद्यु
त्पत्तिवाक्यैः नाद्यः दर्शपूर्णमासाभ्यामित्यस्यकर्मसमुदायवाचकत्वात् यजेतेतिचपरमापूर्वाभिधानात् नापिद्विती
यः दर्शपूर्णमासाभ्यामित्यधिकारवाक्यसन्निधिसमाम्नातानामुत्पत्तिवाक्यानामधिकारापूर्वानुवादशंकाकुंठित
शक्तीनांद्वाग्नित्येवापूर्वांतरप्रत्यययजनकतानाश्रयणात् अन्यथाधिकारवाक्यसन्निधिपरिपठितसमिदादिवाक्य
स्यलिङ्गादिशब्दानामपिस्वतंत्रकार्याभिधायकत्वेग्राहकग्रहणभंगप्रसंगः प्रयोजनप्रयोजनिभावेनान्वितनाभि
धानेग्राहकग्रहणमित्यभ्युपगमात् स्वतंत्राणांचप्रयोजनप्रयोजनिभावासंभवात् ॥ ६ ॥ ६ ॥ ६ ॥

त्यर्थः नकेवलमनुवादाशंकयानभिधायकत्वमनिष्टप्रसंगाच्चेत्याह अन्यथेति दर्शपूर्णमासाभ्यामित्याद्यधिकारवाक्यप्रकरणपठित
समिदादिवाक्यानामप्याग्नेयादिवाक्यवदपूर्वाभिधायकत्वात् अपूर्वस्यचकृतिसाध्यं प्रधानंयदित्युक्तलक्षणवत्तया प्रधानत्वात्प्रधा
नयोश्चांगांगिभावाभावात्तद्बोधकग्राहकसंज्ञकप्रयोगवचनेनपरिग्रहोनस्यादित्यर्थः आपाद्यचेदंदूषणंपरमापूर्वेणग्राहकग्रहण
स्वरूपंदर्शयति प्रयोजनेति प्रयोजनंप्रधानंनियोगः प्रयोजनिनः तत्प्रकरणपठितसकलपदार्थास्तदन्वितत्वप्राधान्य नियोग
स्याभिधानंग्राहकग्रहणमित्यर्थः कथंतर्ह्याग्नेयादिनांक्षणिकानांसेतिकर्तव्यताकानांपरमापूर्वनिर्वर्तकत्वमित्यतआह ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

१
वि·सु· आग्नेयादीनामेवत्विति अवगतोविषयभावः करणभावश्चयेषांतेतथा अंगीकरणादिति यत्रानन्यनिष्ठभावार्थलक्षणविषयलाभ
टी·न· स्तत्राभिधायकत्वकल्पना अन्यत्रकेवलकल्पनेत्यर्थः अत्रभवनाथःप्राहनक्षणिकांक्रियांव्यवहितस्वर्गंप्रतिसाधनत्वेनाभिदधाति।
९९ शब्दः अतःकल्पनानुपपत्तेःअपूर्वकल्पनातःआगयोग्यत्वात् आग्नेयादीनांत्वपूर्वंप्रतियोग्यत्वाद्विनाभिधानमिति नन्ननहिक्षणिक
त्वाद्यवहितत्वमात्रात्राऽयोग्यत्वं नैलपानादावदर्शनात् निरन्वयविनाशस्तत्राप्यसिद्धःआग्नेयादेरिवचक्षणिकस्यापियोग्यतास्त्यतः
कारणांतरमप्रयोजकं एवंनियोगस्याप्याद्यत्वमुपपाद्यतद्यावर्त्तकंनियोज्यंदूषयति कश्चायमिति ननुनियोगदूषणसमयेनियोज्यदू
षणमकांडताडवमिवनेत्याह यदन्वयादिति गुणत्वदृतिक्रियांप्रतिगुणभूतश्चेततःकर्त्तैवनतुतदतिरिक्तइत्यर्थःतेनतसमिदादिष्वत्वं

आग्नेयादीनामेवत्वधिकारापूर्वंप्रत्यवगतकरणविषयभावानांक्षणिकत्वेनतदनुपपत्तौतस्मिद्वायमेवाव्यांतर
व्यापारतयोत्यन्यपूर्वांगीकरणात् कश्चायंनियोज्योनाम यदन्वयाक्रियातिरिक्तनियोगसिद्धिःसकिंकार्यंप्रति
गुणभूतःप्रधानभूतोवानाद्यःगुणत्वेकर्त्तृत्वान्वयात भावात् नद्वितीयःप्राधान्येधिकार्यन्वयापातात् गुणप्र।
धानभावातिरिक्तप्रकारांतरासंभवाच्च कार्यमात्मीयत्वेनयोवबुध्यते सनियोज्यइतिचेत् तथाभूतावबोध।
स्यापिगुणप्रधानभावातिरेकेनोक्तदूषणापत्तेः क्रियाकार्यंप्रतिगुणभूतत्वं कर्त्तृत्वंक्रियातिरिक्तंप्रतिगुणभू ६६
तत्वमेवनियोज्यत्वमितिविषयभेदाद्वैदइतिचेत् ॥ भिवारःइदंचनिगूढाभिसंधेर्दूषणं प्राधान्यइतिक्रियांप्रतिप्राधान्यं
नाम तत्फलभोक्तृत्वमत्रविवक्षितं चेततत्वविशेषितंद्यातदेवचाधिकारित्वमित्यर्थः तेनच ग्रीत्यादिव्यावृत्तिः ननुगुणप्रधानभाव राम
व्यतिरिक्तएवकश्चित्प्रकारोभवत्वितितत्राह गुणप्रधानेति स्वतंत्रयोःसंबंधाभावप्रसंगादितिभावः तथाभूतेति आत्मीयत्वेनात्मा। ९९
संबंधित्वे नचनिराकांक्षयोःसंबंधइत्यंतभेवत्येवगुणप्रधानभावेसोपीत्यर्थः योनिगूढाभिसंधिकृतस्तमुद्घाटयितुं शंकते क्रियाका
र्यमिति द्विविधंहिकार्यं क्रियारूपंतदतिरिक्तनियोगरूपंच तत्रप्रथमंप्रतिगुणभूतत्वंकर्त्तृत्वंद्वितीयंप्रतिगुणभूतत्वंनियोज्यत्व।
मितिगुणभावेसमानेपियत्प्रतिगुणभावस्तद्वैषम्यादिदंवैषम्यमित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दूषयति मेवमिति विषयनियोज्यनिरूपणः कश्चित्कार्य्यं नियोगोनाम यथाहुः कार्य्यत्वेन नियोज्यं यः स्वात्मनि प्रेरयत्यसौ नियोग इति
मीमांसानिस्नातैरभिधीयते इति तथाच नियोज्यनिरूपणान्नियोगनिरूपणं संप्रति नियोगेनतं निरूपयतीति परस्पराश्रय इत्यर्थः यच्च
क्रतूद्देश्यत्वं प्राधान्यं जैगीयते गुरुमतानुसारिभिस्तदपि दूषयति नच नियोगस्येति पुरुषार्थत्व प्रयोजकं दर्शयन्नपुरुषार्थतामेव विवृणो।
ति सुखेति ननु किमिति न पुरुषार्थत्वं यावता स्वर्गादिसाधनतया सुखसाधनत्वमस्तीत्याशंक्य नित्यनियोगे फलरहिते क्रतूद्देश्यतान।
स्यादित्याह नचेत्यादिनां स्यादेतल्लोके खल्वियं कथा यत्सुखादिचतुष्टयान्यतमं सपुरुषार्थ इति वेदे तु नियोगसिद्धिरेव पुरुषार्थ इति
मैवं क्रियातिरिक्तकार्य्यसिद्धौ नियोज्यान्वयसिद्धिः नियोज्यान्वयसिद्ध्यधीना च क्रियातिरिक्तकार्य्यसिद्धिरिति परस्परा
श्रयप्रसंगात् नच नियोगस्य क्रतूद्देश्यत्वमपुरुषार्थत्वात् सुखदुःखप्राप्तिपरिहारौ तदुभयसाधनं वा पुरुषार्थः नचै
षामन्यतमो नियोगो येन पुरुषार्थतया क्रतूद्देश्यः स्यात् नच स्वर्गादिसाधनतया पुरुषार्थत्वं नित्यनैमित्तिकनियो
गयोस्तदभावे नक्रतूद्देश्यतावैधुर्य्यापातात् नियोगसिद्धेरेव च पुरुषार्थत्वे नियोगस्य स्वर्गसाधनताभ्युपगमानर्थक्य
प्रसंगात् ननु कामाधिकारे फलकामिनो नियोज्यत्वात्फलं प्रतिकरणीभूतस्यैव यागस्य नियोगं प्रति विषयत्वात् त
त्साध्यस्य नियोगस्य फलानं च साधनता नित्ये तु न फलकामिनोऽधिकारः नापि फलं प्रतिकरणीभूतस्यैव यागस्य नि।
योगं प्रति विषयत्वं किन्तु नियोगं प्रत्येव विषयत्वं करणत्वं चान्यथा नित्यकाम्ययोर्वैषम्यानुपपत्तेः तस्मान्नित्येषु नियो
तत्राह नियोगसिद्धिरेवेति शंकते नन्विति अयमर्थः नियोगसिद्धिस्तु सर्वत्र पुरुषार्थोऽभ ((गसिद्धिरेव पुरुषार्थ इति चेत्॥
वत्येव नच काम्येषु स्वर्गसाधनत्वाभावप्रसंगः स्वर्गकामिनस्तत्राधिकारित्वात् स्वर्गकरणस्यैव यागस्य नियोगं प्रति विषयत्वाच्च ते
न भवतु नाम तत्र स्वर्गोपि फलं न तावता नियोगस्यापुरुषार्थता अत एव च काम्येषु साध्यविवृद्धिरिति वृद्धाः नित्येषु न तादृशोधिकारी
नापि तादृशी विषयकरणे अपि तु कामिनियोगं प्रत्येव विषयः करणं चातो विवृद्धिरहितं नियोगमात्रं तत्र पुरुषार्थः अवश्यं चैवमंत
व्यं इतरथोभयथाप्यतिरिक्तफलकत्वे तदभावे वा नित्यकामविभागानुपपत्तेरिति तदेतन्नित्यकाम्ययोर्व्यतिरिक्तफलकत्वेपि प्रकारा

१
वि·सु· टी·न· १००

वैषम्यं द्रष्टव्यमित्याह नैवमित्यादिना विश्वजिदादिसंग्रहार्थमाह कल्प्यते चेति ननु फलवत्त्वं चेत्सर्वत्र समानं किमिति नित्येपि विश्वजि
दादिवदेव न कल्प्यते कामः किमिति वा न काम्यमित्यत उक्तं यदकरणे चेति यत्र प्रत्यवायश्रवणं तत्र न कल्प्यमित्यर्थः नित्ये हि न फलं नि
त्यमिति नित्वंडत्तकार्थः वैषम्यान्तरं वा यदकरणे प्रत्यवायो न दृश्यते तत्काम्यं यत्र च श्रूयते नियतं निमित्तं तन्नित्यं यत्र च तच्छ्रवणे प्या
नियतं निमित्तं तन्नैमित्तिकमिति विभागः कर्मणा पितृलोक इति शास्त्राच्च नित्यानां फलवत्ताधिगमः नित्येषु प्रवृत्तिर्लोभाच्चैवमेव
वैषम्ययुक्तमित्याह नित्यनैमित्तिकयोश्चेति ननु किमिति न प्रवृत्तिः यावतानियोगो हितं तत्साधनं च यागः ततो हितसाधने।
नैवं नित्यकाम्यवैषम्यस्यान्यथाप्युपपन्नत्वात् तथा हि द्वयोः फलवत्त्वाविशेषेपि यत्र कामना निमित्ततया श्रूयते।
कल्प्यते वा तत्काम्यं यत्र पुनर्नैवं यदकरणे च प्रत्यवायस्तदितरदिति वैषम्यात् नित्यनैमित्तिकयोश्च फलशून्यत्वे हि
न साधनताबुद्ध्या प्रवृत्तिरेव न स्यात् ननु नियोगसिद्धेः परमपुरुषार्थत्वात्तत्साधने यागादौ हितसाधनबुद्ध्यैव प्रवृत्तिः
नियोगार्थसिद्धेः किमन्यत्प्रयोजनं प्रवर्तेविधौ नामेति गुरूणां वादी विनिन्वादिति चेन्नैवं तथा सति तवापि नित्यकाम्य
वैषम्यभंगप्रसंगात् तथा हि फलं प्रतिकरणीभूते यागादौ रागत एव प्रवृत्तिरिति कर्तव्यतायां तु वैधी काम्याधिकारे नित्ये
षु तु करणेपि कर्तव्यतायां विधित एव प्रवृत्तिरिति वैषम्यं तवाभिमतं तच्चेदं भज्यते नियोगस्य फलरूपत्वेन तत्करणे
यागादावपि रागत एव प्रवृत्त्युपपत्तेः किंचेदं यागस्य फलं प्रतिकरणत्वं श्रुतिलिङ्गादिगम्यं उत नियोगानुपपत्तिगम्य।
प्रवृत्तिः संभवतीति शंकते ननु नियोगेति वैषम्यभंगमेवोपपादयति तथा हि फलं प्रतीति यत्र "स्यंनाराश्रुत्यादेरदर्शनात्॥
करणे रागात् प्रवृत्तिस्तत्काम्यं यत्र पुनः करणेपि विधितः प्रवृत्तिस्तन्नित्यमिति हि नित्यकाम्यवैषम्यमभिमतं तत्तस्यात् नित्येष्वपि क राम·
रणीभूतयागादिषु रागादेव प्रवृत्तेरित्यर्थः यदुक्तं पूर्वं फलं प्रतिकरणीभूतस्य यागस्य नियोगं प्रति विषयत्वमिति तदपि दुर्निरूपमि। १००
त्याह किंचेदमित्यादिना किमः श्रुतिलिंगादिगम्यमित्यनेनान्वयः वस्तु किंचार्थः श्रुत्यादेरदर्शनादिति ॥ ६ – – १॥ ६ – – १॥

१००

यथाहि इष्टसाधनतावाक्यार्थवादिनामस्माकं स्वर्गयागयोः साध्यसाधनभावः श्रौतः यथा च भावनावाक्यार्थवादिनां भाट्टानां
वाक्यगम्यः साध्यसाधनभावः यथाहुः पार्थसारथिमिश्राः नहि तत्र स्वर्गकामस्य यागस्य वा साध्यत्वं साधनत्वं वा केनचिदुक्तं पदद्वयस
मभिव्याहारादेव तु सम्बन्धे कल्प्यमाने असाधकं तादर्थ्यादिति न्यायेन कामिनः साधनत्वं यागस्य च गुणत्वं कल्प्यत इति तन्मतेपि फ
लसंबंधः श्रौत इष्टसाधनरूपत्वात् विधेर्न तथा भवद्भिरभ्युपगम्यते औपादानिकत्वा गोकारादिरित्यर्थः किं तर्हि प्रकृतिप्रत्यययोरभ्या
मभिधीयत इत्यत आह यागेनेति यजेतेत्यस्य यागेन नियोगेऽन्वयः सच नियोगो देवगम्यः फलसाधनमिति न क्वचित्स्वस्य साध्यत्वं ननु
फलस्य फलपरत्वाभावाच्च न तद्वाक्यस्य न फलयागयोः साध्यसाधनभावइत्यर्थः अस्तु तर्हि लिंगवाक्यादीनि प्रमाणमिति नेत्याह लिंगादीनां

स्वर्गकामो यजेतेत्यादौ फलं प्रतिकरणत्वस्य प्रकृतिप्रत्ययाभ्यामप्रतीतेः यागेन फलसिद्धिस्तस्य नियोगस्यैव साध्यत्व
प्रतीतेरभ्युपगमात् लिंगादीनां वाचनासंकनीयत्वात् नापि द्वितीयः विकल्पासहत्वात् किं नियोगः स्वसिद्धये यागस्य
वा३ फलकरणत्वं कल्पयति उत फलसिद्धये स्वस्य फलकामिकृतिसाध्यत्वसिद्धये न प्रथमः स्वसाधनीभूतयागानुष्ठाना
देव स्वस्य सिद्धेः न द्वितीयः स्वसिद्धेरेव फलस्यापि सिद्ध्युपपत्तेः न चरमः यागस्य स्वर्गं प्रतिसाधनत्वाभावइव करण
त्वाभावेपि स्वर्गसाधनीभूतनियोगं प्रतिकरणत्वादेव स्वर्गकामिकृतिव्याप्यत्वोपपत्तेः॥ इति नियोगानुपपत्तिः॥

गौपादानिकत्वं दूषयति नापि द्वितीय इति फलकामीति फलकामिनो यः प्रयत्नस्तेन साध्यत्वं यन्नियोगस्य तन्नोपपद्यते याग
स्य तद्घटकस्य स्वर्गकरणत्वाभावइत्यर्थः साधनत्वाभावइति नहि यागस्य स्वर्गं प्रति साधनत्वं प्रमाणाभावात् नियोगो हि वाक्या
र्थस्तं प्रत्येव तेन वेद्यांशे पत्वावगमात् व्यवहितत्वेनायोग्यत्वाच्च न कामिनस्तत्र स्वसाधनताबुद्धिः कर्त्तृव्यापारगोचरगोचरतया
करणतानुस्यात् यथाह भवनाथो न स्वर्गकामो व्यवहितसाधनयागादिकार्यतया बोद्धुमलमिति एतदुक्तं भवति फलं प्रति साधनत्वा
भावेपि फलसाधनीभूतनियोगसाधनत्वादेव यथा यागस्य फलकामिनस्तद्द्वारा नियोगप्रवृत्तिर्घटते तेन तथा प्रकृतेपीति॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

वि॰सु॰ ननु यदि न यागः स्वर्गं प्रति करणं कथं तर्हि तत्कामिनो यागे प्रवृत्तिरनुपाये प्रवृत्त्यभावादिति शंकते यागादेरिति अकरणे
टी॰न॰ प्रवृत्त्यदर्शनवत्साधनेपि प्रवृत्तिर्न दृष्टा न हि हासाधनेपि प्रवृत्तिमंगीकुर्वतोऽकरणे प्रवृत्तिर्न विरुध्यते दर्शनस्य नियामक
१०१ त्वानंगीकारादिति परिहरति साधनत्वेति साधनसाधनत्वात्प्रवृत्त्युपपत्तिं ब्रुवाणस्य करण—करणत्वादित्युत्तरं न च यत्का
मिनो यत्र नियोगस्तत्तस्य साधनमित्यपि नियमः ग्रामादसाधनेपि भोजनादौ ग्रामकामो भुंक्ष्वेति नित्योतविशेषणेऽन्न
भोजनार्थं नियोगदर्शनात् अथ कर्तृव्यापारगोचरगोचरत्वात्करणमिति मतं तत्र साधनत्वरहितस्य करणत्वांगीका
रे व्याहतेः सामान्यव्यावृत्तौ विशेषव्यावृत्तेरित्याह किं चेति साधकतममिति तमपा साधनविशेषत्वमुक्तमिति भावः न सा

यागादेः फलं प्रत्यकरणत्वे तत्कामिनस्तत्र कथं प्रवृत्तिरिति चेन्न साधनत्वाभावेपि तत्र तस्य प्रवृत्तिरनुप-
पत्तेरित्युक्तम् किं च साधनत्वाभावे तद्विशेषरूपकरणत्वमपि न स्यात् साधकतमं करणमिति पाणिनिस्मर-
णात् अथ परोद्दिष्टकृतिव्याप्यत्वं करणत्वं तेन साधनत्वाभावेपि करणता किं न स्यादिति चेन्न तर्हि नियोग-
स्यापि परोद्दिष्टकृतिव्याप्यतया करणत्वप्रसंगः तस्यापि स्वर्गादिफलोद्देशेन प्रवृत्तकृतिव्याप्यत्वात् अथ सा
क्षादिति विशेषणाददोषः नैवमिति कर्तव्यस्य प्रयाजादेरंगजातस्य धात्वर्थतया साक्षात्कृतिव्याप्यत्वेन करणत्व
प्रसंगात् ॥ १०१

धनविशेषः करणमपि त्वन्यदुद्दिश्य प्रवृत्तप्रयत्नव्याप्यं यथा छेदनोद्देशेन प्रवृत्तप्रयत्नव्याप्यत्वं हि कुठा
रादेः करणत्वं न तु तो व्याघातः इति शंकते अथेति तदिदमतिव्यापकं स्वर्गं प्रत्यकरणस्यापि नियोगस्य स्वर्गोद्देशिपुरुषप्रयत्नव्याप्यत
या करणत्वप्रसंगादिति दूषयति तर्हीति आपाद्य चेदं ननु परोद्दिष्टकृत्या साक्षाद्व्याप्यत्वं करणत्वं तथा च न नियोगेतिव्याप्तिः न राम॰
स्वभावार्थव्यवधानादिति शंकते अथेति तर्हीति कर्तव्यतास्वपि भावार्थस्य साक्षात्कृतिव्याप्यतया यागवदेव करणत्वप्रसं १०१
गइत्यतिव्याप्त्या दूषयति नैवमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्तु साधनत्वव्यावृत्तौ करणत्वव्यावृत्तिरित्युक्तं तत्परिहर्तुं शंकते उभयोरिति प्रयाजादेः षड्यागस्येव स्वर्गं प्रति साधनत्वा विशेषे प्रयाजादेरितिकर्तव्यत्वमितरस्य करणत्वमिति प्रसिद्धो विभागो न स्यात् अतः करणेतिकर्तव्यविभागलोभादेवासाध नस्यैव यागस्य स्वर्गं प्रति करणत्वं स्वीकर्तव्यमित्यर्थः परिहरति न तवापीति यथा हि नियोगं प्रति साधनत्वाविशेषेप्ययं वि भागस्तथा स्वर्गं प्रतीति भावः यश्च कामाधिकारे करणेतिकर्तव्यताविभागो गुरुमतानुसारिभिः परिकल्प्यते तमपि प्रसंगाद्दू षयति नच करणांशइति अथवा साधनत्वाविशेषेपि कामाधिकारे करणत्वप्रयोजकमाशंक्यानेन दूष्यते तत्र हेतुः सेतिक॰

उभयोः साधनत्वाविशेषे करणेतिकर्तव्यतालक्षणो विभागो न सिध्येदिति चेन्न तवापि नियोगसाधने यागे तदिति कर्तव्येषु च साधनत्वाविशेषाद्विभागानुपपत्तेस्तुल्यत्वात् नच करणांशे रागतः प्रवृत्तिरितिकर्तव्येषु तु विधित इति विभागो युक्तः सेतिकर्तव्यताकस्यैव करणतया तत्र रागतः प्रवृत्तेरवर्जनीयत्वात् तथा लोके दृष्टत्वात् एतेन श्येनाग्नीषोमीयवैषम्यमप्यपास्तं श्येनवदग्नीषोमीयेपि रागतः प्रवृत्तेः समानत्वात् नच प्रथमतो नियोगेनैव संबद्धेतिकर्तव्यता पश्चात्तत्प्रयुक्ता फलेन संबध्यते ॥

तेव्यतेति यथा हुद्यमननिपातनव्यापारविशिष्टस्यैव कुठारस्य करणत्वं नतु केवलस्य तथा सेतिकर्तव्यताकं करणं तत्र चेद्रागतः प्रवृत्तिस्तर्हीति कर्तव्यतास्वपि रागत एव सेति न विभाग इत्यर्थः अथवा इतिकर्तव्यतासाध्योपकारसापेक्षत्वात्करणस्य तदपेक्षेष्वपि रागतः प्रवृत्तिरित्यर्थः तथा नित्ये विभागानुपपत्तिरित्यपि द्रष्टव्यं करणेतिकर्तव्यतयो रागतः प्रवृत्तिसाम्यापादनेन श्येनाग्नीषोमीययागयोरपि वैषम्यमपास्तमित्याह एतेनेति एतेनेत्यस्यैव विवरणं श्येनवदिति ननु नेतिकर्तव्यतासु रागतः प्रवृत्तिः प्रथमत एव नियोगेन संबंधात्तस्य च रागविषयत्वाभावात् यागस्य तु नैवं प्रथमतः फलसंबंधित्वात् फलस्य च रागविषयतया तत्करणेपि रागत एव प्रवृत्तिरित्यत आह नच प्रथमत इति ॥

CC-0. In Public Domain. Digitization by eGangotri



हेतुमाह ग्राहकेति न प्रथमतः फलेन यागस्य संबंधः अप्रकरणित्वात्फलस्याप्रकरणिता चेतरेणासंबंधत्वात् तेनेति कर्तव्य
तावदेव यागो विनियोगशेषतया ग्राहकेण गृहीतः पश्चात्तमेव प्रधानान्वयं निर्वोढुं तद्द्वारेण परस्परान्वयः स च दृष्टतो भवतीति पा
र्ष्टिकस्तु स्याच्च दशायां यागस्वर्गयोरप्यन्वय इति भवतामंगीकार इत्यर्थः किंच विध्याक्षेपलक्षणोपादानप्रमाणात्फलकामित्व
ति व्याप्यतानुपपत्तिलक्षणान्नियोगफलयोः संबंधो भिप्रेयते आक्षेपश्च विषयनियोज्यविशिष्टनियोगप्रतीत्याऽतोपि न प्राक
रणिकत्वान्नियोगेनैव विषयभूतयागस्य प्रथमं संबंधो वक्तव्यः ननु फलेनेत्याह फलप्रतीतीति तस्मादुभयत्रागतो वा विधितो वा

यागस्य तु फलं प्रति करणीभूतस्यैव नियोगेन पश्चात्संबंध इति विशेषमं ग्राहकग्रहणदशायां प्राकरणिकसकलप
दार्थानाम् विशेषेण नियोगसंबद्धतातद्दशादेव परस्पर संबंधस्य पार्ष्टिकस्यांगीकारात् फलं प्रति करणत्व
स्य विध्याक्षेपलक्षणोपादानाधीनतया तत्प्रतीतेर्विशिष्टनियोगप्रतीत्युत्तरकालीनत्वात् कथं चैवं सति श्येनेना
भिचरन् यजेतेति विधौ जाग्रति रागतः प्रवृत्तौ निषेधानुप्रवेशाद् धर्मता स्यात् नहि विधिसंस्पृष्टे निषेधः प्रवर्त
मानो नर्थतां बोधयितुमीष्टे तथा सति षोडशिग्रहणस्यापि नातिरात्रे षोडशिनं गृह्णातीति निषेधादनर्थत्वप्रसं
गात् उक्तं हि भट्टाचार्यैः यद्यपि स्याद्विधिस्पृष्टे निषेधो नैव तादृशं विज्ञायते ह्यनर्थत्वं षोडशिग्रहणादिवदिति।

प्रवृत्तिः समानेत्यर्थः ननु यद्यप्युभयत्र रागतः प्रवृत्तिः समाना तथापि न हिंस्यात्सर्वा भूतानीति निषेधानुप्रवेशाद् धर्मेनाश्येन न
यागस्येतरस्य न तथा तद्भावादिति वैषम्यमिति नेत्याह कथं चैवं सतीति रागतः प्रवृत्तिस्तावदुभयत्र समानेत्यावेदितं तथा स
ति विधिस्पर्शास्पर्शाभ्यां वैषम्यं वक्तव्यं न चैतद् युक्तं इत्येते पि विधेर्विद्यमानत्वादिति भावः एतदेव षोडशिप्रतिवेधासमर्थयते न
हि विधिसंस्पृष्टेपि चेन्निषेधादनर्थत्वं तर्हि नातिरात्रे षोडशिनं गृह्णातीति विहितस्यापि षोडशिग्रहणस्य नातिरात्रे षोडशिनं गृह्णा
विधिसंस्पृष्ट इत्यादिना ।।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न वैतद्युक्तं आह हि यद्यपि स्याद्धि विधिस्पृष्टे निषेधो नैव तादर्थ्यं विज्ञायते ह्यनर्थत्वं षोडशिग्रहणादिवदित्यर्थः व्यापार इह विध्यं वि
धेर्दर्शयन्नस्येन यागस्याधर्मतामुपपादयति पूर्ववादी नन्वित्यादिना तदेतदग्नीषोमीयहिंसायामपि समानमिति परिहरति।
नो क्रोतरत्वादिति प्रकारान्तरेणाधर्मतामाशङ्कते नन्विति अहीनोऽहर्गण निर्वर्त्यः क्रतुविशेषः अन्हःस्वः क्रताविति स
मूहे गम्यमाने अहः शब्दात्खप्रत्ययविधानात्परिहरति मैवमिति निषिद्धत्वान्निर्णये प्रायश्चित्ता निर्णयात् न हि ध्यानस्य
च नैमित्तिकत्वेनाप्युपपत्तेः निषिद्धत्वविधानात्प्रायश्चित्तविधानाच्च निषिद्धत्वे परस्पराश्रयमिति भावः ननु व्यपोहनी

ननु विधेर्द्वि विधो व्यापारो भावार्थफलयोः साध्यसाध नसंबंधबोधो भावार्थानुष्ठानबोधश्चेति तत्रैव बा
नुष्ठानबोधो यत्र भावार्थेऽन्यतो न प्रवृत्तिः श्येनादौ च फलोपायत्वे ऽधिगते रागत एव प्रवृत्त्युपपत्तेर्नानुष्ठा
पकत्वं ततश्च निषेधप्रवेशाच्छ्येनादेरनर्थत्वमिति चेन्न उक्तोत्तरत्वात् उक्तं हि हैमिकत्तव्यस्यैव करणत्वात्तत्र
रागतः प्रवृत्तावितिकर्तव्येऽपि तत एव प्रवृत्तौ श्येनवदग्नीषोमीयस्यापीतिकर्तव्यस्यानर्थताप्रसज्येतेति।
नन्वभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहतीति प्रायश्चित्तविधानादनर्थता निश्चीयत इति चेन्नैवं नैमित्तिक
त्वेनाप्यस्योपपत्तेः यथा हि वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेदित्यनृतवदनविधानानन्तरं तत्पावनाय नि
र्वाप्यश्चरुः सारस्वतो द्विजैरिति नैमित्तिकत्वेन सारस्वतश्चरुर्निर्वाप्यो विधीयते न त्वनृतवदनजनितपापनिब
ति दोषनिबर्हणश्रवणात्प्रायश्चित्तत्वमिति तत्राह यथा हि वर्णिनामिति यत्र यस्मिन्समये ब्राह्मणादीनां व((र्हणाय॥
धः प्राप्नोति तत्र तदा साक्ष्यनृतं वदेत् अनृतवदनमवदनस्याप्युपलक्षणं ततश्च यदि वदनमात्राद्वधः प्राप्नोति तदा न वदेत् यदा
नु सत्यवदनात्तदानृतं वदेदित्यर्थः तत्पावनायेति तच्छब्दार्थं द्विजैस्त्रैवर्णिकैः सारस्वतः सरस्वती देवताकश्चरुर्निर्वाप्यः नि
र्वपणेन यागपर्यन्तं लक्ष्यते ननु तत्पावनायेति श्रवणात्प्रायश्चित्तं नैव किन्त्वस्यास्तीति तत्राह न त्वनृतवदनेति॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

१ चि·सु· नत्र हेतुः अनृतवदनेनेति कामनः प्राप्तं ह्यनृतवदनं नानृतं वदेदिति निषिद्धं निषिद्धानुष्ठाने च प्रायश्चित्तं प्रकृते तु विधितः प्रवृत्तेर्न प्राय-
टी·न· श्चित्तं युक्तं निषिद्धानुष्ठानशंकाभावादित्यर्थः एवं च विषयविभागेन प्रायश्चित्तव्यवस्थापनमपि केश्चित्क्रियमाणमयुक्तमित्य-
१०३ वधानरविचारमुपसंहरति नृदेवमिति यत्र प्राधान्यसमर्थनं कृतं स्वर्गादिसाधनत्वेपि तद्दूषयति नचेति पूर्वपक्ष्याशयमनूद्य दूषय-
ति नचेति गर्भदासस्वामिनोश्चैतनतया स्वस्वप्रयोजनोद्देशेन प्रवृत्तिर्युक्ता अत्र तु नियोगस्य स्वामिस्थानीयतानयुक्ता अचेतनत्वात्

अनृतवदनेकामनो प्रवृत्तेर्विधित एव तत्र प्रवृत्त्यंगीकारात् एवमत्रापि तदेवं नित्यकाम्यवैषम्यस्य वक्तुमशक्यत्वान्नित्यव-
त्काम्येपि नियोगस्य फलसाधनत्वकल्पनानिः प्रामाणिका पुरुषार्थत्वे नियोगस्य स्वर्गसाधनताभ्युपगमानर्थकताप्रस-
ङ्गात् नच स्वर्गादिसाधनत्वे नियोगस्य प्राधान्यमपि संभवति। स्वर्गादिसुखशेषत्वात् नच स्वानुकूलनियोज्यसिद्ध-
ये स्वर्गादिकं साधयतो नियोगस्य स्वामिवत्प्राधान्यानुपघातः दृष्टान्तवैषम्यात् तथाहि द्वौहि तत्र स्वामिभृत्ययोः
प्रयत्नौ स्वार्थोद्देशेन प्रवृत्तौ परस्परमुपकुर्वाते न तथेह नियोगस्य चेतनता येन स्वकीयप्रयत्नेन स्वर्गमात्मार्थ-
तया आक्षिपेत् प्रस्तुत गर्भदासस्थानीयो नियोज्यः स एव स्वर्गाय प्रवृत्तो नियोगमेव स्वर्गशेषतया स्वीकुर्यात्
नच स्वर्गादिसुखस्यान्यार्थता स्वभाववैपरीत्यापत्तेः यदर्थं सर्वं यत्र नान्यार्थं तत्सुखमिति हि सुखस्य लक्षणमा-
चक्षते तत्कथमन्यशेषता स्वर्गादिसुखस्य भवेत् नचालौकिकत्वेपि नियोगस्य यूपाहवनीयादिवत्प्रदानत्वस-
अत एव न प्रवृत्तिरपीत्यर्थः न केवलं नियोगस्य प्राधान्याभावः प्रत्युत स्वर्गं प्रति शेषत्व (( समभिव्याहारात्सवेधग्रहणम्॥
मेवेत्याह प्रत्युतेति ननु कथमिदमवधार्यते स्वर्गशेषो नियोगः ननु विपरीतमिति तत्राह नचेति अथवा पूर्वमचेतनत्वान्नियोगस्य राम·
न स्वर्गस्य न च्छेषत्वमित्युक्तं इदानीं स्वभावविरोधादपि न तथेत्याह नच स्वर्गादीति यत्र नान्यार्थं तत्सुखमित्युक्ते दुःखेपि स्याद्दत उक्तं य- १०३
दर्थमिति स्वर्गादिसुखस्यान्यशेषत्वं यत्र नान्यार्थमिति लक्षणविरुद्धमित्यर्थः यत्तु यूपाहवनीयादिदृष्टान्तेन तदपि वैषम्यं दर्शयन्परि-

१०३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



मत्यनुमानमेवश्लोकेनदर्शयति विवादाध्यासितादिति लौकिकलिङादौ सिद्धसाधनतापरिहाराय विवादपदं वैदिकलिङादयइ
त्यर्थः क्रियारूपं कार्यं क्रियाकार्यं तदभिधायिनइत्यर्थः नियोगेनार्थान्तरतानिरासाय क्रियाग्रहणं नचलौकिकलिङादित्वमुपा
धिः लौकिकपदवैयर्थ्ये नपक्षेतरत्वात् नन्वेवमपित्वत्पक्षे किं प्रमाणं ननावदिदमेव प्रतिरोधमात्रतयास्वपक्षासाधनत्वात् नैतत्सार्थं
बाधकत्वेनप्रतिरोधकत्वासिद्धेः समबलबोधितसाध्यविपर्ययत्वं तच्चात्रसमबलत्वं अधिकबलत्वादितरस्यदुर्बलत्वात्तदाहइष्टसा
धनेति वादिनोवेदांतिनइतिचद्वितीयासाध्यवैकल्यमेवविवृणोति लौकिकेति एतत्क्रियातिरिक्तकार्याभिधायि त्वेगामानयेत्या

तत्रयूपाहवनीयादेर्यूपतस्तीत्यादिप्रसिद्धपदसमभिव्याहारान्यथानुपपत्तिगम्यत्ववन्नियोगस्यार्थापत्तिगम्यत्वा
नंगीकारात् अंगीकारेवापूर्वत्वव्याघाताच्चयत्तुलिङादेः क्रियातिरिक्तकार्याभिधायित्वानुमानंतत्प्रत्यनुमानपराहत
त्वादसाधनंतथाहि विवादाध्यासिताःशब्दाःक्रियाकार्याभिधायिनःकार्यप्रत्ययहेतुत्वाद्गामानयेत्यादिशब्दवत् १८इष्ट
साधनवादिनोवेदांतिनः प्रतिसाध्यविकल्पत्वाच्च लौकिकलिङादिशब्दानामपिश्रेयःसाधनबोधकत्वाभ्युपग
मात् व्यापकानुपलब्धिपराहतत्वाच्च तथाहि तदभिधायकत्वं तत्रसंगतिग्रहणेनव्याप्तं तच्चमानान्तरानधि
गतादपूर्वाद्व्यावर्तमानंलिङादीनांतदभिधायकतांव्यावर्तयति नचक्रियातिरिक्तकार्यानभिधानेस्वर्गका
मोयजेतेत्यादिशास्त्रस्याप्रामाण्यप्रसंगः क्रियाया एवापूर्वोवान्तरव्यापारायाः परमेश्वरप्रसादोवांतरव्यापाराया
दि यदंहि पूर्ववादिनादृष्टांति तंनच तत्रापिकार्याभिधायित्वमिष्टसाधनताभिधायित्वांगी((वाफलसाधनत्वोपपत्तेःप्रदर्शि
कारान् मयेत्यर्थः इदंचासिद्धेरप्युपलक्षणंदूषणांतरंचाह व्यापकेति व्यापकं विवेचयन् तदनुपलब्धिमिहोपलंभयति तथाही
त्यादिना यद्यद्विषयस्याभिधायकं तत्तस्यगृहीतसंगतिकमितिव्याप्तंनच प्रमाणांतरानधिगतेऽपूर्वे तत्संभवइतिव्यापकव्यावृ
त्या व्याप्यव्यावृत्तिरग्निव्यावृत्त्येवधूमव्यावृत्तिरित्यर्थः यस्तु तेन विपक्षेबाधकःतर्कउक्तस्तमपिप्रशिथिलमूलमुन्मूलयति नचक्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



वादार्थमुपसंहरन्समन्वयोपयोगमाह तदेवमित्यादिना हितसाधनतामवलंब्य पदार्थवद्गते विधिबोधकवाक्यमपि परमार्थतो बोधविधौ तु तरां परमात्मनि शिरोक्षिनदा अखंडबोधकत्वमुक्तमाक्षिपति ननु कथमित्यादिना अखंडार्थत्वस्यासंभवलक्षणान्निदूषयति किमिदमित्यादिना खंडशब्दस्य च विशेषभेदं चार्थमादाय प्रथमद्वितीययोः प्रवृत्तिस्तृतीयचतुर्थयोः स्वविवक्षावशात्तेषामेवैतत्पर्यायशब्दानामेवेत्यर्थः पंचमस्तु खंडशब्दस्य संसृष्टमर्थमादाय निर्विशेषाणामप्यन्यविशेषाणां भिन्नत्वं परैरंगीकारात् नाद्यः। स्य ४
द्वितीयशंकरः नात्म्यं अविहितेषु लक्षितेषु वासंभवति यथा गंगायां यादांसीति यथा वा गंगायां घोष इति तदुभयमपि प्रकारं

तदेवं विधिवाक्यानामपि सिद्धार्थबोधकत्वाद्विधिसंस्पर्शविधुराणां सत्यज्ञानादिवाक्यानामखंडैकरसब्रह्मलक्षणसिद्धार्थावबोधकत्वं सुतरां सिद्धमिति सिद्धम् १० ननु कथं वेदान्तानामखंडार्थत्वं तस्य निर्वक्तुमशक्यत्वात् तत्र प्रमाणासंभवाच्च तथाहि किमिदमखंडार्थत्वं किं निर्विशेषवस्तुपरत्वं उत निर्भेदार्थनिष्ठत्वं आहोस्वित्पर्यायशब्दानां प्रातिपदिकार्थमात्रपर्यवसायित्वं अथवा तेषामेवैकप्रातिपदिकार्थमात्रपर्यवसायित्वे संसर्गागोचरप्रमाजनकत्वं वा नाद्यः विकल्पासहत्वात् तथाहि पदानां निर्विशेषवस्तुपर्यवसायित्वमभिधायकतया लक्षकतया वा स्यात् न प्रथमः तस्यात्यंतमप्रसिद्धतया संबंधाग्रहणेन पदानां तत्पर्यवसायित्वासंभवेन लक्षणस्यासंभवित्वप्रसंगात् नापि द्वितीयः अप्रसिद्धत्वादेवाभिधेयाविनाभावस्य लक्षणाहेतोरसंभवेन प्राचीनदोषानुषंगात्

१०४

विकल्प्य दूषयति तस्यात्यंतमिति अंत्यविशेषाणां भवद्भिरनंगीकारादिति भावः लक्षणापक्षं दूषयति नापीति अभिधेयाविनाभूतं हि लक्ष्यं दृष्टं यथा गंगायां घोषः प्रतिवसतीत्यत्र गंगाऽविनाभूतं तीरं गंगापदेन न पुनरनविनाभूतं अविनाभावश्चायं भूयः संबंधदर्शनमात्रं मंचाः क्रोशंतीत्यत्र मंचपुरुषयोर्मुख्याविनाभावाभावेऽपि लक्षणादर्शनात् न चात्यंताप्रसिद्धस्य निर्विशेषवस्तुनोऽभिधेयाविनाभावः सम्भवतीति लक्षणासंभवाल्लक्षणासंभव इत्यर्थः॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वभिधेयासंबद्धमपि क्वचिल्लक्ष्यं दृष्टं यथा कश्चित्किमस्य गृहे भोक्तव्यमिति केनचित्पृष्टः तन्निवारयन्नाह विषं भुंक्ष्वेति नचात्र ल
क्ष्यमाणे तद्गृहनिष्ठभोजननिवृत्तेः विषभक्षणस्य च सम्बन्धोस्ति अथ च लक्ष्यते तत्कस्य हेतोर्वाक्यप्रामाण्यानुपपत्तेरेवमत्रापि सन्ना
दिवाक्यप्रामाण्यानुपपत्तेरेव किमिति न लक्षणोन्नत आह नचाभिधेयेति तत्र हेतुः अत्यंताप्रसिद्धेरिति अनुपपत्तिरपि हि यायेलक्ष
णां प्रवर्त्तयति नत्वयोग्येइतरथा स्वप्नादेरपि लक्षणाप्रसंगात् तस्मात्प्रामाण्यानुपपत्तिरपि अन्यपरतायामेव बीजं न त्वखण्डार्थ
तायामिति भावः द्वितीयं दूषयति अर्थनिर्भेदवस्त्विति निर्भेदत्वं नाम भेदाभावविशिष्टत्वमिति प्रथमपक्षं दूषयति नाद्य इति यथा

नचाभिधेयाविनाभावं विना विगरमभ्यवहरेत्यादिगिरामिव वाक्यप्रामाण्यानुपपत्तिरेव लक्षणाक्षेपिका अत्यंताप्रसि
द्धत्वेन गगनारविन्दादेरिव लक्ष्यत्वानुपपत्तेः अथ निर्भेदवस्तुपरत्वं तद्रूपेण निर्भेदत्वस्यानिरुक्तेः तथाहि निर्भेद-
त्वं नाम किं भेदाभावविशिष्टत्वं उत भेदाभावोपलक्षितत्वं नाद्यः तत्परत्वे वाक्यस्य निर्घटं भूतलमितिवत्संसृष्टार्थ
त्वप्रसंगात् न द्वितीयः तत्रापि संसृष्टार्थत्वस्यानतिवृत्तेः तथा भेदस्य योभावस्तेनोपलक्षणेनोपलक्षितवस्तुपर
त्वे कथं न संसृष्टार्थता वस्तुमात्रमेव तत्र प्रतिपाद्यं भेदाभावस्तु द्वारमिति चेत् तथापि नाखण्डार्थता उपलक्ष-
णस्येतरेभ्यो व्यावृत्तत्वेन प्रतीतावखण्डार्थत्वासंभवात् अप्रतीतौ चानुपलक्षकत्वादेवोपलक्षणस्य वै

हि निर्घटं भूतलमिति घटाभावविशिष्टभूतलबोधकस्य नाखण्डार्थत्वमेवं तत्रापीत्यर्थः भेदाभावोप ((यर्थ्यप्रसंगात्॥
लक्षितत्वपक्षं दूषयति न द्वितीय इति तत्रापि वक्तव्यं किं भेदाभावोपलक्षितविशिष्टमुत वस्तुमात्रमित्याद्ये प्राह भेदस्य यो भाव
इत्यादिना द्वितीयं शंकते वस्तुमात्रमेवेति दूषयति तथापीति भेदाभावेन यद्ब्रह्म लक्ष्यते तत्किमितरेभ्यो व्यावृत्तं प्रतीयते न
वा प्रथममाह उपलक्ष्य माणस्येति व्यावृत्ति विशिष्टस्याखण्डत्वाभावादित्यर्थः द्वितीयं दूषयति अप्रतीतौ चेति कादाचित्क
व्यावर्त्तकमुपलक्षणं नाम तस्य चाव्यावर्त्तकत्वं व्याहतमित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वि॰तु॰ अपर्य्यायशब्दानां प्रातिपदिकार्थमात्रनिष्ठत्वमिति तृतीयं दूषयति नापि तृतीय इति यस्य हि लक्षणवाक्ये लक्ष्यप्रातिपदिकार्थमा-
टी॰न॰ त्रपर्य्यवसितमिति मतं तन्मते लक्षणवाक्ये लक्ष्यजातानां स्वरूपपर्य्यवसितेन तथापि नाखण्डार्थता भिन्नत्वाल्लक्ष्ययोरित्यर्थः अथवा
१०५ पयःपावकशब्दयोरपि शीतोष्णस्पर्शवत्तावेवार्थौ जातिमात्रपरत्वायोगात् तथा च शीतोष्णस्पर्शवद्द्रव्ययोः पयःपावकशब्दयो-
श्च प्रातिपदिकार्थमात्रपरत्वमसिद्धं वाक्याखण्डार्थतेत्यर्थः अपर्य्यायशब्दानामेकप्रातिपदिकार्थत्वमिति चतुर्थपक्षं दूषयति नापि
चतुर्थ इति यदि ह्येकमेव वस्तु बोधयिषितं तदेकेनैव बुद्धमिति पदान्तरप्रयोगाद्वैयर्थ्यं च स्यात् न च पदमात्रं वाक्यमिष्टं तस्मात्

नापि तृतीयः शीतोष्णस्पर्शवतौ पयःपावकाविव तत्रापर्य्यायशब्दानां प्रातिपदिकार्थमात्रपर्य्यवसायित्वेप्य-
खण्डार्थत्वादर्शनात् नापि चतुर्थः तथा सत्येकेनैव तत्प्रतिपत्तेः पदान्तरप्रयोगस्य वैयर्थ्येन लक्षणस्यासंभ-
वित्वापातात् व्यवच्छेद्यभेदाद्वैयर्थ्यमिति चेन्न तदनिरुक्तेः तथा हि किं व्यवच्छेद्यानां व्यावृत्तयः पदैः
प्रतिपाद्यन्ते अथवा तद्धिशिष्टमाहोस्विदुपलक्षितं स्वरूपमात्रं वा न तत्र न प्रथमद्वितीयौ तथा सति संसृ-
ष्टार्थत्वेनाखण्डार्थत्वानुपपत्तेः नापि तृतीयः तत्राप्यन्यतो व्यावृत्तस्य प्रतिपादने प्राचीनदोषानुषंगात् स्व-
रूपमात्रप्रतिपादने च पदान्तरप्रयोगवैयर्थ्यस्य दर्शितत्वात् नापि पंचमः तथात्वस्यान्यतोऽदृष्टचरत्वेन लक्ष-
णासंभवित्वात् ॥ ६ ॥ 90५

संभविलक्षणमित्यर्थः यद्यप्येकमेव लिलक्षयिषितं तथापि व्यवच्छेद्या बहवः सन्ति असम्भ
जाड्यादयः न चैकपदमात्रात्सर्वेषां व्यवच्छेदः तदर्थमात्रेण तेषां विरोधाभावात् अतो न पदान्तरवैयर्थ्यमिति शंकते व्यवच्छेद्ये राम॰
ति दूषयति न तदनिरुक्तेरित्यादिना न ह्यव्यवच्छेदमात्रप्रतिपादने व्यवच्छेदविशिष्टवस्तुप्रतिपादने च संसृष्टार्थतया अखण्डार्थता १०५
विरोधीति दूषयित्वा व्यवच्छेदोपलक्षितवस्तुप्रतिपादनमिति तृतीयपक्षं दूषयति नापि तृतीय इति संसर्गागोचरप्रमाजनकत्वमिति
पंचमपक्षं दूषयति नापीति सर्वत्र हि वाक्यार्थस्य पदार्थसंसर्गतया वा संसृष्टपदार्थतया वा संसर्गग्राहि वाक्यमित्यसंभविलक्षण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सिद्धान्त्यभिमतसंभवस्थलमाशंकते ननु प्रकृष्टेति अत्र हि चंद्रप्रातिपदिकार्थमात्रं पृष्टं एतद्वाक्यविषयः न पुनः प्रकर्षादिसंसर्गोस्ति। स्याबुभुत्सितत्वादिति तदेतद्दूषयति मैवमिति तदितरव्यावृत्तिर्वा तच्छब्दव्यवहारो वा लक्षणार्थः उभयथापि संसृष्टार्थपरत्वान तिवृत्तिस्तद्धि प्रकर्षादिसंसर्गपरत्वाभावेपि भवत्येव विधान्तरेण संसृष्टार्थत्वमित्यर्थः उदाहरणान्तरमाशंकते ननु सोयं देवद त्त इति देवदत्तैक्यस्यैकैकपदादपि सिद्धेर्वाक्यवैयर्थ्यमाशंक्योक्तं भेदभ्रमव्युदासेनेति यद्यपि लक्षणवाक्यमिदं न भवति तथा पि महावाक्याखंडार्थत्वसंभावनायामयमेव भूमिरितीदमाशंकितं यदि ह्युभयोरपि लक्षणपादे देवदत्तमात्रपर्यवसितमिदं स्या

ननु प्रकृष्टप्रकाशश्चन्द्र इत्यादिलक्षणवाक्येष्वदृष्टं संसर्गागोचरप्रमितिजनकत्वमिति चेन्मैवं लक्षणवाक्यैरपि लक्ष्यस्य सजातीयविजातीयेभ्यो व्यावृत्तत्वेन प्रतिपादनात् तच्छब्दव्यवहर्त्तव्यत्वेन प्रतिपादनाद्वा लक्षणवाक्याना मपि संसृष्टार्थत्वानतिवृत्तेः ननु सोयं देवदत्त इत्यादिषु देवदत्तगतभेदभ्रमव्युदासेन तत्स्वरूपमात्रपर्यवसायित्वम पर्यायशब्दानामदृष्टमिति चेन्मैवं तत्रापि परोक्षदेशकालोपलक्षितस्यैतद्देशकालविशिष्टत्वप्रतिपादकतया संसृष्टार्थत्वानतिवृत्तेः तावतैव च भेदभ्रमव्युदासादुभयपदलक्षणाभ्युपगमे गौरवप्रसंगाच्च तदेतेनाखंडार्थत्व निरुक्तिः नापि तत्र प्रमाणं प्रकृष्टप्रकाश इति वाक्यार्थश्चन्द्रप्रातिपदिकमात्रार्थस्तत्प्रश्नोत्तरार्थत्वात् यन्नैवं तन्नैवं यथा

तदाखंडार्थत्वं तत्त्वेन तदस्मिन्नेतद्देशकालसंसर्गप्रतिपादनपरत्वात् तस्य "यथा वाक्यान्तरार्थ इति व्यतिरेक्यनुमानमस्तीति चेन्मै दस्यैव केवलं लक्षणाश्रयणात् तावन्मात्रादेव भेदभ्रान्तिनिवृत्तेः विना कारणं लक्षणामतिप्रसंगात् तदेतदाह मैवं तत्रापीति गौरवप्रसं गादिति प्रथमं मुख्यार्थप्रतीति सत्त्वमित्यज्य तत्त्वं यादर्शान्तरप्रतीतिश्चेति बहुकल्प्यमित्यर्थः एतेनार्थादेकत्वप्रतिपादनाद्वंसा स्तादेकत्वप्रतिपादनमित्यपि परास्तम् लक्षणागौरवादेव यदत्र न्यायरत्नदीपावल्यामनुमानमुक्तं तदनुवदति प्रकृष्टेत्यादिनासि द्धसाधनतानिवृत्त्यर्थं मात्रग्रहणं संसृष्टपदार्थानां वाक्यार्थत्वेन चंद्रपदार्थस्यापि तत्स्वीकारात् तत्प्रश्नस्योत्तरपद्वाक्यं तदर्थत्वादित्यर्थः

CC-0. In Public Domain. Digitization by eGangotri

वि॰सु॰ टी॰नं॰ १०६ अत्रसाध्यंचंद्रप्रातिपदिकार्थः क्वचित्प्रसिद्धोनवेतिविकल्प्यदूषयति तथाहीत्यादिना ननु माभूत्केवलव्यतिरेकिता अन्वयव्यतिरे-
कितातुभवतु किमेतावतेत्यत आह अन्वयेति कतिवराटका इतिप्रश्नोत्तरार्थे वराटकसंख्याविशेषे वराटकप्रातिपदिकार्थत्वेना-
प्तिसंख्यासंबंधपरत्वाद्वाक्यस्येत्यर्थः वराटकः कपर्दकः नचतत्प्रातिपदिकप्रश्नोत्तरार्थत्वोपाधौ व्याप्तिः क्वचिदपि प्रातिपदिकमा-
त्रनिष्ठवाक्यासंप्रतिपत्ते अन्यथा तस्यैव दृष्टांततोपपत्तौ एतत्साधनवैयर्थ्यापातादिति अतएव चंद्रप्रातिपदिकप्रश्नोत्तरार्थ-
त्वोपाधावपि न व्याप्तिरसिद्धेरेव आनंदबोधाचार्यानुमानमुद्भाव्य दूषयति विमतमित्यादिना विज्ञानादिवाक्यमित्यर्थः उक्तप्रका-

तथाहि चंद्रप्रातिपदिकमात्रार्थोऽन्यत्रप्रसिद्धो नवा आद्ये तत्र हेतोर्दृष्टत्वादन्वयव्यतिरेकितया केवलव्यतिरेकित्वव्याघा-
तः अदृष्टत्वे तु सत्यपि सपक्षे तत्र हेतोरसाधारण्यानैकांतिकता द्वितीये पुनरप्रसिद्धविशेषणतैव अन्वयव्यतिरेकितायां च
यो यत्प्रश्नोत्तरार्थः स तन्मात्रपदिकमात्रार्थ इति व्याप्तिरभ्युपेया तथा च त्वत्करे कतिवराटका इति प्रश्नस्य पाणौ पंचव-
राटका इति प्रतिवचने व्यभिचारः न च विमतमखंडार्थे लक्षणवाक्यत्वात् पृथुबुध्नोदराकारः कुंभ इति वाक्यवदित्य-
नुमानं मानं लक्षणवाक्यानामप्युक्तप्रकारेण संसृष्टार्थपरतया दृष्टांतस्य साध्यविकलत्वात् न देवं लक्षणप्रमाण-
योरभावात्त्वाखंडार्थत्वे शब्दानां विवादाध्यासितं पदार्थसंसर्गप्रतीतिजनकं वाक्यत्वात् गवानयनादिवाक्यवत्
न च जरद्गवादिवाक्ये व्यभिचारः तस्य वाक्याभासत्वात् आकांक्षासन्निधियोग्यतावंति पदानि वाक्यमिति हि वाक्यवि-

रेणेति इतरव्यावृत्ते व्यवहारस्य वा बोधनादित्यर्थः स्वपक्षे चानुमानमाह पूर्ववादी विवादाध्यासितमिति सत्यज्ञानादिवाक्यमित्यर्थः १०६
प्रतीतिः प्रमितिः प्रयोगद्वये च संसृष्टपदार्थस्य पदार्थसंसर्गस्य वा पक्षीकरणे बाधस्तदितरस्य त्वप्रसिद्धेराश्रयासिद्धिरित्यपि द्र- राम॰
ष्टव्यं जरद्गवेति जरद्गवः कंबलपादुकाभ्यां द्वारि स्थितो गायति मद्रकाणि तं ब्राह्मणी पृच्छति पुत्रकामा राजन्रुमायां लशुनस्य १०६
कोऽर्घ इति श्लोकादावित्यर्थः वाक्याभासतामेव दर्शयति आकांक्षेति न तत्र योग्यतास्तीत्यर्थः ॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ननु खंडिद्रुमित्यत्र वाक्यत्वमस्ति न च साध्यमस्ति अनेकपदार्थाभावेन संसर्गाभावादतो व्यभिचार इति तत्राह खंडिद्रुमितीति भ
त्र समाधानमुपक्रमते अत्रेति संसर्गेति गिरामपर्यायशब्दानां या संसर्गाविषयत्वे सति सम्बन्धधीहेतुता इयमखंडार्थतोक्ता अ
पर्यायानेषामेव शब्दानां तन्मात्रनिपादिकार्थेनानतदिति संसर्गराहित्येन लक्षितमेकत्वं परामृशति एकमात्रनिपादिकार्थेनेति लक्षणसं
ग्राहकश्लोकयोजना अनेनैव चतुर्थपंचमपक्षोपि विगृहीतो श्लोकं विवृणोति अपर्यायेति हस्तः कर इत्यादौ व्यभिचारवारणाया

न च खंडिद्रुमित्यादौ व्यभिचारः तस्यापि लक्षणवाक्यत्वेन लक्ष्यस्य सजातीयविजातीयेभ्यो व्यावृत्तिप्रतिपादनपरत्वेना
खंडार्थत्वाभावात् न च विपक्षबाधकतर्काभावः संसर्गप्रतीत्यजनकत्वे वाक्यत्वाभावप्रसंगस्यैव बाधकत्वात् तदेवं नाखंडा
र्थता वेदांतानामिति अत्राभिदध्महे ननावल्लक्षणासंभवो यतः संसर्गासंगिसम्बन्धधीहेतुता या गिरामियमुक्ताखंडार्थता य
द्वा तन्मात्रनिपादिकार्थता र्ल अपर्यायशब्दानां संसर्गगोचरप्रमितिजनकत्वमखंडार्थता न चेदमसंभवि लक्षणं प्रकृष्ट
प्रकाशश्चंद्र इत्यादिवाक्येषु तत्सद्भावात् न च लक्षणवाक्यमपि संसृष्टार्थं लक्ष्यस्य सजातीयविजातीयेभ्यो व्यावृत्तिविशिष्टप्रति
पादनपरत्वात् तत्त्वतुर्व्वेद्यं वदन्नेव व्यावृत्तप्रतिपादनाहेतिर्युक्तं विकल्पासहत्वात् किं प्रकृष्टप्रकाशादिवाक्यं साक्षाद्व्यतो
व्यावृत्तिं प्रतिपादयति किं वा स्वरूपप्रतिपादनेनार्थात् नाद्यः व्यावृत्तिप्रतिपादकशब्दाभावात् नापि द्वितीयः नांतरीयकतया
सिध्यतोर्थस्य शब्दार्थत्वाभावात् यश्चार्थादर्थो न स चोदनार्थ इति न्यायात् अन्यथा गामानयेत्यादिवाक्येष्वश्वानयनव्यावृत्ते

पर्यायग्रहणं इंद्रियमात्रमैश्वर्यग्रहणं गामानयेत्यादिव्यवच्छेदार्थं संसर्गगोचरग्रहणं वाक्याभासव्यावृत्त्यर्थं प्रमितिग्रहणं तत्सद्भावाल्ल
क्षणसद्भावादित्यर्थः तत्रापि संसृष्टार्थत्वं पूर्ववादिनोक्तमनूद्य दूषयितुं विकल्पयति किं प्रकृष्टेत्यादिना साक्षादभिधानेनेत्यर्थः अ
र्थादिति नांतरीयकतया इत्यर्थः यश्चार्थादित्यनार्थेनांतरीयकतया लभ्यते न च स चोदनार्थो वेदार्थ इति शबरस्वामिवाक्यार्थः न चाश्वा
व्यानयनव्यावृत्तिरपि तद्वाक्यार्थः वाक्यभेदप्रसंगादिति भावः ॥

CC-0. In Public Domain. Digitization by eGangotri

१
वि॰सु॰ ननु माभूद्व्यावृत्तिप्रतिपादनपरत्वं व्यवहारसाधनमेव लक्षणप्रयोजनं ब्रूमः तावताप्यखंडार्थतारव्यैव ति शंकते नन्वयमित्यादिना
टी॰न॰ चंद्ररूपार्थविशेषितव्यवहारकर्त्तव्यता साधने दोषमाह आद्य इति यस्य कर्त्तव्यता मात्रसाध्यते स किं चंद्रविशेषितो व्यवहारः प्रतिवादिनो
१०७ ऽज्ञातो ज्ञातो वा यद्यज्ञातस्तदाऽप्रसिद्धविशेषणत्वं अविदितदहनं प्रतीवदहनानुमानप्रवृत्तिरिव्याद्द तदा लक्षणवाक्यादपीति अपि
नास्वरूपसाधकत्वं लक्षणस्य सूच्यते द्वितीयं दूषयति अथेति चंद्रव्यवहारस्य कर्त्तव्यता मात्रमेव तावत्साध्यते न पुनरग्निसंबंध

नन्वयं चन्द्र इति व्यवहर्त्तव्यः प्रकृष्टत्वे सति प्रकाशत्वात् यन्नैवं न तदेवं यथा नक्षत्रादि न तथा चायं तस्मान्न
तथेति केवलव्यतिरेकिनया लक्षणवाक्यं पर्यवस्यति तथा च कथमखंडार्थता चंद्र इति व्यवहर्त्तव्यता लक्षण
धर्मवैशिष्ट्यप्रतिपादनपरत्वादिति चेन्नैवं चंद्रतया व्यवहर्त्तव्य इति किं चंद्ररूपार्थविशेषितो व्यवहारः कर्त्त॰
व्यः उत चंद्रशब्दमात्रविशेषितो व्यवहारः आद्ये चंद्रविशिष्टं व्यवहारं यदि नाज्ञासीत्तदा लक्षणवाक्यादपि
विषयविशेषितकर्त्तव्यतां तस्य कथमधिगच्छेत् नह्यविदिताग्निरनुमानाद्व्याग्निसंबंधमधिगमयितुं प्र॰
क्यः अथाधिगतवांस्तदा लक्षणवाक्यरूपमनुमानं निष्प्रयोजनं ज्ञानस्यैव ज्ञापनात् अथ सामान्यतो जानात्य
लिकश्चिद्विषयश्चंद्रव्यवहारस्येति विशेषतस्तु न जानातीत्युच्येत तथापि किं सामान्यतो व्यवहारस्य निमित्तवत्तां
इवान्यत्र सिद्धस्यान्यत्र संबंधः केवलव्यतिरेकिताभंगात्तत्स्वेन्न्क विप्रसिद्धं सिद्धमतु ॥ जानाति किं वा व्यवहारविशेषस्य॥
मानसाध्यमित्यर्थः ज्ञाताज्ञातविकल्पोक्तदोषपरिहरत्नाशंकते अथ सामान्यत इति अयमर्थः यद्यपि तस्य लातरे सिद्धिः केवल राम॰
व्यतिरेकित्वात् तथापि नामसिद्धत्वं सामान्यतः सिद्धत्वादिति तदेतद्दूषयति तथापीति कीदृशमिदं सामान्येन ज्ञानं किं वक्ष्यमाण॰ १०७
दिशा चंद्रशब्दविशेषिततया सिद्धेश्चंद्रलक्षणार्थो ज्ञानाच्चाप्यकर्णादि व्यवहारमात्रस्य नामचंद्रव्यवहार इति ततो व्यवहारमात्रेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

किंवा चंद्रव्यवहारो निमित्तमात्रवानिति आद्ये गवादिव्यवहारस्य निमित्तमात्रवत्त्वज्ञानं न चंद्रव्यवहारकर्त्तेत्यनात्तुमानस्याप्रसिद्ध
विशेषणतां निवारयति नह्यग्निमत्त्वप्रसिद्धिरिति न्यूनत्वानुमाने नावारयितुमलमित्यभिप्रेत्याह आद्ये प्रकृतानुपयोग इति द्वितीये चं
द्रविशेषितव्यवहारः किं चंद्रलक्षणार्थविशेषितो व्यवहारः उत चंद्रशब्दविशेषितः द्वितीयस्तु प्राथमिकद्वितीयविकल्पसमा
नजीवनः प्रथमेपि किं चंद्रोऽविदितो विदितो वा आद्ये माह द्वितीयेपि चंद्रेति द्वितीये माह ज्ञाने चेति चन्द्रशब्दविशेषितो व्यवहारः
साध्यत इति द्वितीयपक्षं दूषयति नापि द्वितीय इति अत्र चंद्रशब्दः प्रयोक्तव्य इति वाच्यवाचकसंगतिग्रहो हि यदा लक्षणप्रयोजनं

आद्ये प्रकृतानुपयोगः व्यवहारविशेषस्य विचार्यमाणत्वात् द्वितीयेपि चंद्रलक्षणार्थविशेषापरिज्ञाने तद्विशिष्टव्य
वहारस्यैव विज्ञातुमशक्यः ज्ञाते च लक्षणवाक्यवैयर्थ्यमित्युक्तं नापि द्वितीयः लक्षणं विनापि गवादिशब्दानामिव वृ
द्धव्यवहारादेव वाच्यवाचकसंबंधग्रहोपपत्तेः पूर्वं प्रतिपन्न एव वाच्यवाचकभावो लक्षणवाक्येन स्मार्यत इति
चेत् न अवगतसंबंधस्य तत्र तच्छब्दादेव संबंधस्मरणोपपत्तौ लक्षणाभिधानवैयर्थ्यात् अवगतसंबंधस्या
पि शब्दलक्षणवाक्यादेव संबंधस्मरणनियमे लक्षणवाक्यस्थपदानामपि प्रत्येकं लक्षणवाक्यैः संबंधस्म
रणप्रसंगादनवस्थाद्दुरवस्था स्यात् तस्माद्भवानयनादिवाक्यवदाप्तोपदेशतयैव लक्षणवाक्यमवबोधकं॥

तदा लक्षणं व्यर्थं अंतरेणापि लक्षणं गवादिपदानामिव संगतिग्रहसंभवादित्यर्थः प्रथमतोऽवगतस्यापि शब्दसंबंधस्य लक्षण।
वाक्यात्स्मरणसाधनमप्यनर्थकं गवादिपदानामिवांतरेणापि लक्षणं स्मरणसंभवादित्युक्तं इदानीं न केवलमानर्थक्यमपि त्वनव
स्थालक्षणानर्थोपि स्यादित्याह अवगतसंबंधस्यापीति तत्तद्वाक्यस्थपदानामपि तैस्तैरर्थैः संबंधो लक्षणैरेव स्मारयितव्यः एवं त
त्तत्स्मारकवाक्यस्थपदानामपीति न क्वचिदपि स्यादित्यर्थः तत्किं लक्षणमेव तेषु ग्रंथेषु न प्रयोक्तव्यं तथा च गतं तत्त्वज्ञानमनंत।
मिति ब्रह्मलक्षणेन न प्रयुक्तं जन्माद्यधिकरणेनापीत्यत आह तस्मादिति न लक्षणमनुमानतयोपयुज्यते अपि तु शब्दप्रमाणत

१ ५ब

वि॰सु॰ ननु भवतु लक्षणं शाब्दतयोपयोगि किमायातमखंडार्थतायामिति तत्राह तत्त्वमर्थमिति उक्तमेतत्स्वरूपादेव स्वरूपमात्रं शाब्देन बो
टी॰त॰ ध्यते इतरव्यावृत्तिस्त्वार्थिकी न त्वार्थिकः शाब्दार्थ इति यद्यपीदं संभवति तथाप्यव्यापकमिदं लक्षणं संयोगसमवायात्मकसंबंधस्य
१०८ यल्लक्षणवाक्यं तस्य लक्ष्यस्य संसर्गविषयत्वेन संसर्गागोचरत्वलक्षणस्याभावादिति शंकते नन्वेवमपीति संसर्गागोचरप्रमितिजन
कत्वमिति कोर्थः यद्बोधयति तदीयसंसर्गागोचरत्वे सति तत्प्रमितिजनकत्वमिति अस्ति चैतदत्रापि न हि संयोगस्य समवायस्य वा
तत्तद्विशेषणसंसर्गबोधपरं इदं वाक्यं तस्यावुभुत्सितत्वादित्यभिप्रेत्य परिहरति मैवं तेषामपीति न च विवक्षुंस्त्वेत्यादि सर्वलक्षा

तत्त्वमर्थस्वरूपमात्रपर्यवसायीति अर्थात्सु तरव्यतीत्याचूत्तिः फलतीति युक्तं नन्वेवमपि तैन लक्षणं अप्राप्तयोः प्राप्तिः
संयोगो नित्यः संबंधः समवाय इत्येवमादिसंबंधप्रतिपादकलक्षणवाक्ये ष्वव्याप्तेः तेषां संसर्गगोचरप्रमितिजनकत्वा
दिति चेन्न मैवं तेषामपि स्वस्वपदस्मारितपदार्थानामन्योन्यसंसर्गागोचरप्रमितिजनकत्वात् संसर्गगोचरप्रमिति
जनकत्वशब्देन वाक्यैकवाक्यार्थस्याविवक्षितत्वात् नाव्याप्तिः संसर्गप्रमितिजनकेषु गवानयनादिवाक्येषु लक्ष
णाभावात् यद्वा अपर्यायशब्दानामेकप्रातिपदिकार्थमात्रपर्यवसायित्वमखण्डार्थता न चैवं पदानां तर वैय
र्थ्यं व्यावर्त्यभेदादर्थवत्त्वोपपत्तेः तथा हि लोके प्रकृष्टप्रकाशश्चन्द्र इत्यत्र प्रकृष्टपदेनाप्रकृष्टखद्योतादेः प्रकाशपदेना
प्रकाशात्मप्रकृष्टसेतमसादेश्च व्यवच्छेदेन बुभुत्सितश्चन्द्रप्रातिपदिकमात्रार्थः प्रतिपाद्यते ॥ १ णावाक्येष ‒ त्यव्याप्तिः १०८
प्रतिपिपादयिषि तसंसर्गगोचरत्वात् तदभावस्येह विवक्षितत्वात् यद्वा तत्प्रातिपदिकार्थेनेति श्लोकावयवं विवृणोति यद्वा
पर्यायेत्यादिना यद्यप्येकपदलक्ष्यमेव पदान्तरपर्यवसानभूमिस्तथापि नैकपदव्यावर्त्यमेव पदान्तरव्यावर्त्यं जाड्यानृतादीनां राम॰
विभिन्नत्वात् ततोन संसृष्टार्थता वैयर्थ्यं चेद्युक्तं एतदेव लौकिकोदाहरणेन दर्शयति तथा हीत्यादिना संतमसं विषक्रमः २०८
अत्र च व्यवच्छेदेनेति व्यवच्छेदानाद्वारतो का प्रतिपाद्यत इति नान्यथ्ये विषयत्वं तेनेन शून्यनिष्ठतापत्तिः ॥ ‒ ‒ ‒ ॥

ननु किमिति स्वरूपमात्रपरताश्रयणं न पुनरेषां प्रकर्षादिसंसर्गपरत्वमिति तत्राह अन्यथेति यदि हि स्वरूपमात्रे दृष्टे गुणादिसंसर्गं प्रतिपादयेत् तर्हि अश्रद्धेयवचनः स्यादित्यर्थः यत्तु पूर्वपक्षिणा त्रेधा विकल्प्य दूषणद्वयमुक्तं तन्निराकरोति न च व्यावृत्तीति ननूक्तं स्वरूपमात्रपरत्वे पदान्तरवैयर्थ्यमिति तत्राह व्यावर्त्यभेदेनेति तदेवं लौकिकेषूदाहृत्य विवक्षित सत्यादिवाक्येषु लक्षणं वर्तयति तथा वेदेऽपीति ननु स्ववाच्यप्रक्षेपेणैव पदानां विरोधिव्यावर्त्तनम् अप्रक्षेपेण वा न तावद्द्वितीयः विरोध्यदर्शनेनानृतादिव्यावृत्तेरशक्यज्ञानत्वात् प्रथमे तु विभिन्नैर्ज्ञानत्वादिभिराकारैर्ब्रह्मणोऽप्यनेकाकारत्वमिति तत्राह नचैवमनेकाकारेति

अन्यथा वक्तुरबुभुत्सितमर्थं प्रतिपादयतोऽनवधेयवचनत्वप्रसंगात् न च व्यावृत्तिपरत्वे व्यावृत्तिमत्परत्वे वा संसृष्टार्थत्वं स्वरूपमात्रपरत्वे च पदान्तरवैयर्थ्यमिति वाच्यं व्यावृत्तिद्वारा पदानां स्वरूपमात्रपर्यवसायित्वाङ्गीकारात् व्यावर्त्यभेदेनावैयर्थ्याच्च तथा वेदेऽपि सत्यं ज्ञानमनन्तं ब्रह्मेत्यादौ सत्यज्ञानानन्दानन्तात्मशब्दा अनृतजडदुःखान्तवत्त्वानात्मत्वभ्रान्तिनिवृत्तिद्वारा लक्ष्ये ब्रह्मणि पर्यवस्यन्ति नचैवमनेकाकारविज्ञानजनकत्वात् पदानां लक्ष्यस्य ब्रह्मणोऽनेकाकारत्वप्रसंगः लक्षणासमये भिन्नाकारविज्ञानजनकानामपि पदानां तत्तद्भ्रान्तिनिवृत्तिमात्रप्रयोजकतया लक्ष्ये ब्रह्ममात्रे तात्पर्येण पर्यवसानात् एवं च तत्तच्छब्दजन्यविज्ञानानां तत्तद्भिन्नाकारसमर्पिणां नान्तरीयकतया न तद्विरोध्याकारनिवर्तकत्वाद्वाक्यस्याखण्डार्थत्वसि

लक्षणासमय इति सामीप्यात् लक्षणाप्रक्रमयोर्विवक्ष्यते न हि तत्तदाकाराः प्रतिपिपादयिषिता इति प्रतिपाद्यन्ते किं तु कथं नु नामानृताद्यारोपरहितं ब्रह्म प्रतिपत्तिरिति तथा वदनृतादिव्यावृत्तिस्तावदेव सत्यत्वाद्याकाराणां स्थितिः निवृत्तेषु तु तेषु एते एवाकारा अनृता जायन्ते कः खलु विशेषोऽनृतादिभिराकाराणामद्वैतविरोधे तस्मादेकानन्दव्यक्तिपरमेव सत्यादिवाक्यं न सत्यत्वादिपरं नाप्यनृतादिव्यावृत्तिपरमित्यर्थः विधिमुखेषु वाक्येषु उक्तन्यायं निषेधमुखेन प्रतिपादकेष्वप्यतिदिशति एवं च तत्तच्छब्दजन्येति

CC-0. In Public Domain. Digitization by eGangotri

१
चि·सु· यदेतद्विरोधिनिवृत्त्यर्थमेव तत्तदाकारविधानं किंचिदुक्तं तत्तदाकारविरोधिनिवृत्तेश्चापादनमुक्तं तदाचार्यवचनेन द्रढयति।
टी·नं· उक्तं चैतदिति तैत्तिरीयकेवार्तिके सत्यं ज्ञानमनन्तमिति वाक्यव्याख्यानसमये इति शेषः पदान्तरादेः पदार्थसत्यत्वादिर्ब्रह्मणि प्रतिपा-
१०९ द्यमानतानेन विरोधाद्धेतोर्विरोधिनोऽनृतादेरभावं जानाति तत्र निदर्शनं वध्यघातकवदिति यथा खल्वाखुभूषितां भूमिं दृष्ट्वाऽयो-
न्मार्जाराभावोऽवगम्यत एवमिति ननु किमुभयमपि स्यादाहोस्विदन्यतरदिति तत्राह शब्दादिति प्रथमं धर्मधर्मिणोः सत्यत्वा-
देः ब्रह्मणश्च संगतिः शब्दात्प्रतीयते तावत्तावस्यास्तात्पर्याविषयत्वं द्योत्यते अपोहस्तु विरोधिव्यावृत्तिर्मानान्तरादनुपपत्ति-
लक्षणात् ज्ञायतेऽनेन स अपोहस्तु न शाब्दः ननु किं त्रयाणामविशिष्टोयं न्याय इति नेति वैषम्यमाह तत्रानन्त इति तत्र त्रिषु मध्ये

उक्तं चैतत्सुरेश्वराचार्यैः प्रतिपाद्यपदार्थविरोधात्तद्विरोधिनः पश्चादभावं जानाति वध्यघातकवत्सदा १
शब्दात्प्रतीयते तावत्संगतिर्धर्मधर्मिणोः मानान्तरादपोहस्तु न शाब्दस्तेन स स्मृतः २ तत्रानन्तोऽन्तवद्वस्तु-
व्यावृत्त्यैव विशेषणम् स्वार्थार्पणप्रणाड्या च परिशिष्टौ विशेषणं ३ तद्विरोध्यर्थसंत्यागः सामर्थ्यात्स्यान्न
शब्दत इति न च गुणगुण्यादिभावप्रतिपादनेऽपि तत्तद्विरोध्याकारनिवृत्त्युपपत्तेः कथमखण्डैकरसत्वसि-
द्धिरिति वाच्यं ब्रह्मशब्दार्थमात्रस्यैव बुभुक्षितत्वात्॥ ॥ ऽनंतः अनंतशब्दार्थः अंतवद्वस्तुव्यावृत्त्यैव विशेषणं व्याव-
र्तकं साक्षादेव ब्रह्मणो व्यावर्तकमित्यर्थः परिशिष्टौ तु सत्यज्ञानशब्दौ स्वार्थसमर्पणप्रणाड्या व्यवधानेन विशेषणं न हि यथाऽनं- १०३
तमित्युक्ते नाभावः साक्षात्प्रतीयते तथा सत्यं ज्ञानमित्यत्रानृताद्यभावः अपि तु स्वार्थविधानव्यवधानेनेत्यर्थः नहि तयोर्विरोधि-
व्यवच्छेदः किंनिबंधन इति तत्राह तद्विरोधीति एतच्च मानान्तरादपोहस्तु इत्यस्यैव प्रपंचः ननु विरोध्याकारनिवृत्तिरखण्डा- राम·
र्थतामन्तरेण संसर्गपरत्वेऽपि सेत्स्यति किमर्थमखण्डार्थताऽऽग्रह इति तत्राह न चेति लौकिकवाक्येषु संसर्गपरतायामुक्तबाधकं १०९
प्रकृतेऽप्याह ब्रह्मशब्देति ब्रह्मविदाप्नोति परमिति श्रुतस्य ब्रह्ममात्रस्यैव बुभुक्षितत्वादित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न केवलमबुभुक्षितार्थपरत्वं बुभुक्षितार्थपराणां नादिपदविरोधश्चेत्याह सर्वं नइति मासादेर्वैकार्थप्रतिपादकानां नाकारनिवारकत्वं न च विरोधश्चेत्याह एकधर्मेत्यादिना ननु प्रसिद्धमेव लक्षणं न त्वप्रसिद्धं गगनारविंदादेर्लक्ष्यत्वादर्शनात् अप्रसिद्धं च ब्रह्म सर्वप्रमाणागो क्षणत्वादिति तत्राह न चेति अथवा लक्षणलक्ष्यत्वमत्राशिष्यसमर्थ्येन स्वप्रकाशस्य सत्यज्ञानत्वमनया प्रसिद्धिरस्तीति संभवत्येव लक्ष्यत्वमित्य र्थः न केवलमस्माकमेवेयं रीतिः अपि तु सर्वेषामेव लक्षणवादिनामित्याह अन्यथेति घटादिषु सामान्येन प्रसिद्धस्य पृथिवीत्ववद्गा रस्येतरेभ्यो भेदस्य च परमाण्वादिभूगोलकान्तसमुदाये प्रसिद्धस्य लक्षणेन साधनमिति परांगीकारादित्यर्थः यत्तु सोयं देवदत्त इत्यत्रास्व

सर्वतोनवच्छिन्नवस्तुप्रतिपादनपरब्रह्मानंतशब्दाभ्यां विरोधाच्च एकधर्मैवानुद्रष्टव्यं एकमेवाद्वितीयमित्याद्येकरसत्वप्रतिपादकवाक्यविरोधाच्च नेह नानास्ति किंचनेत्यनेकरसत्वप्रतिषेधाच्च न चाप्रसिद्धत्वाद्ब्रह्मणो लक्ष्यत्वासंभवः सत्यज्ञानत्वतयास्वतः सामान्येन प्रसिद्धत्वात् न च तथात्वे लक्षणवैयर्थ्यं लक्षणस्य विशेषाकारसमर्पणार्थत्वात् अन्यथा गंधवती पृथिवीति नित्यज्ञानाधार ईश्वर इत्यादिलक्षणानामपि लक्ष्यस्याप्रसिद्धत्वप्रसिद्धत्वयोर्वैयर्थ्यापातात् एतेन सोयं देवदत्त इत्यत्रापि तत्कालोपलक्षितस्यैतत्कालवैशिष्ट्यं प्रतिपाद्यत इत्येतन्निरस्तं देवदत्तस्वरूपमात्रस्यैव बुभुक्षितत्वात् एतत्कालवैशिष्ट्यस्य दृष्टत्वेनाबुभुक्षितत्वात् न च पूर्वकालोपलक्षितस्यैतत्कालवैशिष्ट्यप्रतिपादने विभेदभ्रमनिरासः सिध्यतीति वाच्यं एतत्कालविशिष्टस्य पूर्वकालसंबंधासंभवेन तदुपलक्षितत्वस्यासंभवात् तयोरभेदप्रतिपादनस्याशक्य

त्वात् ऽभावाय पूर्वपक्षिणोक्तं तत्राप्युक्तन्यायमतिदिशति एतेनेति एतेनेत्यस्यैव विवरणं देवदत्तस्वरूपेति न चैतदपि बुभुक्षितं किं तस्यान्तर्हि देवदत्तमात्रमत एकेन विसृष्टं येन लक्षणवाक्यवत्तन्मात्रमेव बुभुक्षितं स्यादिति तत्राह एतदिति न केवलमबुभुक्षितत्वादप्रतिपाद्यत्वं बुभुक्षितैक्यविरोधाच्चेत्याह न चेति न हि किमेतत्कालविशिष्टस्य पूर्वकालोपलक्षितेनैक्यं बोधयति किं वा पूर्वकालोपलक्षितस्यैतत्कालविशिष्टेन नाद्य इत्याह एतत्कालेति संबद्धस्य तदुपलक्ष्यतासंबद्धं न चैतत्कालविशिष्टस्य पूर्वकालसंबंधः संभवति एतत्काले पूर्वका

१
चि॰सु॰ द्वितीयं शंकते नन्विति किमुपलक्षितस्य विशिष्टेनाभेदः शब्दगम्यः किं वोपलक्षिते वैशिष्ट्यमात्रं शब्दार्थः अभेदस्यानुपपत्तिक इति वि
टी॰न॰ कल्प्य दूषयति नैवमित्यादिना एतत्कालविशिष्टस्य पूर्वकालोपलक्षितस्वरूपस्य चैक्यासंभवेन प्रथमं पक्षं दूषयति नाद्य इति किमित्य
११० संभवस्तत्राह तथा सतीति द्वितीयेन शब्दाद्विशिष्टमर्थोऽत्र स्वरूपमात्रैक्यमिति कल्पनागौरवादहं शब्दादेवोभयोपलक्षितस्यैक्यप्रति
पादनमित्याह साक्षादेवेति ननु साक्षाच्छब्दादभेदप्रतिपत्तावुभयोरपि लक्षणाप्रसक्त्येतत्तो वरमेकलक्षणया पारंपर्याश्रयणमि
ति शंकते उभयेति पारंपर्यकल्पनातो लक्षणाश्रयणं न्याय्यं व्यापारवत्प्रमाणगौरवात् व्यापारगौरवस्य लघीयस्त्वात् यदुद्दिश्य

ननु तथापि पूर्वकालोपलक्षितस्यैतत्कालवैशिष्ट्यासंभवात्संभवत्येव तयोरभेदप्रतिपादनमिति चेन्न मैवं विकल्पासहत्वा
त् किं पूर्वकालोपलक्षितस्यैतत्कालविशिष्टेनाभेदः प्रतिपाद्यत इत्युच्यते किं वा पूर्वकालोपलक्षिते वर्तमानकालवैशिष्ट्यल
क्षणधर्मप्रतिपादनेनार्थादभेदः सिध्यतीति नाद्यः विशिष्टाविशिष्टस्वरूपयोरभेदासंभवात् तथा सति वर्तमानकालविशिष्ट
स्य पूर्वमपि सद्भावप्रसंगात् नापि द्वितीयः साक्षादेवाभेदप्रतिपादने संभवति परंपरया तत्प्रतिपादनाश्रयणस्यायुक्तत्वात्
उभयपदलक्षणाश्रयणे कल्पनागौरवात्तथाश्रीयत इति चेन्मैवं अत्रापि परंपरया अभेदप्रतिपादनात्साक्षादभेदप्रतिपा
दने बुद्धिलाघवस्य दर्शितत्वात् तथापि विनिगमनायां को हेतुरिति चेत् बुभुत्सितार्थस्य साक्षात्प्रतिपादनलाभ एवेति ब्रूमः
उक्तं च प्रतिज्ञावचनस्य साधनांगत्वमाचक्षाणेनाचार्यवाचस्पतिना अनित्यशब्दं बुभुत्समानाय अनित्यः शब्द इत्यनुक्त्वा 990
च वाक्यं प्रवर्तते तस्य बुभुत्सितस्याभेदस्य साक्षात्प्रतिपादनं न्याय्यं इतरथानुद्दिष्टस्य साक्षात्प्रतिपादनं भवति यदेव किंचिदुच्यते
उद्दिष्टस्य पारंपर्येणेति क्लिष्टकल्पना स्यात् तदेतद्धृदि निधाय परिहरति मैवमत्रापीति अनधिगतपराभिसंधिः शंकते तथापीति विनि राम॰
गमनानिर्णयः अभिसंधिमुद्घाटयन् परिहरति बुभुत्सितेति बुभुत्सितस्यार्थिकप्रतिपत्तेः साक्षात्प्रतिपत्तिरभ्यर्हितेत्यत्राचार्यवाचस्प ११०
ति वचनमपि प्रमाणयति उक्तं चेति हेतूदाहरणावयववद्धृपवादितं सौगतं प्रति —— प्रतिज्ञानानन्तर्यं हेतोरुपवर्णितमर्थः ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

अत्र च यत्कृतकं तदनित्यमित्युदाहरणनिर्देशः कृतकश्च शब्द इति हेतुनिर्देशः एतदुक्तं भवति यद्यप्युदाहरणहेतुनिर्देशादप्यर्थात्
कृतकत्वस्यानित्यत्वपर्य्यवस्यति तथापि साक्षादनिर्देशापराधमात्रादिदमसंबद्धबुद्ध्यभिधानमिति एतेनेत्यस्यैव विवरणं बुभुत्सि
तार्थेति लक्षणसमर्थनमुपसंहरति तदेवमिति प्रमाणश्लोकेन संगृह्णाति सम्यग्ज्ञानादीति सत्यज्ञानादिगीर्वाक्यमेतत्संसर्गव्यतिरे
किण्यर्थे यस्ते सत्यादयः पदार्थास्तेषां संसर्गव्यतिरिक्ते संसर्गरहिते प्रमाणमिति प्रतिज्ञानिर्देशः शेषं विशदं सिद्ध साधनतानिवृ

यत्कृतकं तदनित्यमिति वा कृतकश्च शब्द इति वा तत्सर्वमसंबद्धबुद्ध्या न प्रत्येति प्रतिवादीति एतेनोभयपरलक्ष
णास्वीकारे गौरवदोषो निरस्तो वेदितव्यः बुभुत्सितार्थप्रतिपादनप्रयोजनतया गौरवस्यैवोचितत्वात् प्रमाणवत्य दृष्टा।
निकल्प्यानि सुबहून्यपीति न्यायात् तदेवमसंबद्धार्थत्वेन लक्षणासंभवः नापि प्रमाणासंभवः तथाहि सत्यज्ञानादिगीरेत
त्संसर्गव्यतिरेकिणि अर्थे प्रमाणं मानत्वादन्वयनादिप्रमाणवत् २० सत्यादिवाक्यमेतत् पदार्थसंसर्गातिरिक्तेऽर्थे प्र
माणं प्रमाणत्वाच्चक्षुरादिवत् विपक्षे चैकरसत्वप्रतिपादकश्रुतीनामुदाहृतानामप्रामाण्यप्रसंगः बुभुत्सितेऽप्र
ह्यणिप्रामाण्याभावप्रसंगश्च बाधकस्तर्क उन्नेयः यत्तु वाक्यत्वादन्वयनादिवाक्यवत् संसर्गपरत्वानुमानं तदे
करसत्वप्रतिपादकश्रुतिविरोधात्कालात्ययापदिष्टं उक्तनीत्या च संसर्गप्रतीतिजनकत्वाभावेऽपि वाक्यत्वोपपत्तेः

न्ये संसर्गव्यतिरेकिणीत्युक्तं तथापि यत्किंचित्संसर्गव्यतिरिक्तत्वेनार्थान्तरतान्निवृत्त्यर्थमेतत्पदं ११ संदिग्धव्यतिरेको हेतुः॥
यद्यपि गामानयेत्यादिवाक्यं संसर्गविषयं तथाप्येतत्संसर्गव्यतिरेकिण्यर्थे प्रमाणमेवेति न व्यभिचारः ननु श्रुत्यासंसृष्टार्थप्रमिति
जनकत्वसिद्धिः एतदेव विवृणोति सत्यादिवाक्यमित्यादिना पूर्वमद्वैतश्रुतीनामप्रामाण्यप्रसंग उक्तः इदानीं सत्यज्ञानादिवाक्य
स्यागुणगुण्यादिपरत्वेऽप्यप्रामाण्यप्रसंगमाह बुभुत्सितेति पूर्वपक्षिणोऽनुमानं दूषयति यत्त्वित्यादिना विपक्षबाधकतर्काभावाच्च
किंतोपाधितां चाह उक्तेति उक्तनीत्या वाक्यत्वोपपत्तेरिति संबंधः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१
वि॰सु॰ ननु संसर्गपरत्वाभावे वाक्यत्वभंगप्रसंग एव बाधक इत्यत आह आकांक्षेति ननु प्रामाण्यभंगप्रसंगो बाधको नेत्याह आचार्येति शा
टी॰न॰ स्त्रविज्ञानाच्छब्दविषयज्ञानादसन्निकृष्टेऽर्थे प्रमाणान्तरेण तथा वानधिगते यद्विज्ञानं जायते तच्छास्त्रं शब्दप्रमाणमिति शाबरवाक्या
१११ र्थः अत्र चानुवादविसंवादव्यवच्छेदायासन्निकृष्टपदं अपेक्षनादिपदनिराकरणायार्थग्रहणं अनुमाननिराकरणाय शब्दविज्ञा
नग्रहणं एतावदेवाचार्यैर्लक्षणमभिहितं शब्दप्रमाणस्य ननु संसर्गविषयत्वमपीत्यर्थः द्वितीयपक्षेप्यर्थापत्तिप्रमाणमाह प्रातिपदि
केति अनुपपत्तिमेव दर्शयति अवबुभुत्सितेति वाक्यार्थमुपसंहरन् वर्तिष्यमाणमेवोद्भावयति तदेवमिति अद्वैतवादेऽसत्यादिपदपर्य्यो
यत्वं तथा अपर्य्यायद्वयपक्षे संवादो वागीश्वरोऽप्रवीणतमस्तवार्थनानात्वात् तस्यैकसमाश्रयात् तपर्य्यायद्वयपक्षे सावित्यनुत्त

आकांक्षासन्निधियोग्यतावन्तिपदानि वाक्यमिति वाक्यविदः ननु संसर्गप्रमितिजनकान्यपीति विशेषणवैयर्थ्या
त् आचार्यशबरस्वामिना च शास्त्रं शब्दविज्ञानादसंनिकृष्टेऽर्थे विज्ञानमित्येतावत एव लक्षणस्याभिधानात् प्रा
तिपदिकमात्रार्थप्रश्नोत्तरत्वानुपपत्तिश्च लौकिकवैदिकलक्षणवाक्यानामेकप्रातिपदिकार्थमात्रपर्यवसायि
त्वे प्रमाणप्रदर्शिता वक्तव्यानुपपत्तिः अवबुभुत्सितार्थप्रतिपादनेऽनवधेयवचनत्वप्रसक्तिरिति तदेवमशेषोपप
निषदामखण्डैकरसे ब्रह्मणि स्वतःसिद्धमेव प्रामाण्यमिति सिद्धं ॥ ननु किमिदं प्रामाण्यस्य स्वतस्त्वं न तावत्स्वत एव

स्फुरत्वं यत्तु प्रकृष्टप्रकाशशब्दावपि प्रकर्षादिवत्ता प्राकृतावितिनदवबुभुत्सितत्वेनात्रैव परिहृतं यत्तु पृथक्प्रवृत्तयोः प्रकृष्टप्रकाश।
शब्दयोरेकत्र प्रयोगात् युज्यते अर्थविशेषबोधकत्वं न तथेह लौकिकज्ञानादेरपि प्रसक्तत्वादिति तन्नोपहितज्ञानादेर्नेष्टत्वस्वरूपत्व
मनुपहितं तु वाच्यमित्यस्यैव पृथक्प्रवृत्तिः ज्ञानादिशब्दस्येति न कोऽपि व्यतिकरः अद्वयमस्तु स्वबोधं विना नेदं हृषीकमनोम राम॰
तिहीने विश्वविवर्तनिदानमबोधं प्रतिवचास्मि स यत्र परोऽस्मि स्वतःसिद्धमेव प्रामाण्यमित्युक्तमुपपन्नमयुक्तं प्रामाण्यवादी प्रत्यव १११
तिष्ठते नन्विति तत्र लक्षणं तावदाक्षिपति न तावदित्यादिना तत्र किं स्वत एव प्रामाण्यस्य जन्म स्वतः प्रामाण्यं नाम आहोस्वित्स्वाश्रय।
ज्ञानजन्यत्वं उत स्वाश्रयज्ञानसामग्रीजन्यत्वं अथवा ज्ञानसामग्रीजन्यप्रमाश्रितत्वं किं वा ज्ञानसामग्रीमात्रजन्यप्रमाश्रितत्वं नाद्य

विरोधादिति स्वस्यैव स्वकारणतया प्राक्क्षणे सत्त्वं कार्यतया च प्रागसत्त्वमिति व्याघातादित्यर्थः द्वितीयं निषेधयति नापीति एतच्च स्वशब्दस्य स्वीयवचनत्वमाश्रित्य स्वाश्रयप्रामाण्यजनकत्वे हि समवायिकारणतया द्रव्यत्वापातो ज्ञानस्येत्यर्थः तृतीयं निषेधयति नापि ज्ञानेति न स्वसामग्र्यामपि हि यथाकथंचित्स्वीयतया स्वशब्दो भवत्येवेति भावः तदेतदसंभवेन दूषयति प्रामाण्यस्येति बाधात्यन्ताभावो घटादेरप्यस्तीति ज्ञानस्येत्युक्तं तथापि स्मृतावतिव्याप्तिसत्त्वार्थं स्मृतित्वानधिकरणस्येति अबाध्यानुभवत्वमित्यर्थः विषयापहारस्य बाधस्तदभावस्यापाततः संशयादेरप्यस्तीत्यत्यंतग्रहणं अत्र च प्रमादौ धर्म्यंशे जातिसंकरप्रसंगात् प्रामा

स्वस्य हेतुकत्वविरोधात् नापि प्रमाणादेव जन्मज्ञानस्य गुणत्वेन स्वप्रामाण्यं प्रति समवायिकारणत्वासंभवात् नापि ज्ञानसामग्रीतो जन्मप्रामाण्यस्योपाधित्वे जातित्वे च जन्मासंभवात् तथा हि उपाधिपक्षे स्मृतित्वानधिकरणस्याज्ञानस्य बाधात्यन्ताभावः प्रामाण्यं न च तस्योत्पत्तिः संभवति अत्यन्ताभावत्वादेव नापि ज्ञाने जन्मनित्यत्वात् ज्ञानसामग्रीजन्यत्वं प्रमायाः प्रामाण्यस्य स्वतस्त्वमिति चेन्नैवं अप्रमाया अपि स्वतस्त्वप्रसंगात् तस्या अपि ज्ञानसामग्रीजन्यत्वात् अथ ज्ञानसामग्रीमात्रजन्यत्वं स्वतस्त्वं अप्रमा तु न तन्मात्रजन्या दोषसहकृतज्ञानसामग्रीजन्यत्वादिति चेन्नैवं विकल्पासहत्वात् तथा हि दोषाभावसहकृतज्ञानसामग्रीजन्यत्वं मात्रशब्दार्थः किं वा दोषासह

ण्यमुपाधिरिति केचित् अपरे तु तत्र गौणं व्यवहारमादाय जातिरिति वदंति तेनेदं द्वैविध्यमुक्तं ((कृतज्ञानसामग्रीजन्यत्वम् चतुर्थं शंकते ज्ञानसामग्रीति यदिदं प्रमायाः ज्ञानसामग्रीजन्यत्वं तत्प्रामाण्यस्य स्वतस्त्वमिति योजना तदेतदतिव्याप्त्या दूषयति मैवमिति ज्ञानविशेषो ह्यप्रमा विशेषसामग्र्यां च सामान्यसामग्र्यनुप्रविशति शिंशपासामग्र्यामिव वृक्षसामग्री इतरथा तस्याकस्मिकत्वप्रसंगात् अतः परतस्त्वेनाभिमतायामप्रामाण्येऽपि ज्ञानसामग्रीजन्यत्वादतिव्याप्तिरित्यर्थः अप्रमाया अपीति अप्रामाण्यस्येत्यर्थः पंचमं शंकते अथेति अप्रमायामतिव्याप्तिपरिहारं मात्रग्रहणेन विवक्षितं स एव विवृणोति अप्रमा त्विति ।छ।। ८ ।छ।।

नहेतुतयाऽपि ४

त्रि·सु· अत्रमात्रग्रहणेनाप्रमासामग्रीरूपदोषासाहित्यद्वारेणतदभावसाहित्यमपिज्ञानसामग्र्यांविवक्षितं उत्तासाहित्यमात्रमितिविक॰
टी·न· ल्पासंदूषयतिनाद्य इति एवं स्वतः प्रामाण्यपक्षस्तस्वेप्युपपद्यते इत्यर्थोनत्वमित्यर्थः द्वितीयंदूषयति नापिद्वितीयइति यथाहिप्रमाणज्ञा
११२ नहेतोर्विशेषदर्शनस्याभावोऽप्रमाणज्ञानहेतुः एवमप्रमाणज्ञानहेतोर्दोषस्याभावोपिप्रमाणहेतुर्भवत्वेवएवमवधृतस्याभाव्यादन
योर्विपर्ययः यद्यपि प्रमासामग्र्यांदोषाभावोऽविद्यानस्तथापितद्वर्जनीयसन्निधिराकाशवत्युक्तंचैतत् इतयथानित्यस्येश्वरज्ञान॰
स्यतद्धेतुत्वाद्यनतथाप्रामाण्याभावप्रसंगादितिशंकते नन्वितिजन्याप्रमादोषाभावसहकृतज्ञानसामग्रीजन्यातभवतिप्रमानादीश्वरस्य

नाद्यः स्वतः प्रामाण्यवादिमतानुप्रवेशप्रसंगात् नेपिहि दोषाभावसहकृतज्ञानसामग्रीजन्यत्वमेवपरतः प्रामाण्यं।
मिनीत्युक्तंनापिद्वितीयः विशेषदर्शनस्यभ्रमनिवृत्तिहेतुत्वेनतद्विपर्ययस्यभ्रमहेतुत्ववद्दोषसहकृतज्ञानसामग्रीज-
न्यंज्ञानमप्रमेत्यंगीकुर्वता प्रमांप्रतिदोषाभावस्यहेतुतायाः अनिराकार्यत्वात् नन्वीश्वरज्ञानइवदोषाभावस्यावर्ज
नीयतया अस्मत्प्रमास्वपितस्यासन्निधिः किंनस्यात् नहीश्वरज्ञानेपिदोषाभावः प्रयोजक इत्युक्तंवक्तुं नप्र
युक्तत्वस्यतदंतर्भूतसामग्रीजन्यत्वानतिरेकात् तस्यच नित्यतयाविशिष्टसामग्रीजन्यत्वासंभवादिति चेन्नै
वम् अंतरेणापि तत्सामग्रीजन्यत्वंनित्यद्रव्येषुगुणवत्वप्रयुक्तद्रव्यत्ववत्तत्प्रयुक्तत्वोपपत्तेः॥

मावदितिभावः साध्यवैकल्यंपरिहरति नहीति ननुजन्यत्वाभावेपितत्प्रयुक्तत्वंकिंनस्यादित्यतआह तत्प्रयुक्तत्वस्येति त
दंतर्भूतेति सदोषाभावादिरंतर्भूतोयस्यांसामग्र्यांसातदंतर्भूतासामग्री अथवांतर्भावएवांतर्भूतंभावेनिष्ठातदंतर्भाववतीसाम राम·
ग्रीत्यर्थः ननक्रमेसामग्रीजन्यत्वंनहिगुणवत्त्वप्रयुक्तंद्रव्यत्वमित्यत्रगुणवत्त्वद्रव्यत्वयोर्व्यंग्यजनकभावः परस्परमेकस्यो ११२
पाधित्वात् एकस्यचजातित्वात् किंतर्हि समव्यापकत्वमात्रेण प्रयोज्यप्रयोजकभावः एवमत्रापीति परिहरति नैवमिति
अनित्येष्वाश्रयद्वाराकादाचित्कत्वमपिकथंचित्संभाव्यमितिनित्यद्रव्येष्वित्युक्तं ॥ ॥ ॥ ११२

नन्वभावस्य कारणत्वे वायुक्तानिः स्वभावत्वादिति तत्राह न चेति किमिदं निःस्वभावत्वं यद्यसत्त्वं न किं सत्तानधिकरणत्वं तर्हि गतं सामान्यादीनां
बुद्धिकारणत्वेन न च स्वरूपसत्त्वरहितत्वं तदसिद्धम् यथाहोदयनः नह्यसौ विधिरूपेण तुच्छ इति स्वरूपेणापि तथा इतरथाऽभावस्यापि
तथात्वापातादिति अथ भावत्वानधिकरणत्वं किमेतावता किं वाभावस्य कार्य्यत्वमङ्गीक्रियते न वा न यदि तदा प्रध्वंसानुत्पत्त्या घटस्यानि
त्यतापत्तेः अस्ति चेत् कारणत्वेन किमपराद्धं कः खलु विशेषो नियतप्राक्क्षणसत्तः प्रागसत्त्वे सति सत्तायोगित्व स्तवे अथान्य
थैवाभूत्वाभावित्वात्मकं तत्र कार्य्यत्वं विशिष्यते कारणत्वमपि तथा विशिष्यतेति सूक्तीभावः उक्तं चोदयनेन भावो यथा तथाभावः।
कारणं कार्य्यवन्मतमिति किं च न सर्वत्र भावरूपा एव दोषाः येन तदभावस्याभावतया न कारणत्वमपि तु भावरूपा अपि सन्ति दोषाः त
दभावस्य न किमिति कारणतास्यात् अथ भावस्य तत्र तत्र दृष्टचरं कारणत्वं न त्वभावस्येति तत्र अभावस्यापि तत्र तत्र दर्शनात्स्वीकाराच्च

न च दोषाभावस्याभावत्वादेवाकारणत्वं विशेषदर्शनाभावस्य भ्रमहेतुत्ववत् प्रमाणाभावस्य प्रमेयाभावप्रमितिहे
तुत्ववद्विहिताकरणस्य प्रत्यवायहेतुत्ववच्च तदुपपत्तेः न च प्रामाण्यस्य स्वतस्त्वे मानमस्ति प्रामाण्यं ज्ञानहेतुमा
त्रजन्याश्रयं अप्रामाण्येतरत्वे सति ज्ञानैकधर्मत्वात् ज्ञानत्ववत् दोषजन्यत्वेन व्यभिचारो माभूदिति ज्ञानैकधर्मे

भवद्भिरित्याह विशेषदर्शनेत्यादिना साधारणधर्मदर्शनविशेषादर्शनाभ्यां सर्वत्र भ्रम इत्यर्थः आहूनेवमत्याह ((त्वादित्युक्तम्
प्रमाणाभावस्येति योग्यानुपलब्ध्या ह्यभावप्रमितिरङ्गीक्रियते अनुपलब्धिश्चोपलब्ध्यभाव इत्यर्थः मतद्वयसंमतमुदाहरणमाह वि
हिताकरणेति येन त्वत्र स्वकाले पदकुर्वन्न् हि करोति यदचेतनः प्रत्यवायोऽस्य तेनैव नाभावेन स जन्यते इति ब्रुवतेनैरपत्यनिप्रसक्तिपरि
हाराया कुर्वन् यदन्यत्करोतीति वचनादभावहेतुता शङ्का प्रत्याख्याता एवं लक्षणमाक्षिप्य प्रमाणमाक्षिपति न च प्रामाण्येति र
त्नदीपावलीकृतमनुमानमुद्भावयति प्रामाण्यमिति ज्ञानहेतुजन्याश्रयत्वसाधने सिद्धसाधनता तदर्थमात्रग्रहणं ज्ञानैकधर्मत्वम
प्रामाण्येऽप्यस्तीति तत्र व्यभिचारवारणायाप्रामाण्येतरत्वे सतीत्युक्तं घटत्वादिव्यावृत्त्यै ज्ञानग्रहणं उत्तरविशेषणकृत्यमाह दोषेति
तद्व्याधेरपि धर्म इति तज्ज्ञानैकधर्म इत्यर्थः॥

CC-0. In Public Domain. Digitization by eGangotri

वि॰सु॰ तदीयमेवानुमानान्तरमाह तथेति ज्ञानत्वन्यूनवृत्तित्वमप्रामाण्ये प्रयोक्तीति अत उक्तमप्रामाण्येतरत्वे सतीति सत्तागुणत्वज्ञानत्वेर्व्य

टी॰त॰ भिचारनिवारणाय ज्ञानत्वन्यूनवृत्तित्वग्रहणं अत्र किं ज्ञानहेतुमात्रजन्यवृत्तित्वमात्रं साध्यं किं वाज्ञानहेत्वतिरिक्तजन्यावृत्तित्वे सति

११३ ज्ञानहेतुमात्रजन्यवृत्तित्वमिति विकल्प्याद्ये अंशतः सिद्धसाधनमाह अंशत इति यथा चैतेषां स्वतः प्रमात्वं तैरंगीकृतं तथा सिद्धान्ते दर्श

यिष्यते साध्यविकलत्वमेव दर्शयति ज्ञानत्वस्येति दोषजन्येत्वत्यतिरिक्तजन्यत्वमुक्तं अत्रान्तरा सिद्धान्तिमतमवलंब्य कश्चिच्चोदयति नाप्र

तथाप्रामाण्यमुक्तविधमप्रामाण्येतरत्वे सति ज्ञानत्वन्यूनवृत्तित्वात् प्रत्यक्षत्ववदित्यनुमानं मानमिति केचित्तन्न विक

ल्पासहत्वात् तथाहि किं तथाविधव्यक्तिवृत्तितामात्रं विवक्षितमुतान्यावृत्तित्वे सति तथाविधव्यक्तिवृत्तित्वं नाद्यः अंशतः सि

द्धसाधनत्वात् अनुव्यवसायानुमित्युपमितीनां स्वतः प्रमात्वस्य परैरप्यंगीकारात् न द्वितीयः आद्यप्रयोगे दृष्टान्तस्य साध्य

विकलत्वात् ज्ञानत्वस्य दोषजन्याप्रमाणज्ञानवृत्तित्वस्याप्यंगीकारात् नाप्रमाणज्ञाने ज्ञानत्वस्य वृत्तिस्तस्य ज्ञानाभासत्वा

दिति चेत् मैवं तथा सत्यप्रामाण्येतरत्वे सतीति विशेषणस्य वैयर्थ्यात् अप्रमाणज्ञानस्य ज्ञानाभासत्वेनाप्रामाण्यस्य ज्ञा

नवृत्तित्वाभावात् द्वितीयानुमाने च संशयत्वादिना व्यभिचारः तथाहि तदपि ह्यप्रामाण्येतरत्वे सति ज्ञानत्वन्यूनवृत्ति भव

ति न तु भवति ज्ञानहेतुमात्रजन्याश्रयं निमित्तादिदोषजन्याश्रयत्वात् दृष्टान्तस्य साध्यविकलताच प्रत्यक्षत्वस्यापि

परतः प्रामाण्यवादिनां ज्ञानहेतुमात्रजन्याश्रयत्वानाश्रयणात् प्रमात्वमेव यस्य ज्ञानमात्रजन्याश्रयं न भवति गुण

विशिष्टज्ञानसामग्रीजन्यवृत्तित्वात् तस्य कथं तदवानरजातिप्रत्यक्षत्वं तद्धेतुमात्रजन्याश्रयं स्यात् अस्ति च परतस्त्वेपि प्रयो

माणेति उक्तं हि अविद्यावेद्यैः सह भ्रमदृष्ट्यभिमानः सर्वत्र प्रकृतदूषणं परिहरतो विशेषणवैयर्थ्यं तथा चैकं संधित्सतोऽपरं प्रच्यवत

इत्याह मेवमिति व्यभिचारमेव स्फोरयति तथाहीति दूषणान्तरं चाह दृष्टान्तस्येति तस्यैव विवरणं प्रत्यक्षत्वस्यापीति ननु किमिति प्रत्य राम॰

क्षत्वे नाङ्गीक्रियते नहि तत्प्रमात्वमित्यत आह प्रमात्वमेवेति गुणविशिष्टसामग्रीजन्यप्रमाश्रयं प्रमात्वमिति यस्याङ्गीकारः स कथं ११३

तदवानरजातिप्रत्यक्षत्वं ज्ञानहेतुमात्रजन्याश्रयमङ्गीकुर्यादित्यर्थः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गुणग्रहणं दोषाभावस्याप्युपलक्षणं एवं स्वतस्त्वलक्षणप्रमाणे दूषयित्वा परतस्त्वे कुसुमांजलीयमनुमानं दर्शयति अनीश्वर
प्रमेति इदं च तत्रयुक्तं प्रसिद्धमीश्वरप्रमायां बाधासिद्धी मा भूतामिति यदस्य रत्नदीपावल्यामनुमानदूषणमुक्तं तदुद्दिधीर्षुरनु
वदति ननु किं ज्ञानव्यक्तेरिति किं ज्ञानत्वाश्रया या ज्ञानरूपिणी व्यक्तिस्ततो भिन्ना प्रमात्वाश्रयः प्रमाव्यक्तिः किं वा नेति विक।
ल्पाद्ये व्यभिचारमाह प्रत्यक्षेति द्वितीये ज्ञानरूपायाः प्रमाव्यक्तेर्ज्ञानहेत्वतिरिक्तहेतुजन्यत्वसाधनं व्याहतं ज्ञानं ज्ञानहेतु।
त्वानधिकरणजन्यमिति हि तदर्थः स्यादित्याह द्वितीयेपीति तदेतद्दूषयति मैवमिति यद्यपि व्यक्त्योर्भेदो नास्ति तथापि ज्ञान

अनीश्वरप्रमा विज्ञानहेत्वतिरिक्तहेत्वधीना कार्यत्वाद्घटवत् ननु किं ज्ञानव्यक्तेः प्रमाव्यक्तितोस्ति कश्चिद्वि
शेषः किं वा प्रमाव्यक्तिरेव ज्ञानव्यक्तिः आद्ये प्रत्यक्षज्ञानव्यक्त्या स्पष्टो व्यभिचारः प्रत्यक्षज्ञानव्यक्तेर्विज्ञा
नहेत्वतिरिक्तहेत्वधीनत्वाभावात् द्वितीयेपि जन्यापि विज्ञानरूपा प्रमा न ज्ञानहेत्वतिरिक्तहेत्वधीनेति बाध
इति चेन्मैवं ज्ञानव्यक्तेः प्रमाव्यक्तितो भेदाभावेपि विज्ञानत्वप्रमात्वधर्मयोर्भेदात् ततश्च घटत्वस्य पृथिवी
त्वप्रयोजकातिरिक्तप्रयोजकत्वसाधन इव प्रमाया विज्ञानत्वप्रयोजकातिरिक्तप्रयोजकत्वसाधने बाधाभावात् वि
पक्षे च प्रमात्वस्य विज्ञानत्वप्रयोजकमात्रप्रयोज्यत्वात् ज्ञानत्ववदप्रमाज्ञानवृत्तित्वं स्यादिति बाधकस्तर्क उन्नेयः
ननु ज्ञानसामग्र्या एवानिरूपणात् तदतिरिक्तहेत्वधीनत्वं दुर्ज्ञानमिति चेत्

॰त्वप्रमात्वयोर्भेदात् प्रमाया अपि ज्ञा
नत्वप्रयोजकव्यतिरिक्तप्रयोज्यत्वमुपपद्यते यथा ह्येकस्मिन्नेव घटे द्रव्यत्वपृथिवीत्वघटत्वानां विभिन्नप्रयोजकतया द्रव्यादीना
मपि विभिन्नप्रयोज्यत्वेनेत्यर्थः ज्ञानहेत्वतिरिक्तहेत्वधीनत्वाभावे च बाधकमाह विपक्षे चेति यदि ज्ञानहेतुमात्रप्रयोज्य यं तर्हि।
तत्प्रयोज्यज्ञानवृत्ति ज्ञानत्ववत्प्रमात्वमप्यप्रमायां वर्तेतेत्यर्थः ननु साध्यमेवेदं नांगीकारयति ज्ञानहेतोरेवानिरूपणादिन्द्रिया
दीनां परस्परव्यभिचारादात्ममनःसंयोगस्य च सुखादिसाधारण्यात् अतस्तदतिरिक्तहेतुरपि दुर्निरूप इति शंकते नन्विति॥

१
वि॰सु॰ रूपयति मैवमिति अवश्यंतावद्दोषानुषक्तविज्ञानसामग्रीजन्यत्वमप्रामाण्यं मत्वानेन ज्ञानसामग्रीतावन्निरूपिणी यासा च तास्मन्मतेदं
टी॰न॰ वाविताभविनव्यं चतया अन्यथाविलक्षणकार्यादर्शनप्रसंगादिति भावः किमाश्रयज्ञानवेद्यत्वं प्रामाण्यस्य तद्ग्रहोस्वतस्त्वं किं वा ज्ञानग्राह
११४ कग्राह्यत्वमिति विकल्पाद्यं दूषयति नाद्य इति नीलसंवेदनस्य स्वप्रामाण्यग्राहकत्वाभावमेवोपपादयति तथाहीति इंद्रियार्थसन्निकर्षोत्प
न्नं ह्यनीश्वरप्रत्यक्षं तदिदं च बहिरिंद्रियस्यांतरस्य वा प्रामाण्येन सन्निकर्षादुत्पद्यत इति वक्तव्यं प्रत्यक्षवादिना तत्र बहिरिंद्रियग्राह्यत्वं प्रा
माण्यस्यातद्धर्मत्वादेवासंभवीत्याह तस्येति नापि मानसत्वं तदाहि प्रामाण्यस्य मनःसन्निकर्षसमयेतत्स्त्वार्थे तदाश्रयज्ञानस्यापि सत्त्वेव

मेवं एवं सत्यप्रमायाः परतस्त्वं दत्तजलांजलिः स्यात् तदपि हि ज्ञानसामग्रीनिरूपणाधीननिरूपणं तस्य दोषानुषक्तवि
ति ज्ञानसामग्रीजन्यतापि ज्ञानात् तस्मान्नोत्पन्नोप्रमायाः स्वतस्त्वं नापि द्वितीय तथाहि नीलसंवेदनस्य प्रामाण्यं नीलसं
वेदनेनैवावेद्यत इति स्वतस्त्वमुच्यते किंवा तद्वेदनग्राहकमात्रग्राह्यत्वेन नाद्यः तस्य तत्राप्रमाणत्वात् तथाहि
यदेतन्नीलप्रकाशनं प्रत्यक्षं तन्नीलं प्रतितावत्प्रत्यक्षमिंद्रियार्थसन्निकर्षोत्पन्नत्वात् स्वप्रामाण्यं परिच्छित्तौ
तु कथं तत्प्रमाणं तस्य बहिरिंद्रियैरसन्निकर्षात् अपि च तत्प्रत्यक्षं विज्ञानस्यैव प्रामाण्यं गृह्णीयात् उत तत्फलं
स्य नाद्यः ज्ञानस्य फललिंगानुमेयत्वेन तस्याप्रत्यक्षतया तत्प्रामाण्यस्यापि प्रत्यक्षतानुपपत्तेः॥ द्वितीयं तथा च न तदेव ११४

ज्ञानं स्वाश्रितप्रामाण्येंद्रियसन्निकर्षादुत्पत्तुमर्हतीति सिद्धस्वभावात् ज्ञानांतरस्योत्पत्तौ तु परतः प्रामाण्यप्रसक्तिरिति लिंगादिजन्यत्वाभावा
त्वनानुमित्यादिरूपता शंकापि किंचेदं प्रामाण्यमिति वा तत्तेन गृह्यते तत्प्रामाण्यमिति वा आद्ये ज्ञाननिष्ठतया अग्रहणात् गृहीतेन स्मिन्
संशयप्रसंगः द्वितीये स्वविशेषितप्रामाण्यग्रहणे स्वग्रहापत्तिः अपि च यथा तथा भवतु तत्तु कस्य प्रामाण्यं गृह्णातीति भाट्टमतं विकल्प राम॰
यति अपि चेत्यादिना तत्फलं प्राकट्यं प्राकट्य लिंगानुमेयं विज्ञानं भाट्टैरभ्युपेयते न चाप्रत्यक्षगतं प्रामाण्यं भवितुं प्रत्यक्षमर्हतीति न ११४
च स्पर्शशब्दादितुल्यता जातित्वात् जातेरेव व्यक्तिप्रत्यक्षतानियतप्रत्यक्षत्वं वक्ष्यते च जातित्वमतत्त्वमंतरमेवेतिभावः॥ ७ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रतीतेपि ३॥

फलगतप्रामाण्यग्रहणपक्षेपि किं वहिरिंद्रियेणांतरेण वा नाद्य इत्याह फलस्यापीति अर्थनिष्ठत्वादेव नांतरप्रत्यक्षत्वमपि यदि क
श्चिदात्मनिष्ठत्वमन्वीतसुचरितमिश्रमतानुसारेण तथापि स्वप्रकाशत्वादेवाविषयत्वेन तद्गतप्रामाण्यमविषय इत्यपि द्रष्टव्यम् ज्ञान
ग्राहकादेव तत्प्रामाण्यग्रहणं ज्ञप्तिस्वतस्त्वमिति द्वितीयपक्षं दूषयति नापि द्वितीय इति दृष्टत्वेहि क्वचिज्ज्ञाने प्रामाण्ये संशयः स तस्या
त् ज्ञाननिश्चायकादेव तन्निश्चयप्राप्तेरित्यर्थः तत्र ज्ञानग्राहकमात्रग्राह्यत्वेप्युपपन्नः सन्देहः ज्ञानगततदर्थविशेषितत्वस्य ज्ञान।
ग्राहकमात्रग्राह्यत्वेपि तत्र संदेहदर्शनादतः प्रशिथिलमूलस्तर्कः हेतुश्च सव्यभिचार इत्यौदयनं परतस्त्वानुमानं केचिद्दूषयां।

फलस्यापि स्वप्रकाशतया वाह्येन्द्रियाविषयत्वात् तद्गतयथार्थत्वलक्षणप्रामाण्यस्यापि वाह्येन्द्रियप्रत्यक्षविषयत्वानुप
पत्तेः नापि द्वितीयः ज्ञानग्राहकमात्रग्राह्यत्वे प्रामाण्यस्य क्वचिदपि ज्ञाने प्रमाणमप्रमाणं वेति संशयाभावप्रसंगात् ननु ज्ञान।
ग्राहकमात्रग्राह्यत्वेप्यर्थविशेषितत्वस्य सांशयिकत्ववत् प्रामाण्यस्यापि सांशयिकत्वमुपपद्यते तथाहि कुंभज्ञानस्यांभो विषयी
भूतं वेति संशयानादृश्यंते जनाः सांभसामनंभसामपि कुंभानामुपलंभात् एवं प्रामाण्येपि संशयः किन्न स्यादिति चेन्मैवं।
अंभसः कुंभग्राहकसामग्रीमात्रग्राह्यत्वानंगीकारात् अंगीकारे वाऽविशेषेण सकलकलशानां सलिलवत्त्वप्रसंगात् तस्मा
न्नारिकेलफलांतर्गतसलिलादिवद्भिन्नसामग्रीग्राह्यत्वादेव तत्र संशयः प्रामाण्ये तु न तथेति युक्तमुत्पश्यामः किंच वि
ज्ञानग्राहकसामग्रीमात्रग्राह्यतायां प्रामाण्यस्य शुक्तिकारजतादिबुद्धिष्वपि तद्ग्रहप्रसंगः स्वयं गृहीतमेव तत्॥

वभूवुः तत्प्रसंगादनूद्य दूषयति नन्वित्यादिना ज्ञानग्राहकग्राह्यत्वे समानेपि कुंभसलिलयोर्भिन्नसामग्रीग्राह्यत्वात् सोदकेपि कुंभे कुत
श्चिन्निमित्तात्सलिलग्राहकसामग्रीवैकल्याद्विषयत्वोपपन्नत्वेन संभवत्यपि तावदंशे संशयः इह तु न तथा किंचिदस्ति संशयकारण
मिति परिहरति मैवमिति वाधकांतरमाह किंचेति पूर्वमुत्पत्तिस्वतस्त्वे विभ्रमेपि तत्सत्त्वं स्यादित्युक्तं संप्रति ज्ञप्तिस्वतस्त्वे तदुच्यत इ
ति नन्वामिता उत्सर्गतः प्राप्तस्यापि तत्र तस्यापवादमाह स्वतः प्रामाण्यवादी सत्यमिति सत्यमङ्गीकारे

CC-0. In Public Domain. Digitization by eGangotri

१

वि॰सु॰ अनङ्गीक्रियमाणांशमाह बाधकादिति बोधात्मकत्वेन ज्ञानत्वादेव शुक्तिरजतादिबुद्धेरपि प्रमाणतापत्त्या गृहीतानत्याप्यर्थोन्यथा
टी॰न॰ त्वज्ञानैः प्रतीतार्थस्यान्यथात्वबोधकैः बाधकज्ञानैर्हेतूत्थदोषज्ञानैर्हेतुगतदोषज्ञानैश्चापोद्यते बाध्यत इति भङ्ग्युक्तेरर्थः परतः प्रा
११५ माण्यमापादयन्ति निवृत्तामेव समर्थयते मैवमिति प्रामाण्यस्यापि बाधकज्ञानादपवादे तत्तदसत्त्वाभ्यामप्रामाण्यप्रामाण्य
व्यवस्थेति परतः प्रामाण्यापत्तिः प्राप्नोतीत्यर्थः ज्ञप्तिस्वतस्त्वानिरुक्तिमुक्त्वा प्रमाणमपि तत्राक्षिपति नचेति रत्नदीपावलीयमत्रमा
नमुद्भावयति ननु प्रमेति स्वतो ज्ञायत इति ज्ञानज्ञापकमात्रात् ज्ञायते परनिरपेक्षेति ज्ञानसामग्रीमात्रादुत्पन्नत्वादित्यर्थः परतः

बाधकादपनीयते यथाहुः तस्माद्बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता अर्थान्यथात्व हेतूत्थदोषज्ञानैरपोद्यते इति तस्माद
स्माकमिष्टप्रसंजनमिति चेत् मैवं परतःप्रामाण्यप्रसंगात् तथा हि प्रसक्तमपि प्रामाण्यं रजतादिबुद्धिषु बाधकज्ञानादपनी
यत इति वदता बाधकज्ञानाभावनिबंधनमेव प्रामाण्यावधारणमभ्युपगतं स्यात् न च ज्ञप्तिस्वतस्त्वे मानमस्ति ननु प्रमा
स्वतो ज्ञायते परानिरपेक्षोत्पत्तिकत्वात् ज्ञानवत् तथा प्रामाण्यं स्वतो ज्ञायते अप्रामाण्येतरत्वे सति ज्ञानैकधर्मत्वात् ज्ञानत
वदित्यस्त्येवानुमानमिति चेत् मैवं आद्यप्रयोगे परतःप्रामाण्यवादिनं प्रति हेतोरसिद्धेः दृष्टान्ताभावाच्च न हि परस्योक्त
तां प्रमां विपक्षकुक्षिनिक्षिप्तामप्रमां च विहाय ज्ञानस्यापरा कोटिरस्ति यां दृष्टान्तपदवीमुपारोहेत् द्वितीये च प्रयोगे प्राभाक
रस्मृत्यप्रमात्वे ज्ञानैकधर्मे भाट्टस्य च ज्ञाततानुमेयत्वधर्मे व्यभिचारः तयोर्ज्ञानैकधर्मत्वेपि ज्ञानग्राहकसामग्रीमात्रग्रा

प्रामाण्यवादिनः परनिरपेक्षोत्पत्तित्वं प्रमाया असिद्धमिति दूषयति मैवमिति किंच प्रमाणाप्रमाणाभ्यां ९ ह्यत्वाभावात्॥ ८
दैवाप्यमेव ज्ञानस्य तत्र प्रमाणवर्गः पक्षः सर्वः इतरस्तु विपक्षः ततो दृष्टान्तोपि नास्तीत्याह दृष्टान्तेति अप्रामाण्येतरत्वे सति ज्ञानैक ताम॰
धर्मत्वादिति द्वितीयानुमानेपि गुरुमतभाट्टमतयोर्यथायथमनैकान्तिकमाह द्वितीये चेति ज्ञाततयानुमेयं हि ज्ञानं भाट्टमते ततो ११५
ज्ञाततानुमेयत्वं नाम कश्चिज्ज्ञानस्य धर्मस्तस्मि न्नित्यर्थः ज्ञानसामग्रीजन्यत्वधर्मेव व्यभिचारो द्रष्टव्यः॥ ६ ॥ ६ ॥

११५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ किमिति तयोरपि न स्वतो ज्ञानमिति तत्राह अन्यथेति यदि हि ज्ञानग्राहकादेव तयोरपि ज्ञानं स्यात्तर्हि ज्ञानवदेव तयोरपि न विवादो वादि
नां स्यात् विवदन्ते चेत्यर्थः सांशयिकत्वादित्युक्ते भागासिद्धिः स्यात् नहि करतलस्पर्शनादिप्रमायां मुग्धोपि संदिग्धे तत उक्तमनभ्याससदशाया
मिति विपक्षबाधकस्तर्क इति संबंधः यद्यत्र रत्नदीपावत्स्यादूषणमुक्तं तदनुवदति ननु नैवमिति प्रवृत्तिसामर्थ्यमिति विमतमर्थाव्यभिचारि
समर्थप्रवृत्तिजनकत्वात् यत्रैवं तत्रैवं यथा ज्ञानाभास इति व्यतिरेकिणानुमानादिव दित्यन्वयिना वा अनभ्यासदशापन्नेषु प्रामाण्यमनुमी
यते संशयाच्च प्रवृत्तिरभ्यासदशापन्नेषु तु तज्जातीयत्वलिंगेन इत्यभ्युपेयत इत्यर्थः क्वचिदनिर्णीतस्य साधारणधर्मदर्शनाद्युपस्थापित।

अन्यथा तत्त्ववादीनां विप्रतिपत्त्यभावप्रसक्तेः ज्ञप्तिः परतस्त्वे चानुमानं न्यायकुसुमांजलावादस्माचोदयनः प्रामाण्यं परतो ज्ञा
यते अनभ्यासदशायां सांशयिकत्वात् अप्रामाण्यवत् विपक्षे प्रामाण्यसंशयो न स्यात् ज्ञाननिश्चायकादेव तन्निश्चयप्रसंगात् इति बा
धकस्तर्कः ननु नैवमनुमानमुदेति धर्मिहेत्वोरसिद्धेः तथा हि प्रामाण्यं प्रवृत्तिसामर्थ्यलिंगावगम्यं भवद्भिरुपगम्यते।
तस्य च लिंगस्य प्रवृत्तिः प्रामाण्यसंशयपूर्विका असंदिग्धे सिषाधयिषाभावात् अनुमानाप्रवृत्तेः तत्संशयश्च क्वचि
न्निश्चयाधीन इति प्रामाण्यसंशयनिश्चययोरन्योन्याश्रयात् अनवस्थानाद्वा नैकमपि सिद्ध्येदिति चेन्नैवम् विकल्पा
सहत्वात् किं स्वार्थानुमानमसंदिग्धे न प्रवर्त्तते किं वा परार्थं नाद्यः सद्यः समुन्मीलितविलोचनशिखरिशिखरवि
परिवर्त्तमानधूमलेखावलोकनसमनंतरमप्रत्यूहधूमध्वजमनीषासमुन्मेषात् नापि द्वितीयः॥ ॥

तयोः संशयकोटितः भावात् तन्निर्णयस्य च संशयसापेक्षानुमानाधीनत्वात्संशयनिर्णयोः परस्परसापेक्षत्वे परस्पराश्रयात् सं
शयांतरनिर्णयांतरापेक्षायामनवस्थानाच्च नैकमपि सिध्यति लोकसिद्धं च किंचिद्रूपं सर्वत्र प्रमाणतः सिद्धमभिवांछतो नास्ति अ
तो निर्णीतप्रामाण्याभावाद्धर्म्यभावः संशयाभावाच्च हेत्वभाव इति खंडलार्थः अत्र विकल्प्य पूर्वं संशयव्यतिरेकेणापि निश्चयमुप
पादयन्धर्मिहेत्वसमर्थयते सैवमित्यादिना शिखरी पर्वतः तस्य शिखरमग्रिमभागः अप्रत्यूहमनिर्विघ्नं धूमध्वजो वह्निः मनीषा बुद्धिः
स्वार्थानुमानं वह्निसाधनादिज्ञानप्रामाण्यानुमानमित्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१
वि॰सु॰ टी॰न॰ ११६

पराथानुमानेपि न संशयपूर्वकत्वनियमः विपर्य्यस्तं प्रत्यपि प्रयोगादित्याह विपर्य्यस्तमिति जल्पवितंडयोरिति नहि तत्र संदिहानः
प्रतिवादी यं प्रत्यनुमानं प्रयुज्येत अपि तु विपर्य्यस्तः तथा चाह वाचस्पतिः निश्चितो हि वादं कुरुते इति वादे तु सन्नप्येव वादार्थ्यी वा संशयो स्ति
न त्वितरयोरित्यर्थः ननु संदिग्धे न्यायः प्रवर्त्तते इति रुद्रवचनस्य तर्हि का गतिरित्यत आह संदिग्धे इति नेन तत्संदेहाभावेनुमाननिवृत्तिपरं
अपि त्वनुमानस्थले संदेहो प्यस्तीत्ययोगव्यावृत्तिपरमित्यर्थः अयोगव्यावृत्तिमेवोपपादयति क्वचिदिति यच्चैवैवानभ्यासदशायामि
ति विशेषणं व्यर्थं व्यभिचारानिवारकत्वात् सिद्धिपरिहाराय च विशेषणप्रक्षेपायोगादित्युक्तं अनभ्यासदशायामित्यादिना तदनूद्य दू
षयति नचानभ्यासेत्यादिना रूपव्यंजकत्वादित्युक्ते मनस्यनैकांतिकता तदर्थं रूपस्यैवेत्युक्तं तथा चासिद्धिः द्रव्यसामान्यादेरपि व्यंज

विपर्य्यस्तमपि प्रति प्रतिवादिनमनुमानप्रयोगोपगमात् अन्यथा जल्पवितंडयोः प्रमाणतर्काभ्यां स्वपरपक्षसाधनो
पालंभासम्भवात् संदिग्धे न्यायः प्रवर्त्तते इति वचनस्यायोगव्यवच्छेदपरत्वात् क्वचित्साधकबाधकप्रमाणानुदया
त्संदेहसति न्यायप्रवृत्त्युपपत्तेः नचानभ्यासदशायामिति विशेषणस्य वैयर्थ्यं असिद्धिवारकत्वात् नच व्यभिचारवारक
मेव हेतोर्विशेषणमिति नियमः चक्षुस्तैजसं रूपादिषु मध्ये रूपस्यैवाभिव्यंजकत्वात् प्रदीपवदित्यादिचिरंतनानुमानेष्वसि
द्धिनिवारकाणां विशेषणानां बहुलमुपलंभात् अपि चासिद्धिनिवारणार्थं पि विशेषणोपादानेन दोषं पश्यामः क्षित्या
दिकं सकर्तृकं शरीराजन्यत्वादाकाशवदित्यादावविव्याप्यत्वासिद्धिरिति चेन्न मैवं तत्राकर्तृकत्वे साध्ये तदेकदेशस्याज
न्यत्वस्यैवोपाधितया विशिष्टस्य व्याप्यत्वासिद्धेः॥ ९ कत्वाच्चक्षुस्तदर्थं रूपादिषु मध्य इत्युक्तं यत्त्वपि रसाग्राहकत्वे सति रूपव्यंज

कत्वादित्युक्त एवं मनस्यपि न व्यभिचारः तथाप्यसिद्धिपरिहारार्थमपि भवति विशेषणमिति दर्शयितुमिदं चिरंतनैर्विशेषणं प्रक्षिप्तमिति
भावः नन्विमनुपपन्नो व्याप्तवचनेनैव साध्योयमर्थ इति मत्वा नं प्रत्यनुपपत्त्यभावं दर्शयति अपि चेत्यादिना दोषं शंकयति क्षित्यादिकमि
ति अत्र ह्यजन्यत्वादित्युक्ते कुरादेर्जन्यत्वादसिद्धिः स्यात्तदर्थं शरीराजन्यत्वादित्युक्तं तदत्र यथासिद्धिपरिहाराय विशेषणं कृतं व्याप्यत्वा
सिद्धिः अजन्यत्वस्यैवाकर्तृकत्वोपाधित्वात् तद्दिहापि स्यादित्यर्थः न तत्रासिद्धिपरिहारप्रयोजनविशेषणवत्त्वात् व्याप्यत्वासिद्धिः किं तर्हि तदे

कदेशस्योपाधित्वसंभवात् न चात्र तथा सांशाविकत्वस्यैक
देशस्योपाधित्वमिति परिहरति मैवमित्यादिना॥

११८
राम॰ ११६

एकामसिद्धिमिति स्वरूपासिद्धिं परिहरतो व्याप्यत्वासिद्धिरिति बौद्धधिक्कारे उदयनेनोक्तमित्यर्थः परतो ज्ञायमानानामिति ज्ञानग्रा
हकानि लिङ्गग्राह्याणामित्यर्थः प्रकृतानुमानस्य तर्कपराहतीं शङ्कते ननु प्र माणस्येति येन हि प्रमाणेन प्राथमिकस्य प्रामाण्यं गृ
ह्यते तत्प्रामाण्यमपि प्रमाणान्तरेणैव पुनस्तत्रापीत्यनवस्थेत्यर्थः उक्तं वाचस्पतिमिश्रैः परं हि तज्ज्ञो वरं वाज्ञानमभ्युपेयते अर्थ।
क्रियानिर्भासं वा ज्ञानं तज्ज्ञोत्तरं नान्तरीयकार्थनिदर्शनं वा तत्सर्वं स्वयमबोधितप्रामाण्यमाकुलं सत्कथं प्रवर्त्तकज्ञानं पूर्वमनाकु
लयेदिति ननु कथमवश्यंभावनियमाभावः यावत्तास्फुरत एव प्रमाणस्य स्वविषयनिश्चायकत्वनियमात् तदुत्तरप्रमाणानाम

उक्तं हि एकामसिद्धिं परिहरतो द्वितीयासिद्धिरापद्यत इति प्रकृते तु परतो ज्ञानेन सांशयिकत्वमुपाधिः स्फीता
लोकविपरिवर्त्तिनां परतो ज्ञायमानानामपि घटादीनां सांशयिकत्वादर्शनात् ननु प्रामाण्यस्य परतो ज्ञानेन
वस्थानन्तु प्रामाण्यग्रहणाय तत्सामान्यस्य प्रमाणस्यापेक्षणात् अतः प्रतिकूलतर्कपराहतं परतः प्रामाण्यानुमानमि
ति चेन्न मैवं मानान्तरस्यावश्यंभावनियमाभावात् न च स्फुरत एव मानस्यार्थनिश्चायकत्वमन्यथा ज्ञानेप्यन
न्तरसंदेहापत्तेरिति वाच्यम् ज्ञाततयानुमेयं ज्ञानमिति मतेऽपि लीनस्यापि ज्ञानस्यार्थनिश्चायकत्वात् स्वयं वेदनं सं =
वेदनमिति वदतः प्राभाकरस्यापि मते प्रामाण्यस्य तद्धर्मस्य तद्गतगुणत्वादेरिव न स्वतः स्फुरणं तस्यापि संवेदनं
(१वत्स्वयंप्रभावत्वा

पि भवितव्यमेव स्फुरणेनेति नेत्याह न च स्फुरत एवेति न च वाच्यमित्युक्तं तत्र हेतुः ज्ञाततयेति स्वतः
प्रामाण्येऽपि समानैवानवस्थेत्यपि द्रष्टव्यं भवतु भाट्टान्प्रति अज्ञायमानप्राकाश्यहेतुत्ववादिनो व्यभिचारः स्वप्रकाशवादिनं प्रा
भाकरं प्रति किं वक्तव्यमित्याह प्राभाकरस्यापीति तत्र किं ज्ञानगतं प्रामाण्यं अर्थप्रकाशनसमसमये ज्ञानेन स्फुरति स्वत एव
वा न तावज्ज्ञानेन पूर्वमेव निरस्तत्वात् द्वितीयं निषेधति न स्वतः स्फुरणमिति कुतो न स्वतः स्फुरणमिति तत्राह तस्यापीति ॥६॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१

वि॰सु॰ ततोऽपि वा किमनिष्टमिति तत्राह तथात्वे चेति तथाप्यपरितुष्यन्नन्यमाह ततश्चेति ननु साक्षिवेद्यत्वन्तु ज्ञानवादिनां तन्मये च सा
टी॰न॰ क्षिणैव प्रामाण्यमपि स्फुरतीति वदतामद्वैतिनामेव आपत्तिरित्यत आह वेदान्तिनां चेति तेषां सन्देहानुपपत्तिरेव बाधिकेत्यर्थः
११७ एवमुत्पत्तौ ज्ञप्तौ च स्वतस्त्वं दूषयित्वा परतस्त्वं समर्थितं इदानीं व्यवहृतावपि तदुभयं व्याकरोति न च प्रमाणमिति न च वस्तु
ज्ञानमात्राद्धानादयोऽपि तु इष्टसाधनतादिज्ञानात् ततश्च घटज्ञानस्येष्टसाधनतादिज्ञानाधीनव्यवहारजनकत्वं न स्वव्यवहृतौ
परतस्त्वमित्यर्थः लक्षणं तावत्समर्थयते तत्तावदिति श्लोकेन लक्षणं संगृह्णाति आहुरित्यादिना यद्विज्ञानसामग्रीजन्यत्वे।

तथात्वे चाप्रमात्वस्यापि स्वत एव स्फुरणप्रसंगात् ततश्च प्रामाण्यं परतः प्रतीयत इति स्वसिद्धान्तभंगप्र
संगः वेदान्तिनां च प्रामाण्यस्य साक्षिवेद्यत्वेन स्फुरणनियमादिदं प्रमाणमप्रमाणं वेति सन्देहो न भवेत् न च प्र
माणं स्वत एव फलं जनयति हानोपादानोपेक्षालक्षणस्य त्रिविधस्यापि फलस्य वस्तुज्ञाना
तिरिक्तगुणदोषमाध्यस्थ्यदर्शपूर्वकत्वाभ्युपगमात् तस्माद्वेदान्तिनः स्वत एव प्रमाणमिति तत्प्रामाणिकप्रती
ति यथा समवतरति अत्राभिदध्महे तत्तावत्प्रमायाः स्वतस्त्वा निरुक्तिः यतः आहुर्विज्ञानसामग्रीजन्यत्वे सत्य
जन्यता तदन्यतः प्रमायाः स्वतस्त्वं न स्वमिति तद्विदः २१ विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तहेत्वजन्यत्वं प्र [illegible]

सति तदन्यतः तदतिरिक्तसामग्रीतोऽजन्यता प्रमायाः स्वतस्त्वं (मायाः स्वतस्त्वं नाम न चैतल्लक्षणमव्यापकं सर्वे ११८
प्रमा स्वतस्त्वमिति तद्विद आहुरिति योजना लक्षणवाक्यं विवृणोति विज्ञानेति विज्ञानसामग्रीजन्यत्वे सति विज्ञानसामग्री
त्वानधिकरणजन्यत्वानधिकरणत्वं स्वतस्त्वमित्यर्थः विज्ञानसामग्रीजन्यत्वमप्रामाण्येऽप्यस्तीति परतः प्रामाण्यवादिभि राम॰
ष्वस्वीक्रियत इत्यतिव्याप्तिरर्थान्तरता वा स्यात् तन्निवृत्त्यर्थं तदतिरिक्तहेत्वजन्यत्वमित्युक्तम् ॥ ॥ ६ ॥ ॥ ११७

CC-0. In Public Domain. Digitization by eGangotri

ननु कथं नाव्यापकं यावतेश्वरज्ञाने ऽजन्ये व्याप्तिः विशेषणाभावादिति तत्राह न चाजन्यत्वादिति विज्ञानसामग्रीजन्यत्वे सति
तदतिरिक्तसामग्रीजन्यत्वं परं प्रमासु प्रसिद्धं तदन्यतमाभाववत्त्वं हि लक्षणं एतच्चेश्वरज्ञानेऽस्तीति नाव्याप्तिरित्यर्थः अत्र चाप्रमाव्य
तिरिक्तं सर्वं लक्ष्यं समानयोगक्षेमं पराभिमतं परतस्त्वव्यतिरिक्तस्वतस्त्वस्याविवक्षितत्वात् श्लोकविवरणयोः प्रमापदस्य प्रकृ
तोपयोगमात्रनिबंधनत्वात् अत एव वक्ष्यमाणानुमाने घटादीनां सपक्षीकरणं एवं च सति घटादिष्वव्याप्तिपरिहारार्थं विज्ञान
सामग्रीजन्यत्वग्रहणमिति द्रष्टव्यम् स्पष्टार्थं वा विज्ञानग्रहणं प्रमायामुक्तं स्वतस्त्वसद्भावेऽनुमानमाह श्लोकेन प्रमेति अत्रजा

न चाजन्यत्वादव्याप्तिरीश्वरज्ञाने तस्याजन्यत्वेऽपि ज्ञानसामग्रीजन्यत्वे सत्यतिरिक्तकारणजन्यत्वलक्षणवि
शिष्टधर्मवत्त्वाभावात् नाप्यतिव्यापकमप्रमाया विज्ञानसामग्रीजन्यत्वे सत्यतिरिक्तहेतुजन्यत्वात् अस्ति चे
हमानमनुमानं तथाहि प्रमा विज्ञानसामग्रीजन्यत्वे सति नान्यतो जायते व्यतिरिक्तत्वादप्रमातः घटादिवत् २२
प्रमा विज्ञानसामग्रीजन्यत्वे सत्यतिरिक्तजन्या न भवति अप्रमातिरिक्तत्वात् घटादिवत् न च ज्ञानत्वानधिकरण
त्वमुपाधिः ईश्वरज्ञाने साध्याव्याप्तेः नापि ज्ञानसामग्र्यजन्यत्वमुपाधिः यज्ज्ञानसामग्रीजन्यं तज्ज्ञानसामग्री
जन्यत्वे सत्यतिरिक्तजन्यमप्रमाणवदिति व्यतिरेकिव्याप्तावप्रमात्वस्यैवोपाधित्वात् ॥ यत इत्थं तत्प्रतिज्ञा अप्रमातो

व्यतिरिक्तत्वादिति हेतुः अतिरिक्तसामग्रीजन्या न भवतीत्युक्ते बाधः यत्किंचित् व्यतिरिक्तसामग्रीजन्यत्वात् तदर्थं विज्ञानसामग्री
जन्यत्वे सतीत्युक्तं तावत्युक्ते परतस्त्वेऽप्युपपद्यमानतयार्थान्त~रतानदर्थमुत्तरं विशेष्यग्रहणं ईश्वरज्ञाने विज्ञानसामग्रीजन्यत्वे
सत्यतिरिक्तसामग्रीजन्यत्वाभावलक्षणसाध्यमस्ति न च ज्ञानत्वानधिकरणत्वरूपोपाधिः अतः साध्याव्याप्तेस्तु पाधिरित्याह ई
श्वरेति ननु तद्विज्ञानसामग्र्यजन्यत्वमुपाधिः तथा चेश्वरज्ञाने विद्यमानत्वान्न साध्याव्याप्तिरिति तत्राह नापीति नायमुपा
धिर्व्यतिरेके सोपाधिकतया साध्याव्यापकत्वादित्याह यज्ज्ञानेत्यादिना ईश्वरप्रमायां चाप्रमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वि॰सु॰ टी॰ न॰ ११८

त्वस्यव्यतिरेकसिद्धिः नचाप्रमाविज्ञानसामग्रीजन्यत्वेसत्यतिरिक्तजन्यानभवतिप्रमातिरिक्तत्वात् पटवदित्याभाससमानयोग
क्षेमत्वाद्दोषान्वयव्यतिरेकबाधात् प्रतियोग्यप्रसिद्ध्याअप्रसिद्धविशेषणत्वाच्च विपक्षेबाधकतर्कमाह विपक्षेचेति यत्तुपूर्वपक्षः
परतस्त्वेऽनुमानमुदयनीयमुक्तंतत्रापिगौरवतर्कपराहतत्वाशंकितोपाधित्वामतिदिशति एतेनेति स्वप्रतिपक्षत्वंचाह प्रमेत्यादिना
ज्ञानहेत्वतिरिक्तहेत्वजन्यत्वानधिकरणत्वमात्रसाधनेदृष्टान्तेसाध्यवैकल्यं अतिरिक्तदोषजन्यत्वादप्रमायास्तन्निवृत्त्यर्थंदोषातिरि
क्तेत्युक्तंदोषातिरिक्तजन्यानभवतिइत्युक्तेबाधस्तदर्थंउत्तरंविशेषणंदोषव्यतिरिक्तज्ञानहेत्वतिरिक्तजन्यत्वंदोषजन्यत्वाद्बाधा

विपक्षेचविज्ञानसामग्रीमात्रादेवप्रमोत्पत्तिसंभवेनतदतिरिक्तस्यगुणस्यदोषाभावस्यवाकारणत्वकल्पनागौरव
प्रसंगोबाधकस्तर्कः एतेनप्रमाविज्ञानहेत्वतिरिक्तहेत्वधीनाकार्यत्वात्घटवदिति योऽयमुदयनस्यपरतस्त्वेपिप्रयो
गः प्रमादोषव्यतिरिक्तज्ञानहेत्वतिरिक्तजन्यानभवति ज्ञानत्वादप्रमावदिति प्रतिसाधनग्रस्तत्वाच्च नचप्रमात्व
स्यविज्ञानसामग्रीमात्रप्रयोज्यत्वादप्रमाज्ञानवृत्तित्वंस्यादितिवाच्यं तत्रप्रयोजकाभावादेवप्रयोज्यस्याप्रसक्तेः
दोषासहकृतज्ञानसामग्रीप्रयोज्यंहिप्रमात्वंतत्रदोषस्यैवसद्भावात् कथंप्रमात्वस्यवर्तमानत्वसंभावनापिसमु
द्भवेत् दोषस्याप्रमाहेतुत्वेनतदभावस्यगलेपादुकान्यायेनप्रमांप्रतिहेतुत्वंस्यादितिचेत् स्यादेवंयद्यन्यथासिद्धः

नहेत्वतिरिक्ताजन्यत्वाद्धानाद्यः प्रमायास्तुभयानभिमतंहितन्नद्वितीयेऽभीष्टमि॥ त्वन्वयव्यतिरेकौकारणत्वावेदकौस्यातांतौ
द्धिः नचसिद्धसाधनतानिवृत्त्यैप्रथमंविशेषणंअनधिकरणत्वस्यविवक्षितत्वात् नचाप्रमात्वमुपाधिः ईश्वरज्ञानेसाध्याव्याप्तेः यत्तुस्व
तस्त्वेबाधकतर्कउक्तः विज्ञानसामग्रीमात्रजन्यत्वेज्ञानत्ववदप्रमाणवृत्तित्वमपिस्यादितितत्परिहरति नचेतिप्रयोजकमेवदर्शयन्
तदभावंदर्शयतिदोषेत्यादिना अत्रापिपूर्वपक्षोक्तंस्मारयतिदोषस्येति नान्वयव्यतिरेकमात्रात्कार्यकारणभावावसायः माभूदप्र
योगलयोस्तथाभावः सोऽन्वयव्यतिरेकाविति किंत्वनन्यथासिद्धाभ्यांनचात्रतथाविधौविनिपरिहरतिस्यादेवमिति प्रमोत्पत्तौयाविरोधि

११८ राम॰ ११८

यथाचनप्रतिबंधाभावस्यकारणतानतथोपपत्तिनत्वादेविवृरिष्यते यतएवंस्वतःप्रामाण्यंतस्माद्गुणेभ्योदोषाणामभावएवपूर्वंजायते
ननुप्रमाणोत्पत्तिः ननुतर्हिदोषाभावादेवतुप्रामाण्यंतथापिसैवपरतःप्रामाण्यपिशाचिकाविशेदितितत्राह तदभावतइतिदोषाभावा
दप्रामाण्यद्वयस्यमिथ्यात्वसमारोपणलक्षणस्यासत्त्वमेवजायते अनुत्पत्तिलक्षणाऽप्रामाण्यस्यानाद्यभावतयादोषाद्युत्पत्त्यसंभवेनत
दभावेनभावस्याप्यसम्भवात् तेनकारणेनोत्सर्गोज्ञानसामग्रीमात्रप्रयुक्तत्वलक्षणोऽनयोदितअपादितोनभवतीति भट्टवार्त्तिका
र्थः भवतुदोषाभावस्यविरोधिप्रतिबंधकत्वंतथापिकिमायातंप्रमानुत्पादकत्वेनहिसंस्कारस्यस्वजनकानुभवविनाशकत्वमित्यता

माप्रतिबंधकत्वेनोपक्षीणोनकारणमात्रत्वमावेदयतः तथाचाहुर्भट्टपादाः तस्माद्गुणेभ्योदोषाणामभावस्तदभावतःअ
प्रामाण्यद्वयासत्त्वेनतेनोत्सर्गोनपोदितइति नन्वेकस्यापिदोषाभावस्याप्रमाप्रतिबंधकत्वंप्रमाहेतुत्वंचकिंनस्यात् एक।
स्यापिसंस्कारस्यानुभवनाशकत्वस्मृतिहेतुत्वयोरपिदर्शनादितिचेन्मैवंतत्रसंस्कारस्यानुभवनाशकत्वेपिस्मृतेःसंस्का
रातिरिक्तकारणांतरानिरूपणात् उभयहेतुतायाअवश्याश्रयणीयत्वात् नचतत्रापिसंस्कारनाशात्स्मृतिः किंनस्यादिति।
वाच्यंस्मृतिसमुदयव्यतिरेकेणसंस्कारनाशस्यैवासंभवात् प्रकृतेतुज्ञानसामग्रीतएवप्रमोद्भवसंभवेदोषाभावस्यापित
द्धेतुत्वकल्पनानिष्प्रामाणिकातस्मात्प्रमाविज्ञानसामग्रीमात्रादेवजायतइतिसिद्धम् तथाप्रमात्वज्ञप्तिरपिविज्ञानज्ञापक

वतास्मृतिप्रतिहेतुत्वमपनीयतइत्याशंक्यवैषम्येणपरिहरति नन्वित्यादिना ननुकिमिति तत्रकारणांतरानिरू॥ सामग्रीतएव॥
पणं यावतासंस्कारनाशएवस्मृतिकारणंभवत्विति नेत्याह नचतत्रापीति नित्यद्रव्येषुगुणनाशस्यगुणांतरोत्पादनियतत्वादितिभावः
एवंतत्रानन्यगतिकत्वमुक्त्वाप्रकृतेतदभावमाह प्रकृतेत्विति एतेनाप्रामाण्येदोषाणामन्यथासिद्धिरुदयनाचार्यादिनायोदितातत्रदे
त्वेनतदभावादभावहेतुतायास्तिरस्तत्वादिति नचसामग्र्यैक्येज्ञानप्रमालक्षणकार्यभेदानुपपत्तिर्बाधिकाएकस्माद्वह्निसंयोगात्पा
र्थिवपरमाणोरूपरसगंधस्पर्शादीनांबहूनामंगीकारात् प्रागभावभेदस्यचतदभावेकार्याभावलक्षणव्यतिरेकाभावादकारण
त्वादुत्पत्तिस्वतस्त्वमुपसंहृत्यज्ञप्तिस्वतस्त्वमपिविवेक्तितथाप्रमेति॥

CC-0. In Public Domain. Digitization by eGangotri

१ ऽपि

वि·सु· यत्तत्राप्युक्तं विज्ञानग्राहकसाक्षिमात्रग्राह्यत्वेन प्रामाण्यस्य संदेहो न स्यात् ज्ञानवदेव निर्णीतत्वादिति तत्परिहृतं न चेति तथाहि भवतां ध
टी·न· र्मिमात्रज्ञानं स्वतः एव प्रमाणं सर्वं ज्ञानं धर्मिण्यभ्रान्तमिति स्वीकारात् तथानुव्यवसायज्ञानप्रामाण्यमपि तत्तज्ज्ञानस्फुरणसमय एव स्फुरति
११९ तथा तत्र बौद्धानां धर्मधर्मिभावाद्यपलापाय वदितृत्वेऽपि वादिनां स्वप्रकाशज्ञानरुचीनां अप्रामाण्यबुद्धाविपर्यासः तथानुमित्युपमित्या
स्वभवदभिमतस्वाभाविकमानभावयोश्चार्वाकवैशेषिकयोर्विपर्यासः यथा वा प्राभाकरार्कवंधुप्रभृतीनां स्वरूपभेदवादिनां स्वरू
पे स्फुरत्यपि भेदाग्रहात् संदेहविपर्ययौ तथात्रापि किं न स्यातामित्यर्थः समाधानसाम्यदर्शयितुं तत्स्वरूपेणैव समाधानमुद्भावयति स
न च तथात्वे विज्ञानद्वयप्रमाणमप्रमाणं वेति संशयानुदयप्रसंगः स्वतः प्रमाणत्वेन भवदभिमतधर्मिज्ञानेऽनुव्यव
सायेन च स्फुरत्यपि स्फुरति मतानुसारिणाप्रमाणमेवेति विपर्यासदर्शनात् स्वतः प्रमाणत्वेन भवदंगीकृतानुमित्यादाव
प्र पि ज्ञायमानायां चार्वाकस्य प्रामाण्ये विप्रतिपत्त्युपलब्धेः स्वरूपभेदवादिनां च गृह्यमाणेऽपि स्थाणोः स्वरूपे स्थाणुर्वा पुरु
षो वेति संदेहः पुरुष एवेति विपर्ययस्य चोपलंभात् सत्यपि प्रतिभासे पुष्कलकारणे प्रतिबंधकदोषादिसमवधाना
त्तत्र तत्र संशयविपर्यासयोरुपपत्तौ प्रकृतेऽपि समं समाधानमन्यत्राभिनिवेशात् न च ज्ञानज्ञापकादेव प्रामाण्यग्र
हणे मिथ्यारजतादिबुद्धिषु प्रामाण्यग्रहणप्रसंगः प्रसक्तस्यापि प्रामाण्याग्रहणस्य कारणदोषावगमबाधबोधाभ्या
मपनयात् न च ताभ्यामपनयेन तयोरभावज्ञानस्य प्रामाण्यग्रहणहेतुत्वोपपत्तौ परतः प्रामाण्यापत्तिरिति वाच्यं दोष 995
बाधबोधयोरनुदयमात्रेण प्रामाण्यस्फुरणोररीकरणात् ॥ ११ ॥ त्यपीत्यादिना प्रतिभासस्य पुष्कलकारणे सत्यपि प्रबल ।
प्रतिबंधवशात् तत्र तत्र संशयाद्युत्पत्तिरत्रापि समानेत्यर्थः यत्तु ज्ञप्तिस्वतस्त्वे तेन बाधकमुक्तं तत्परिहरति न चेति हेतुमाह प्रसक्त
स्यापीति ननु कारणदोषज्ञानबाधकज्ञानाभ्यां चेत् प्रसक्तस्यापि प्रामाण्यग्रहणस्यापनयस्तर्हि तयोरभावज्ञानस्य प्रामाण्यज्ञानहेतुत्वं राम·
स्यादिति युक्तमिति तत्राह न च ताभ्यामिति न वयमप्रामाण्यज्ञाने कारणदोषज्ञानबाधकज्ञानवत्प्रामाण्यावगमे तयोरभावज्ञानं । ११९
कारणमाश्रयामहे अपि तु तद्ज्ञानानुदयमात्रं तेन न परतः प्रामाण्यापत्तिरित्यर्थः उररीकरणं स्वीकारः ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दोषाभावादिज्ञानस्य प्रामाण्यज्ञानहेतुताभावं भट्टाचार्यवचनेन द्रढयति तथा चाहुरिति यदा स्वतः प्रमाणत्वमस्याश्रीयते तदान्य-
ज्ञानग्राहकातिरिक्तं नैव मृग्यते ननु दोषाभावज्ञानमतिरिक्तं मृग्यत इति तत्राह निवर्तत इति दोषज्ञानानुदयमात्रात् अयत्नेनामि-
थ्यात्वशंका निवर्तत इत्यर्थः न च दोषज्ञानानुदयमात्रायैव परतस्त्वापत्तिरिति वचनीयं विरोधिज्ञानुदयप्रतिबन्धकतयैव कृतस-
माधानत्वात् दोषाभावावगमस्यापि प्रामाण्यहेतुत्वेऽनवस्थाबाधकमाह अन्यथेति येन हि दोषाभावज्ञानेनाद्यस्य प्रामाण्यमवग-
म्यते तत्प्रामाण्यावगमार्थमपि दोषाभावज्ञानान्तरं गवेषणीयमेवं कारमुपर्युपरीत्यनवस्थेत्यर्थः यत्तु ज्ञप्तिपरतस्त्वेऽनुमानमुदयनीयं
तत्राप्युक्तं दूषणमतिदिशति। तथा चेति तथा चेत्येतदेवोद्घाटयति स्वतः प्रमाणत्वेनेति ननु यद्यनुमानादि स्वतः प्रमाणमिति प-

तथा चाहुर्भट्टपादाः यदा स्वतः प्रमाणत्वं तदान्यन्नैव मृग्यते निवर्तते हि मिथ्यात्वं दोषाज्ञानादयत्नतः इति अन्यथा
तदभावावगमस्यापि प्रामाण्यस्फुरणहेतुत्वेन तदभावावगमस्यापि प्रामाण्यावगमाय तदभावावगमान्तराणा-
मप्यवश्याश्रयणीयत्वादनवस्था तथा चानभ्यासदशायां सांशयिकत्वादिति हेतोः स्पष्टमनैकान्तिकत्वं स्वतःप्रमाण-
त्वेन भवदभिमतेष्वेवानुमानोपमानानुव्यवसायधर्म्यध्यवसायेषु व्यभिचारस्य दर्शितत्वात् उक्तं चैतदनुमानादेः
स्वतःप्रामाण्यमाचार्यैर्वाचस्पतिना न्यायवार्तिकटीकायाम् विमतं ज्ञानमर्थाव्यभिचारिसमर्थप्रवृत्तिजनक-
त्वात् यदि पुनरेवं नाभविष्यन्न समर्थप्रवृत्तिमकरिष्यत् यथा प्रमाणाभास इति व्यतिरेकी॥ ॥६॥ ॥

[illegible] ८

रैरंगीकृतं स्यादयं मनोरथस्तदेव नु कुत इति तत्राह उक्तं चैतदिति प्रमाणतोऽर्थप्रतिपत्ताविति प्रथमभाष्यव्याख्यानावसर इति शे-
षः समर्थप्रवृत्तीति फलाभिसंधिप्रवृत्तिजनकत्वादित्यर्थः व्यतिरेकव्याप्तिं दर्शयति यदि पुनरेवमिति अभविष्यदिति च क्रियाति-
पत्तौ लृङो रूपं अत्र चोपेक्षाज्ञानानां पक्षत्वे नानुपादानान्न भागासिद्धिः व्यतिरेकी सर्वत्र सपक्षाभावमभ्युपेत्य वर्त्तत इति नासा-
धारणानैकान्तिकता ननु नास्त्येव वादी यः प्रामाण्यनिश्चये विप्रतिपद्येत न हि प्रामाण्यं स्वीकृत्य तन्निश्चये विप्रतिपत्तिः स्वीकार-
स्य निश्चयमूलत्वात् नाप्यस्वीकृत्य प्रमाणशून्यविप्रतिपत्तेः सर्वत्र सुलभतया सर्ववादविधिनिषेधप्रसंगात्॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

१

वि.सु. अनिश्चितेतु प्रामाण्ये तत्तद्रूपसंदेहोपि क्वचिद्दुर्लभः विशेषस्मृतेरभावात् तत्पूर्वकत्वाच्च संशयानां नापि सर्वत्राप्रामाण्यप्रसंज
टी.न. नं प्रामाण्यग्रहणोपायनिराकरणस्याप्रामाण्येपि तुल्यत्वात्तदग्निप्रामाण्यादिकं तन्निश्चयश्च तदुपायस्तच्चिन्तामहे इति सर्व चान्व
१२० योस्त्येव तत्कथं केवलव्यतिरेकी त्वाशंक्य संप्रत्युत्तरमाह अन्वयव्यतिरेकीति नन्वनुमानमेव कथं स्वतः प्रमाणं यद्दृष्टान्तादन्वयिन
मित्याशंका तन्त्रापि तदीयमेव ग्रन्थं पठति तथानुमानस्येति पवितः सर्वप्रकारेण निरस्ता समस्तविभ्रमाशंका यस्येति विग्रहः अत्र
मेयेनान्यादिना यल्लिंगमव्यभिचारि तेनोत्पन्नत्वात् प्रत्यक्षज्ञानहस्तथाद्युत्पन्नमनुमानमपि न गृहीताव्यभिचाराद्युत्पन्नं अपि तु सा
नामात्रेणावस्थितादेव स्वमिद्रियादीन्यपि न गृहीताव्यभिचारीणि व्यभिचारीणि वार्थं न ग्राहयन्ति नन्वनार्थादयन्त्येन च संस्पर्श्य
र्थाव्यभिचारस्तस्मात्तनयोः स्वतोऽव्यभिचारग्रहणमिति प्रवृत्तिसामर्थ्येन ज्ञानीयन्नवा अथाव्यभिचारायानुसारिणीय अनुमानो

अन्वयव्यतिरेकी वा अनुमानस्य स्वतः प्रमाणतया अन्वयस्यापि संभवात् तथानुमानस्य तु पवितो निरस्तसम
मस्तविभ्रमाशंकस्य स्वत एव प्रामाण्यं अनुमेयाव्यभिचारिलिंगसमुत्पन्नत्वात् एतेनोपमानं व्याख्यातमित्या
दि स्वत इति पक्षसाधनत्वाच्च विवादस्थले प्रमात्वं विज्ञानग्राहकसामग्रीमात्रग्राह्यं अप्रमामात्रवृत्तित्वानधि
करणत्वे सति ज्ञानैकवृत्तिजातित्वात् ज्ञानत्ववत् ॥

पमानानुव्यवसायधर्मिज्ञानानां धर्मिज्ञाने स्वतस्त्व तद्व्याप्तिपक्षधर्मत्वग्राहकेणैवानुमानेकारणतः स्वरूपतश्च व्यभिचाराशं
कानिरासाद्युपमाने प्यतिदेशवाक्यसादृश्यज्ञानयोः प्रामाण्यावधारणे न तत्रिरासादनुव्यवसायेप्यज्ञाताननुव्यवसायादित्यर्थः ए १२०
वमनैकान्तिकतामुद्धास्यति पक्षितामप्याह स्वत इति पक्षसाधनत्वाच्चेति विवादस्थलइति अनुमित्यादिव्यतिरिक्तस्थलइत्यर्थः
इतरथांशतः सिद्धसाधनतापत्तादितिवत्तः प्रामाण्यवादिनोऽप्यान्तरनातिवृत्त्येमात्रग्रहणगुणत्वादिव्यभिचारवारणाय ज्ञानैकवृत्तीत्युक्तं राम.
अप्रमात्वे संशयत्वादिव्यभिचारनिवृत्त्यर्थमप्रमावृत्तित्वानधिकरणेत्युक्तं साधनवैकल्यनिवृत्त्यर्थं मात्रग्रहणं प्रमामात्रवृत्तिनाप्र १२०
मान्यान्यत्वादिना व्यभिचारनिवृत्त्यर्थं जातिग्रहणं न स्वान्योन्याभावत्वेन प्रतियोगिज्ञानापेक्षत्वेन विवक्षितत्वात् ॥ ० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उद्यनीयां विशेष्यासिद्धिं शङ्कते ननु कथमिति साक्षात्कारित्व प्रमात्वयोः परापरभावाभावे सत्येवोपपादयति तथाहीत्यादिना अत्र साक्षात्कारित्वं किं परं व्यापकं प्रमा   त्वमपरं व्याप्यमिति मते विपरीतं वा नाद्य इत्याह यदीति साक्षात्कारित्वव्याप्यत्वे प्रमात्वस्य तद्रहितेषु परोक्षेष्वनुमानादिषु प्रमात्वं न स्यादस्ति च तदतो न व्याप्यमित्यर्थः द्वितीयमाशङ्क्य दूषयति अथापरमित्यादिना यदि हि साक्षात्कारित्वं प्रमात्वावान्तरजातिस्तदा तद्रहितेषु विभ्रमेषु साक्षात्कारित्वं न स्याद्यदि स्यात्तर्हि तद्व्यापकं प्रमात्वमपि स्यादित्यर्थः ततः परापरभावशून्ययोरेकत्र वृत्तौ संकरः स्यात्स च जातिबाधकः पश्चाद्वक्ष्यति संकर इति संकरान्तरमाह किं चेति यदि प्रमात्वं जातिस्ततो जातिसंकरपरिहाराय विभ्रमेष्वप्रमात्वाधिकरणेषु सा नेष्टव्या ततश्च सर्वज्ञानानां धर्म्यंशे प्रामाण्यं प्रकारे रजतादौ विपर्यय इति यौक्तिकपरिभाषा निरर्थका स्यादिति ।

ननु कथं प्रमात्वं जातिः साक्षात्कारित्वेन तस्य परापरभावासंभवात् तथा हि यदि साक्षात्कारित्वं परं तदा तदपरसामान्यस्य प्रमात्वस्य परसामान्याविनाभावनियमात्सर्वैव प्रमा साक्षात्कारिण्येवेत्यनुमानादेः परोक्षस्याप्रमात्वमेव भवेत् अथापरं तदा साक्षात्कारित्वस्य प्रमात्वाविनाभावादिदं रजतमित्यादिसाक्षात्कारिणो विभ्रमस्य प्रमात्वप्रसंगः किंच यदि प्रमात्वं जातिस्तदा सर्वज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्यय इत्येषा परिभाषा परिलुप्येत एकस्यैवेदं रजतमिति ज्ञानस्य धर्म्यंशे प्रमात्वमप्रमात्वं चैतदंशे इति जातिसंकरप्रसंगादिति चेत् मैवम् साक्षात्कारित्वस्य रजतादिविभ्रमावृत्तित्वात् तत्र तद्व्यवहारस्येन्द्रियसंप्रयोगजन्यतोपाधिमात्रेणोपपत्तेः धर्म्यंशे प्रमात्वव्यवहारस्य चाबाधितानुभूतित्वोपाधिनिबंधनतयाप्यसंभवा

दित्यर्थः साक्षात्कारित्वमपरं प्रमात्वं परं विभ्रमेषु च साक्षात्कारित्वव्यवहारस्त्वौपाधिकस्ततो न जातिसंकर इति परिहरति मैवमिति प्रमात्वाप्रमात्वसंकरं परिहरति धर्म्यंश इति न चाबाधितानुभूतित्वसंभवेन तद्व्याप्या जातिरपि तत्र भवेदिति वाच्यं प्रसाधने संकरबाधात् प्रसंजने विपर्ययपर्यवसानात् न तावदिदं प्रयोजकं मीमांसकानां यथाह सूत्रकारः अर्थेऽनुपलब्धे तत्प्रमाणमिति तथा तद्भाष्यकारोऽपि असन्निकृष्टेऽर्थे ज्ञानमिति संशयविपर्ययस्मृतिव्यतिरिक्तज्ञानानि स्वतद्वृत्तिरिक्तवृत्तित्वानधिकरणजातिमन्ति जातिमत्त्वात्संप्रतिपन्नवदिति च प्रमात्वजातावनुमानं अत्र चैतदवसेयं परसिद्धान्तमाश्रित्यैवं जातिसंकरपरिहार इति यतो विज्ञानत्वमधिष्ठान

१
चि॰सु॰
टी॰नै॰
१२१

धियाभावेपितेषुयत् अविद्यापरिणामत्वादित्वाना भासत्वामत्वायेन यत्तत्रविज्ञानंनतत्प्रमाणमुपेयते अप्रमाणंनविज्ञानं नतत्संकर
संभवः ननुतर्हि सर्वमेवज्ञानंप्रमाणमप्रमाणंचज्ञानाभासइति ज्ञानस्यपरतोऽप्रामाण्यमितिवचसः कोऽर्थः नकोपिविज्ञानंपर
तः प्रमाणंअपितुस्वतइत्येतावदुपपादनीयं अथवा अप्रामाण्यंपरतइत्यस्यैवायंपर्यवसितोऽर्थः यद्विज्ञानव्यतिरिक्तसमवाय्य
प्रामाण्यमिति सामग्रीभेदस्यकार्यभेदनियमात् प्रमायाश्चज्ञानविशेषत्वस्यासिद्धेरिति नचसर्वप्रत्ययानांयथार्थत्वेऽख्यातिमतापा
तः अविद्यापरिणामत्वस्यभ्रमारोप्ययोरंगीकारेणतत्ताविशेषादिति नन्वेकत्रोपाधिनिबंधनश्चेत्प्रामाण्यव्यवहारः सर्वत्रतन्निबंधन
एवभवतु किमित्यइज्जरनीयकल्पनइतितत्राह नचैवमिति तत्र किंकल्पकनास्तीत्युच्यते अन्यथा सिद्धिर्वाप्रथमेप्राह प्रमिणो।
मीति एषहस्तुस्वर्गः यदनुवृत्तव्यवहारस्यानुवृत्तालंबनमिति नह्येतत्कथमपिदुःसंपादं तदागत्यैवाश्रीयते साधारणशब्दतायथाश्चादीनां।

नचैवंसर्वत्रोपाधिनिबंधनएवास्तुप्रमाव्यवहारः कृतंजातिकल्पनयेतिवाच्यम् प्रमिणोमीत्यबाधितानुगतव्यव
हारस्यगोगौरितिव्यवहारस्येवजातिमंतरेणानुपपत्तेः उपाधिमादायजातिप्रत्याख्यानस्यगोत्वादिष्वपितुल्यत्वात् न
स्याद्यत्रव्यक्तेरभेदस्तुल्यत्वंसंकरोऽथानवस्थितिः रूपहानिरसंबंधोजातिबाधकसंग्रहइत्युक्तबाधकानामन्यतमोपिबा
धकोनप्रसरति तत्रजातिनिमित्तोव्यवहारइतरत्रतूपाधिनिबंधनइतिविभागोद्रष्टव्यः॥१९ संभवतिचेत्ताद्वृत्तोऽर्थः तत्राबा

पिवक्ष्यमाणबाधकाभावेजातित्वमेवेतिभावः द्वितीयेप्राह उपाधीति यदिहि संभवेत्पुपाधिनाजातिप्रत्याख्यानंतदागोत्वादिष्वप्यता।
स्वासः स्यात् नतद्वाजकस्यैवोपाधेः संभवादित्यभिप्रायः ननुतर्हि पावकादावपिकिमिति जातिर्नकल्प्यते अस्तिहि अनुवृत्तप्रत्ययइति
तत्राह तस्मादिति यत्रैकैवव्यक्तिः यथाकाशत्वादौ तत्रजातित्वकल्पना अनुवृत्तप्रत्ययहेतुत्वाभावात् अनेकसमवेतत्वाभावाच्च तस्य १२१
च तल्लक्षणत्वात् तथायत्रतुल्यव्यक्तित्वंयथाकुंभत्वकलशत्वयोः तत्रोभयोर्जातित्वंपक्षेवानुगतव्यवहारसिद्धेः तत्रयापर्यायत्वा राम॰
विलयप्रसंगात् तथायत्रसंकरप्रसक्तिः परस्परव्यभिचारिणोरेकत्रस्थितिर्यथाऽऽदिनत्वकुंडलित्वयोः तत्रापितज्जातित्वंप्रयमप्रसादृष्णात १२१
त्वस्पृष्टपरस्परपरिहारेणैववर्तमानतयावधृतस्वभावयोरेकत्रप्रतीतिक्ष्मयद्यमानामानामेवंध्येति वत्तद्धिरुद्धार्थविषयतयाअप्रमाणी

नीतिप्रमाणाभावादेव तदभावः परस्परपरिहारेण वर्तमानयोः सामान्ययोरेकत्र समावेशे तदन्तर्जातीयविरोधोच्छेदापत्तिश्चेति तथा यत्रान
वस्थाप्रसक्तिः यथा सत्तायां सत्तास्तीत्याकारेण तत्रापि न जातिकल्पना यत्र रूपहानिप्रसक्तिरागन्तुकत्वादिना नित्यत्वहानादिना यथा पाचकत्वादौ यथा
वा विशेषेषु तत्रापि न जातिकल्पना यत्र जातिकल्पनायां व्यक्त्या सह संबंधाभावः यथा समवाये जातिकल्पनायां समवायाभावात् जातिव्यक्त्योस्त
न्नियमात्तत्रापि जातिरिति किरणावलीकारसंगृहीतजातिबाधकानां अन्यतमस्यापि यथाभावस्तत्र जातित्वमितरत्रोपाधित्वमिति खण्डलार्थः
प्रमात्वजातिसमर्थनस्य प्रकृतोपयोगं दर्शयितुमुपसंहरति तस्मादिति तत्रिपवतत्त्वे बाधकमाह विपक्षे चेति पूर्वपक्ष्याशयमनूद्य दूषयति।
नचेत्यादिना ननु भवतु तदस्तित्वलोपाज्ज्ञानस्य स्वतः स्फुरणं प्रामाण्यन्तु किमिति न परतः स्फुरतीति प्राभाकरमतिपूर्वोक्तं स्मारयति पूर्वपक्षी अ
तस्माज्ज्ञानैकनिष्ठजातित्वादिति न विशेष्यासिद्धो हेतुः विपक्षे चानवस्थाप्रसङ्गो बाधकस्तर्कः न च निर्लीनस्यैव प्रमाणस्यार्थे
व्यवहारजनकत्वोपपत्तेर्नानवस्थेति वाच्यं तथात्वनिश्चायकप्रमाणानुदयेन तदस्तित्वस्यैव निश्चेतुमशक्यत्वात् अस्तु तर्हि ज्ञान
स्य स्वत एव स्फुरणं तथापि तत्प्रामाण्यं तद्गतगुणत्वादिवदन्यत एव स्फुरिष्यतीति को विरोध इति चेत्तत्रैवं तस्मादिति एव प्रमाणत्वेना
स्फुरणे तद्विषये निःशंकप्रवृत्त्यनुपपत्तेः न हि ज्ञानमित्येतावता प्रवृत्तिः मरुमरीचिकादौ सत्यपि विज्ञाने तदप्रामाण्यनिश्चये प्रवृ
त्त्यदर्शनात् अस्तु तर्हि प्रामाण्यास्फुरणेऽप्रामाण्यस्फुरणमन्तरेणापि ज्ञानमात्रात्प्रवृत्तिरिति चेन्नैवं विज्ञानस्य प्रामाण्याप्रामाण्य
योरस्फुरणे संशयान्निःशंकप्रवृत्त्यनुपपत्तेः अस्ति वा नव्यासदृशायां नववनस्थलीस्थितेषु फलितरसालादिषु तत्फलादाने क्लो
निःशंकप्रवृत्तिः अपि च त्वयापि पारलौकिकफलसाधनेषु निःशंकप्रवृत्तिः प्रामाण्यनिश्चयाधीनाभ्युपगता॥ स्फुरतीति अर्थे तु
निःशंकप्रवृत्तिः प्रथमतः प्रमाणतयास्फुरण एव घटते नेतरथेति परिहरति मैवं तस्यादिनइति तद्विषये तस्य ज्ञानस्य विषय इत्यर्थः एतदेव वि
पक्षे बाधकेन विवृणोति नहीति मरुभूमिषु मरीचिका मरुमरीचिकाः नन्वप्रामाण्यस्फुरणादेव तत्र प्रवृत्त्यभावः न प्रामाण्यास्फुरणात्प्रामाण्या-
स्फुरणेऽपि प्रवृत्तिर्घटते इति प्रसक्तं तत्किं केन संगतमिति शंकते अस्तु तर्हीति प्रामाण्यास्फुरणे तन्निःशंकप्रवृत्तिरुपपन्नेति परिहरति मैवं वि
ज्ञानस्येति ननु ज्ञानोदयसमसमयमेव निःशंकप्रवृत्तिः क्व दृष्टा यद्बलादिदं साध्यत इति तत्राह अस्ति चेति रसाल आम्रः अपि च त्वयापि पारलौ

किकसाधनेषु इहलौकिकेषु अभ्यासदशापन्नेषु च निःशंक
प्रवृत्तिः प्रामाण्यनिश्चयाधीनैवेति स्वीकृता तस्मात्त्वं

निःशंकप्रवृत्तिस्थलेषु शंका प्रामाण्यनिश्चयाधीनत्वमनुमा
तुमित्यभिप्रेत्याह अपि च त्वयेति॥

CC-0. In Public Domain. Digitization by eGangotri

१
वि·सु·
टी·न·
१२२

ननु संशयादपि निःशंकप्रवृत्तिः कृष्यादौ दृष्टा इति सव्यभिचार इति नत्राह न च कृष्यादावपि एवं पारलौकिकेषु निःशंकप्रवृत्तेर्निर्णयपूर्व
कत्वस्य व्याप्तिनिश्चयात् सर्वत्रैवं शक्यानुमानमित्याह एवं च यत्र यत्रेति यदि च संशयात्प्रवृत्तिस्तदा संशयस्य कोटिद्वयसमानत्वात्प्रवृत्ति
वन्निवृत्तिरपि स्यात् न चानिष्टजनकत्वादेः वस्यैव धर्ममात्रत्वात् अथाप्रामाण्यानिश्चयान्न निवृत्तिः प्रामाण्यानिश्चयान्न प्रवृत्तिरित्यपि पश्यन्तः स्या
न्निःशंकप्रवृत्तिः प्रामाण्यनिश्चयाधीनैवेत्यभिप्रेत्याह अपरथेति यदत्र कुसुमाञ्जलावुदयनेनोक्तमिति प्रवृत्तिसमर्थप्रवृत्तेः स्वतः प्रा
माण्यानधीनतामुपपादयता कंकटीति प्रवृत्तिर्हीच्छामुपक्रम्य इच्छा च प्रवृत्तेः कारणं सा च समीहितोपायताज्ञानं अपेक्षते तच्चेष्टता
नीयत्वलिंगानुभवः सोपीन्द्रियसन्निकर्षात् प्रामाण्यग्रहणं तु न केनाप्यंशेनोपयुज्यते उपयोगेपि वा स्वत इति कुत एतदिति तदपि न
स्फुरत्स्वपुरतः कुसुमकवर्णमलयतः सर्वांगाह्लादनमिव यतः समीहितसाधनताज्ञानमेव प्रमाणतयावगम्यमानमिच्छां जनयति

न च कृष्यादौ संशयेऽपि प्रवृत्तिर्दृष्टेति वाच्यं तत्र निःशंकप्रवृत्तेरभावात् एवं च यत्र यत्र निःशंकप्रवृत्तिः तत्र तत्र प्रामाण्य
निश्चयाधीनत्वमेवमभ्युपगन्तव्यम् अपरथा प्रामाण्यानिश्चयान्निवृत्तेरपि प्रसंगात् न च फलेऽपि परत — स्त्व ज्ञेयाभिव्यक्ति
लक्षणफलस्य ज्ञानमात्रादेव सिद्धेः उपादानादीनां तु नरिष्टसाधनादिज्ञानाधीनतया तद्विषयप्रमाणस्य न चापि फल
जनकत्वं स्वत एव तस्मात् स्वधीयैव गुणगणमनपेक्ष्यैव दोषाभावस्त्वशक्यैव स्वार्थमावेदयति वेदानाम् इति सिद्धं ॥ ९ ॥ १२

इत्यत्रैव स्फुटं स्वतः प्रामाण्योपयोगः किं च कश्चिदपि चेन्न निःशंकसमर्थप्रवृत्तिः संशयादुत्पद्यते तर्हि सर्वत्रैवं तथाभावसंभवात्।
प्रामाण्यनिश्चयो निरर्थकः अनिश्चितस्य सत्त्वमेव दुर्लभमिति प्रामाण्यस्य जलाञ्जलिरेव दत्तः स्यादिति एवमुत्पत्तौ ज्ञप्तौ च स्वतस्त्व
मुपपाद्य व्यवहृतौ स्वतस्त्वमुपपादयति न च फलेपीति यदि नाव ज्ञानानां ज्ञेयाभिव्याप्तिः फलं यथाहुः ज्ञेयाभिव्याप्तिता यस्मात्तच
ज्ञानात्फलान्तरमिष्यत इति तच्च फलं ज्ञानमात्रादेव न तु नरत्वनिबंधनमित्यर्थः अथोपादानाद्येव सर्वत्र फलविज्ञानस्य तच्चेष्टसाध
नादिज्ञानाधीनमिति परतस्त्वं पुरस्तादेव वर्णितमिति तत्राह उपादानादीनामिति न वक्तमात्रज्ञानफलमुपादानादि अपि तु गुणदोष
माध्यस्थ्यज्ञानानां तेषां च स्वत एव तज्जनकत्वमिति न चापि वर्णितस्वतस्त्वं व्यभिचरतीत्यर्थः वाद्यर्थमुपसंहरन् समन्वयोपयोग

राम·
१२२

122

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इतिस्वतस्त्वं परितः प्रसाधितं प्रमाणमात्रस्य ततः स्वतो यदा निषिद्धं पुंदोषकथेषु लीलया समस्तवेदांतवचस्सु सिध्यति स्वशक्तौ
वेदान्ताः स्वार्थमावेदयन्तीत्युक्तं तत्र स्वरूपसहकार्य्यतिरिक्तशक्त्यसहिष्णवस्तार्किकाः प्रत्यवतिष्ठन्ते नन्वित्यादिना समवधानमे
लनं तत्र किं कार्य्योत्पत्तिप्रयोजकधर्ममात्रं शक्तिः किं वातीन्द्रियत्वे सति तादृशो धर्मः किं वा मृदादिगतातीन्द्रियप्रयोजकधर्मविशे
षो वा मृदादिस्वरूपमात्रगतस्तादृशो वा प्रथमे न विवादः घटत्वाग्नित्वादिजातीनामंगीकारात् द्वितीयेपीश्वरेच्छादीनामंगीकारा
दविवादः तृतीयेपि कालादिसंयोगस्य मृदादावंगीकारादविगानमेव चतुर्थश्चेत्तत्राह तत्रप्रमाणाभावादिति तत्र किमर्थापत्ति
रनुमानमागमो वा प्रमाणं तत्रार्थापत्तिं द्विधा विकल्प्य दूषयति तथाहीत्यादिना कार्य्योत्पत्त्यनुपपत्तिर्वेदमस्योपादानं दुग्धादि

ननु स्वरूपसहकारिसमवधानातिरिक्तां शक्तिमेव न जानीमः तत्र प्रमाणाभावात् तथाहि स्फोटादिलक्षण
कार्य्यान्यथानुपपत्तिस्तत्र प्रमाणमुतोपादानोपादेयभावनियमानुपपत्तिः नाद्यः स्वरूपादेव पावकादेः प्रति
बंधकाभावादिसहकार्युपबृंहितात् स्फोटादिलक्षणकार्य्योत्पत्त्युपपत्तावतीन्द्रियशक्तिकल्पनानुपपत्तेः न
चाभावस्याकारणत्वात्प्रतिबंधकाभावो न सहकारीति सांप्रतं किमन्वयव्यतिरेकित्वं नास्त्यभावस्य कारणत्वे
ऽनिष्टप्रसक्तिः नाद्यः भाववदभावस्यापि कार्य्यान्वयव्यतिरेकित्वात् न द्वितीयः ॥ ((दध्यादेर्न पुनस्तिलादीति तिलाद्येव

तैलस्य न पुनर्दुग्धादीति योयं नियमस्तदनुपपत्तिर्वेत्यर्थः स्यादेतत् यदि स्वरूपसहकारिसमवधानमात्रात्कार्य्योत्पत्तिः प्रतिबंध
दशायामपि किमिति नोत्पद्यते स्फोटादिर्न हि तदाग्निरनग्निः सहकारिणो वेन्धनादयोऽनिन्धनादयः तस्माद्यत्प्रतिबंधात्कार्य्यं नो
त्पद्यते सैव शक्तिरित्यनुपपत्त्यैव कार्य्योत्पत्तिरंतरेण शक्तिमिति तत्राह प्रतिबंधकाभावादीति एतदुक्तं भवति प्रमाणद्वयविरोधोऽ
र्थापत्तिः यथा देवदत्तस्य जीवनग्राहकस्य गृहाभावग्राहकस्य च विरोधो बहिर्भावं कल्पयति विरोधपरिहृत्यै न चात्र तथा विरोधः
स्फोटोत्पत्त्यनुपपत्तिग्राहकयोरग्निमात्रे विरोधेपि प्रतिबंधाभावतदाहित्यवदग्निविषयत्वेन विरोधशान्तेरिति ननु न प्रतिबंधाभाववदग्नि

विषयतया विरोधः स्यात्तिअभावस्य कारणताभावा
दिति तत्राह न चाभावस्येति किंच भावे स्तावदेवमप्युक्तं

CC-0. In Public Domain. Digitization by eGangotri



वक्तुमित्याह योग्येति गुर्वेत्यनुवर्तिनः तस्मादाह विवेकाग्रहस्येति विभ्रमपदस्थोऽयथार्थव्यवहारपरो ग्राह्यस्तेनाऽयमत्र प्रतिबंधाभावस्य कारणत्वं विकल्प्यैकैकं व्यभिचारेण दूषयति शक्तिवादीनत्विति आदिना यदा तूत्तंभकः प्रतिबंधकस्य विघटनं विधीयते तेन तदा सत्यपि प्रतिबंधके मण्यादौ कार्यमुत्पद्यते न नन्वत्र प्रागभावो नास्तीत्यर्थः दूषणमपि प्रतिबंधध्वंसव्यभिचारभूमिर्भवत्येव तथाप्यसाधारण दूषणमाह प्रतिबंधकेति नह्युत्तेजिते प्रतियोगिप्रध्वंसः संभवतीति भावः तदेतत्परिहरति मैवमिति नास्माभिर्मण्यादिस्वरूपमात्रं प्रतिबंधकत्वमुच्यते अपितूत्तंभकाभावविशिष्टस्य तच्च तादृशमुत्तंभकसन्निधानेऽस्तीति तदापि प्रतिबंधकप्रागभावस्य ना-

योग्यानुपलब्धेरभावप्रमितिहेतुत्वात् विवेकाग्रहस्य च विभ्रमहेतुत्वात् ननु किं प्रतिबंधकप्रागभावस्य कारणत्वमुत तत्प्रध्वंसस्य नाद्यः उत्तंभकसद्भावे सत्यपि प्रतिबंधके विनापि प्रागभावं कार्यदर्शनात् न द्वितीयः प्रतिबंधकानुदयेऽपि कार्योपलब्धेरिति चेत् मैवं उत्तंभकमणिमंत्राद्यभावसहकृतस्यैव प्रतिबंधकस्य प्रतिबन्धकत्वात् तेन तत्र प्रतिबन्धकप्रागभावसहकृतस्यैव कारणत्वान्न व्यभिचारः एतेनानियतहेतुकत्वमप्यपास्तम् ॥ १ व्यभिचारादित्यर्थः उक्तं वक्तुकमाजत्याप्युदयनेन प्रतिबंधकोत्तंभकाले तर्हि व्यभिचारः स्यात् यदि पादयोस्सति कार्यानुदयः स्यात् दृश्यतएवमनुत्पादः नन्वेवं तदापि प्रतिपक्षस्याभावात् अस्त्यप्रतिपक्षो हि प्रतिबंधकोऽभिमतो न सत् प्रतिपक्षः स च तादृशो नास्त्येव यस्त्वस्ति नासौ प्रतिपक्ष इति स्यादेतत् प्रतिबंधकाभावस्य सामग्र्यन्तःपातित्वमयुक्तं अनियतहेतुकत्वप्रसंगात् तथाहि यत्राग्न्यादिसमवधाने प्रतिबन्धकमण्याद्यभावे दृष्टेति कार्यमुत्पद्यते तत्र विशेष्यमण्यादि प्रतिनिबंधकाभावादिति वक्तव्यम् यत्र मण्यादौ विद्यमानेपि उत्तंभकसन्निधौ कार्यमुत्पद्यते तत्रोत्तंभकाभावस्य विशेषणाभावादिति नैकहेतु निरूपणमिति तत्राह एतेनेति ॥ ॥ ॥ ॥ ॥



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतेनेत्यस्यैव विवरणं सर्वत्रेति न विशेषणाभावो विशेष्याभावो वा हेतुस्तयोरप्रतिबंधकत्वात् किंतु विशिष्टाभावः स चोभयथापि न भिद्यत इति तथा हि केवलदंडसद्भावे दंडपुरुषसद्भावे द्वयाभावे केवलपुरुषाभावः सर्वत्राविशिष्टः तथा केवलोत्तंभकसद्भावे प्रतिबंधकोत्तंभकसद्भावे द्वयाभावे वा केवलप्रतिबंधकाभावोऽविशिष्टः संसर्गाभावशब्देन तद्विशेषप्रागभावादित्रितयविवक्षितं प्रागभावप्रध्वंसाद्यपेक्षया चेदप्रतियतहेतुकत्वमाशंक्य परिह्रियते तदा वृसंसर्गाभावशब्दोऽप्यनुगुणः त्रयाननुगतत्वात् यस्मिन्नसति कार्यं न जायते तस्मिन्सत्येव कार्यं जायत इत्येवं संसर्गाभावमात्रस्यैव प्रयोजकत्वाद्धेतुत्वनोक्तेश्च अतश्चैवमेवांगीकर्तव्यं अन्यथाऽनुपलब्धेरप्यभावप्रमितिहेतुतायामपि उक्तदूषणसाम्यादित्याह अन्यथेति अलं वा स्थलांतरप्रतिबंधाशक्तावेवेंपसुग्रहासापि ह्यप्रतिबद्धा कार्योपप्रभवति ततस्तत्रापि प्रतिबंधाभावे समानावेवेमावाक्षेपपरिहारावित्याह शक्तिपक्षेपीति एवमभावविकल्पप्रयुक्तदोषे परिहृते प्रकारांतरेण प्रतिबंधाभावस्य कारणतामाक्षिपति शक्तिवादीनन्विति यस्तदभावः प्रतिबंधकाभावः कारणमसौ प्रति

सर्वत्र प्रतिबंधकसंसर्गाभावविशिष्टस्यैव कारणत्वांगीकारात् अन्यथानुपलब्ध्यावप्युपलब्धिप्रागभावप्रध्वंसाभावविकल्पे नाभावप्रमितेरनियतहेतुकतापादुःपरिहरत्वात् शक्तिपक्षेप्यप्रतिबद्धाया एव तस्याः कारणत्वादभावविकल्पोक्तदोषतत्परिहारयोः समानत्वात् ननु न प्रतिबंधकाभावस्य कारणता प्रतिबन्ध्यापेक्षत्वात्तदभावः कारणं कारणापेक्षश्च तदभावः प्रतिबंध इत्यन्योन्याश्रयग्रस्तत्वात् प्रतिबंधोऽपि सामग्रीनिहतः प्रतिबन्धकत्वांगीकारादिति चेन्न ॥

बंधापेक्षः तन्निरूपणीयत्वात् यश्च कारणाभावः प्रतिबंधः सोऽपि कारणापेक्षः तन्निरूपणीयत्वादेव ततश्च प्रतिबंधाभावरूपकारणस्य कारणाभावरूपप्रतिबंधस्य च परस्पराधीननिरूपणादन्योन्याश्रय इत्यर्थः ननु कारणाभावस्य प्रतिबंधत्वे स्यादयमन्योन्याश्रयस्तदेव तु कथं यावता कार्यानुत्पादः एव प्रतिबंध इति तत्राह प्रतिबंध इति अयमर्थः न तावत्कार्यानुत्पादः प्रतिबंधः तस्यानादितया प्रतिबंधकाधीनत्वाभावात् नापि तस्य कालांतरसंबन्धः कालस्यैकत्वात् औपाधिकानेकत्वे च कालोपाधेरेव प्रागजन्यत्वात् कस्तर्हि कारणाभावात्कार्याभाव इति परिभाषार्थः भावधर्मोपचारात् सामग्रीकार्ययोः पौर्वापर्यनियमः तद्भावयोरप्युपचारात्प्रयुज्यते वस्तुतस्तु समसमयत्वमेव कार्यस्तर्हि प्रतिबंध इति हृदि निधायोक्तमुदयनेन भावो यथा तथाभावः कारणं कार्यवन्मतः प्रतिबंधोऽपि सामग्रीनिहतः प्रतिबंधक इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अत्रपूर्वार्द्धेनाभावस्यकारणता निरूपणेनप्रतिबंधाभावस्यकारणत्वमुक्तंउत्तरार्द्धेनचप्रतिबंधप्रतिबंधकौनिर्दिष्टौप्रतिबंधोनामविसामग्री
सामग्रीवैकल्यंमंत्रादिनद्धेतुस्तुमंत्रप्रयोक्ताप्रतिबंधकइति तस्मात्सामग्रीप्रतिबंधयोरस्त्येवान्योन्याश्रयत्वमिति यद्यप्युभयाभावत्वमुभयस्य
तथाप्यन्योन्यनिरपेक्षस्यग्राहकनिरूपणतान्तान्योन्याश्रयत्वमितिपरिहरति मैवमिति मंत्रादेःस्वाभावकारणताज्ञानमंतरेणैवकार्यानुद
येनव्यतिरेकाभ्यांकार्यप्रतिकूलतालक्षणप्रतिबंधकत्वावगमादित्यर्थः मंत्राद्यभावस्यकारणत्वमपि मंत्रादिप्रतिबंधकत्वज्ञानव्यति
रेकेणैवशक्यंज्ञातुमित्याह अनवक्लृप्त्यैवचेति यथास्थूलमृदादेःकारणत्वंकार्यान्वयव्यतिरेकाभ्यामेव तथामंत्राद्यभावस्यापीत्यर्थः एवंसाधा
रण्येनपरिहारमुक्त्वाविकल्प्याह किंचेति यद्यपिमंत्रादिप्रागभावस्यमंत्रादिप्रतिहेतुतासंभवति तथापितत्प्रतितद्धेतुतामंत्रादेरतआह परा-

मैवमवधीर्यैवाभावस्यकारणतांकार्यानुदयमात्रेणैवमंत्रादेःकार्यप्रतिकूलतावगमात् अनवक्लृप्त्यैवचमणिमंत्रादेःका
र्यप्रतिबंधकतातदभावस्यान्वयव्यतिरेकाभ्यामेवकारणताध्यवसायात् किंचेदमन्योन्याश्रयत्वमुत्पत्तौज्ञप्तौवास्यात् नाद्यः
मंत्रतदभावयोःपरस्परहेतुत्वाभावात् नापिद्वितीयः अज्ञातयोरपिमंत्रतदभावयोःकार्यप्रतिप्रतिकूलत्वकारणत्वयोरु
पपत्तेः ननुकार्याभावावसेयकार्यप्रतिकूलभावामंत्रादयःशक्तेरपह्नवायकारणाभावरूपाइष्यन्ते अतएवमंत्राद्यभावो
पिकारणमिष्यते ततोमंत्रतदभावनिष्ठप्रतिबंधकत्वकारणत्वयोरन्योन्यापाधिकत्वादुत्पत्तौज्ञप्तौवान्योन्याश्रयतादुर्वारेति
चेन्न उक्तोत्तरत्वात् अंतरेणैवाभावस्यकारणतावगमंमंत्रादेःकार्याभावमात्रेणकार्यप्रतिकूलभावस्यावगंतुंशक्यत्वात्

स्यरेति ज्ञप्तौपरस्पराश्रयंपरिहरति नापीति नहियद्यत्कारणंतत्सर्वंज्ञानमेवकारणंचक्षुरादेरदर्शनात् एवंप्रतिबंधाभावोपीतिभावः नमि
मसुदयनीयमन्योन्याश्रयतापरिहारंपरिजहुःन्यायरत्नदीपावलीकृतस्तदनुवदति नन्विति यद्यपिकार्यानुदयोदयान्वयव्यतिरेकावसेये
मंत्रतदभावयोःप्रतिबंधकत्वकारणत्वेतथापिसामग्रीवैकल्यरूपतयामंत्रादेःप्रतिबंधकत्वंनतुस्वरूपेणएवंतदभावस्यापिप्रतिबन्धका-
भावतयाकारणत्वंनस्वरूपेणतथाचप्रतिबंधकत्वेयोरपरिहार्यैवसत्ताज्ञप्त्योरन्योन्याश्रयतेतिरत्नदीपकारोदूषयतिनेतिउक्तमेवोत्तरंदर्श
यति अंतरेणेत्यादिना यद्यपिकोष्टगत्याविद्यतएवायमर्थःतथापीतरेतरनिरपेक्षत्वमन्वयव्यतिरेकाभ्यांप्रतीयमानमनुभवसिद्धंनयुक्तिसह

कारणत्व२

नन्वप्रतिबंधान्यथानुपपत्तिः शक्तौ प्रमाणं तथाहि अग्न्यादिस्वरूपं तावत्प्रतिबध्यते पूर्ववदेवाविकलस्य उपलभ्यमानत्वात् तस्याग्रदनेनप्र
तिबध्यते तदतीन्द्रियं शक्तिर्नामेति तदिदं सहेतुकमनूद्य प्रतिषेधति न चेत्यादिना वाच्यमित्यन्तेन तत्र हेतुः कार्य्योदासीन्येति अग्न्यादिस्वरू
पावैकल्येपि मंत्रादिसन्निधाने कार्य्योत्पादं प्रत्युदासीना भवन्त्यग्न्यादयः अयमेव प्रतिबंध इत्यर्थः शक्तिपक्षेप्ययमेव प्रतिबंधशब्दार्थो वक्त
व्यः समन्तपक्षेपि समान इति मतिवदीं गृह्णाति अन्यथेति एतदेव शक्तिपक्षे परिशोषयति तदीत्यादिना ननु सा शक्तिर्विनष्टेव उत्तरकाले तु शक्त्य
न्तरमुत्पन्नं तदा कार्योदय इति तत्राह नचस्फोटाख्येति न तावदग्निसामग्रीतस्तस्योत्पादः तस्या नष्टत्वात् नाप्याश्रयभूताग्नेः तस्याः शक्त ।
तदभावकारणत्वस्याप्यन्वयव्यतिरेकाभ्यामेव सुकरत्वगम्यत्वात् इति न च शक्त्यनंगीकारे प्रतिबंधासंभवः मणिमंत्रादि
सन्निधानासन्निधानयोः स्वरूपस्याविशेषादिति वाच्यं कार्योदासीन्यस्यैव प्रतिबंधशब्दाभिधेयस्याविशेषत्वात् अन्यथा
शक्तिपक्षेपि प्रतिबंधस्य दुर्विवेकत्वात् नहि शक्तेर्नाशः प्रतिबंधः प्रतिबंधापाये कार्याभावप्रसंगात् नचस्फोटाख्य ।
कार्योत्पत्तये शक्त्यन्तरं तत्रोत्पन्नं तत्कारणानिरूपणात् न च प्रतिबंधाभावः कारणं अभावस्य कारणतानंगीकारात्
अंगीकारे वा तस्यैव स्फोटादिकार्यजनकत्वमस्तु कृतमतीन्द्रियशक्तिकल्पनादुर्व्यसनेन शक्तेः शक्त्यन्तरं प्रतिबध्य
त इति वदतोऽनवस्था तस्मात्कार्यस्यान्यथाप्युपपन्नत्वान्नातीन्द्रियशक्तिकल्पनावकाशः नापि द्वितीयः ॥ उपादानोपादे
यभाव नियमस्याप्यनादिसिद्धवृद्धव्यवहारावसित तत्कार्यानुकूलस्वभावभेदादेवोपपत्तेः ॥ ९ ॥ स्यानुत्पादकत्वात् उत्पाद
कत्वेवाकार्येतथा इति कृतं शक्तिपिशाचिकया शक्तश्चेन्नेव शक्तिः कार्ये प्यक्लसुधोत्याद्या शक्तिः तस्मात्कारणं तदा निरूपणात्वशक्तं तदो
त्पाद इति भावः ननु किमिति कारणाभावः यावत्ता प्रतिबंधाभावादेवेयमुत्पद्यतामिति तत्राह न चेति नेशक्तेरपि शक्तिरस्तिसैव प्रतिबद्ध्य
तामिति तत्राह शक्तेरिति तत्राप्युक्तदूषणपरिहाराय शक्तिप्रतिबंधो वक्तव्यः तथा चानवस्थेति भावः प्रथमार्थापत्तिदूषणमुपसंहरति
तस्मादिति अनादिसिद्धो यो वृद्धव्यवहारस्तेनावसितो यस्तत्कार्यानुकूलस्वभावस्य भेदो विशेषः तस्मादेवोपादानोपादेयनियमोपप
त्तेः तदर्थमपि शक्तिर्न कल्पनीयेति द्वितीयामर्थापत्तिं दूषयति उपादानेति ॥

नु

CC-0. In Public Domain. Digitization by eGangotri

१

वि॰ सु॰ यदि हि स्वभावो नियामको न स्वीक्रियते न हि शक्त्वावपि नस्यान्नियमइत्याह अन्यथेति नियमरहितप्रयोगमनुवदति विमतमिति विमतमन्या
टी॰ न॰ दि अतिशययोगीत्युक्ते अविद्यमानदशातो विद्यमानदशायां सत्वलक्षणातिशयवत्वात् सिद्धसाध्यतानदर्थमजनकेति विशेषणम् द्रंश
१२५ क्तिसाधकं न भवति सहकारिसमवधानस्यातिशयस्यापि जनकावस्थायां साधकतयार्थान्तरत्वादिति परिहरति न सहकारीति न्यायरत्नदीपा
वलीस्थमनुमानमुद्भावयति अस्तु तर्हीति निःक्रियाश्रयद्रव्यत्युक्ते सामान्याभावाद्याश्रयत्वेन सिद्धसाधनेनदर्थं सामान्यवदित्युक्तं तथापि
गुणकर्मभ्यां सिद्धसाधनतानदर्थमतीन्द्रियेत्युक्तं तेजोद्व्यणुकरूपादिना सिद्धसाधनतापरिहाराय तत्सामान्यग्रहणं तत्सेन्द्रियकसामा॥

अन्यथेयमिहैव किमिति शक्तिर्नान्यत्रेति पर्यनुयोगे कः स्वभावभेदादन्यः परिहारः स्यात् तस्मादर्थापत्तिद्वयमपि नात्र
प्रमाणं अस्तु तत्त्वनुमानेन तथा हि विमतमजनकदशातो ——— जनकदशायामतिशययोगि कारकत्वात् कुठ
कुठारवदिति चेत् न सहकारिसमवधानातिशयेनैव सिद्धसाधनत्वात् अस्तु तर्ह्यग्निरतीन्द्रियसामान्यवन्निःक्रियाश्रयः
कारणत्वात् गुरुत्वाश्रयवदिति प्रयोगः तेजोद्व्यणुकमतीन्द्रियरूपस्पर्शवायोश्चाधिकरणमिति तद्व्यावृत्त्यर्थमतीन्द्रिय।
सामान्यवन्निःक्रियेत्युक्तमतः शक्तिसिद्धिरिति कश्चित् तन्न योगिस्वीकारवादिनं प्रत्यतीन्द्रियविशेषणस्याप्रसिद्धत्वा
त् विमतेन गुरुत्वजातिविषयमिन्द्रियत्वादस्मच्चक्षुर्वदित्यतीन्द्रिय सिद्धिरिति चेन्न योगिनमनङ्गीकुर्वतो मीमांसकस्याश्रया
सिद्धेः तत्सिद्धौ वा धर्मिग्राहकप्रमाणबाधात् अस्तु तर्ह्यस्मदाद्यभिप्रायेणातीन्द्रियत्वविशेषणं॥ ९॥ त्यवत्त्वात् वा त्याश्रयत्वे नार्थो

न्तरतानिवृत्त्यै निःक्रियेत्युक्तं गुरुत्वगुणाश्रयः पार्थिवमाप्यं वाऽत्र दृष्टान्तः गुरुत्वत्वजातेरतीन्द्रियतया गुरुत्वाश्रयस्योक्तरूपत्वात् तेज १२५
सि गुरुत्वासंभवेन शक्तिसिद्धिः तदुक्तमेव व्यावर्त्यमाह तेज इति तदेतद्दूषयति योगीति तार्किकाणां हि सर्वं योगिप्रत्यक्षमित्यतीन्द्रि राम॰
यविशेषणस्यासिद्धत्वात् अप्रसिद्धविशेषणः पक्ष इत्यर्थः अत्र तैरेव गुरुत्वत्वजातेर्योगिनः प्रत्यतीन्द्रियत्वसमर्थने नैवाप्रसिद्धविशे १२५
षणतासाध्यवैकल्यपरिहारे तदनुवदति विमतमिति योगीन्द्रियमित्यर्थः एवमनुमिमानस्य योगीन्द्रियप्रसिद्धमप्रसिद्धत्वाद्धिती
येप्याह योगिनमिति प्रथमे प्राह तत्सिद्धौ वेति साध्यं विशेषयति अस्तु तर्हीति ॥ ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाप्यप्रसिद्धविशेषणतामाह मैवमिति यद्यद्धि परमाणुज्ञानस्याकाशं ज्ञानामीत्यनुव्यवसायो जायते तदा परमाण्वादिज्ञानं चानुव्यव-
सायस्य मानसप्रत्यक्षस्य विषयो भवति एवं सर्वोप्यैंद्रियकज्ञानविषयत्वप्रसिद्धमतीन्द्रियत्वमस्मदादिप्रत्यक्षस्यापीत्यर्थः अनुव्यवसायेतर
त्वे सतीति विशेषणमाशंक्य दूषयति नप्रमाणान्तरेति येषां हि व्योमशिवप्रभृतीनां मते सुरभिचंदनमित्यादिविशिष्टज्ञानानि प्रमाणान्तरेण
घ्राणादिनोपनीतं गंधादिकमपि विषयीकुर्वंति मत्वमिद्वे वतन्ताशमिति मतं तन्मते सर्वस्यापि किंचित्प्रत्यक्षार्थविशेषणतया ऐंद्रियकबुद्धि
बोध्यत्वसंभवात् अप्रसिद्धविशेषणतातदवस्थेत्यर्थः अथ विशिष्टज्ञानानुव्यवसायातिरिक्तास्मदादिऐंद्रियकबुद्ध्याविषयत्वमतीन्द्रियत्व
मभिप्रेतमिति विशेषणपरंपरामेवप्राणधारणनिरपत्रपतया परिगृह्णीयात् सप्रष्टव्यः किमत्राश्रयशब्देन संयोगीतयाधाराधेयभावोवि
मैवं अनुव्यवसायप्रत्यक्षगोचरतया सर्वस्यास्मदादिविशेषणस्वीकारेपि पूर्वोक्तदोषतादवस्थ्यात् अनुव्यवसायेतरास्मदा
द्यैंद्रियकबुद्ध्यागोचरत्वाभिप्रायेणातीन्द्रियत्वविशेषणमितिचेत् न प्रमाणान्तरोपनीतविशेषणावगाहिविशिष्टज्ञानवादेसर्वे
षामप्यैंद्रियकत्वसंभावनया पूर्वोक्तदोषानुतारात् आश्रयपदस्य च समवाय्यर्थतायां भाट्टस्य समवायानंगीकारवादिनोऽप्रसिद्ध
विशेषणत्वात् वह्नौ स्थितिस्थापकसंस्कारसिद्धेः सिद्धसाधनत्वाच्च ननु कथं सिद्धसाधनत्वं तत्सत्त्वे मानाभावादिति चेन्नैवं
विमतः स्थितिस्थापकसंस्कारवान् रूपवत्त्वात् कटवदित्यनुमानसद्भावात् न च स्थितिस्थापककार्य्यवत्त्वमुपाधिः उत्पन्नमा
त्रविनष्टकटादिषु कार्य्यानुपलंभेपि तथाविधसंस्काराभ्युपगमेन साध्याव्याप्तेः किंच यः स्वसिद्धांतानुसारेण सिद्धसाधनतां
ब्रूयात् स कथमनुमानशतैरपि स्वसिद्धांतात्प्रच्याव्येत कथं वा तदीयसिद्धसाधनताभिधानं प्रत्युद्ध्रियेत ॥ वह्निना समवायितया
वा नाशः दृष्टांते साध्यवैकल्यात् द्वितीये त्वाह आश्रयपदस्येति साधारणाकारविवक्षायां सिद्धसाधनतामाह वह्नाविति अत्रापि तदीयपरिहारमुद्भा
वयति ननु कथमिति अस्मिन्नप्यनुमाने तदीयं दूषणमुद्भाव्य दूषयति न चेति साध्याव्यापकत्वेनोपाधिं परिहरति उत्पन्नेति न हि यत्र यत्र स्थिति
स्थापकवत्त्वं तत्र तत्र तत्कार्य्यवत्त्वमस्ति परं हि उत्पन्नः कटो नुत्पादितपूर्वावस्थानसमानसंस्थानादिः स्थितिस्थापककार्य्यो विनश्यति तदा साध्यव
त्त्वेप्युपाधेरभावात् साध्याव्याप्तिरित्यर्थः अत्र चोत्पन्नमात्रेति अनुत्पादितकार्य्यवत्त्वमात्रं विवक्षितम् इतरथा तत्र साध्याभावस्यापि सुवचत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१
वि·सु
टी·न
१२६

ननुयदिस्वसिद्धांतानुरोधेनसिद्धसाधनतांवदतोऽनुमानेत्वदीयसिद्धांतास्वीकारेणनमयाशक्यंसिद्धसाधनतावाअपरिहार्योनहिस्थि
तिस्थापकेनतेनविशेषणीयमितिशंकतेअस्तुतर्हीति तथापिप्राभाकरमतेकर्मणायोऽन्तरतानन्तरकर्मण्यप्रत्यक्षेतिः क्रियेऽतीन्द्रिय
सामान्यवत्त्वादिरूपसाध्यस्यविद्यमानत्वादित्याह नैवमित्यादिना तथाहि यद्यत्कदाचित्कंतत्स्वाश्रयातिशयपुरःसरंहृष्टंय
थासंयोगविभागजन्यकार्यंसंयोगविभागलक्षणस्वाश्रयातिशयपुरःसरमितिव्याप्त्यासंयोगविभागयोरपिकादाचित्कत्वात्
स्वाश्रयातिशयपूर्वकत्वमनुमीयते योऽसावतिशयःतत्कर्मेतितेषांमतेनस्यादुद्भवत्येवतेनाऽर्थान्तरतेतिभावः एवंप्रतिज्ञानिव

अस्तुतर्हिस्थितिस्थापकेनतातीन्द्रियसामान्यवत्त्वेः क्रियाश्रयइतिप्रयोगइतिचेत्नैवं तथापिकर्मोप्रत्य
क्षवादिनप्राभाकरप्रत्यर्थान्तरत्वापातात् वह्नेरतीन्द्रियसामान्यवत्त्वेःक्रियकर्माश्रयत्वात् कारणत्वादि।
तिहेतोः शक्त्यानैकान्तात् शक्तेश्चशक्त्यन्तराभ्युपगमेऽनवस्थापातात् जनकशक्तियोगित्वएवकारणत्वे
नविवक्षितत्वात् नशक्त्यावनैकान्तिकतेति चेत् नैवम् शक्तियोगित्वस्यविशेषणशक्त्यसिद्धावसिद्धेः
मानान्तरात्तत्सिद्धौक्तनमतयाग्रन्थकथाकन्थाकदर्थनयागुणादावनैकान्त्यंच॥ ६ ॥ ६ ॥ ६ ॥

इदूषणान्युक्त्वाअनैकान्तिकतांचाह कारणत्वेति ननुकिमित्यनैकान्ततायतःशक्तेरपिसाध्यवत्तयासपक्षत्वादिति तत्राह शक्तेश्चे १२६
तिउक्तंत्वलीलावतीकारेणशक्तेरपिशक्त्यन्तरापेक्षायामनवस्थितेरनपेक्षत्वेतयैवव्यभिचारादितिस्यादेतत् यदिनशक्तेःसप
क्षत्वंतर्हिहेतुरेवतत्रप्रवर्ततेइतिशंकते जनकशक्तीति शक्तिमद्धिकारणंनतुशक्तिरित्यर्थः तर्हिहेतोरसिद्धिरित्याह नैवमितिका राम
रणत्वादितिकोऽर्थः शक्तियोगित्वादिति तथाचविशेषणस्यैतदनुमानात्प्रागसिद्धेरेवहेतोरसिद्धिरित्यर्थः अथभूयान्मानान्तरादेवविशेष १२६
णंसाधयामीति तत्राह मानान्तरादिति ग्रथमयीकथाकन्थानन्तहिसदृशविशकलितग्रथितत्वात् तयाकदर्थनप्रसङ्गजनेनेनतक्तमल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनैकांतिकत्वोदाहरणांतरमाह गुणादावपीति तथाहि द्रव्यगुणकर्मणामेव हि सामान्यवत्त्वं तत्र निष्क्रियत्वविशेषणात् यद्यपि द्रव्याश्रयत्वं नायाति आश्रितद्रव्यसावयववित्ते तसक्रियत्वात् तथापि गुणकर्मणोरन्यतराश्रयत्वस्यादेव तन्नद्वयमपि द्रव्यलक्षणं द्रव्यत्वव्याप्तं वा अतो गुणादेरपि प्रसज्येतैव द्रव्यत्वमिति तद्द्यातद् हि तत्त्ववक्तव्यं तथा च तत्र कारणत्ववर्तते इत्यनैकान्तिकमित्यर्थः अनुमानान्तरं शंकते अस्तु तर्हीति स्फोटकारणत्वानधिकरणकारणजन्यत्वादित्युक्ते व्याहतिः स्वदर्शमुभयवादिसंप्रतिपन्नेत्युक्तं अप्रसिद्धविशेषणता निवृत्त्यै स्फोटग्रहणं उभयवादिसंप्रतिपन्नकारणातिरिक्तकारणं भवति प्रतिबंधकाभावस्त्वयाविप्रति

गुणादेरप्यतीन्द्रियसामान्यवत्त्विनिष्क्रियाश्रयत्वे च घटादिवद्द्रव्यत्वप्रसंगात्तयथोक्तशक्त्याश्रयत्वोपपत्तिः अस्तु तर्हि विवादाध्यासितः स्फोट उभयवादिसंप्रतिपन्नस्फोटकारणातिरिक्तकारणजन्यः कार्यत्वाद्घटवदिति प्रयोग इति चेन्मैवं प्रतिबंधकाभावेन प्रतिवादिनोऽसंप्रतिपन्नेन कारणेन सिद्धसाधनत्वात् भावजन्य इति विशेषणेपीश्वरेण सिद्धसाधनत्वात् ननु माभूदर्थापत्तिः प्रमाणं मास्म भूदनुमानं व्रीहीन्प्रोक्षति यूपं तक्षत्यग्नीनादधीतेत्याद्याः श्रुतय एव प्रमाणम् तथाहि व्रीहीनित्यादिवाक्येषु द्वितीयाश्रुत्या ग्रामं गच्छतीत्यादिष्विव व्रीह्यादौ तत्कर्मतावगमात् तेषु कश्चिदतीन्द्रियः प्रोक्षणजन्योऽतिशयोऽस्तीत्यवसीयते दृष्टस्य फलान्तरस्यादर्शनात् स चायमतिशयः शक्तिरिति शक्तिवादिभिर्गृह्यत इति ॥

पन्नत्वात् अतस्तेनार्थान्तरत्वमिति दूषयति मैवमिति भावजन्य इति विशेषणाभावेन नार्थान्तरतेति चेत्तत्राह भावेति ननु यद्यपि सहजशक्तावर्थापत्तिरनुमानं वा न सम्भवति तथाप्याधेयशक्तावागमः प्रमाणमस्तीति तद्बलात्सहजशक्तिरपि सिध्यतीत्यभिप्रेत्य शंकते नन्विति ननु नैतेष्वागमेषु शक्तिवाचकं पदमुपलभ्यत इति तत्राह तथाहीति क्रियाजन्यातिशयभाक्त्वं हि कर्मत्वमित्यर्थः अतीन्द्रियत्वे हेतुमाह दृष्टस्येति उत्पत्त्याप्तिविकृतिसंस्काराणां मध्ये तीन्द्रियसंस्कारः प्रोक्षणादिक्रियाफलमित्यर्थः तावतापि कथं शक्तिसिद्धिस्तत्राह स चेति ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१
वि·सु·
टी·न·
१२७

परिहरति सैवमिति आत्मनो गुणो ह्यदृष्टं नानात्मसु व्रीह्यादिषु संभवति न चैतावता प्रोक्षणादिविध्यानर्थक्यं कर्तृसंस्कारकत्वात् यथाहुः संस्का
रः पुंसस्य वेष्टः प्रोक्षणास्तु स्नानादिमिति निभावः ननु व्रीहीनिति द्वितीयया व्रीहीणां संस्कार्यत्वावगमात् तत्संस्कृता व्रीहय इति प्रसिद्धेश्च न तदि
कर्तृत्वेन न संस्कारस्वीकार इति तत्राह घटविषयेति तथाहि घटविषयज्ञानादुत्पन्नः संस्कारो घटसंस्कार इत्युच्यते न तु कर्तृहेतोर्घटविषयत्वा
त् न पुनर्घटाधारत्वात् एवमत्रापीत्यतो न द्वितीयाश्रुतिः प्रसिद्धिर्वा व्रीह्यादिगतशक्तिसाधिकेत्यर्थः प्रयोगमेव दर्शयति विचारेति अग्न्या
दीत्यर्थः अतीन्द्रियसापेक्षं न भवतीत्युक्ते बाधः स्यात् ईश्वरेच्छादृष्टादिसापेक्षत्वात् तदर्थं निजरूपसंबद्धेत्युक्तं नाचत्युक्ते चादृष्टवदात्मसं

सैवं संस्कारात्याददृष्टस्य चेतनगतस्याचेतनेषु व्रीह्यादिषु समवायासंभवात् घटविषयज्ञानजनितभावनाया घटविषय
त्ववत् व्रीहिप्रोक्षणाद्युद्भूतसंस्कारस्यापि तद्विषयक्रियाजन्यतामात्रेण तद्विषयत्वमतोऽस्तुपपन्ने व्रीह्यादिषु शक्तिकल्पनाया
प्रमाणाभावात् तस्मान्न शक्तिसद्भावे प्रमाणमस्ति तथा च प्रयुक्तं लीलावतीकारेण विवादाध्यासितं न निजरूपमात्रसं
बद्धातीन्द्रियसापेक्षं प्रमाणेन तथात्वानुपलभ्यमानत्वात् यत्प्रमाणेन तथात्वेनोपलभ्यते न तत्तथाभूतं यथा नीलपीतरूपा-
मिति अत्र च निजरूपमात्रसंबद्धशब्देन द्विष्ठस्य संप्रयोगादेर्व्यावृत्तिः क्रियत इति अत्रोच्यते न तावदुक्तौ प्रमा
णाभावः यस्मात् परस्यशक्तिर्विविधासर्गाद्याभावशङ्कयः इति श्रुतिस्मृतिमिताशक्तिः केन निवार्यते २१ न तस्य
कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥

योगादिसापेक्षत्वाद्बाधः स्यात् तदर्थं निजरूपमात्रसंबद्धेत्युक्तं तस्य द्विष्ठत्वेन व्यापित्वेन तदभावादिति तत्र तावदुक्तावागमप्रमा १२७
णयति श्लोकेन परेति विवृणोति न तस्येति तस्येश्वरस्य कार्यं स्थूलशरीरं करणं सूक्ष्मशरीरं न विद्यते तथा तेन परमेश्वरेण समोऽभ्य राम
धिको वा न दृश्यते श्रुतिस्मृत्योरित्यर्थः तथा शक्तिः परोत्कृष्टा विविधैव बहुप्रकारा श्रूयते तथा ज्ञानलक्षणबलस्य क्रियासंपादनं १२७
स्वाभाविकी अथवा ज्ञानबलेन क्रिया जगन्निर्माणादि स्वाभाविकी नान्याधीनेति अथवा ज्ञानं च बलं च क्रिया चेत्येतत्सर्वं स्वाभावि
कं स्वरूपतादात्म्येनाध्यस्ताचिन्त्यमायाशक्तिविजृम्भितमिति श्वेताश्वतरोपनिषन्मन्त्रस्यार्थः ॥ ६ ॥ ६ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्लोकोक्तमप्यनेकरूपलक्षणत्वात्समानविषयकत्वं नराण्याह ते ध्यानयोगेत्यादिना ये किं कारणमित्यादि बहुविधं सन्दिह्य तेऽस्मत्र ब्रह्मवा
दिनः ते ध्यानमेव योगो ध्यानयोगः तं ध्यानयोगमनुगताः प्राप्ताः सन्तोऽपश्यन् दृष्टवन्तः किं देवात्मशक्तिं देवो द्योतनात्मकस्य स्वा
त्मा चेति देवात्मा ब्रह्म तस्य शक्तिमनाद्यनिर्वचनीयाविद्यां तं त्रिशक्तिमयीं महामायां स्वगुणैः सत्त्वरजस्तमोमयैर्वियदादिकार्यै
र्निगूढां छन्नामित्यर्थः पराकोऽवर्णाः करणकर्तृत्वमस्यान्तानामरूपं च वर्णस्तद्रहितः सन् शक्तियोगात् बहुधा बहुप्रकारं वर्णान्विदधा
तीति च श्वेताश्वतरोपनिषन्मन्त्रो स्मृतिं विवृणोति शक्तय इति तथा विष्णुपुराणे निर्गुणस्याप्रमेयस्य विशुद्धस्य परात्मनः कथं सर्गा
दिकर्तृत्वं ब्रह्मणोऽप्युपपद्यते इति मैत्रेयेण पृष्टः प्रत्युवाच पराशरः शक्तय इत्यादि सर्वभावानामचिन्त्यज्ञानगोचराः अचिन्त्या अनिर्वच

ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढां पराकोऽवर्णो बहुधा शक्तियोगात् शक्तयः सर्वभावाना
मचिन्त्यज्ञानगोचराः यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः सर्वज्ञता तृप्तिरनादिबोधः स्वातन्त्र्यता नित्यमलुप्त
शक्तिः अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्येत्यादि श्रुतिस्मृतिशतैर्गीयमाना शक्तिः शक्यते
कथमपह्नोतुं न चैतानि वाचामि स्वरूपसहकारिमात्रप्रतिपादकानि कार्यकरणादिसहकारिनिरासपुरःसरं तस्याः

नीयत्वात् ज्ञानगोचरा अनन्तदुपासनासूपाधितायाता अचिन्त्यज्ञानगोचराः शक्तयः सन्ति यतोऽतः परमेश्वर (( प्रतिपादनात्
स्थापिताः सर्गाद्य भावशक्तयः सन्ति एतदुक्तं भवति सर्वभावानामेव तावच्छक्तयः सन्तीति किमु वक्तव्यं ब्रह्मणः परमेश्वरस्यातः ताभिः स
र्गादिकर्तृत्वमप्युपपद्यत इति अथवा सर्वभावानामिति कर्मणि षष्ठी ज्ञानगोचराः अचिन्त्याः शक्तयस्तावत्सन्ति यतोऽतस्ताः सर्गाद्याभावशक्त
या ब्रह्मणः सन्ति अन्यस्य तादृग्विधशक्तिनियन्तुरभावादतः सर्गादिकर्तृत्वं ब्रह्मण उपपद्यत इत्यर्थः पुराणान्तरवचनमुदाहरति सर्वज्ञ
तेत्यादिना अचिन्त्यशक्तिरिति प्रकृतोपयोगिनी विधिज्ञा वेदज्ञाः परमेश्वरज्ञा इति वानन्ये तेषु शक्तिशब्दः स्वरूपसहकारिमात्रपरः ना
तीन्द्रियशक्तिपर इत्यत आह न चैतानीति न तस्य कार्यकरणं च विद्यत इति सहकारिनिषेधेन शक्तेरुच्यमानत्वात्तत्सहकारिमात्रपरत्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वि॰सु॰ शक्तेर्ब्रह्मस्वरूपत्वाभावे हेतुमाह परास्येति षष्ठ्या शक्तेः ब्रह्मस्वरूपाद्भेदप्रतिपादनात् विविधेति शक्तयइति च बहुत्वाभिधानात्स्वेनैव
टी॰न॰ स्वस्यभेदायोगात् एकस्यानेकत्वायोगाच्चेत्यर्थः नैयायिकादिभिः स्वीकृतं चासामीश्वरपरत्वमित्यर्थः नैयायिकेति परिशेषयामः परिशे
२२८ षयिष्यामः प्रथमामर्थापत्तिं समर्थयते तथाहीति स्फोटादीति प्रतिबंधाभावस्यकारणत्वाभावे शक्तेः प्रतिबद्धायाः कारणत्वं न स्यादिति य
दुक्तं तद्विकल्प्य दूषयति मैवमिति प्रतिबंधाभावस्याकारणत्वाभावे शक्तिकारणत्वापत्त्यापत्तलक्षणप्रतिकूलतर्कं दर्शयित्वा विपर्यये पर्य्य
न च स्वरूपत्वमपि शक्तेः परास्येत्यादिषष्ठ्या स्वरूपातिरिक्तत्वप्रतिपादनात् अस्य शक्तिर्विविधानास्तु शक्तयइ
ति च नानात्वेन श्रूयमाणायाएकरूपब्रह्मत्वासंभवाच्च न चासांश्रुतिस्मृतीनामर्थवादत्वमुपक्रमोपसंहारादिलिंगै
नेश्वरस्वरूपत्वाध्यवसायात् नैयायिकादिभिरेतासामीश्वरस्वरूपपरत्वाभ्युपगमाच्च अस्त्वेवमपि नार्थापत्त्यनुमा
नेविनाना किं कमन्यस्तु प्यति भवानतदर्थापत्त्यनुमानोपन्यासेन भवंतं परिशेषयामः तथाहि स्फोटादिकार्या
न्यथानुपपत्तिलक्षणादाहेतैवार्थापत्तिः ननु तत्राप्युदितैवान्यथाप्युपपत्तिः प्रतिबंधकाभावसहकृतादेव वह्नि
स्वरूपात्कार्योत्पत्तेः न च प्रागभावप्रध्वंसाभावादिविकल्पेनाभावस्याकारणत्वं शक्तावपि तत्प्रसंगस्य तुल्यत्वात् प्र
तिबद्धायाएव शक्तेः कारणत्वादिति चेन्मैवं विकल्पासहत्वात् तथाहि यदि प्रतिबंधकाभावः कारणं न स्यात्तर्हि
शक्तिरपि कारणमिति प्रतिकूलतर्कमात्रमिदं किंवा भवति च शक्तिः कारणं ततः प्रतिबंधकाभावोपि कारणमिति
विपर्यये पर्यवसानादभावस्याकारणत्वसाधकबाधनाद्यः तर्कमात्रस्योपालंभानंगत्वात् नेतरः भवति च शक्तिः
कारणमिति विपर्ययस्य शक्तिमनिरुक्तावक्रमशक्यत्वात्॥ ॥वसानरूपप्रमाणादभावस्यकारणतासाधकत्वमिति
द्वितीयं पक्षं दर्शयति भवतीत्यादिना विपर्यये पर्य्यवसानरहितस्य तर्काभासत्वात्तु ततः प्रतिपक्षनिराकरणसिद्धिरित्याह नाद्यइ राम॰
ति द्वितीयं दूषयति नेतरइति एवंहि विपर्ययपर्यवसाने मृदादिविशेषणप्रतिबंधाभावः कारणं प्रतिबंधाभावत्वात् शक्तिविशेष २२८
णप्रतिबंधाभाववदिति न चैतच्छक्यानुमानं दृष्टांतस्याश्रयहीनत्वादिदोषग्रस्तत्वादित्यर्थः॥

ननु द्विविधस्तर्कः स्वपक्षसाधकानुकूलः प्रतिपक्षदूषकश्च तत्राद्यस्य विपर्य्यये पर्य्यवसानमपेक्षितं इतरथासाधकानुकूल-
त्वासिद्धेः चरमस्य तु न तदपेक्षितं परसिद्धव्याप्तिमादाय परस्यानिष्टप्रसक्तेः शक्यकरणत्वात्तादृशश्चायमिति तत्राह नचेति
तत्र हेतुः प्रमितेत्यादि यस्य हि मते प्रमितेऽधिकरणे प्रमितप्रतियोगिक एव निषेधः नाप्रमितप्रतियोगिकस्तस्य वादिनो यदि प्र-
तिबंधाभावः कारणं न भवेत् नहि शक्तिरपि कारणं न भवेदिति शक्तिकारणत्वं निषेद्धुं न शक्यं शक्तेस्तत्कारणत्वस्य चाप्रमितत्वात्
प्रमितत्वे वा स्वरूपेण निषेधानुपपत्तेः उक्तं च प्रमितस्यैव निषेधप्रतियोगित्वं धर्मित्वं चोदयनेन व्यावर्त्याभाववत्तैव भाविकी हि वि-
शेष्यता अभावविरहात्मत्वं वस्तुनः प्रतियोगितेति न हि इह भवतु नाम विपर्य्ययापर्य्यवसाय्यपि तर्को निषेध एव शक्तिकारणत्वस्यापा

न च परसिद्धेन परस्यानिष्टापादनं प्रमितप्रतियोगिकनिषेधवादिनः शक्तिरपि कारणं न भवेदित्येवं विधिनिषे-
धस्याप्यसिद्धेः तथापि जल्पकथामवधीर्य प्रतिबंधकाभावस्याकारणत्वे प्रतिबद्धापि शक्तिः किमिति का-
र्य्यं न जनयेदिति सुहृद्भावेन पृच्छतः किं सुतरामिति चेच्छ्रूयतां न हि दर्शनरहस्यं सति पुष्कलकारणे कार्य्योत्पा-
दविरोधि प्रतिबंधकमिति हि शक्तिवादिनः॥ ॥ दर्शयितुं न शक्यत इति भावः वस्तुव्यावृत्तिबुभुत्सुः पृच्छति तथापीति य-
दि प्रतिबंधाभावः कारणं न भवेत् प्रतिबंधे विद्यमानेपि किमिति शक्तिः कार्य्यं न जनयेदित्यर्थः अत्र सामग्रीवैकल्यस्य प्रतिबं-
धकताभावेन तावदाह सतीत्यादिना कारणाभावव्यवच्छेदार्थं सति पुष्कलकारणमित्युक्तं कार्योत्पत्तिं प्रति कारणपौष्कल्ये सति यदु-
त्पत्तिविरोधि तत्प्रतिबंधकमिति शक्तिवादिन इष्टं तेन प्रतिबंधसमयेपि कारणपौष्कल्यात्प्रतिबंधाभावस्य कारणान्तरभाव इति
भावः यद्वोदयनेन सति पुष्कलकारणे कार्य्योत्पादविरोधी प्रतिबंधक इति मतमसहमानेनोक्तं ये तु प्रतिपादयंति कार्य्यानुत्पा-
द एव प्रतिबंध इति तैः प्रतिबंधमकुर्वन्नपि च प्रतिबंधक इत्युक्तं भवति तथा हि कार्य्यानुत्पाद इति कोर्थः कार्य्यप्रागभावो वा स्यात् का-
र्य्यप्रागभावस्य कालान्तरप्राप्तिर्वा स्यात् नाद्यः तस्यानादित्वेन मणिमंत्राद्यजन्यत्वात्॥

१
वि॰सु॰ नहि तीयः कालस्यैकत्वेन कालांतराभावात् अपरकालभेदकउपाधिः कालांतरं तस्य तावन्मन्त्रकारणजन्यत्वेन नमणादिजन्यत्वम् अ-
टी॰न॰ पप्रागभावावच्छिन्नकालोपाधिर्मन्त्रजन्यः तत्प्रागभावस्यानादित्वेनतदवच्छिन्नकालोपाधेरपि मन्त्रादिजन्यत्वानुपपत्तेः तस्मात्साम-
२२९ ग्रीतत्कार्ययोः पौर्वापर्यनियमाद्भावयोरपि पौर्वापर्यभावउपपद्यते वस्तुतस्तु तुल्यकालत्वमेवेतिनायपन्थाः किंतु सामग्रीवैकल्य-
प्रतिबंधपदार्थो मुख्यः सच मन्त्रादिरेव न तु सो प्रतिबंधकः तु वतस्याः किंचित्करत्वं दोषायतत्प्रयोक्तारस्तु प्रतिबंधकाः नेच किंचित्करा
इतितदेतदपि गर्जनं कारणानां कार्योदासीन्यस्यैव प्रतिबंधकत्वेन निर्वक्ष्यमाणत्वात् आकाशसृष्टिहननायते किंच भवतु कालस्य प्रा-
गभावस्य त्वनादित्वं कालोपाधेश्च स्वकारणाधीनत्वात् मन्त्राद्यजन्यत्वं च न यापि प्रागभावावच्छिन्नकालोपाधिस्तत्संबंधो वा किमिति
मन्त्रादिजन्यो न भवेत् नहि स प्रागभावो नाप्युपाधिमात्रं नापि कालमात्रं तस्मात्स्वतिप्रुष्कलकारणे कार्यं न्यात् विरोधी प्रतिबंधक इत्य-

तेन न सामग्रीवैकल्यात्तत्र कार्यानुदयः किंतु विरोधिसद्भावादेव नच सामग्रीवैकल्यमेव प्रतिबंधो लोकप्रसिद्धि- [illegible]
विरोधात् नहि कुसूलनिहितबीजानि क्षितिपवनयाथस्तेजस्समग्रविरहतानि तत्र बीजायमजूषानिहितानास्तु रीवेस
कुविंदादिविरहिणः प्रतिबद्धा इति प्रतियन्ति लौकिकाः सामग्रीविधुरतामात्रस्य च प्रतिबंधतायां समस्तस्यापिहे-
तुजातस्य प्रतिबंधाभाववत्तयैवापक्षीणत्वादिदमस्य कारणमयं च प्रतिबंधाभाव इति परीक्षकाणां विशेषावधारणमेव

यमेव पन्थाः ननु भवतु अयं प्रतिबंधकस्ततः किमिति तत्राह तेनेति सामग्रीवैकल्यस्य प्रतिबंधकत्वाभावात्ततः कार्यानुत्पादः
किंत्वन्यस्माद्विरोधिन इत्यर्थः ननु सत्यं न सामग्रीवैकल्यं प्रतिबंधकः किंतु प्रतिबंध इति तत्राह नच सामग्रीति प्रसिद्धिविरोधमे-
व दर्शयति नहीति पाथ उदकं यदि हि सामग्रीवैकल्यं प्रतिबंधः ततः सहकारिविरहतबीजेषु सहकारिविरहितत्तंतुषु प्रतिबद्धबुद्धिः स्या-
त् नत्वेतदस्तित्ततो नियमेन तु तदनुपलब्धिरर्थाभावनिर्वाहिकेत्यर्थः इतश्च न सामग्रीवैकल्यमात्रं प्रतिबंध इत्याह सामग्रीविधुरेति राम॰
अस्ति तावदिदमस्य कारणमयं प्रतिबंधाभाव इति विभागः इतरथा प्रतिबंधसहितकारणानां सामग्रीत्वाभावप्रसंगात् सचायं वि- २२९
भागस्तत्सत्तेन सिद्ध्येत् सर्वस्यैव कारणस्य वैधुर्यलक्षणप्रतिबंधाभावरूपत्वादित्यर्थः॥

५५

तदेवं सामग्रीवैकल्यप्रतिबंधनिरसनेन प्रतिबंधाभावस्य कारणत्वमपि निरस्तं तत्रान्वयव्यतिरेकविरोधं शंकते अभावस्येति विशेष्यभावविषयतयान्यथासिद्धत्वात् न तावदभावस्य कारणत्वं कल्प्यत इत्याह मैवमित्यादिना उक्तस्यायमर्थः स्वतःप्रामाण्यवादे स्वशक्तिप्रतिबंधापरिहृता यापूर्वोदिता प्रतिबंदी स्मारयति पूर्ववादी तत्रानुपलब्धेरिति शंकयति तत्रापि वह्नेर्घटाभावो लब्धेर्विरोधिनो घटोपलब्धिस्तदभावश्च तदनुपलब्धिरतो योग्यत्वे सत्यनुपलब्धेरभावोपलब्धेश्चान्यथासिद्धान्वयव्यतिरेकत्वात् न कार्यकारणभाव इत्यभावप्रमाणाभावः स्यादित्यर्थः यद्यप्येवं तथापि कारणं तत्राभावादगत्यानुपलब्धेरनन्यथासिद्धायास्तत्र कारणत्वमाश्रितं इह तु न तथेति वैषम्येण परिहर

अभावस्याकारणत्वे कार्येणान्वयव्यतिरेकविरोध इति चेन्मैवं अन्यथासिद्धत्वात् अनन्यथासिद्धावन्वयव्यतिरेकौ कारणक्लृप्तिं कुर्वाते इति न्यायात् तर्ह्यनुपलब्धेरप्यभावोपलंभहेतुता न भवेत् विरोधिन्याभावोपलब्धेरभावतयान्वयव्यतिरेकयोरप्यन्यथासिद्धेर्वक्तुं सुकरत्वादिति चेन्न तद्व्यतिरेकेणाभावोपलंभकारणानिरूपणात् इंद्रियमेव कारणमिति चेन्न तस्याभावेन सन्निकर्षाभावात् संयोगसमवाययोस्तत्राभावात् विशेषणविशेष्यभावस्य च संबंधांतरगर्भस्यैव प्रत्यक्षांगत्वात् न तत्राभावस्य प्रत्यक्षगम्यत्वं किं त्वनुपलब्धिगम्यत्वमेवेति निर्णीयते अन्यथायं पर्वतो वह्निमानित्यत्र वह्नेरपि संयुक्तविशेषणतया प्रत्यक्षत्वप्रसंगात् न च संबद्धस्यैवाभावस्येंद्रियग्राह्यत्वमस्तु तत्प्रतीतेरिंद्रियान्वयव्यतिरेकानुविधायित्वेनापरोक्षत्वात्॥ ॥ति तत्तदिति गत्यंतरं शंकते इंद्रियमिति सन्निकर्षाभावमेवाह संयोगेति द्रव्ययोर्हि संयोगो गुणत्वान्न चाभावो द्रव्यं तथा कार्ये द्रव्यगुणकर्मसामान्यविशेषाणामेव समवायः न चैषामन्यतमोऽभाव इत्यर्थः ननु संयुक्तविशेषणत्वादिकमस्ति संबंधांतरमिति तत्राह विशेषणेति संबंधाभावादप्रत्यक्षत्वमुक्तमुपसंहरति नन्वत्रेति यदि च संयुक्तविशेषणतैव प्रत्यक्षबुद्धिनिमित्तं तर्हि प्रत्यक्षधर्मिकानुमानोच्छेदः स्यादित्याह अन्यथेति नन्वपरोक्षाभावप्रतीतिरिंद्रियान्वयव्यतिरेकौ वान्यथानुपपन्नावसंबद्धस्यापि ग्रहणं कल्पयत एव यथा हि भावेषु विशेषणविशेष्यभावस्य मूलसंबंधनिबंधनस्यात्तन्निबंधनस्यापि च स्वीकारस्तथाऽभावे तदभावेपि प्रतीतिबलादेवांगीकार इति शंकते नन्विति ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

१
चि.सु. नन्वेतदापरोक्ष्यं स्वप्नादिवद्भ्रान्तिरेवेत्याशंक्यामेवं बाधाभावादित्याह गतं नरेति विशिष्टप्रतीतेरुभयवादिसंमतत्वात् मूलसंबंधरहितो
टी.नं. पि विशेषणविशेष्यभावः प्रत्यक्षागमितिवक्तव्यं ननु तथापि धर्मप्रत्यक्षागतेमानमस्ति अपरोक्षत्वस्यासिद्धत्वात् ज्ञापकप्रमाणाभा
१३० वाद्योगीन्द्रियाणां संबद्धार्थग्राहकत्वनियमभंगो नांगीकरणीयः इह निघटं भूतलमिति व्यवहारस्यायं घटोनुपलब्धेः पर्वतो वह्निमानि
त्यादिव्यवहारवदधिकरणप्रत्यक्षतामात्रेणोपपत्तेरिति तत्प्रियेत्यपरिहरति सैवमिति योगीन्द्रियव्यावृत्त्यै अयोगीति पदं आपरो
क्ष्यानुपपत्तेरनुदयमाह अभावेति साक्षात्परोक्षवद्भातित्वादित्यर्थः विशेषणादिभावेनुगन्यतरेनास्ति आश्रयापरोक्ष्याच्च निर्घटं
गान्यतराभावाच्चेति चेत् मैवं अयोगिप्रत्यक्षप्रमितावितिन्द्रियाणां संबद्धार्थग्राहकत्वनियमस्य निराकर्त्तुमशक्यत्वा
त् अभावप्रतीतेरपरोक्षत्वस्यासिद्धत्वादिन्द्रियान्वयव्यतिरेकयोरधिकरणग्रहणमात्र एवोपक्षीणतयान्यथा ।
सिद्धत्वाच्च नन्वधिकरणग्रहणमात्रोपक्षीणत्वमन्वयव्यतिरेकयोरयुक्तं अधस्तात्तमिन्द्रियेणापनीत घटादौ रू
पाभावप्रतीतिप्रसंगात् अधिकरणस्य गृहीतत्वात् इन्द्रियस्य चाभावाग्राहकत्वात् तस्माद्धर्मप्रतियोगि
ग्राहकेन्द्रियाभावादेव रूपाभावप्रतीत्यनुदय इति वाच्यं तथा चाभावस्येन्द्रियकत्वसिद्धिरिति चेन्नैवम् अ
ये भावस्य प्रतियोगिग्राहकेन्द्रियग्राह्यत्वमतेप्यन्धस्यापि मेवादौ घटतद्रूपाद्यभावस्य चाक्षुषत्वं किं न स्यात् ॥
भूतलमिति प्रतीति घटोनुपलब्धेरित्यादिवदिति भावः अधिकरणविषयतयेन्द्रियान्वयव्यतिरेकयोरन्यथासिद्धिरयुक्ता अतिप्र
संगादिति शंकते नन्विति यदि ह्यभावस्यनेन्द्रियग्राह्यता नहेधस्यापि त्वगादिना घटादावधिकरणे गृहीते तत्र रूपाभावग्रहणप्रसं
गः तत्र हेतुः अधिकरणस्येति अथेन्द्रियाभावान्न रूपाभावप्रत्यक्षमिति चेन्न तत्राह इन्द्रियस्येति तस्माद्यद्रैकस्मादभावाग्रहणं त
दिन्द्रियमभावग्राहकं वक्तव्यमित्याह तस्मादिति तामिमामुद्धरणीयामनुपपत्तिं परिहरति सैवमिति यस्यापि मतेप्रतियोगिग्राहकेन्द्रिया- राम.
ग्राह्यत्वमभावस्याभिमतं तस्यापि तन्निहितमेवादौ घटाद्यभावः किमिति चक्षुषा न गृह्यते इति यस्यैवानुयोगेयः परिहारः प्रतियोगिग्राहकेन्द्रियाग्र १३०
हणमधिकरणस्य सोऽस्मन्मतेपि समान इति खंडलकार्यः ॥ ८ ॥ ९ ॥

१३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यत्प्रतियोगिग्राहकेणाधिकरणे गृहीतेऽभावस्य योग्यानुपलब्धिगम्यत्वं तर्हि गन्धग्राहकेन्द्रियागोचरे कुसुमे रूपग्राहकेन्द्रियागोच
रे च वायौ गन्धरूपयोरभावो न योग्यानुपलब्धिगम्य इति प्रत्यक्षो वक्तव्यः स न स्यात् प्रत्यक्षत्वे चैवंविधस्थलेषु समाहितमुदयनेनाकाशे
शब्दाभावस्य श्रोत्रेण समर्थनात् एवं हि मूने धर्मिसन्निकर्षो नियतो न तु पुनर्धर्मिग्रहणं भूतलादेस्तु दैवगत्या योग्यत्वात् गुणान्तराय
न धर्मिधिषणामनुरुन्धिपति न त्वभावग्रहणोपयोगितया तस्मादिन्द्रियसन्निकृष्टधर्मिण्यभावः प्रत्यक्ष एवेति ततः शब्दाभावः प्रत्य
क्ष इति परिहरति मा भूदिति अत्र तावद्वाय्वादौ रूपाद्यभावस्य चाक्षुषत्वे कोशपानमेव शरणं तद्व्यवहारस्य प्रमाणान्तरवेद्यत्वेना
नुपपत्तेः प्रत्युत प्रतियोगिवद्धर्मिणोऽप्यभावनिरूपकत्वात् तदप्रतीतावप्रतीतिरेव तद्वत्स्यैव प्रतीतिर्घटाभाववदिति इह घटाभाव इति

ननु तत्र प्रतियोगिनश्चाक्षुषत्वेऽप्यधिकरणस्याचाक्षुषत्वात्तत्र रूपाभावश्चाक्षुष इति चेत् एवं तर्हि मन्मतेऽपि
नअंधस्य त्वगिन्द्रियगृहीते घटादौ रूपाभावप्रतीतिः प्रतियोगिग्राहकेणाधिकरणस्य घटादेरग्रहणात् तर्हि घ्रा
णागोचरकुसुमादौ वायौ वाऽचाक्षुषे गन्धस्य रूपस्य चाभावः प्रत्यक्षो न स्यादिति चेत् मा भूत्तत्र प्रमाणान्तरवे
द्यत्वेऽपि तद्व्यवहाराविरोधात् न च सर्वत्र षष्ठप्रमाणवादिनामनुपलब्धिगम्य एवाभाव इति नियमः व्यापकाभा
वाद्व्याप्याभावस्य कारणाभावेन कार्याभावस्य वाऽनुमेयत्वाङ्गीकारात् ९ व प्रतीतेः उक्तं च वृद्धैः सद्ध्यासमभावो निरूप्य
तेनासद्ध्यामिति न चैतदुभयनिरूप्यसंयोगादिप्रतियोगिकाभावविषयं संकोचे प्रमाणाभावात् तस्माद्धर्मिग्रहणमपि कारणमेवा
भावग्रहणे तद्रहिते तु च प्रमाणान्तरवेद्यत्वमित्यपरिपन्थी पन्थाः प्रमाणान्तरं च कुसुमे गन्धानुपलब्धिरेव तदभावेऽनुमानं वायावपि
द्रव्यत्वसमानाधिकरणद्रव्यत्वावान्तरजात्यनधिकरणत्वादिभिरनुमानमित्यादि स्यात् एतद्दास्यवादिनः प्रत्यक्षानुमानागमैः यथा
यथमभावो गृह्यत इति मतं तस्यैव स्यात् यस्य तु योग्यत्वे सत्यनुपलब्ध्यैकवेद्योऽभावः प्रतियोगिग्राहकेन्द्रियगृहीत एव धर्मिणि तस्य
स्वग्राहत्वे विरोधः स्यादिति तत्राह तच्चेति अयमर्थः यदि हि वक्ष्यमाणतत्तद्वृद्धसंमतिवशात् प्रमाणान्तरगम्यत्वमप्यभावस्यास्ति त
दायोग्यानुपलब्धिगम्यस्थल एव प्रतियोगिग्राहकेणाधिकरणग्रहणनियमः तत्कस्य हेतोः तत्तदविनाभूतकारणव्यतिरिक्तकारण

CC-0. In Public Domain. Digitization by eGangotri

१
चि·सु· पौष्कल्यं हि योग्यत्वं तदंतःपातिचेन्द्रियमिति तदभावेपि योग्यत्वं न भवेत् यत्र तु प्रमाणांतरगम्यत्वं तत्र तद्विरहे पिशाचोऽभावो गृहीतु
टी·न· मिति व्यापकाभावाद्व्याप्याभावानुमाने भट्टसंमतिमाह उक्तं हीति अग्निधूमयोर्भावयोर्यादृशी नियम्यत्वनियंतृत्वे गम्यगमकत्वे संमते
१३१ ते एव गम्यगमकत्वे तदभावयोर्विपरीते प्रतीयेते धूमो गमको वह्निर्गम्य इति हि भावयोः स्थितिः अभावयोस्तु तद्वैपरीत्येनाग्न्यभावो ग
मको धूमाभावो गम्य इति स्थितिरित्यर्थः कारणाभावेन कार्याभावानुमाने मंडनमिश्रवचनमुदाहरति तथा च ब्रह्मेति नहि कारणसङ्गा
वे कार्यं सत्ता वियोगतादृतिश्लोकविवरणे दोषाभावाद् ग्रहाशंकानिवर्त्तनं इत्युक्त्वातिपक्षेऽविनिगम्यत्वसुक्तास्वपक्षे वैषम्यमाह
स्वदोषाभावाद्धि पर्य्ययज्ञानाभावः शक्योनुमातुं हेतोरभावे फलाभावस्य नियमादिति अन्यथानुपपत्तिबलादभावस्य कारणतासम

उक्तं हि भट्टपादैर्नियम्यत्वनियंतृत्वे भावयोर्यादृशी मते विपरीते प्रतीयेते ते एव तदभावयोरिति तथा च ब्रह्मसिद्धौ
मंडनमिश्रैर्विपर्ययाभावस्तु युक्तोनुमातुं हेत्वभावे फलाभाव इति तस्मादनुपलब्धेरनन्यथासिद्धान्वयव्यतिरेकव
लादभावप्रतीतिहेतुतास्थलविशेषवशीयत्तु प्रकृते च स्वपुष्कलकारणादेव कार्योत्पत्त्युपपत्तौ न प्रतिबंधकाभा
वस्य कारणता अन्योन्याश्रयता वा स्यमतेदूवीरा यद्यपि मण्यादेः कार्यप्रतिकूलत्वमन्वयव्यतिरेकावसेयं तथा
ऽपि विसामग्रीरूपतालक्षणं यदिदं प्रतिबंधत्वं तत्तदीयाभावस्य सामग्र्यंतर्भावविज्ञानसापेक्षं प्रतिबंधो विसा
मग्रीत्यंगीकारात् तेन प्रतिबंधत्वसामग्रीत्वयोरन्योन्यापेक्षमेवाधिगतिरिति परस्पराश्रयता कथं न स्यात्

थ्यं तमुपसंहरति तस्मादिति प्रतिबंधकाभावस्य तु न कारणत्वे किंचन प्रमाणमित्याह प्रकृते चेति उक्तान्योन्याश्रयमपि समर्थय 939
ते अन्योन्येति नन्वत्राप्युक्त एव परिहारः कार्यप्रतिकूलस्वरूपप्रतिबंधकत्वमनुत्पत्त्यन्वयव्यतिरेकाभ्यामेवावसीयते इति न
त्राह यद्यपीति वैसामग्र्यं हि प्रतिबंधः प्रतिबंधाभावलक्षणकारणवैकल्यं च वैसामग्र्यं तथा च मंत्राद्यभावस्य सामग्र्यंतर्भावज्ञान नाम·
सापेक्षं मण्यादेर्वैसामग्र्यरूपप्रतिबंधत्वज्ञानं मण्यादेरप्रतिबंधत्वज्ञानाधीनं तदभावस्य सामग्र्यंतर्भावज्ञानं प्रतिबंधाभावल १३१
क्षणकारणवैकल्येन वैसामग्र्योपपादनादिति वक्तव्यमन्योन्याश्रयत्वमिति खंडलकार्थः॥ … ॥ ॥ … ॥

म३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रतिवंधत्वस्यस्वाभावस्यसामग्र्यंतर्भावज्ञानापेक्षज्ञानत्वेपितदभावस्यसामग्र्यंतर्भावः प्रतिबंधज्ञानानपेक्षः शक्यो ज्ञातुं नह्यग्न्यादेः कारण-त्वंतदभावस्यविसामग्रीत्वज्ञानाधीनमितिपरस्पराश्रयपरिहारं पुरैवोक्तंस्मारयतिपूर्ववादी नन्विति परिहरतिमैवमिति अनुगतरूपमादाय ह्यन्वयव्यतिरेकौ प्रतीयेते न तु च्छ रूपं तत्स्यानंतत्वेनाशक्यज्ञानत्वात् घटविशेषचिकीर्षयामृद्विशेषोपादानानुपपत्तेश्चनह्येतद्धर्मि न त्वेतद्धर्मेणान्वयव्यतिरेकावभूतानद्विशेषस्य प्रागननुगतेः अनुगतेनापितादृशाभवितव्यं यदननिप्रसंगितदिहप्रतिबंधाभावस्यापिकार्यप्रतिहेतुत्वव्यावृत्ताकारेणाशक्यग्रहणंमदनुगतंपुरस्करोति रूपमऽभावत्वंचानुगतमप्यतिप्रसंगि नचाभावेषुजाति

ननुमण्याद्यभावस्यसामग्र्यंतर्भावज्ञानसापेक्षमस्तुनाममण्यादेर्विसामग्रीत्वज्ञानंतथापितदभावस्यान्वयव्यतिरेकाभ्यामेववह्निस्वरूपवत्सामग्र्यंतर्भावावगतिसंभवान्नान्योन्याश्रयतेतिचेन्मैवंविकल्पासहत्वात् तथाहिकिंमण्याद्यभावाःप्रत्येकमन्वयव्यतिरेकाभ्यांकारणतयाअवसीयंते अथवाप्रतिबंधाभावत्वोपाधिनाक्रोडीकृताःनाद्यः मण्याद्यभावानामनंतानामुपसंग्राहकंविनाप्रत्येकमन्वयव्यतिरेकाध्यवसानस्यपुरुषायुषेणाप्यशक्यत्वात् नापिद्वितीयःतथासति विसामग्रीलक्षणप्रतिबन्धज्ञानाधीनप्रतिबन्धाभावत्वोपाधिज्ञानमंतरेणमण्याद्यभावानांसामग्र्यंतर्भावस्यदुरधिगमतयान्योन्याश्रयतायादुरुत्तरत्वात् नचशक्तिपक्षप्रतिबंधासंभवःशक्तिमनभ्युपगच्छतामिवशक्तिमभ्युपगच्छतामपिकारणानांकार्योदासीनस्यैवप्रतिबंधकतोपपत्तेः वैसामग्र्यस्यप्रतिबंधस्यादृष्टविनरीत्यानिरस्तत्वात् ९ इतितत्प्रतिबंधाभावत्वमननुगतरूपमुपाधिमादायकार्येणान्वयव्यतिरेकाववगंतव्यौ यदाहोदयनः माभूज्ज्ञातिः नतदुपहितगृहीतानामेवव्यवहारांगत्वंसर्वत्रोपाधिमद्व्यवहारलोपप्रसंगादित्यतोप्युदुष्परिहरएवदुरात्मापरस्पराश्रयस्तदेतद्विकल्पपूर्वकमाह विकल्पेत्यादिःयस्तुशक्तिपक्षेकःप्रतिबंधःशक्तेर्नाशश्चेत्यादिनाप्रतिबंधाभावोभिहितस्तत्राह नचेति ननुनपरस्यकार्योदासीन्यंप्रतिबंधोयेनेदंसमीक्षियते अपितुवैसामग्रीमेवतत्राह वैसामग्र्यस्येति उदीरितरीतिःपरस्पराश्रयः यदत्रलीलावतीकारेणार्थापत्तिमाशंक्योक्तंतत्रान्यथैवोपपत्तेः मणिमंत्रादिनादाह प्रतिपक्षभूतस्यस्वेत्र समवा

CC-0. In Public Domain. Digitization by eGangotri



अन्यं नरेणापि तत्स्पृष्टपुरुषस्य दाहो न स्यादिति चेन्न प्रतिनियताग्निसाध्यदाहप्रतिपक्षस्यैवादृष्टस्य जननादिति तत्रत्वेतावदुक्तव्यं कि
मग्निविशेषोद्देशेन मन्त्रादिप्रयुक्तः किं वा दाहो न स्यादिति दाहकाग्निमात्रमुद्दिश्येति स्वयमेव परिभाव्यतामिति किं च दाहानुकूलमहा
पातकनिकेतनेनैवमित्याह प्रतिकूलस्फुटादृष्टप्रभावस्याप्यसंभवात् औषधिलिप्तकाष्ठादिष्वदाहाभावप्रसंगाच्च इदमपि तेनैव शङ्कितं।
मिति चेत् सत्यं शङ्कितं परिहारस्तु संवदः तत्राप्यौषधलेपकारिपुरुषसमवेतादृष्टस्य दाहप्रतिपक्षभूतस्योत्पादादिति हि परिहारस्तु
त्र किं पुरुषकर्तृकौषधलेपाददृष्टोत्पत्तिरौषधलेपमात्राद्वा नाद्यः पवनाद्युपनीतौषधिसंपर्के काष्ठादावग्निसंयुक्ते दाहाभावप्रसं
गात् न द्वितीयः काष्ठादावप्यदृष्टोत्पादापातात् तदलमनेन लीलावतीविलासवतीविलपनेन प्रकृतमर्थोपपत्तिसमर्थनमुपसंहर

अतः प्रतिबन्धाभावस्याकारणत्वासंभवात्तत्कार्य्यार्थापत्तेरन्यथोपपत्तिः उपादानोपादेयभावनियमानुपपत्तिरपिप्र
त्तौ प्रमाणमेव ननु तत्र स्वभावभेदादेवोपपत्तेरन्यथोपपत्ते रुक्तेति चेन्नैवं तथा सति सर्वत्र स्वभाववादापारप्रसा
रिकया सामान्यसमवायविशेषादेरपि परा करण प्रसंगात् तथा हि सत्तायाः स्वभावभेदादेव सदिति व्यवहार
वत् द्रव्यादिष्वपि सद्व्यवहारोपपत्तौ सत्तासामान्यापलापः प्रसज्येत एवं समवायवान्नयं घट इत्यादाविव संबन्धमन्त
रेणापि गुणकर्मादेर्विशेषणत्वोपपत्तौ समवायापह्नवः स्यात् विशेषाणां विशेषान्तरेणेव व्यावृत्तिव्यवहार।
हेतुत्ववत्त्वनित्यद्रव्याणामपि स्वभावभेदादेव तथात्वोपपत्तौ विशेषपदार्थपरित्यागप्रसंगः॥ ६ ॥ ६ ॥ 132

ति अत इति द्वितीयार्थापत्तिं समर्थयते उपादानेति तत्र किं शक्तिवादिनोप्यन्ततः स्वभावशरणग्रहणमेव शरणं तदवरमादावेव स्वभावा
श्रयणमिति अभिसंधिरामुष्मतामादौ क्वचिदपि स्वभावातिरिक्तशक्तौ प्रमाणं नास्तीत्याशयेनाह तथा सतीति सामान्याद्यपलापं यथा
यथमुपपादयति तथा हीत्यादिना सत्तायाम् अनवस्थाभयात्सत्तान्तरमन्तरेणैव स्वभावविशेषात्सद्व्यवहारहेतुत्वांगीकारवदितरत्रापि राम॰
स्यादिति सत्तापलापः तथा समवायवान्नयं घट इत्यत्रापि अनवस्थाभयादन्तरेणैव समवायान्तरं समवायस्य घटं प्रति विशेषणत्ववत्। १३२
न्तु क्तः पटश्शुक्ल इति चैलावलमित्यत्रापि गुणकर्मणोः स्वभावभेदादेव विशेषणविशेष्यभावप्रसंगात् समवायापलापः तथा चा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्यविशेषेषु परस्परव्यावृत्तिः स्वभाववशात् तत्कस्य हेतोर्विशेषेषु विशेषान्तरस्वीकारे तेषामप्यनुगतरूपवत्तया रूपादिवदन्य
विशेषत्वहानेरनवस्थानाच्च क्वचिन्नगत्या निर्विशेषस्वीकारे च तेषामेवान्यविशेषत्वादिति तद्वन्नित्यद्रव्याणामपि स्वभाववशाद्या
वृत्तिर्वृद्धिजनकत्वयोगिनामित्यन्यविशेषा पलायद्ध्वंति खडलकार्थः उपलक्षणं चैतत् कालादेरत्नसंबंधमन्तरेण सत्त्ववदि
तरेषामपि स्यादिति कालाद्यपलापइत्यपिद्रष्टव्यम् द्वितीयमाशंकापरिहरति अथेत्यादिना उपादानादिग्रहणमुपलक्षणं च स्फुरा
दीनां रूपादिग्रहणनियमस्यापि न हि सन्निकर्षमात्रात्तत्संभवः रसादेरपि तत्त्वाद्देवमर्थापत्तिं समर्थयित्वा अनुमानमपि समर्थ
यितुं श्लोकेन संगृह्णाति स्थितिस्थापकेति दहनइति धर्मिनिर्देशः पूर्वार्द्धेन साध्यनिर्देशः संग्रहं विवृणोति वह्निरित्यादिना आ

अथ यत्र यत्र प्रमाणमस्ति तत्र तत्र वस्तुतन्त्राधीनएव तद्व्यवहारः यत्र तु तन्नास्ति तत्र तत्स्वभावभेदादेव व्य
वहारइति व्यवस्थेति चेत् हंतैवमत्रापि प्रमाणसद्भावादेव स्वरूपातिरेकिणी शक्तिरंगीक्रियतां कृतं स्वभाववा
दपादावलंबनकातरतयेत्यलमतिविस्तरेण अनुमानमपि तत्र प्रमाणम् तथाहि स्थितिस्थापकधर्मान्या
तीन्द्रियाद्विष्ठसंश्रयः दहनोगुणयोगित्वाद्गुरुत्वाश्रयकुम्भवत् २४ वह्निरद्दिष्टातीन्द्रियस्थितिस्थापकेतरभावा
श्रयः गुणवत्त्वात् घटवत् न चेश्वरवादिनामतीन्द्रियत्वमसिद्धम्॥

काशादिसंयोगव्यावृत्त्यर्थं अद्दिष्टेत्युक्तं रूपादिव्यावृत्त्यर्थं अतीन्द्रियेत्युक्तं प्रत्यक्षावयविनः पक्षत्वाद्व्यणुकादिगतरूपेण
नार्थान्तरतास्थितिस्थापकनिवृत्त्यै स्थितिस्थापकेतरेत्युक्तं अतीन्द्रियाकाशाद्यन्योन्याभावस्याग्निगतस्य व्यावृत्त्यर्थं भावग्रहणं
आश्रयग्रहणेन चायुतसिद्धतया सिद्धसंबंधित्वं विवक्षितं तेन नूनवायुपरमाणुभिरर्थान्तरता गुरुत्वमादाय घटादौ साध्यप्रसिद्धिः
आकाशादौ च परममहत्त्वादिना पूर्ववास्तुक्तमनूद्य दूषयति न चेत्यादिना प्रमाणान्तरोपनीतविशेषणात्वेन व्यतिरिक्तमनुव्यव
सायव्यतिरिक्तं च यदस्मदादिप्रत्यक्षं तद्विषयत्वमतीन्द्रियत्वं विवक्षितं तच्च गुरुत्वादौ प्रसिद्धं तेन न पूर्वोक्तविधाप्रसिद्धविशे

२
शि·सु· प्रशस्तपादवचनसंमतिपूर्वकं दर्शयति प्रमाणान्तरेति भाष्ये भावनाग्रहणं स्थितिस्थापकस्याप्युपलक्षणं कुड्यमिव वराणामाश्रयो
टी·न· भवति द्वयोरप्यस्तीति तेनार्थान्तरतेति प्रथमं पक्षं दूषयित्वा द्वितीये भाट्टमतप्रसिद्धविशेषणतामाह नापि द्वितीय इति अस्तिता
१३३ वह्न्येवोपाश्रयत्वविलक्षणाश्रयत्व स्वकीयरूपस्पर्शादिप्रति तन्मात्रस्तु नामसमवायित्वं स्वरूपादितुल्यमेवेदमाश्रयत्वमभिम
तं तेनेनार्थान्तरताऽप्रसिद्धविशेषणतेत्याह मैवमिति अपुनःसिद्धतयेतिद्वयो रत्वनरस्य वा पृथगाश्रयित्वरादित्यपृथगातिमत्त्वरादि त्यथा अत्र
न सिद्धिस्तत्रयेत्यर्थः ननु तथापि कर्मप्रत्यक्षवादिनः प्राभाकरस्यार्थान्तरतेत्याह नचेति भाट्टवेदान्तिनोस्तावत्स्वीणमिद
प्रमाणान्तरोपनीतविशेषणालंबनानुव्यवसायेनतारस्मदादिप्रत्यक्षाविषयत्वस्यातीन्द्रियशब्दार्थस्य गुरु
त्वादेर्भावनादेश्च प्रसिद्धत्वात् गुरुत्वधर्माधर्मभावना अतीन्द्रिया इति प्रशस्तपादैरुक्तत्वात् ननु किमिहाश्र
यशब्देनाधारत्वमात्रं विवक्षितमुत तत्समवायित्वं नाद्यः वह्नेः कदाचित्परमाण्वाधारत्वसम्भवेन सिद्धसाध।
नत्वात् नापि द्वितीयः समवायमनिच्छतो भाट्टस्याप्रसिद्धविशेषणत्वादिति चेन्मैवं समवायानङ्गीकारेपि
स्वीयरूपादीनामिवाश्रुतसिद्धतयावह्नेर्विशिष्टधर्माधारत्वस्याश्रयशब्देन विवक्षितत्वात् न चातीन्द्रियक
र्माश्रयत्वेन मीमांसकस्यार्थान्तरताशङ्किवादिनोरपि प्राभाकरवदाद्वैतवेदान्तिनोः कर्मातीन्द्रियत्वस्यासिद्धत्वा
त् विपक्षे च वह्निस्वरूपस्यैव कारणत्वात् प्रतिबंधकाभावकारणत्वस्य पुरस्तान्निरस्तत्वात् मंत्रादिसमवधाने समवधा
नयोरविशेषेण कार्यजननप्रसंगो बाधकः ९ मनुमानेनतयोः कर्मप्रत्यक्षवादित्वात् प्राभाकरस्यतुभ्रान्तिमात्रमप्र १३३
त्यक्षत्वाभिमानः तथाहि कादाचित्कातिशयः स्वाश्रयातिशयपूर्वक इति नतावद्व्याप्तिरस्ति तस्यामेव क्रियायां व्यभिचारात् याया
क्रियासाकादाचित्कीनवानचेन्नात्वनयासंयोगादिनि त्वतापत्तिः कादाचित्कीचेदतिशयान्तरपूर्वकत्वेऽनवस्था अतत्पूर्वकत्वे। राम
देतोस्तत्रैव व्यभिचार इति भावः विपक्षे बाधकमाह विपक्षे चेति विपक्षे मंत्रादिसमवधानासमवधानयोरनादरे सप्तमी अविशेषेण १३३
कार्यजननप्रसंगो बाधकः कुतोऽग्निस्वरूपस्यैव कारणत्वात् प्रतिबंधाभावकारणत्वस्य पुरस्तान्निरस्तत्वादिति योजना ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

दूषणांतरमुक्तं निराकरोति नचैवमिति यद्यपि शक्तिवादिनां गुणादिष्वप्येवं धर्मोभिमतस्तथापि माभूदुक्तव्यस्थितिस्यात्प्रकारेक
कस्वरूपतत्तद्वानत्वज्ञानाश्रयत्वमात्राद्द्रव्यत्वप्रसक्तिः अथतदप्यनेकवृत्तित्वाद्विष्ठमपि भवतीति मतं तथापि गुणवत्त्वं द्रव्यप्र
योजकं नच तद्गुणादावप्यस्तीति नद्रव्यत्वप्रसक्तिरित्याह नैषामिति नहीत्यनेनैव गुणाधिकरणमपि प्रसंजनीयमिति तत्राह न
चैवमिति प्रशिथिलमूलतया आपादनं दूषयति प्रसंगस्येति एवं ह्यस्य विपर्ययः विप्रतिपन्नगुणादय एवंविधधर्मानधिकरणं
गुणानधिकरणत्वादिति नचात्र व्याप्तिरस्ति शक्तिगुरुत्वाश्रयव्यतिरिक्तस्य सर्वस्य पक्षकोटिनिक्षिप्तत्वात् अस्तु तर्हि शक्तिरेव

नचैवंविधधर्माश्रयत्वे गुणकर्मादेरपि द्रव्यत्वप्रसंगः नैषां गुणानधिकरणत्वात् नचैवंविधधर्माश्रयत्वा
द्गुणाधिकरणत्वमपि स्यादिति वाच्यं प्रसंगस्य विपर्ययापर्यवसायित्वात् नहि यद्गुणानधिकरणं तदेवं
विधधर्माधिकरणं न भवतीति प्रतिवादिसंप्रतिपन्नमुदाहरणमस्ति येनायं प्रसंगो विपर्यये पर्यवसा
यी स्यात् शक्तिव्यतिरिक्तस्य सर्वस्य पक्षकोटिनिक्षिप्तत्वात् द्वितीयानुमानेपि मायावादिनं प्रति नेश्वरकार
णत्वेन सिद्धसाधनता तस्योभयवादिसंमतकारणातिरिक्तत्वाभावादीश्वरकारणत्वस्य वेदांतिभिरभ्युपग
मात् जन्यभावजन्य इति विशेषणांतरप्रक्षेपेण मादृस्याप्यर्थांतरपरिहारसम्भवात् ॥ विपर्ययापर्यवसान

भूमिः तस्याः गुणानधिकरणत्वाद्विष्ठानींद्रियत्वादिविशिष्टधर्मानाश्रयत्वाच्च तथाशंकावपि शक्तिस्वीकारेणानवस्थापा
तादिति चेन्नैवं नैयायिकादिमतेन तदसिद्धेः नच परसिद्धेन दृष्टांतेन प्रसंगः प्रसंगमासादयतीति सांप्रतं उभयवादिप्रसिद्धस्य साध
नांगतानियमभंगप्रसंगादिति भावः एवं प्रथमानुमानं समर्थयित्वा स्फोटः संप्रतिपन्नस्फोटकारणातिरिक्तकारणजन्य इत्यनु
मानेऽर्थांतरतामुक्तां परिहरति द्वितीयेति ननु भवतु वेदांतिभिरीश्वरांगीकारादुभयवादिसंप्रतिपन्नत्वेन तदतिरिक्तत्वाभावा
त्तेश्वरेणार्थांतरता मीमांसकानां त्वनीश्वरवादित्वाद्भवत्येव तेनार्थांतरतेति तत्राह जन्यभाव इति तथा च न नित्येश्वरेणार्थांतरं ने

टी॰ ६५

१
वि·सु· भाट्टस्यापी त्युपलक्षणं न हि नित्यगतनित्यशक्त्याव्याप्तिरित्याशंक्य निषेधति नचेत्यादिना नित्यद्रव्येषु द्रव्यत्वेन नित्यगुणे-
टी·न· षु गुणत्वेन सामान्यादिषु च शक्त्यनित्यत्वेन संप्रतिपन्नवदेव शक्त्यनुमानादिति भावः स्यादेतत् साध्यतानामनित्यत्वनानुकथं स्या-
१३५ त् यावन्नाशक्त्युपाधिविकरूपायां नित्यत्वानित्यत्वविरोधादिति तत्राह सलिलेति इदमत्राकूतं नैयं शक्तिरेकैव येनैकस्याः शक्तेर्ज-
न्यत्वमजन्यत्वं च विप्रतिषिध्यते अपितु प्रतिपदार्थं विभिन्ना तथा चाव्ययविषु अनित्यत्वेपि रूपस्य पाथः पावकपरमाणुषु नि-
त्यत्ववन्नित्यत्वं किं न स्यादिति आधेयशक्त्या वागमप्रमाणं समर्थयते व्रीहीनिति यत्तु मुख्यार्थानुपपत्त्युपन्यासेनार्थान्तरत्व

नचैवं सतिनित्येषु शक्त्यभावप्रसंगः अनित्येषु शक्तिसिद्धौ न दृष्टान्ताभावः प्रमत एव नित्येष्वपि तत्सिद्धेः सलि-
लपरमाणुरूपादिवन्नित्येषु न स्यानित्यत्वोपपत्तेः व्रीहीन्प्रोक्षतीत्यादिद्वितीयाश्रुतिभिश्च व्रीह्यादिषु अतीं-
न्द्रियशक्तिसद्भावसिद्धिः नचादृष्टस्य चेतनधर्मस्याचेतनेषु व्रीह्यादिष्वसंभवात् तद्विषयक्रियाजन्यता-
मात्रेण तदीयत्वप्रतिपत्त्युपपत्तेश्च द्वितीयाश्रुतिर्गौणीति वाच्यं धर्माधर्मलक्षणादृष्टविलक्षणस्यैव कस्य-
चिदतिशयस्य तण्डुलपिष्टपुरोडाशादिपरम्परया प्रधानापूर्वजननसामर्थ्यापरनामधेयस्याभ्युपगमात्॥ १३४

युक्तं तदनूद्य दूषयति नचेत्यादिना वाच्यमित्यन्तेन तत्र हेतुमाह धर्माधर्मेति नास्माभिर्धर्माधर्मात्मकादृष्टं व्रीह्यादिष्वभ्युपेय-
ते अपितु तद्विलक्षणं तद्गतातीन्द्रियातिशयः सर्वो धर्माधर्माभिधानो गुरुत्वादेरपि प्रसंगात् यो हि सुखदुःखफलो पुरुषार्थो वातिश- राम·
यो पुरुषसमवेतो तौ तौ नाम पुण्यापुण्याभिधानौ एतान्दृशानि तुकत्वं यानि तर्थे वृत्त्यादि प्रमाणैरवगमादित्यर्थः यथा च प्रोक्षणा १३५
दीनां गुणकर्मतया स्वतन्त्रापूर्वकल्पनानवकाशः तथाभेदलक्षणभावार्थपाद तानि द्वैधं गुणप्रधानभूतानीत्यत्रोक्तम्॥

तत३

ननुव्रीहीणामेवप्रोक्षितानां तण्डुलादिपरंपरया प्रधानापूर्वनिर्वर्तकत्वमस्तु किमत्रादृष्टेन विनानुपपन्नमिति तत्राह अन्यथे
ति एतदनुपपत्त्यात्मकं प्रमाणान्तरमेव वाच्यं त्रिविधं ह्यंगं दृष्टार्थमदृष्टार्थमुभयार्थं चेति तत्र दृष्टार्थेष्वपि नियमादृष्टमस्त्येव ।
केवलदृष्टविधिवैयर्थ्यात् अनन्यलभ्यस्य च शब्दार्थत्वात् अतो विध्यन्यथानुपपत्तिरप्यदृष्टसाधिकेत्यर्थः ननु दृष्टसंभवेनादृ
ष्टकल्पना युक्तेति तत्राह दृष्टस्येति ननु भवतु विध्यन्यथानुपपत्त्यादृष्टं तच्च चेतनसमवायि चेतनधर्मत्वात् भावनायाः इति तत्रा
ह संभवति चेति अयमर्थः व्रीहीन्प्रोक्षतीति द्वितीयाश्रुत्या व्रीहीणामेव प्रोक्षणेन संस्कार्यत्वश्रुतेः ननु सक्तूनामिव होमेन भस्म
साद्भूतानां विनियोक्ष्यमाणत्वानुपपत्तिः येन सक्तुभिरितिवद्व्रीहिभिरिति श्रुतविनियोगभंगावकाशः नच तीर्थस्नानादिव

अन्यथा स्वरूपेणैव व्रीह्यादीनां तत्साधनत्वे प्रोक्षणादिविधानवैयर्थ्यप्रसंगात् दृष्टस्यासंभवे चा
दृष्टस्यैव कल्पनीयत्वात् सम्भवति च मुख्ये लक्षणाश्रयणस्यानवकाशत्वात् एतेन लीलावतीका
रस्यापि निरास्कृतः प्रयोगः प्रमाणानामागमार्थापत्त्यनुमानानां दर्शितत्वेन प्रमाणेनानुपलभ्यमा
नत्वादिति हेतोरसिद्धेः ॥

त्कर्तृधर्मतानतदिह न विषयतामात्रेण द्वितीयाश्रूयते किंतु संस्कारजन्यातिशयाधारतया तथा सति लक्षणा स्यात् न
त्वविनाकारणं लक्षणा अतिप्रसंगात् न चागमैकभूमिषु प्रमाणान्तरावतारो येन विरोधशंकापि स्यात् तदुक्तं भाष्यकृद्भिः
न विधौ परः शब्दार्थ इति यत्तु श्रीवल्लभेन शक्त्यपह्नवायानुमानमुक्तं तदप्युक्तप्रकारेण दूषितमित्याह एतेनेति एतेनान्ये
नदिगुणवत्त्वसिद्धिमाह प्रमाणानामिति किंच यत्त्वदुक्तं तत्त्वदुक्तयोस्तावदर्थपर्यालोचनायां अनुमाने शरीरं पूर्तिकूष्माण्डापत्ते
तथाहि यत्त्वदुक्ताभासाद्यविवक्षायां यथा नीलपीतरूपेण निर्दृष्टान्तासंगतिः नीलरूप⁻ विवक्षायां तु पक्षासंगतिः अन्य।
श्चानुगतोऽर्थः न तिप्रसंगी दुर्निरूपत्वस्य अतिपक्षत्वाच्च तथाहि विवादपदं स्वरूपमात्रसंबद्धानीन्द्रियसापेक्षजन्यजनकत्वा

१
वि·सु· शक्यमनुमातुं नचात्मान्तवस्तूपाधिः स्वरूपमात्रसंबद्धातीन्द्रियरूपत्वसापेक्षाणां पतनेपाषाणादीनामात्मत्वाभावेनसा-
टी·न· ध्याव्यापकत्वात् नच विवादपदं स्वरूपमात्रसंबद्धातीन्द्रियभावनासापेक्षं अदृष्टसापेक्षमिति वा जनकत्वादात्मवदित्यपि प्र-
२३५ संगेनाभाससमानयोगक्षेमतात्मत्वस्यैव तत्रोपाधित्वात् यत्नेनेनाकृष्टकेरविप्रक्षेपत्वापेक्षायामनवस्थितिः अनपेक्ष-
त्वेनयैव व्यभिचारदृष्टिदर्शनात् शङ्कस्यकारणत्वाभ्युपगमात् नचानतः प्रतीतिप्रत्यपिकारणत्वमस्तीति वक्तुनीयं प्रत्यक्षप्रती-
तेरेवार्थजन्यत्वात् शक्तेश्चाप्रत्यक्षत्वात् अनुमानादिनां तु नार्थजन्यत्वमिति तथा ज्ञातात्वनुमानाद्युदयप्रसङ्गात् नच योगिना-
मतीतातादिप्रत्यक्षमिति प्रत्यक्षेप्यर्थजन्यत्वं शक्यं जनमतीतादीनां प्रत्यक्षत्वमेव विवादात् यथाह परमर्षिः विद्यमानोप-

तदेवमर्थप्रत्यायनशक्तिसद्भावात्पदानां तदभिहितेभ्यः पदार्थेभ्यः सन्निधानादिसहकारिवशात्पदार्था-
नामन्योन्यान्वयप्रतिपत्तिलक्षणवाक्यसिद्धानीति सिद्धम् ॥ २३ ॥ ननु पदानामेवान्योन्यान्वितस्वार्थाभिधायक-
त्वसम्भवे किमिति पदार्थानां लक्षणयान्योन्यान्वयप्रतिपत्तिजनकत्वमास्थीयते तथाहि योग्यतयान्वित-
स्वार्थेषु पदानामावापोद्वापदर्शनात्तत्रैव सामर्थ्यमध्यवसीयते ॥ ५ ॥ तं भनादिति वार्तार्थमुपसंहरन् शक्तिसा-

मर्थ्येनस्य समन्वयोपयोगमाह तदेवमित्यादिना अर्थप्रत्यायनशक्तिसद्भावात्पदानां पदैरेव स्वा- भिहितपदार्थेभ्यो द्वारभूतेभ्यः १३५
सन्निधानादिसहकारिवशात् पदार्थानामन्योन्यान्वयप्रतिपत्तिलक्षणवाक्यसिद्धानीति सिद्धमित्यन्वयः इदं तावत् सत्संस्कारविशु-
द्धानामापाततः कृतीनां मूलत्वान्महद्भिः प्रबोध्य मयतो विद्यासहायो हि नाशक्तिविघ्नमयस्य यस्य विशदानन्दमयो बोधो निर्धूता- राम·
खिलभेदगन्धमलं वन्दे भवानीपतिं पदार्थान्वयप्रतिपत्तिः पदैर्लक्षणया सिद्धातीत्युक्तं तत्र पदार्थानामन्विताया विपदैरभिधे- १३५
यैवनलक्ष्येति अन्विताभिधानवादिनः प्रत्यवतिष्ठन्ते ननाम् नन्वित्यादिना श्रौतत्वसंभवे लक्षणानन्याय्या मुख्यासु मुख्ययोर्मुख्यसा-
म्याहितत्वादिति भावः नन्वन्विते सामर्थ्याश्रयणाद्गुरुं स्वरूपमात्रे सामर्थ्याश्रयणमतिलाघवात् इतरथा गौरवप्रसंगादिति तत्राह न

नन्वेकस्मिन्प्रयोगे वृत्यनान्वितं गोत्वं प्रतीयते अपरस्मिन्नानयनान्वितं अपरत्र चरणान्वितमिति व्यभिचारिणौ पदार्थान्तरं तद
न्वयौ अव्यभिचारित्वं गोत्वे अव्यभिचारिणि सामर्थ्यं युक्तमाश्रयितुमेकरूप्यात् ततः पदार्थमात्रमेव पदशक्तिगोचर इति तत्राह यद्य
पीति नतु किमिति एवं व्यभिचारिणोरपि पदार्थान्तरतत्संसर्गयोरनुगतमेकरूपमापाद्यानुगतशक्तिकल्पना निर्वक्ष्यत इति तत्राह प्र
थमेति न तु वाक्यार्थमात्रकार्यानार्थनाकांक्षासन्निधियोग्यार्थान्तरसंगमात् स्वार्थानाहुः पदानीति व्युत्पत्तिः संश्रिता यदा।
अन्वयव्यभिचाराभ्यां तदा दोषो न कश्चनेति प्रयोगान्तरेषु तु यत्नमानये त्यादिशुद्ध्यर्थः अत्राभिहितान्वयवादिनामाक्षेपमवतारयति

यद्यपि प्रतिप्रयोगं विशेषान्तरतत्संसर्गयोर्व्यभिचारः तथापि योग्येतरान्वितस्य स्वार्थमात्रस्याव्यभिचारात् प्रथमाव
गतयोग्येतरान्वितस्वार्थाभिधानसामर्थ्यानुसारेण प्रयोगान्तरेष्वपि तथैव कल्पयिष्यते ननु कि— मनभिहितेन पदा
र्थेनान्वितं स्वार्थमवबोधयति गोपदमुत पदान्तराभिहितेन नाद्यः एकस्मादेव पदात्तदर्थान्वितस्वार्थावबोधसं
भवेन पदान्तरस्य वैयर्थ्यप्रसङ्गात् न द्वितीयः परस्पराश्रयप्रसङ्गात् तथाहि गामानयेत्यत्र गोपदं यावदानयपदेन गोप
दार्थान्वितस्वार्थो नाभिधीयते न तावत्तदन्वितस्वार्थमभिधातुमर्हति एवं तदपि पदं यावत्स्वार्थान्वितमर्थं गोपदं ना
भिदध्यात् तावत्तदन्वितस्वार्थं नाभिधत्ते न तस्माद्गोपदेन तदन्वितस्वार्थेऽभिहिते पश्चादानयपदेन तदन्वितः स्वा
र्थोऽभिधातव्यः सति च तस्मिन् गोपदेन स्वार्थाभिधानमित्युक्तमेव परस्पराश्रयत्वम्

नन्वित्यादिना येन पदार्थान्तरेणान्वितं स्वार्थमभिदधाति गोपदं तत्किमन्येनानभिहितमुताभिहितं आद्ये पदान्तरवैयर्थ्यं विनैव तद
भिधानं तदन्वयलाभात् एकपदादेव सर्वार्थप्रतीतिप्रसङ्गात् न च योग्येतरमात्रान्विताभिधानेऽपि तद्विशेषान्विताभिधानसिद्धये
पदान्तरोपादानं विशेषान्विताभिधानेऽप्यभिहितविकल्पस्य तुल्यत्वात् द्वितीयं दूषयति न द्वितीय इति आनयइति पदेन गोत्वान्वि
तत्वयानयनाभिधाने सति आनयनान्वितं गोत्वं गोपदमभिदध्यात् एवं गोपदेनानयनान्विते गोत्वेऽभिहिते तदन्वितमानयनमा
नयेति पदमभिदध्यादित्यन्योन्याश्रय इति खंडलकार्थः॥

भिहितानर

चि.सु. टी.न. १३६ नतु नात्र परस्पराश्रयेण याः अवतारः परस्परनिरपेक्षाणि प्रथमं पदानि पदार्थान् संसृष्टान् अभिधाय पश्चादन्योन्यान्वितांस्तानेव प्र-
दायानभिदधतीति तत्राह पदार्थमात्रेति । न केवलमेवं कल्पनायां प्रमाणाभावः अपितु प्रमाणविरोधश्चेत्याह अनुपपद्यमानं चे
ति तथाहि संसृष्टांशेपि चेत् पदानि गृहीतसंगतिकानि तर्हि प्रथममेवाभिदध्युः अगृहीतसंगतिकत्वे पश्चादपि नाभिदध्युः इत्युभयथा
नुपपत्तिः सकृत्प्रयुक्तस्य शब्दस्य विरम्यव्यापारानुपपत्तिर्वानुपपत्तिः ननु न प्रथममभिधायकानि पदानि येन द्विरभिधानं प्रसज्येत अपितु प्र
थमं पदार्थेषु स्मृतिरेव जायते सहचरितदर्शनात् सहचरितानि हि पदार्थैः प्रथमं पदान्यनुभूतानि देवदत्तदर्शनाद्विव तत्सहचरित

पदार्थमात्राभिधानपूर्वकेत्युक्तत्वात् अन्विताभिधाने द्विरभिधानमप्रमाणमनुपपद्यमानं चापद्येत ननु द्विरभिधानं न पद
जातस्य साहचर्यवशात् अर्थेषु प्रथमं स्मारकाणां पश्चादन्विताभिधायकत्वाभ्युपगमादिति चेत्तस्यैव साहचर्यद
र्शनदशायामन्वितानामेवानुभूततया तथैव स्मरणस्यावश्याश्रयणीयत्वात् नहि पदं पदार्थमात्रप्रतिपत्त
येप्रयुज्यते किन्तु व्यवहाराय स चान्वित एवेति कथमनन्वितानामेव पदार्थानां पदेभ्यः स्मृतिः स्यात् त
थाच गां पश्येति प्रयोगे गोपदेन पूर्वानुभूतानयनान्वितत्वार्थस्य स्मारितत्वात् पश्येति पदमनाकांक्षिता
र्थमसंगतं प्रसज्येत एवं मामाहं पश्य इत्यत्र मामाहान्वितस्वार्थाभिधायकत्वात् पश्येति पदस्य न गोपदं तेन

एतदुक्तं भवति अनन्तं वस्तु संसृष्टदृष्टानां स्मारकतानां पदार्थानामभिधानमिति तदेतदाशंक्य परिहरति मैवमिति ॥ सवस्थेन ॥ ८ ॥
अन्वितपदार्थैः साहचर्यमेवोपपादयति नहि पदमिति व्यवहारसमर्थसंसृष्टपदार्थैः साहचर्यान्नान्तरगणेः स्मारकपदानां पदार्थ
मात्रस्मारकत्वमप्रसिद्धमित्यर्थः अंगीकारेऽपि दूषणान्तरमाह तथा चेति अयमर्थः गामानयेति प्रयोगे गोपदस्यानयनान्वितगोत्वे राम.
न साहचर्योपलंभात् गां पश्येति प्रयोगेपि कारकोभिधायि गोपदमानयनान्वितमेव गोत्वं स्मारयेदिति पश्येति पदमनाकांक्षितार्थ । १३६
मसंगतं प्रसज्येत एवं तस्मिन्नेव प्रयोगे गोपदमपि पश्येत्यनेन क्रियाभाविनानाकांक्षितार्थस्मारकमसंगतमेव स्यात् पश्येत्यस्य प्र-
योगान्तरेऽर्थान्तरसाहचर्यदर्शनादिति ॥

136

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उक्तामव्यवस्थां सर्वे वाक्येषूपनिदिशन्ति तथा चेति साहचर्य्याविशेषेपि पदार्थानां तस्यैव संशंकते नन्विति व्यभिचारेपि भूयो दर्शनाद्याहि
तसंस्कारोद्बोधादुत्पद्यमाना स्मृतिर्नान्विताभिन पदार्थयोर्विशिष्यत इति परिहरन्ति मैवमिति भावनासंस्कारः सकृद्दृष्टेनेपि तडि
दादौ पटुप्रत्ययः कुड्यादावभ्यासप्रत्ययः अद्भुते चादरप्रत्ययः तथाप्यप्रबुद्धस्य तस्य स्मृतिजनकत्वमिति प्रबोधग्रहणं ननु भावनोद्बोध
एव न तथा व्यभिचारिणि यथा अव्यभिचारिणि पदार्थमात्र इदित्याह तस्य बोधस्येति प्रबोध उद्बोधः परिगणितेभ्यः प्रणिधानसाहचर्यादिभ्यो
जन्म यस्य प्रबोधस्य तस्येत्यर्थः भगवदक्षपादेन परिगणितानेव यथास्थानेस्मृतिहेतून्दर्शयति परिगणितानीति स्मृतिहेतवः संस्कारोद्बो
धनद्वारेति शेषः प्रणिधानं मनोऽवधानं अभ्यासः प्रसिद्धः लिंगाद्व्याप्तिसंस्कारः लक्षणं धवलछत्रादि चिह्नं राजादिसंस्कारोद्बोधकं

तथा च वाक्यार्थः क्वापि परिनिष्पन्नो न सिद्धो न नन्वव्यभिचाराद्वा पदं स्वार्थमात्रमेव स्मारयतीति नार्थान्तराणि तेषां
व्यभिचारित्वादिति चेन्नैवं पटुव्यासादरप्रत्ययैराहितायाभावनायाः प्रबोधवत्याः स्मरणहेतुत्वाङ्गीकारात् तत्प्र
बोधस्य च व्यभिचारिण्यर्थान्तरे परिगणितप्रणिधानसाहचर्यादिजन्मनोः विशेषात् परिगणिता हि स्मृतिहेतवः
प्रणिधानाभ्यासलिंगलक्षणसादृश्यपरिग्रहाश्रिताश्रयसंबन्धानन्तर्यवियोगैककार्यविरोधातिशयप्राप्ति
व्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्माः प्रामाणिकैः अस्ति चेह योग्येतरान्वयस्यापि साहच
र्य्यं स्मरणहेतुः तस्मात्तैरभिहिताः पदार्था एवाकांक्षादिमन्तः परस्परान्वयं बोधयन्तीति युक्तमाश्रयितुम् ॥ ६ ॥

सादृश्यं शुक्तिभास्वरतादि रजतादिसंस्कारोद्बोधकम् परिग्रहः स्वीकारः कलत्रादिसंस्कारस्य एवमाश्रिताश्रयावपि परस्परसंस्कारस्य संब
न्धः सहचारः सहचरितसंस्कारस्य आनन्तर्य्यं पूर्वेतनपदार्थसंस्कारस्य वियोगः कामिन्यादेः एककार्य्यमेकस्मादुत्पन्नकार्याणामन्यतमस
संस्कारस्य विरोधः सर्पनकुलादौ अतिशये नातिशयिते व्याप्याव्याप्यव्यापकयोः व्यवधानं प्रियतमव्यवहिते सुखदुःखादि तज्जातीयस्य
तद्धेतोश्चार्थित्वमर्थनीये अर्थित्वं तु मात्रविषयपुनः पुनरिच्छा तेनेच्छयानपौनरुक्त्यम् क्रियारागः क्रियाशक्तिः स्वविषयस्य धर्माध
र्मौ शुभाशुभविषयसंस्कारोद्बोधकौ यस्मादेवमन्विताभिधानपक्षे न घटतेऽतोऽभिहितान्वयपक्ष एव श्रेयानिति समुपसंहरन्ति अभिहिता

अगान्विताभिधानवादीस्वपक्षदूषणं प्रतिवंद्यासमादधाति मैवमित्यादिना पदार्थाएव पदैरभिधीयन्ते तदन्वयस्तु लक्ष्यत इति यस्या-
भिहितान्वयवादिनो मतं तेनापि पदार्थविषयाः प्रत्ययाः प्रमाणत्वेन नाभ्युपगन्तुं शक्याः अनधिगतार्थगन्तृत्वाभावात् सर्वस्य सन्तु प्रसं-
गाच्च नापि विपर्ययसंशयत्वाभ्यां यथार्थनिश्चयत्वात् अतः परिशेषात्स्मृतय एवैष्टव्याः तास्च न पदार्थमात्रगोचराः सहचरितदर्शनात-
स्वल्पसंस्कारोद्बोधः साहचर्यंच न्वितैः पदार्थैः न त्वनन्वितैरित्यायुष्मतैवावेदितम् तथा च कथं तन्मतेऽपि पदार्थमात्रस्य प्रथमस्म-
रणं सोऽयमात्मीयस्यैव बाणोऽभ्रुवं तं प्रहरतीति भावः ननु द्विविधा स्मृतिः पदजनिता साहचर्यादभिधानाच्च तत्र साहचर्यमन्वितेऽपि सा-
मानं अभिधानं तु पदार्थमात्रे अभिधानद्वारा च यत्स्मारितं तदेव वाक्यार्थान्वयोपयोगितेन रहितं न ब्रूमो देवदत्तगामानयेत्यादेतस्मा

मैवं तथापि पदार्थविषयाः प्रत्ययाः प्रमाणविपर्ययसंशयादिष्वन्तर्भावात् स्मृतय एवेष्टव्यास्ताश्चान्वितगोचरा न
स्वरूपमात्रगोचरा इति तुल्यो दोषः न च वाच्यमभिधानतः स्मारितमेव वाक्यार्थान्वयि न साहचर्यमात्रादिति
गंगायां घोषः प्रतिवसतीत्यादौ यदाऽनभिहिततीरादीनां वाक्यार्थानन्वयप्रसंगात् अभ्यासातिशयश्च पुन-
र्थस्मरणहेतुः स च यथा पदानां स्वार्थेषु न तथार्थान्तरेषु तेषां व्यभिचारित्वात् तथा च स्वरूपमात्रेणैव पदैः
स्मारिताः पदार्थाः आकांक्षादिमन्तः पदैरन्विता अभिधीयन्त इति न परस्पराश्रयता ॥९१ हचरितयज्ञदत्तादेरन्वया-
दर्शनात्ततो वैषम्यमिति तत्राह न चेति हेतुमाह गंगायामिति यदि ह्यभिधानेन स्मारितमेव वाक्यार्थोपयोगि न हि तीरादिपदार्थानां वाक्या- १२८
र्थान्वयो न स्यात्तेषामभिधानाभावात् तुल्यार्थसाहचर्यादेव स्मारितत्वादित्यर्थः ननु किमेवमनुपपत्तिम्यापादनेन निर्बन्धो भवान् तथा
च मतानुज्ञा राजपक्षकस्वीकारः स्यादित्यतः स्वपक्षे परिहारमाह अभ्यासेति यस्माद्व्यभिचारिपदार्थेष्वभ्यासातिशयात्तावन्मात्रस्म- राम·
प्रथमं स्मरणोपपत्तिः अतः पूर्वोक्तः परस्पराश्रयपरिहारः स्थित एवेत्याह तथा चेति तदुक्तं प्राक् निर्णये क्रमेणावगतानर्थान्सु- २३७
गपत्स्मृतानाप्रभिमीरन्पदानीति नान्योन्याश्रयदोषतेति नार्थैरपि श्रूयमाणपदैः सर्वैःस्मारितानन्वितार्थकं न्यायसंपादितव्यक्ति-
पश्चाद्वाक्यार्थबोधकं स्मृतिसन्निहितैरेव मर्थैरन्वितमात्मनः अर्थमाह पदैः सदेवेति नान्योन्यसंश्रय इति॥

यत्तु सर्वेषां पदानाम् अन्योन्यानाकांक्षितार्थसमर्पणमापादितं तन्न अभिधानापर्य्यवसानाद्वा अभिहितार्थापर्य्यवसानाद्वा पदार्थान्तरे पुरुषस्य जिज्ञासा ह्याकांक्षा नाम यथाहुः अभिधानावसाना हि जिज्ञासा श्रोतृजायते प्रयोजनावसानाश्च पदार्थे सा निवर्त्तते इति नार्थेनापि अन्वितस्याभिधानार्थमित्यादि तद्धि हाभिधानानवसानजनिताकांक्षापदार्थान्तरेऽपि समानातद्विशेषनिर्णयश्च सन्निहितयोग्यपदावमर्शादित्यभिप्रेत्य परिहरति नापीति न च पदत्रयाद्यान्यतमके अन्यतरानाकांक्षाकारणद्वयाभावादिति वाच्यं अश्रूयमाणे हि न याश्रूयमाणे तु रक्तपटन्यायेनाकांक्षाकल्पनात् अभिधानापर्य्यवसानोदाहरणमाह यथाह्यक्षेति ह्यक्ष इति पदेनापि

नापि पदान्तरानाकांक्षा आकांक्षा हि प्रतिपत्तुर्जिज्ञासा सा चाभिधानापर्य्यवसानादभिहितार्थापर्य्यव।
सानाद्वा भवति यथाक्षः इत्यत्र प्रातिपदिकार्थमात्रे प्रथमाविभक्तेः स्मरणात्तेनैव तस्यान्विताभिधा
नासम्भवादन्यस्य चानभिधानादभिधानपर्य्यवसानायैवाकांक्षा यथा वा विश्वजिता यजेतेत्यत्र
कार्य्यस्य विषयकरणान्वितत्तया प्रतीतस्यैवापर्य्यवसानाद्विशिष्टाधिकारिकल्पना ॥ ॥ ५ ॥ ॥

हि पदत्वादन्वितोऽक्षोऽभिधातव्यः स च केनान्वित इति विमर्शे न तावदक्षः संरक्षेत्यादौ कर्मकरणादिभिरिव विभक्त्यर्थेन प्रातिपदिकार्थमात्रे प्रथमाविधानात् प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमेति प्रातिपदिकार्थादिष्वर्थे प्रथमां पाणिनिः स्मरति स्म न च पदार्थान्तरमभिहितमस्ति तस्मादभिधानपर्य्यवसानायैव तत्र तिष्ठतीत्यादौ जिज्ञासेत्यर्थः अभिहितापर्य्यवसानस्योदाहरणमाह यथा वेति विषयो धात्वर्थः स एव करणं तत्र हि पदान्तरश्रवणादभिधानपर्य्यवसानेऽप्यभिहितापूर्वापर्य्यवसानमस्ति विषयनियोज्यव्याप्तत्वाद्धि नियोगः प्रतीयमानोऽनुष्ठानाय कल्पत इति विषयवन्नियोज्योऽप्यस्यैवा

१
वि.सु. प्रतिपादितामाकांक्षां प्रकृतेपि दर्शयति तद्देवमिति यद्यप्यन्योन्याश्रयादिदोषो नास्ति तथाप्यभिहितपदार्थेभ्य एव संसर्गोसि
टी.न. द्धौ पदानामपि सामर्थ्यकल्पनायां कल्पनागौरवं दूषणमित्यभिहितान्वयवादी शंकते नन्विति यदि हि पदार्थानां संसर्गबोधकत्वं
१३८ स्यात्तदा तदपहाय पदानामपि सामर्थ्यकल्पनायां स्यादेव गौरवं नतु तदस्ति प्रमाणान्तरगृहीतपदार्थेष्वदर्शनादित्याद सैव
मिति तुल्यं च नार्थेन किंतु तेषां तद्दृष्टेषां शक्तिः मानान्तरेणाज्ञातो कल्प्या विशिष्टा ये परपदसंसर्गाभाविनेदृति प्रमाणान्तरगृहीताना
मप्यस्यैव संसर्गबोधकत्वमिति शंकते नन्विति अत्र हि दृश्यमाने श्वेतमारूपमव्यक्तरूपं शृण्यमाणो च हेषारवं खुरनिक्षेपशब्दे

तदेवंभूताकांक्षावशात्पदानामन्विताभिधानेन विरुध्यते ननु तथापि पदानामन्विताभिधाने सा
मर्थ्यं न कल्पनीयं पदस्मारितानामेव पदार्थानामाकांक्षादिवशादन्योन्यान्वयप्रत्यायकत्वोपपत्ते
रिति चेन्नैवं मानान्तराधिगतानां पदार्थानां वाक्यार्थप्रत्यायकत्वादर्शनात् ननु पश्यतः श्वेतमारूपं।
हेषाशब्दं च शृण्वतः खुरनिक्षेपशब्दं च श्वेतोश्वो धावतीति धीरिति न्यायादस्त्येव पदार्थानां संसर्गबोध
जनकत्वमिति चेन्न अनुमानादर्थापत्तेर्वा तत्र संसर्गावगमात् तथा हि एषां पदार्थानामेकाधिकरणत
यावगतानामप्रत्यायकत्वेनानुमानानतिरेकः विशकलितावगतानां वाक्यार्थान्तराभावे निश्चितेऽर्थापत्तिरेव
श्वेतोश्वो धावतीति संसर्गबुद्धिं जनयतीत्यर्थः अत्र किमेकनिष्ठत्वेन १ परिशिष्यते अनिश्चितेत्वनध्यवसाय एव ॥६ [93C?]
यावगतमेतत्त्रयं संसर्गबोधकं विशकलितं तथा वा प्रथममनुमानं तादर्शयति तथा हीति यत्र ह्येतत्त्रयमेकत्रावगतं तत्राश्वत्वं दृ। राम
ष्टमिति व्याप्त्या बोधकत्वादनुमानमित्यर्थः द्वितीयेऽर्थापत्तिमाह विशकलितेति तत्त्वार्थान्तराभावे विनिश्चितेऽनुपपत्त्याश्वत्वबोध १३८
कत्वाद्भवेदर्थापत्तित्वमर्थान्तराभावोपि यदा न निश्चितस्तदा कथमर्थापत्तित्वमिति तत्राह अनिश्चितेत्विति ॥ ॥

किंच शब्दाजन्यत्वे संसर्गबुद्धेरप्रामाणिकत्वं पदार्थान्वयस्य प्रमाणाभ्युपगमो वा प्रसज्येत प्रत्यक्षादिषु नंतर्भावादित्याह अपि चेति ।
अथ पदस्मारितानामेवेदं सामर्थ्यं न ह्यनेकशक्तिकल्पनागौरवं स्यादित्याह किं चेति पदार्थानां तावत्संसर्गबुद्धिजननसामर्थ्यमेकमप
रमपि पदानां पदार्थेषु संसर्गप्रत्ययजननसामर्थ्यमुत्पादयितुं सामर्थ्यं पदैरेवाभिहितपदार्थेषु नाहत्य सामर्थ्यमाधीयते अनभिहितेषु
सामर्थ्यादर्शनात् नैवमस्मत्पक्षे न्वितस्वार्थेषु पदानामेकसामर्थ्याश्रयणात् यद्यप्यर्थसामर्थ्यादन्विते सामर्थ्यकल्पनायां गौरवम
स्ति तथापि न सामर्थ्यद्वित्वं अपि तु स्वोल्पमात्रमिति भावः अत्र च सामर्थ्यद्वयाभिधानं प्राथमिकपदार्थबुद्धेः साहचर्यात्स्मृति ।

अपि च शब्दसामर्थ्याजन्यत्वे वाक्यार्थप्रत्ययस्य पदार्थान्वयं सत्प्रमेयं प्रमाणमभ्युपेयं स्यात् प्रत्यक्षादिषु तस्या ।
नंतर्भावात् किंच पदार्थानामनभिहितानां संसर्गबोधकत्वाभावादभिहितानामेव तद्देष्टव्यं तथा च पदार्थानां
संसर्गप्रत्ययजननसामर्थ्यं पदानां च पदार्थेषु तत्सामर्थ्याधानसामर्थ्यमिति द्वयं कल्पनीयमिति कल्पनागौ
रवमभिहितान्वयवादिनः अन्विताभिधानवादिनस्तु पदानां योग्येतरान्वितस्वार्थाभिधानसामर्थ्यमेकमेव
कल्पनीयमिति कल्पनालाघवमित्ययमेव पक्षः श्रेयानिति अत्राभिहितान्वयवादिनः प्रत्यवतिष्ठन्ते वि
नाभिधेयस्मरणमन्वयाप्रतिपत्तितः तत्तत्पदार्थस्मृतयस्तेषामन्वयबोधिकाः ॥३५॥ पदकदम्बकश्रवणसमनंत
रमपि कुतश्चिन्मानसापराधादनुपजनितपदार्थस्मृतेर्वाक्यार्थप्रत्ययानुदयात्तदुपजाने पदार्थस्मृतेरन्वयव्य । दुद्या
तिरेकाभ्यां पदार्थस्मृतीनां वाक्यार्थप्रत्ययहेतुत्वं तावदवसीयते ९. त्वमभिप्रेत्ये तच्च परिहारावसरे स्वयमेव स्फुटी

करिष्यति उभयसाधारणत्वाद्धुवधीरिति पदार्थस्मृतिजननसामर्थ्यमिति अभिहितान्वयवादे अन्वयव्यतिरेकौ नाव प्रमाणमाह
विनेत्यादिना श्लोकेन अभिधेयपदार्थस्य स्मरणं विना न्वयस्य वाक्यार्थस्याप्रतिपत्तितस्त्वत्राविगानमासुप्तगोपि तनो वक्ष्यापे ।
क्षणीयाभिधेयस्मरणैः स्मृतैर्वाभिधेयैरन्वयव्यतिरेकवद्भिरन्वयो बोध्यत इत्ययमेव पक्षः श्रेयानिति श्लोकार्थः श्लोकं विवृणोति पदे
त्यादिना कदंबकं समूहः एवं पूर्वार्द्धेनान्वयव्यतिरेकौ प्रदर्श्य उत्तरार्द्धं व्याचष्टे अन्वयेति ॥

वि॰ सु॰ पूर्वपक्षिणोऽनुमायबीजमुन्मूलयति नचेत्यादिना विप्रकलितपदार्थमात्रस्मृतीनामदर्शनेऽपि पदस्मारितपदार्थस्मृतीनां स-
टी॰ ने॰ हकारिवशादुपपद्यत इत्यर्थः सहकारीति सहकारिणो भेदो विप्रोपक्लृप्तत्वं धादि इत्यर्थः अन्यत्रादृष्टस्य कथं कल्पनमित्याशङ्क्य प्रतिबन्दीमा-
१३९ हनानिकथमिति यथान्यत्र द्विभिन्नविषयनिष्ठतयादृष्टयोः स्मृत्योः संस्कारयोः प्रत्यभिज्ञायां सहकारित्वे विजयवशात्कल्प्यते एवं पदजन्ये-
कार्यविषयत्वमेवमत्रापि संभाव्यत इत्युपपादयत्सप्तमप्रमाणत्वं पदार्थानामापादितं परिहरति नचेति तथाहि श्रुतिवाक्यसमाख्या-
नां शब्दरूपत्वेऽपि लिङ्गप्रकरणस्थानानां न शब्दरूपत्वं अथ च न शब्दात्मकप्रमाणत्वं न येहापीत्यर्थः यद्यपि प्रकरणं सप्त्यङ्गवाक्या-
पेक्षं प्रधानवाक्यमिति शब्दरूपमेव प्रतीयते तथापीति कर्तव्यताकाङ्क्षा यामर्थरूपता इत्याशयेन समभिव्याहारमिति द्रष्टव्यं अविनियोजकत्वादान

नचपदार्थस्वरूपमात्रविषयस्मृतीनामन्योन्यान्वयबोधकत्वमनुपपन्नमन्यत्रादृष्टत्वादिति वाच्यम् स्मरणमा-
त्रस्य समानयत्वाभावेऽपि समभिव्याहृतपदकदम्बकसमुपजनितपदार्थस्मृतीनामाकाङ्क्षादिसहकारिणीनां संभव-
त्येव तद्बोधकत्वं सहकारिभेदोपादानात् कथमन्यथा संस्कारेन्द्रिययोरन्यत्र परस्परसंगतयोर्विषययोः प्रत्य-
भिज्ञायां पूर्वापरदेशकालसंसृष्टैकवस्तुबोधकत्वं परस्परसहकारितया तथात्वं नु प्रकृतेऽपि तुल्यं न च पदार्थस्मृ-
तीनां स्मृतानां वा पदार्थानामन्वयबोधकत्वे सप्तमप्रमाणाभ्युपगमप्रसंगः लिङ्गप्रकरणस्थानानामिव शब्दप्र-
मानतिभावोपपत्तेः ननु लिङ्गादिषु श्रुतिकल्पयित्वैव विनियोगप्रतीतेः स्वीकाराच्छाब्दत्वं न विरुध्यते॥ ॥

दि लिङ्गादीनि साक्षाद्विनियोजकानीति लिङ्गादिभ्यो वैषम्यं दर्शयितुं तद्दृष्टान्तमाह नत्विति शाब्दस्यार्थस्यापेक्षितोऽर्थः शब्देनैव समर्पणी- १३३
यः न प्रमाणान्तरेण न हि त्रयो ब्राह्मणा आगताः कठश्च माठरश्चेत्युक्त्वा तृतीयमगृहीत्वा निर्दिशन्ते संतः प्रशंसन्ति प्रशंसन्ति तु कौण्डिन्य
इति शब्देनैव समर्पयन्ति न हि लिङ्गादिषु श्रुतिभिरेव चेतनं तं गानि समर्पयन्ते समस्तं ते तदा श्रुतप्रधानेन नेतरथेति श्रुतिकल्पनयैवैषां लि- राम॰
ङ्गादीनां विनियोजकत्वं नस्थानेन श्रुतिकल्पनायां च त्वरासंभवता तारतम्येन तेषां प्राबल्यदौर्बल्ये यथाह परमर्षिः अर्थविप्रकर्षा- १३९
दिति अन्येऽपि एक हि त्रिचतुष्पञ्च वस्तूनां नायकाविनं श्रुत्यर्थं प्रतिविषयं लिङ्गादिना प्रतीयत इति॥ ॥ ॥ ६ ॥

प्रकृते तु वैधर्म्यमाह इहत्विति नशाब्दस्येति शेषः ननु शाब्दत्वेपि पदार्थानां शब्दावगतत्वात् तज्जन्यप्रतीतिरपि शाब्दी एवेति नाति
प्रसंगइत्याशंकयाह शब्दावगतेति तो मिमांशंकापरिहरति सिद्धांतीमैवमिति नात्र शब्दावगतपदार्थजन्यत्वमात्रादन्वयप्रतीतेः
शाब्दत्वमुच्यते येनानुमितेरपि वाक्यत्वप्रसक्तिः किंतु शब्दावांतरव्यापाररूपपदार्थस्मरणजन्यत्वात् उक्तं हि साक्षाद्यद्यपि कुर्वं
ति पदार्थप्रतिपादनं वर्णास्तथापि नैतस्मिन्पर्यवस्यंति निष्फले वाक्यार्थमितये तेषां प्रवृत्तौ नांतरीयकं पाके ज्वालेव काष्ठानां पदा
र्थप्रतिपादनमिति ततो नातिप्रसक्तिरिति भावः ननु तथापि पदार्थैर्व्यवधानात् पदानां कथमन्वयप्रतीतिं प्रतिकरणत्वं तत्राह

इह तु पदार्थस्मृतीनां स्मृतानां वा पदार्थानामन्वयबोधकत्वमिति वैधर्म्यम् शब्दावगतपदार्थजन्यत्वेनान्व
यप्रतीतेः शाब्दत्वे चक्षुषावगतधूमजन्यस्यापि वह्निज्ञानस्य चाक्षुषत्वप्रसंग इति चेन्मैवं अन्वयप्रती
तिं जनयता पदानामवांतरव्यापारत्वात्पदार्थस्मरणानां न च स्वव्यापारव्यवधानाद्व्यापारवतः करण
त्वं विहन्यते यागादीनामपूर्वव्यवधानेन फलसाधकानामकरणत्वप्रसंगात् न च चक्षुषो लिंगज्ञानम
वान्तरव्यापारः अगृहीताविनाभावस्यानुमानानुदयात् अचाक्षुषत्वेपि लिंगस्य बोधकत्वात् ॥

नंतरफलत्वमिति तत्राह नचेति यागादीनामिति गुरुमतेपि यागस्य फलं प्रतिकरणत्वमस्त्येवेति भावः पदार्थेभ्यो लिंगज्ञा
नस्य वैधर्म्यमाह न चेति अथ किमिति न व्यापारस्तत्राह अगृहीतेति तज्जन्यस्तदाश्रितो वा फलक्रियाहेतुः स हि तद्व्यापारो ना
म तथा च कथं चक्षुषि व्याप्रियमाणेप्यगृहीतव्याप्तिकस्य लिंगज्ञानमनुत्पद्यमानं चक्षुर्व्यापारः स्यात् नहि धूमज्ञानमात्रे लिं
गज्ञानमपि तु व्याप्तस्य सतः पक्षधर्मतया ज्ञानमिति भावः चक्षुर्व्यतिरेकेणोत्पद्यमानत्वादपि न तद्व्यापारत्वमित्याह अचाक्षु
षेति अथवा न चक्षुर्जन्यानुमितिः तस्मिन्सत्यपि नियमेनोत्पत्त्यभावात् असति चोत्पत्तेरतो नेदं तस्य व्यापार इति ग्रन्थार्थः ॥ ६ ॥

१
वि.सु. यत्तु लिंगप्रकरणादि उदाहृतं तदन्विताभिधानवादिनः प्राभाकरस्य मतस्यैवोदाहरणं शक्तिकल्पनाव्यतिरेकेणैव लिंगादीनि विनि-
टी.न. योजकानीति हि गुरूणां मतमित्याह गुरुमतइति यत्तु शक्तिकल्पनागौरवमुक्तं तत्परिहर्तुं मुन्यापयति नन्विति ननु कथं शक्तित्रय
१५० कल्पना यावता सादृश्यवशादेव प्रथमं स्मृतिः पदार्थधृत्यनुभवतामिवेति तर्हि शक्तिद्वयमवश्यंभावीत्याह पदानामिति यत्तु
पूर्वपक्षे स्पष्टीकरिष्यतीत्युक्तं तदत्र स्पष्टीकृतं स्वपक्षे च लाघवं स्मारयति अन्वितेति अत्राभिहितान्वयवादी अन्विताभिधानेपि
शक्तित्रयकल्पनामापादयन्परिहरति मैवमिति स्यादेतत् यथा नित्यत्वे सत्यनेकसमवेतरूपजातिवाचकमपि पदं नानेकात्मक

गुरुमतानुसारिभिरपि लिंगप्रकरणादीनामंतरंगेणैव शक्तिकल्पनं विनियोजकानां शब्दप्रमाणांतर्भावाभ्युपग
माच्च ननु त्वयाप्यभिहितान्वयवादे त्रयः शक्तयः कल्पनीयाः पदानां तावदर्थस्वरूपानुभवजननशक्तिरर्थां
नां चान्योन्यान्वयप्रत्यायनशक्तिस्तदानुशक्तिश्चापरा पदानामिति पदानां सादृश्येनार्थस्मारकत्वे पुनः
धा शक्तिद्वयं कल्पनीयं पदार्थानामन्वयबोधनशक्तिस्तेषु तदाधानशक्तिश्च पदानां अन्विताभिधाने तु पदानाम
न्योन्यान्वितस्वार्थाभिधानशक्तिरेकैवेति कल्पनालाघवमिति चेन्मैवं त्वयाप्यर्थान्तरेतदन्वये स्वार्थे च पदश
क्तीनां कल्पनीयत्वात् न चार्थान्तरान्वितस्वार्थाभिधायकमपि पदं स्वार्थस्यैव वाचकं नार्थान्तरतदन्वययोरिति
वाच्यम् विकल्पासहत्वात् तथाहि किं जातिवाचकपदेन व्यक्तेरिवल ९८०
स्यान्वमर्थान्तरतदन्वययोरुतवाच्यत्वं नाद्यः पदानामन्विताभिधानभंगप्रसंगात्

व्यक्तीनां तदन्वयस्य समवायस्य वा वाचकं गोत्ववाचकं यथा तद्वाक्ति तदन्वयोरवाचकं तद्वदन्यान्वितस्वार्थवाचकमपि पदं स्वार्थमा राम.
त्रमेव वक्तीति नु शक्तित्रयं कल्पनीयमिति तत्राह न चेति किं पदं वगन्यान्विततद्वाचकमित्यन्वयस्योपलक्षणत्वं आहोस्विदन्वितस्य १५०
वाचकमिति विशेषणत्वमिति विकल्पाद्यं दूषयति नाद्य इति अभिहितान्वयवादिभिरप्येवमभ्युपगमाद्भावसेति भावः॥ ००० ॥

द्वितीयेतु शक्तित्रयमवश्यंभावीत्याह नद्वितीय इति सयदि भूयात्त्वान्विताभिधानवादे शक्तित्रयं नह्येतदर्थे त्रयमपितु एकस्य विशिष्टोर्थः प
रंतु सविशेषणत्वमिव शक्तेरिति तत्प्रकारान्तरेण शक्तित्रयमापादयति किंचेति एषाहि अन्विताभिधानपरिपाटी प्रथमं श्रूयमाणैः स्वार्थमा
त्रे वा पदैरन्योन्यासंसृष्टार्थाः प्रत्याय्यन्ते अंत्यपदोच्चारणानंतरं चैकस्मृत्यारूढानितान्येवपदानि पदार्थान्न्योन्यान्वितान्प्रतिपादयंतीति तथा च पदार्थ
मात्रेषु संसृष्टपदार्थेषु च प्रत्याय्याधाने पदानां सामर्थ्यद्वयं सकलपदविषयस्मरणस्य सकलपदेष्वन्विताभिधानसामर्थ्याधानसामर्थ्यं
तृतीयमेकस्मृत्यनारूढपदानां तत्सामर्थ्याभावादित्यर्थः ननु शक्तित्रयकल्पनायामुभयोः समानायां कोयमाग्रहः यदभिहितान्वयवादएव
वश्रेयानिति तत्राह नचेति अनन्यलभ्योहि शब्दार्थः लभ्यते चान्येभ्योपि व्यवहारः समर्थसंसृष्टपदार्थबोधार्थं प्रयुक्तपदस्मारितेभ्यः पदार्थेभ्यः

नद्वितीयः वाच्यत्वे तयोरपि शक्तेरवश्यकल्पनीयतया गौरवस्य तादवस्थ्यात् किंचैकैकस्य पदस्य श्रूयमाणस्य स्वार्थे
माणस्य चानन्तस्यदार्थस्मरणजननशक्तिः पुनरेकस्मरणगोचराणां च तेषामेव पदानामन्योन्यान्वितपदार्थाभि
धानशक्तिः सकलपदगोचरस्य स्मरणस्य पदेष्वन्विताभिधानशक्त्याधानशक्तिश्चेति शक्तित्रयकल्पनान्विता
भिधानवादेपि तुल्या न चाभिहितान्वयवादेपि शक्तिकल्पनागौरवस्य तुल्यत्वात् विनिगमनाभाव आशंकनी
यः विशिष्टार्थप्रत्यायनप्रयुक्तपदकदंबसमभिव्याहारान्यथानुपपत्त्या पदस्मारितानामर्थानामन्योन्यान्वयस्या
नत्य लक्ष्यमाणत्वेनोपपत्तेः शक्तेरकल्पनीयत्वात् लभ्यः शब्दार्थ इति न्यायात् उक्तं च विशिष्टार्थप्रयुक्ता हि समभिव्याहृति
((जेन इति ॥

नच तस्याशाब्दत्वं शब्दैरेव लक्ष्यमाणत्वात् ततो न शक्तित्रयमिति खंडलकार्थः एतदुक्तं भवति पदानां पदार्थस्मृतिज
नकत्वं न वापि तुल्यं स्मृतपदार्थानामन्वयप्रतिपत्तिहेतुतामात्रमपि तुल्यमेव इतरथा प्राथमिकपदार्थस्मृतेस्तवापि वैयर्थ्यात् करणत्वं
तु मयापि नेष्यते पदानां पदार्थेष्वन्वयप्रतिजननसामर्थ्याधानसामर्थ्यं भवदीयसमुदायस्मृतिसामर्थ्येन तुल्यं पदानां स्मृतपदार्थान्वय
बोधने यत्सामर्थ्यमभिधानात्मकं तद्यापरिकल्प्यते न त्वमत्पक्षे नास्तीति मत्पक्षे लाघवमिति जनेमध्यमटह्लोकव्यवहार इति वा ॥ ॥
पदसमभिव्याहृतिरुत्तमवृद्धस्य पदप्रयोगो वा विशिष्टार्थप्रयुक्तेति मंडनमिश्रोक्तियोजना ॥

पत्ति

CC-0. In Public Domain. Digitization by eGangotri

वि॰सु॰ परस्परान्वये पदानां लक्षणैव वृत्तिर्नेनुसुरव्येत्युक्तं तदाक्षिपति मुख्यवृत्तिं मन्वानोन्विताभिधानवादी ननु नेयमिति लक्षणाभा-
टी॰न॰ वं दर्शयितुं शालिकनाथोक्तं तल्लक्षणमाह तथाहीति वाच्यस्यार्थस्य गंगादिरूपस्य वाक्यार्थे घोषप्रतिवासादिरूपे संबन्धानुप-
२५२ पत्तेस्तस्य वाच्यार्थसंबंधवशात् प्राप्तस्य वाक्यार्थान्वयार्हतो योग्यस्य तत्र प्रवृत्तिः सा लक्षणेति श्लोकार्थः प्रकृते च वाच्यार्थानां वा-
क्यार्थे संबन्धानुपपत्तिरूपलक्षणभागो नास्तीत्याह न चेति पिठरं भांडइयस्कतत्संबन्धवशात् प्राप्तस्यान्वयादिति लक्ष्यमाणार्थे-
स्य पुनर्वाक्यार्थे योन्वय उक्तः सोपि नास्तीत्याह न च पदार्थेष्विति नह्यत्र वाक्यार्थद्वयमस्ति येन लक्ष्यमाणवाक्यार्थस्य वाक्यार्थे संबं-

ननु नेयं लक्षणा भवितुमर्हति तल्लक्षणाभावात् तथाहि वाच्यस्यार्थस्य वाक्यार्थे संबंधानुपपत्तितः तत्सं-
बन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते इति न चौदनं चैत्रः पचति पिठर इत्यादौ चैत्रपिठरादीनामर्थानां वा-
क्यार्थे संबन्धानुपपत्तिः न च पदार्थैर्लक्षितायाः पदार्थानामन्वितावस्थायाः पुनरन्वयान्तरशालितानेने
येन लक्षणा तल्लक्षणविरहादिति चेन्मैवं अव्यापकत्वादेतस्य लक्षणालक्षणत्वासंभवात् नहि विषं भुंक्ष्व
त्यादावेतल्लक्षणमस्ति तत्र सर्वेषां पदानां लक्षकत्वेन वाच्यार्थाभावात् वाच्यार्थाविनाभूतस्य वाक्यार्थेन प्र

धोभवेत् स्वेनैव स्वसंबंधानुपपत्तेरिति भावः लक्षणमेवेदं लक्षणाया न संभवति अव्यापकत्वात् अतो ११ नैरन्वयाभावाच्च॥ १४१
नैतदभावमात्राल्लक्षणा    क्षयइति परिहरति अभिहितान्वयवादीमेव मित्यादिना वाक्यार्थसंबन्धानुपपत्तिरत्र कोयं वाक्यार्थो-
ऽभिमतः किं न्यायपरिशोधनया निष्पन्नोर्थः किं वा क्रियाआदौ स्थितस्य विशिष्टपदवाच्योर्थः नाद्यः तदानीमनिष्पन्नत्वात् वाक्यार्थस्ये- राम॰
त्यभिप्रेत्याह नहीति नापि द्वितीयः विषं भुंक्ष्वेत्यत्र क्रियाया अविवक्षितत्वात् भुंक्ष्वेत्यस्यापि तन्निवृत्तिपरत्वात् अतएव तन्तृतीयद्वया- ॐ २५१
श्रयवानाह नत्वेतिद्वृतरोपि लक्षणांशो नास्तीत्याह वाच्यार्थेति नहि भोजननिवृत्तिव्यतिरेकेणापरो वाक्यार्थोऽस्ति येनान्वियादिति भा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लक्षणांतरमप्यनुवदति यदपीति मुख्यार्थस्यापरिग्रहे मानांतरविरोधे सति मुख्यार्थेनाविनाभूते संबद्धइति यावत् संज्ञाः क्रोशंती
त्यत्राविनाभावादर्शनात् तस्मिन्नविनाभूते याप्रतीतिः सालक्षणोच्यतइति योजना अस्तिकुंडपायिनामयनगतं कर्म मासमग्निहोत्रं
जुहोतीति श्रूयमाणं तत्र चाग्निहोत्रशब्दो गौण्या प्रयुज्यतेइति स्थितं उक्तं क्रियाभिधानमिति तत्र गौण्यपि द्विगुणलक्षणयोगेन वर्त्त
५ द्वि तेइति लक्षणोच्यते लक्षितलक्षणा गौणी नचतत्र एतल्लक्षणमस्तीत्यव्याप्त्या दूषयति तदित्यादिना ननु किमिति गौणो मुख्यए
वाग्निहोत्रशब्दः किन्नस्यादत आह उपसद्भिरिति एतच्च भाष्यकारीयमतं वार्तिककारमतं त्वनुपादेयमासंबन्धात् विच्छिन्न

यदपि मानांतरविरोधे तु मुख्यार्थस्यापरिग्रहे मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणोच्यतेइति लक्षणाल
क्षणं तदप्यव्यापकं कुंडपायिनामयने मासमग्निहोत्रं जुहोतीत्येतल्लक्षणाव्यापकत्वात् उपसद्भिश्चरि
त्वा मासमग्निहोत्रं जुहोतीति श्रूयमाणत्वात् प्रसिद्धाग्निहोत्रे चोपसदामभावात्कर्मांतरेऽग्निहोत्रशब्दः
प्रसिद्धाग्निहोत्रसाधर्म्याल्लक्षणया वर्त्तते नचतत्र मानान्तरविरोधस्तदर्थस्य मानांतरागोचरत्वात्
तस्मात्पदानां पदार्थस्वरूपमात्रपरत्वे वाक्यप्रामाण्यानुपपत्तिरेव लक्षणाक्षेपिकेति तदेव लक्षणं लक्ष
णायाः सर्वलौकिकवैदिकलक्षणाव्यापकत्वात् ॥

प्रकरणत्वाच्च प्रत्यभिज्ञाभावाच्च कर्मांतरमिति तच्चदर्शितं प्रकरणांतराधिकरणमनुक्रामद्भिरस्माभिर्मिथ्यात्ववादपूर्वपक्षावसरे
अस्तु लक्षणात्र --- लक्षणस्य तत्र कथमभावइति मानांतरविरोधाभावादित्याह नचेति यथाहि गंगायां घोषइत्यत्र तद्वाक्यव्यति
रेकेण मानांतरविरोधो मुख्यार्थापरिग्रहेन तथेह प्रमाणांतरविरोधः तदर्थस्य तदयोग्यत्वात् केवलमेतद्वाक्यव्यापारपर्यालोचनत
या मुख्यार्थापरित्यागादिति भावः एवं पराभिमतलक्षणं दूषयित्वा सर्वलक्षणानुगतं लक्षणमुपसंहारफलेनाह तस्मादिति ॥ ॥

गा ग

CC-0. In Public Domain. Digitization by eGangotri

१

वि·सु· लौकिकवैदिकलक्षणासु लक्षणव्याप्तिमेव दर्शयति तथाहीति आदित्यो यूप इत्यत्रादित्यशब्दस्तेजस्वित्वलक्षणापरः निर्णीतं खल्विदं प्र
टी·न· माणलक्षणे नामधेयपादे न सिद्धिर्जातिसारूप्यप्रशंसाभूमलिंगसमवायादिति गुणाश्रयादित्यत्र सारूप्याद् आदित्यशब्दो यूपे वर्त्तत इति न
१४२ न्वेवमुदाहरणे चस्मल्लक्षणमपि वाच्यार्थस्य वाक्यार्थे संबंधानुपपत्त्यात्मकमस्ति तत्कथं निर्णय इति शंकयित्वा तत्स्वलक्षणं रहि
तेऽपि स्वकीयलक्षणानुवृत्त्या लक्षणान्वयं लोकवेदयोर्दर्शयति सेवमित्यादिना सुवर्णपुष्पमिति सुवर्णमयपुष्पशालिनीं पृथ्वीं चिन्व
न्तीति तत्र योजना —— अथवा पृथिवीं सुवर्णपुष्पां चिन्वंति पृथिव्येव सुवर्णपुष्पा यथा भवति तथा चिन्वंति संपादयंति य

तथाहि गंगायां घोषः प्रतिवसति आदित्यो यूपः कुंडपायिनामयने मासमग्निहोत्रं जुहोति इत्यादावस्तिपदार्थे
मात्रपरत्वे वाक्यप्रामाण्यानुपपत्तिः ननु तत्र वाच्यार्थान्वयानुपपत्तिरप्यस्ति तत्कथमिदमेव लक्षणमिति नि
यम्यत इति चेन्नैवम् वाच्यार्थान्वयानुपपत्त्यभावेऽपि लोकवेदयोर्लक्षणादर्शनात् तथाहि लोके सुवर्णपुष्पां
पृथिवीं चिन्वंति पुरुषास्त्रयः शूरश्च कृतविद्यश्च यो भिजानाति सेवितुम् इत्यादौ पदार्थानामन्वयसंभवेऽपि
प्रयोजनेनातात्पर्यात्तस्यैव तवाक्यप्रामाण्यानुपपत्तेः प्रतीयमानवाक्यार्थे हि लाभपूजादित्वसंपदो हेतुरिति
श्रुतिनाम्नस्तवने तथा च वेदे वायुर्वै क्षेपिष्ठा इत्यादौ संभवत्यपि वाच्यार्थान्वये कैमर्थक्यवशेन देवताप्राशस्त्यल
क्षणया कर्मणः प्राशस्त्यलक्षणे तस्माद्वाक्यप्रामाण्यानुपपत्तिरेव लक्षणाबीजमिति निश्चिनुमः अस्ति चेहापि

वंतु नामवद्भिः सुवर्णमुपार्जयंतीत्यर्थः तात्पर्यं तु (( लोकानुसारतो विशिष्टार्थप्रत्यायनप्रयुक्तसमभिव्याहृतीनां
नाह शूरश्चेत्यादिना कैमर्थक्यवशेनेति नहि वायोः क्षेपिष्ठत्वं प्रमाणांतरेण विरुद्ध्यते अविरुद्ध एव तु तस्मिंस्तावती निष्प्रयोजनता याप
र्यवसानाभावात् किमर्थमिदमित्यपेक्षावशेन रक्तपटन्यायेन वा नष्टाश्वदग्धरथन्यायेन वा देवताप्राशस्त्यलक्षणया कर्मप्राशस्त्य राम·
मिति वाक्यार्थः एवं लौकिकवैदिकलक्षणास्वलक्षणस्यानुगतिं दर्शयित्वा प्रकृतेऽपि तदनुगतिमाह अस्तीति विशिष्टार्थप्रत्यायनप्रयुक्ता १४२
समभिव्याहृतिरुच्चारणं येषां पदानां तानि विशिष्टार्थप्रत्यायनप्रयुक्तसमभिव्याहृतीनि तेषामित्यर्थः ॥ ॥ ॥

१४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अर्थः पदार्थः ननु वाक्यार्थे संबंधानुपपत्तेः अन्वयांनरस्यालिङ्गत्वस्य च सर्वे लक्षणास्व ननुगमेऽपि तत्संबंधवत्प्राप्ते रस्त्यन्वयः इह च पदा-
र्थानामेव वाक्यार्थत्वात् न तत्संबंधाप्राप्तिरिति तत्राह अस्तीत्येति वाक्यार्थस्वरूपाणां पूर्वस्य चयः संबंधः तद्दृशात्परस्परयान्वितावस्थायां श-
ब्दानां प्राप्तिरस्तीत्यर्थः अथवा अर्थस्वरूपाणां यावा वाक्यार्थे नान्वयः विशिष्टस्वरूपयोग्यतादृत्यागीकारात् तद्दृशाच्छब्दानामपि प्राप्तिर-
स्ति वाक्यार्थेऽपीत्यर्थः एवं च यदन्वितानभिधानवादिनामतिरिक्तसामर्थ्यं तु यत्पदानामन्वितबोध——
नसामर्थ्यमेकस्मृतेः पदेष्वन्वितबोधनसामर्थ्याधानसामर्थ्यमपरमिति तद्विनिष्प्रयोजनं नास्मन्मते स्वीत्याह तथा चेति स्यादेतत् नप-
दानां पदार्थाभिधायकत्वं येन तत्सामर्थ्यादधिकं न कल्पनीयं स्यात् अपितु साहचर्यवशात्संस्कारोन्मेषकतया स्मारकत्वं न चैवं तद्वाभि-

धेयमात्रपरत्वे पदानां प्रामाण्यानुपपत्तिः विशिष्टार्थप्रयुक्ताहि समभिव्याहृतिर्जनद्वृत्तिन्यायात् अस्ति च शब्दा-
नामर्थरूपसंबंधवशप्राप्तिरन्वितावस्थायां तथा चार्थरूपबोधनसामर्थ्यान्नाधिकसामर्थ्यद्वयकल्पनापि ननु प-
दानां संस्कारोन्मेषमात्रोपयोगान्नाभिधातृत्वं पदार्थानामपि स्ववाचकपदसंस्कारोन्मेषकाणां तत्स्मारकतयाभि-
धायकत्वप्रसंगादिति चेत्तन्न पदानामेव पदार्थस्मारकाणामभिधातृत्वस्य लौकिकपरीक्षकप्रसिद्धिसिद्धत्वानिवा-
रणीयत्वात् शब्दविषयविज्ञानस्यैव पदार्थस्मरणजननशक्त्युपहितस्याभिधाव्यापारत्वेन स्वीकारात् ॥ ६ ॥

धायकत्वं अर्थानामपि शब्दाभिधायकत्वप्रसंगात् अस्ति चैषामपि शब्दस्मारकत्वमिति ततस्तत्तदतिरिक्ताभिधाव्यापारस्वीकारेऽन्वि-
ताभिधानवादस्वीकार इत्यभिप्रेत्य शंकते नन्वित्यादिना यद्यपि स्मारकत्वं पदतदर्थयोः समानं तथापि पदानामेवाभिधायकत्वं लौ-
किकप्रसिद्धं नेतरस्येति परिहरति नपदानामिति नन्वत्यस्याभिधाव्यापारः शब्दस्याभावेऽपि स्मृत्युपेयतेनतत्कथं स्मारकाणामेव प्रसिद्धिर्व-
शादभिधायकत्वमिति तत्राह शब्देति अथवा स्मृतिजननशक्तिविशिष्टशब्दविज्ञानमभिधाव्यापारः न चैवं विधो व्यापारोऽर्थस्यास्तीति
कथमभिधायकत्वप्रसक्तिरित्याह ———— शब्दविषयेति अथवाभिधायकत्वं न निवारयामः
किंतु स्मरणजनकतातिरिक्तमेव तत्स्वीकर्तव्यमिति तत्राह शब्दविषयेति पदजनितविज्ञानेऽपरिशेषात्स्मृतित्वेन तज्जनकत्वमेव शब्दस्या-

चि. सु अन्वयवत्त्वविशेषानुमापकशब्दविज्ञानेनैतदनभिधानस्यैवेति व्याप्तिनिरूप्यैपदार्थग्रहणं सहकृतस्वस्वतरज्ञानेऽतिव्याप्तिनिरूप्यै शब्दग्रह
टी. न णं तत्परिस्पन्दः प्रयत्नो वा अन्य एव व्यापारो लोकप्रसिद्धः यथा तरुणा यथा वा कोमा विलाना मात्मनः तत्कथं विज्ञानस्य व्यापारत्वमित्या
१४३ शङ्क्याह अन्यस्येति विभावितिभट्टनये विभुगुण इति काणादादिनये तदनेन मूर्तद्रव्यानुविधायिपरिस्पन्दो निरस्तः प्रयत्ननिरासायाह चेतन
स्येति अयमभिसन्धिः तज्जन्यत्वसदाश्रितत्वे तत्क्रियाहेतुत्वं तद्व्यापारत्वमिति चक्षुःसंयोगादावपि यद्यपि दृष्टं तथापि श्रोत्रशब्दसन्निकर्षेण तज्जन्यत्वा
भावेऽपि तद्व्यापारत्वदर्शनात् अपूर्वस्य यागाश्रयत्वाभावेऽपि यागजन्यतया तद्व्यापारत्वमभ्युपगतं तदिहापि शब्दविषयविज्ञानस्य शब्दाश्रय
त्वाभावेऽपि तज्जन्यत्वादेव भवति तद्व्यापारत्वमिति स्वपक्षदूषणसमाधानमुपसंहरति तस्मादिति लाक्षणिकत्वेऽतएव शाब्दत्वे च भट्टपार

अन्यस्य च परिस्पन्दप्रयत्नलक्षणस्य व्यापारस्य विभौ विभुगुणे वा शब्दे चैतन्यानधिकरणे दुर्निरूपत्वात् तस्मात्तमभिव्याहृ
तपदकदंबकस्मारितपदार्थानां परस्परान्वयप्रत्ययो लाक्षणिकः शाब्दश्चेति सर्वे मन्वते तत्र तथा चोक्तं मीमांसावार्तिके
कारमिश्रैः न विमुञ्चति सामर्थ्यं वाक्यार्थेऽपि पदानि नः वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति न स्थितिरिति प्रयोग
श्च शब्दास्तात्पर्यविषयव्यतिषङ्गस्य लक्षकाः तत्तात्पर्याभिधानत्वात् स्वेत लभुस्वेति शाब्दवत् इह विवादपदानि पदानि
लक्षणया पदार्थानामन्योन्यान्वयप्रतिपत्तिपराणि अन्वितप्रतिपत्तिपरत्वे सति पदत्वात् हि विषं भुङ्क्ष्वेति पदकदंबवत्

समनिमाह तथा चेति ननु तथापि वाक्यार्थस्य लाक्षणिकत्वे किं प्रमाणं न ह्येतदभियुक्तवचनैकगम्यमिति तत्राह प्रयोग इति तात्पर्यविष
यो व्यतिषङ्गः संबंधस्तस्य लक्षका इति साध्यनिर्देशः विषं भुङ्क्ष्वेति शब्दवदित्यर्थः श्लोकेन संगृहीतमनुमानं विवृणोति विवादपदेति वि
षं भुङ्क्ष्वेत्यादौ सिद्धसाधनतानिवृत्त्यै विवादपदग्रहणं अन्विताभिधानेनार्थान्तरतानिवृत्त्यै लक्षणयेत्युक्तं पदार्थानामिति अन्वयिनां त राम.
पुनः स्वस्मादितानातेन तदृष्टान्तस्य साध्यवैकल्यं पक्षे च सामर्थ्यात्तस्मादितान्वयसिद्धिः इतरस्यासंभवात् गौरश्व इत्यादिपदैरनैकान्ति १४३
कतापरिहाराय हेतौ प्रथमं विशेषणं लिंगो लिंगसंबंधपरलिंगव्यवच्छेदाय पदग्रहणं अनन्वितानधिकरणेत्यपि विशेषणीयमिति के
चित् इतरथा स्वपुत्रानुमापकपदेषु व्यभिचारादिति ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आभाससमानयोगक्षेमतां निराकरोति नचेति उदाहृतानुमानवाक्ये वाच्यार्थपरित्यागापरित्यागयोः प्रकृतविघातं दर्शयति तथाहीत्यादिना अनैकान्तिकत्वादित्यन्तेन तत एव व्याघातकाभावादव्याघात इति शेषः उपाधिमप्याह मुख्यार्थेति साधनव्याप्तिं परिहरति इहचेति किंचेदमः न्विताभिधानं नाम न तावदन्वितप्रतिपादनमात्रम् अविप्रतिपत्तेः नापि पदार्थाभिधायकशब्दस्यान्वितेतान्वय्येऽत्राप्यभिधावादादेव नापि पदार्थमात्रगृहीतसंगतिकस्यान्विताभिधायकत्वं पदार्थसंगतेस्तन्मात्रोपक्षीणत्वात् इतरथाऽतिप्रसंगात् अन्वितपदार्थसंगतिबलेन तत्प्रतिपादनं तदिति चेन्न तत्र वक्तव्यं किमन्वयविशेषवति संगतिग्रहः किं वान्वयमात्रवति आद्ये वाक्यार्थस्यापूर्वत्वक्षतिः अन्वयपदार्थे।

न चैवं पदानि स्वार्थपरित्यागेन लक्षणयान्वयप्रतिपत्तिपराणि उक्तसाधनत्वात् तदुदाहृतवाक्यवदित्याभाससमानयोगक्षेमता अस्यैव तदुदाहृतानुमानवाक्यस्य स्वार्थपरित्यागापरित्यागयोस्तदनुपपत्तेः तथाहि स्वार्थपरित्यागे विशिष्टसाध्यप्रतीत्यभावाद् व्याघातकत्वात् अपरित्यागे च तत्रैवानैकान्तिकत्वात् मुख्यार्थबाधोपाधिप्रयुक्तत्वाच्च स्वार्थपरित्यागस्य इह च बाधाभावान्न स्वार्थपरित्यागानुमानं तस्मादभिहितान्वयवाद एव श्रेयानिति केचिदाचार्याः न चैवमपसिद्धान्तः भाष्यकारसंमतत्वात् तथा च समन्वयसूत्रे वेदान्तवाक्यानि प्रसक्तप्रत्यभाष्यकारः प्रतिपादयति स्म न च तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वयेऽवगम्यमानेऽर्थान्तरकल्पना युक्ता श्रुतहान्यश्रुतकल्पनाप्रसंगात् तत्र च पदार्थानामेवान्योन्यान्वयप्रत्यायकता प्रतीयते मंडनमिश्रादिभिरप्यंगीकृतत्वात् ॥ ६ ॥

प्रतीत्योः समसमयतया योग्यतादिप्रतिसंधानविरहिणामपि पदार्थप्रतीतिवदन्वयप्रतीत्यापत्तिश्चेति द्वितीयस्त्वसंभवनिरस्तः न त्वन्वयमात्रवति गृहीतसंगतिकस्यान्वयविशेषवद्वाचकत्वसंभव इति जातौ गृहीतसंगतिकस्यापि व्यक्तिवाचकत्वप्रसंगात् अन्वयमात्रवति गृहीतसंगतिकेन तावन्मात्रमभिधीयते विशेषस्तु लक्ष्यत इति चेन्न हन्त पदार्थाभिधायिभिरेव शब्दैर्यल्लक्ष्यतां कृतमंतर्गडुनान्वयमात्रेण प्रमाणप्रयोजनरहितेनेत्यलं केचिदाचार्याः वाचस्पतिमिश्रप्रभृतयः यद्येवं न्यायपरिशुद्धेऽपि पक्षे विवरणकारादिमतमवलंब्यापसिद्धान्तं गन्धितां कश्चिदाशंक्य ध्यात्मसुखभाष्यकारप्रभृतिवृद्धवचनप्रतिबंधेन परिहरति नचेत्यादिना ॥

CC-0. In Public Domain. Digitization by eGangotri

१
वि॰सु॰ पदार्थानन्वयेति पदार्थानां संसर्गो न विध्याकांक्षानिबंधनः कुतः विधेयपि पदार्थान्तरतुल्यत्वात् तस्मात्संबंधयोग्यरूपेण स्वयमेवैः प
टी॰नं॰ काशिनाः पदार्थाः स्वयमेव संसर्गभागिनः संबंधयोग्यतया पदार्थप्रकाशकारणमाह विशिष्टार्थेति संप्रयोजनकथनवादार्थमुपसंह
१५५ रति तस्मादिति समष्टपरवाक्येषु संसृष्टार्थस्य लक्षणा अखण्डार्थपरवाक्यमखण्डस्यैव लक्षणं यद्वा अखण्डार्थपरत्वाद्वाक्यस्य संसर्गल
क्षणा तस्यापि च ततस्त्यागः तेन नाखण्डखण्डना अपौरुषेयेभ्यइत्युक्तमनुपपद्यमाना वैशेषिकादयः प्रत्यवतिष्ठन्ते ननु कथमिति जीर्णकू
पारामादिव्यभिचारवारणाय सम्प्रदायाविच्छेदे सतीत्युक्तं कालिदासादिवचस्सु व्यभिचारवारणायास्मर्यमाणकर्तृकत्वादित्यु॥

पदार्थान्तरतुल्यत्वाद्विध्याकांक्षानिबन्धनः न संसर्गः पदार्थानां स्वयमेवैक्तत्परदर्शिनाः संबंधयोग्यरूपेणात
स्मात्संबन्धभागिनः विशिष्टार्थप्रयुक्ता हि समभिव्याहृतिज्ञनरनित्यवद्वारैर्भट्टनयवृत्यङ्गीकारात् भट्टपादैस्त्व
वाक्यार्थस्य सर्वत्र लाक्षणिकत्वस्वीकारात् वाक्यार्थो लक्ष्यमाणो हि सर्वत्रेति च स्थितिरिति तस्मात्पौरुषेयवा
क्येभ्य इवापौरुषेयेभ्यो वेदान्तवाक्येभ्यो लक्षणया यथा कलक्षणब्रह्मसिद्धान्तो निसिद्ध २५ ननु कथमपौरुषेयत्वं
वेदानां तन्निपादकप्रमाणाभावात् नन्वपौरुषेया वेदाः संप्रदायाविच्छेदे सत्यस्मर्यमाणकर्तृकत्वादात्म
वदित्यनुमानमस्तीति चेत् नैवं विशेषणासिद्धेः पौरुषेयवेदवादिभिः प्रलयेसंप्रदायविच्छेदस्याभ्युपगमात्
अस्मर्यमाणकर्तृकत्वं च किमस्मर्यमाणकर्तृकत्वविवक्षितं उत स्मरणागोचरकर्तृकत्वं नाद्यः तस्माद्यज्ञात्स
र्वहुत ऋचः सामानि यज्ञिरे छन्दांसि जज्ञिरे तस्माद्यजुः तस्मादजायत त्रयो वेदा अजायन्त

तं विशेषणासिद्धिमेवाह पौरुषेयेति अस्मर्यमाणेत्यत्रापि स्मृतिपदं किं मूलप्रमितिपरं किंवा स्मृत्यवच्छेति विकल्पाद्येन दूषयति
त्वं वेद कर्तुरसिद्धमित्याह नाद्य स्तस्माद्यज्ञादिति तस्मात्प्रकृतात् ज्ञाद्यज्ञरूपिणः परमेश्वरात् सर्वहुतः हुतं हुतं यस्मिन्तत्सर्वं विद्य राम॰
ते स सर्वहुत् ततः सर्वहुतः सकाशात् अथवा सर्वं जुहोतीति सर्वहुत् यद्यपि स एवेति यावत्प्रलयकाले वा सर्वस्वमात्मन्यजुहोतीति सर्वहुत् १५५
ततः ऋगादयो जज्ञिरे उत्पन्नाइति पुरुषसूक्तार्थः त्रयो वेदा इति स्मृत्यन्तरं ॥ १४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इदं सर्वमित्यपरा श्रुतिः मुक्तकेति विप्रकीर्णाः श्लोकाः मुक्तकश्लोकाः तेषु यैः कैश्चिदस्मर्यमाणकर्तृकत्वमस्ति न चास्य पौरुषेयत्व
मित्यर्थः नित्यत्वप्रतिपादकागमविरोधात् सृष्टिश्रुतीनामन्यार्थत्वं शङ्कते नन्वित्यादिना हे विरूप नित्यया वाचा सृष्टत्वमिति चोद
यस्वेत्यर्थः तथाच परमेश्वरो ब्रह्माणं हिरण्यगर्भं विदधाति विहिताय च तस्मै वेदान् प्रहिणोति प्रददाति उपदिशतीति यावत् ननु करो
तीति श्वेताश्वतरोपनिषन्मन्त्रार्थः नाचिकेतमिति कठवल्लीश्रुतिः अनादिनिधनेति स्मृतिः आदिनिधनरहिता अत एव नित्या उ

ऋग्वेद एवाग्रेऽजायत यजुर्वेदो वायोः सामवेद आदित्यादिदं सर्वमसृजत ऋचो यजूंषि सामानीत्यादिश्रुतिभिः
कर्त्तुः प्रमीयमाणत्वात् नापि द्वितीयः विकल्पासहत्वात् तथाहि किमेकेनास्मरणं विवक्षितमुत सर्वस्मरणं नाद्यः मुक्त सर्वा
कश्लोकादावनैकान्तिकत्वात् न द्वितीयः सर्वास्मरणस्यासर्वज्ञविज्ञानाविषयत्वात् ननु वाचा विरूप नित्यया यो
ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै नाचिकेतमुपाख्यानं मृत्युप्रोक्तं सनातनम् अनादिनिधना
नित्या वागुत्सृष्टा स्वयम्भुवेत्यादिश्रुतिस्मृतिवाक्येभ्यो वेदस्य नित्यत्वावगमात् पौरुषेयत्वप्रतिपादकानि कृ
त्यादीनि सम्प्रदायप्रवर्त्तकत्वपराणीति चेन्मैवं वाचा विरूपनित्ययेत्यस्य वाक्यस्य रहस्य चोदस्व सृष्टत्वमिति
वाक्यशेषादिभिः स्तुतिविधिपरत्वावगमात् अन्यार्थदर्शनस्य मात्रभावे प्रमाणत्वानुपपत्तेः यो वै वेदांश्च प्र
हिणोतीत्यस्य च पौरुषेयत्वापौरुषेयत्वयोः साधारणत्वात् स्वयं निर्मायापि वेदानां प्रदानसम्भवात् मृत्युप्रोक्तं
सनातनमित्यस्य वाक्यस्योक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयत इति वाक्यात् उपाख्यानानुवचनश्रवणप्रशंसा परत्वात् ॥

स्पष्टे सुपदिष्टेत्यर्थः अतत्परत्वादाम्नायसापेक्षाणां तदभावे नास्ति स्वार्थे प्रामाण्यं अतो न सृष्टिश्रुतिविनिवार
कत्वमिति परिहरति मैवमित्यादिना अन्यार्थेति अन्यपरेषु वाक्येषु यद्दर्शनं पदसमभिव्याहारमात्रात् तदन्यार्थदर्शनं साधारण्यमे
वदर्शयति स्वयमिति उपाख्यानेति उपाख्यानस्यानुवचनं श्रवणं च यत्तयोः प्रशंसापरत्वादित्यर्थः ॥ ६६६ ॥

१

वि॰सु॰ स्मृतेः स्मृत्यंतरविरोधमाह अनादीति एवं नित्यत्वात् मानागमदूषणपूर्वकमनित्यत्वागमं प्रदर्श्यानुमानमप्यनित्यत्वे दर्शयति अत्र

टी॰नं॰ मानेति गौतमस्येषु दुंदुभ्याद्विस्तोभभागेषु वा सिद्धिः पविल्लावार्थवाक्यानीति विशेषणं ईश्वरकृतत्वे प्यनुमानमाह वेदेति उन्मत्त

१४५ वाक्येषु त्वस्मादौ च व्यभिचारवारणाय विशेषणद्वयगृहीतं सम्मतिपक्षताग्राहकत्वेन चिन्तेति अत्र किंच त्वलं वेदाध्ययनेपक्षः उत्तानेन

अनादिनिधनानित्येति स्मृतेश्च प्रतिमन्वंतरं चैषाश्रुतिरन्या विधीयत इति स्मृत्यंतरविरोधेनानिर्णायकत्वात् एवं
च नित्यत्वप्रतिपादकानामन्यार्थतया पौरुषेयप्रतिपादकवाक्याबाधकत्वात् पौरुषेयत्वमेव वेदानामनुमितिष्ठि।
तमः अनुमानतोपि तथात्वमध्यवस्यामो वेदवाक्यानि पौरुषेयाणि वाक्यत्वात् कालिदासवाक्यवदिति वेदवाक्या
न्याप्तप्रणीतानि प्रमाणत्वे सति वाक्यत्वान्मन्वादिवाक्यवत् ननु वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकं वेदाध्यय
नत्वात् अधुनाध्ययनं यथेत्यनुमानान्सत्प्रतिसाधनत्वेनेति चेत् मैवं सर्ववेदाध्ययनपक्षीकारे दृष्टान्तासिद्धेः
अतीतकालीनाध्ययनपक्षीकारे चाशतः सिद्धसाधनत्वात् सर्गकालीनाध्ययनपक्षीकारे सर्गमनंगीकुर्व
तो मीमांसकस्याश्रयासिद्धेः भारताध्ययनं सर्वं गुर्वध्ययनपूर्वकं भारताध्ययनत्वेन सांप्रताध्ययनं यथे
त्याभाससमानयोगक्षेमत्वात् अथ तत्र कर्तृस्मृत्या बाधः कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुं को ह्यन्यः
पुंडरीकाक्षान्महाभारतकृद्भवेत् नर्हि इहापि सकर्तृकताप्रतिपादकश्रुतिभिर्बाध इति समानं विपक्षे चाप्त
प्रणीतत्वादेर्लोकमन्त्रादिवत् प्रामाण्यप्रसंगो बाधकस्तर्कः अथ वा लोकमन्त्रादिवाक्यानामनाप्तप्रणीतत्वेनाप्रा १४५
माण्यप्रसंगस्वभावादाप्तवाक्यवत्प्रामाण्यमनुपपन्नमिति चेत्॥ कालीनं उत सर्गकालीनाध्ययनमिति विकल्पक्र [illegible] राम

मेण दूषयति सैवमित्यादिना आभाससमानयोगक्षेमतयादोषत्वमाह भारतेति ननु तत्र व्यासः कर्तेति स्मर्यते को ह्यन्यः पुंडरीका १४
क्षान्महाभारतकृद्भवेदित्यादौ तेन बाधाद्दृष्टमसिद्धमिति तत्राह अथेति शंकितोपाधिं निराकरोति पूर्ववादी विपक्षे चेति सोपाधित्वात्

अनाप्ताप्रणीतत्वे चेदाप्तप्रणीतत्वमेवेति नित्यत्वाभावाद्वाक्यस्येति हृदि निधाय परिहरति मैवमिति आत्मादिषु व्यभिचारवारणाय वा
क्यग्रहणं ननु तत्र वक्त्रा शब्दानां निष्पादनं क्रियते किं त्वभिव्यक्तिरेव तेन न तत्र भावो नुत्पत्तिव्याप्त इति परिशिष्यत मूलं तां शंकते अथेति अनिष्प
न्नत्वात्परिहरति मैवमिति न ह्येवं सदोपलब्ध्यनुपलब्धिप्रसंगो नित्यत्वे बाधकमभिधायानित्यत्वे प्यनुमानमाह किं चेति अयावयवमभि
व्यक्तिवादिना मीमांसकेन कृतकत्वेऽप्यविवेचनाहिं तद्दपि साधनीयमित्याह कृतक इति ईश्वरप्रत्यक्षे व्याकाशादिषु व्यभिचारनि
वृत्त्यर्थमिन्द्रियप्रत्यक्षत्वमित्युक्तं तथापि मनोग्राह्यात्मनि व्यभिचारस्तदर्थं बाह्येति तथापि योगिबाह्येन्द्रियप्रत्यक्षपरमाण्वादिषु व्यभि

मैवं अनाप्तप्रणीतवाक्यस्य जगत्याप्तप्रणीतत्वनियमदृष्टेः अन्यथा वक्तुरभावे वाक्यस्योत्पत्तिप्रतीत्योरसंभवा
त् अथाभिव्यक्तिरेव शब्दानां वक्तृव्यापारान्नोत्पत्तिः मैवं एवं सति पाखण्डागमानामपि नित्यत्वप्रसंगात् किं
च शब्दो नित्यः कृतको वा सामान्यवत्वे सत्यस्मदादिबाह्येन्द्रियप्रत्यक्षत्वात् घटवदित्यनुमानेन शब्दानां कृतक
त्वेन पौरुषेयत्वसिद्धिः नच मीमांसकमते योगिव्यवच्छेदार्थमस्मदादिपदं व्यर्थं तेन योगिनामनभ्युपगमा
दिति वाच्यं स्वमते व्यभिचारनिवारणार्थत्वात् तथा च चिरंतनाचार्याणामपि स्वमते व्यभिचारनिवारणार्थं वि
शेषणोपादानं दृश्यते नित्यः शब्दो ध्वनिधर्मान्यत्वे सति श्रावणत्वात् शब्दत्ववदिति नहि वर्णानित्यत्ववादिमते
वर्णातिरिक्तो ध्वनिरस्ति उदात्तादयो वा तद्धर्माः संति यत्र व्यभिचारः स्यात् स्वमते तु ध्वनेस्तद्धर्माणां चोदात्तादीनां सद्भावादुपध व
ह्यते ध्वनिधर्मान्यत्वे सतीति विशेषणम् ॥१॥ चारस्तदर्थमस्मदादीत्युक्तं तथापि सामान्ये व्यभिचारस्तदर्थं सामान्यवत्त्वे सतीत्युक्तं
अत्रास्मदादीति विशेषणं मीमांसकमते व्यर्थं तेन तन्निवर्त्ययोग्यनंगीकारात्तदुद्धारे च तत्र तन्मते व्यभिचार इति केचिद्दूषणमूचिरे तत्परिहरति
नचेति ननु न स्वमतमात्रं व्यभिचारनिवारणाय विशेषणं प्रयुक्तमदृष्टचरत्वादित्यत आह तथा चेति ध्वनिषु तद्धर्मोदात्तादिषु च व्यभिचार।
निवारणायोक्तं ध्वनिधर्मान्यत्वे सतीति स्वमतसंमतं व्यभिचारवारकत्वं दर्शयति नहीत्यादिना वर्णग्रहणं शब्दपरम् एतदुक्तं भवति व्य
भिचारमात्रनिवृत्त्यापि भवति सार्थकं हेतोर्विति यच्च दूषणं तन्न रसुच्यतेः स्मदादिबाह्येन्द्रियग्राह्यत्वगुणत्वादिषु नास्तीति भागासिद्धिरिति तन्न

CC-0. In Public Domain. Digitization by eGangotri

वि·सु· नचोपान्त्यादीति ननु तथापि धर्म्यसिद्धिः भेरीदण्डसंयोगान्निमित्तकारणात् भेर्याकाशसंयोगादसमवायिकारणात् महाकाशप्रदेशे सम
टी·न· वायिकारणे प्रथमः एकः शब्द उत्पद्यते तस्य च शब्दस्य विभुगुणतया आश्रयद्वारा स्वतो वागमनानुपपत्तेः प्रदेशान्तरासत्त्वात् स्वभावसम
१४६ दाहान श्रोत्रेण संबंधः ततश्च तस्माच्छब्दादसमवायिकारणात् अदृष्टादिनिमित्तकारणाद्वायुसहायादाकाशप्रदेशान्तरे आकाशप्रदे
शेषु समवायिकारणेषु सर्वतो दिशि शब्दा उत्पद्यन्ते तेभ्यश्चान्ये तेभ्यश्चान्ये इति वीचीसन्तानवत् यावच्छ्रोत्रसमवेतस्तदन्तः शब्दसन्तान उत्पद्यते तत्र यः
कर्णशष्कुल्यवच्छिन्नाकाशप्रदेशे शब्द उत्पद्यते स श्रोत्रसमवायात् श्रोत्रेण गृह्यते स च न श्रोत्रान्तरग्राह्यः तत्रासमवेतत्वात् स्वभाव

नचोपान्त्यादिशब्देषु भागासिद्धिः श्रोत्रग्राह्यशब्दविशेषस्यैव पक्षीकरणात् नचैवमपि विशिष्टधर्मिहेत्वोरसि
द्धिस्तत्र क्वचित्रैकस्यैव शब्दस्य समवायानेकीकारात् एकस्य शब्दस्य बहूनां प्रत्यक्षत्वानुपपत्तेरिति वाच्यम् श
ब्दः नित्यत्वानुमानेप्यस्य दोषस्य तुल्यतयास्वव्याघातकत्वेन जात्युत्तरत्वापत्तेः तथाहि भवदिन्द्रियग्राह्यः शब्दः
पक्षोस्मदिन्द्रियग्राह्यो वा नाद्यः प्रतिवादिनं प्रत्यसिद्धेः न द्वितीयः वादिनं प्रत्यसिद्धेः तस्माल्लोकप्रसिद्धशब्दत्व
जात्याधार एव शब्दो नित्यत्वसाधने पक्ष इति वाच्यं एवमनित्यत्वसाधनेपीति न कश्चिद्दोषः नच स एवायं गकार
इति प्रत्यभिज्ञाप्रत्यक्षविरोधात् कालात्ययापदिष्टमनित्यत्वानुमानं प्रत्यभिज्ञाया जातिविषयत्वेन व्यक्तिविष
यत्वे न च संदिग्धमानायाबाधकत्वानुपपत्तेः ननु विवादाध्यासितः कालो वेदाध्ययनयुक्तः कालत्वात् संप्रतिप
न्नकालवदिति प्रत्यनुमानविरोध इति चेन्नैवं ॥ ६ ॥ १४६

भेदाद्धेति वैशेषिकादिदर्शनेन तत्श्च न वादिप्रतिवादिश्रोत्रग्राह्य एकः
शब्दोस्तीति धर्म्यसिद्धिः अत एवोभयसंमतहेत्वसिद्धिरिति तदेतदनूद्य निराकरोति नचैवमित्यादिना जात्युत्तरतां दर्शयितुं परपक्षेपि
विकल्पसाम्यमुत्तरमार्गं दर्शयति तथाहीत्यादिना लोकप्रसिद्धः श्रावणत्वेन लोकप्रसिद्धः ननु प्रत्यभिज्ञाप्रत्यक्षबाधितमिदमनि राम.
त्यत्वानुमानं स एवायं गकार इति प्रत्यभिज्ञया गकारस्थैर्यमवगम्यत इति नत्याह नच स इति यथाहि ज्वालादौ जातिमवलंब्य प्रत्यभिज्ञा १४६
प्रवर्तमाना न व्यक्तिस्थैर्यसाधिका तद्वदिहापीत्याह प्रत्यभिज्ञाया इति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नकेवलंवेदप्रणयनोत्साद वनंप्राकुर्वतो मीमांसकस्य प्रणयनात् प्राक्कालोत्पादोत्तरकालप्रणयनकालानामसिद्धाश्रयत्वसिद्धिः किंतु
प्रथमपक्षेवेदसर्गोत्प्राक्कालोपिवेदाध्ययनप्रयुक्त इति प्रतिज्ञाविरोधश्चाधिक इत्याह प्रथमेचेति दूषणान्तरंत्वाह कालीति ननु यदी
श्वरोवेदकर्त्तानहिशरीरीस्यादिति तर्कविरुद्धंवेदकर्तृत्वानुमानमितिशंकते नन्विति दृष्टप्रसंगतयापरिहरतिमैवमिति लीलयाविग्र
हस्यग्रहणंलीलाविग्रहग्रहणंसिद्धान्तयति अत्रसमाधिरिति समाधिःसमाधानमभिधीयतइतिशेषः अत्रकिंपुरुषादुत्पन्नत्वमात्रंपौरुषेयत्वमभिप्राय
यिषितं यथास्मदादिभिरहरहरुच्चार्यमाणोवेदः किंवाप्रमाणेनार्थमुपलभ्यतत्प्रकाशनायविरचितत्वात्मकत्वंवेदानांपौरुषेयत्वम् य

विकल्पासहत्वात् तथाहि किंवेदप्रणयनात्प्राक्कालः किंवातदुत्पादोत्तरकालउतसर्गकालः पक्षीक्रियते पक्षत्रयेपि
मीमांसकस्यधर्म्यसिद्धिः प्रथमेचप्रतिज्ञापदयोर्व्याघातोनिषिध्यते कालिदासादिवाक्यपाठेप्येवमनुमानोत्थानादा
भाससमानयोगक्षेमताचानुमानस्यतन्वशरीरस्येश्वरस्यतात्वादिविवृत्तिरूपवर्णोच्चारणासम्भवात्क
र्तृत्वस्यणीतत्वंवेदस्येतिचेत् मैवंस्वभावतोशरीरस्यापिपरमेश्वरस्यभक्तानुग्रहार्थंलीलाविग्रहग्रहणोपप
त्तेः तदेवंवेदपौरुषेयत्वानुमानस्यनिरस्तसमस्तदूषणतयावेदाः पौरुषेयाइतिमूलं अत्रसमाधिः श्रुतीनामी
श्वराज्जन्मकेवलंस्मृतिषुश्रुतमानान्तरोपलब्धार्थरचनानुनमीयते २७ इतिकिमिदंपौरुषेयत्वनामयत्रश्रुतयःस्मृतयश्च
प्रमाणत्वेनोदाहृताः किंपुरुषाधीनोत्पत्तिमत्त्वंवेदानांपौरुषेयत्वमुतप्रमाणान्तरेणार्थमुपलभ्यविरचितत्वंतत्राद्यो

यास्मदादिभिरेववर्द्धमानग्रंथपद्धतिः आद्येत्वविवादः द्वितीयेपिकिमागमबलात्तत्साधनमनुमाऽगीक्रियते आकाशवन्नि
नाद्यानाद्यइत्याह श्रुतीनामित्यकेनश्रुतिष्वीश्वरात् श्रुतीनांकेवलंजन्मश्रुतं ननुपुनरुपलभ्यविरचनं तत्तुनरनुमीयते तत्राद्युक्तंवक्त
व्यदोषादित्यर्थः विषयविवेचनपूर्वकंश्लोकंव्याचष्टे किमित्यादिना ननुनित्यस्यकथंपौरुषेयत्वमिमंविनुदन्नाद्यांगीकारमेवविवृ
णोति आकाशवदित्यादिना क्रमविशेषवानुशब्दराशिर्हिवेदः क्रमश्चकालतोदेशतोवानियतः सचोभयविधोप्यत्रसंभवतिवक्ष्यमाण
नित्यत्वप्रमाणबलान्नित्यानांविभूनांचशब्दानांकालतोदेशतोवाक्रमासंभवात् प्रतीयतेचतेनाभिव्यंजकोच्चारणप्रतिपत्योः

ए

१ वि·सु·टी·न· १५७

अन्यतरक्रमोपरागात्क्रमवत्त्वं वक्तव्यं तत्रोच्चारणप्रतिपत्ती अनित्ये इति न तत्क्रमविशिष्टः शब्दराशिरविनष्टबाधावनित्यत्वेनेति इष्टमेवे
दृशं पौरुषेयत्वमित्यर्थः ननु प्रतिपुरुषं क्रमहानानित्यत्वे कथं स एवायं वेद इति प्रत्यभिज्ञानमिति तत्राह पूर्वेति क्रमसंदर्भ एव प्रमतया अ
पौरुषेयत्वभंगमाशंक्य वेदस्तु तत्तं सामान्यमपीति स्पष्टीकृत्याप्यनेन दविरुद्धमेव प्रतिपादयितुं सूचितमित्यर्थः एवं पूर्वार्धं व्याख्याय यो नदार्ध
व्याचष्टे द्वितीयपद्यादिना अदर्शने हेतुमाह प्रमाणेति स्यादेतत् यद्यपि तत्सास्साक्षुतो यमर्थः तथापि अक्रतोन्यस्यानुपपत्त्या कल्प्यते।
पौरुषेयत्वे सोपि हि भवतु निकश्चित् कर्तोव्यापारः यथाहुः अर्थाद्वा कल्पनैकदेशत्वादिति तत्रैवं वक्तव्यं किं पुरुषाधीनोत्पत्त्यनुपपत्त्या

त्यत्वेन सर्वगतत्वे कालतो देशतश्च क्रमशून्यानां वर्णानामनित्योच्चारणप्रतिपत्तिक्रमविशिष्टानां पूर्वपूर्वक्र-
मानुस्मृतिनिमित्तजन्तसदृशोत्तरोत्तरक्रमवतो वेदशब्दवाच्यानां सांप्रतमपि पुरुषाधीनोत्पत्तिमत्तया सर्गसमये
पि श्रुत्या तथात्वस्य प्रतिपादयितुं सूचितत्वात् द्वितीयः क्तन प्रमाणान्तरेणार्थमुपलभ्य तन्त्रेश्ववर्णं वेदा विरचिता
इति कृतिभिः प्रतिपादितत्वात् न च पुरुषाधीनोत्पत्तिमत्त्वं श्रवणान्यथानुपपत्त्यैव प्रमाणान्तरेणार्थमुपलभ्य विर
चितत्वसिद्धेः तदानीमस्मदादिभिरुच्चार्यमाणवेदवाक्येषु मालतीमाधवादिवाक्येषु च व्यभिचारात् एतेन प्रमा
णभूतवाक्यस्य रचनान्यथानुपपत्त्या मानान्तरोपलब्धेऽर्थे विरचितत्वकल्पनापि प्रत्युक्ता अस्मदादिभिरुच्चार्यमाणप्र
त्यादिवाक्येषु व्यभिचारात् किं च यदि विरचितत्वान्यथानुपपत्तिर्मानान्तरोपलब्धेऽर्थे रचना कल्प्यते तर्हि तेनैव ऋग्वेद
एवाग्नेर्जायत यजुर्वेदो वायोः सामवेद आदित्यादिति वेदानामग्न्यादिभ्यो जन्मश्रवणात् न तत्कर्तृकतया ईश्वर

कल्प्यतेऽतः प्रमाणभूतवाक्यरचनान्यथानुपपत्त्या नाद्यहमाह नवेति मायुक्तनीत्या वेदवाक्यास्त्व कर्तृकत्वनियमो न स्यात्॥
निकाव्यवाक्यानि चतुरुच्चारणसमये सत्यपि नेतत्र प्रमाणान्तरेणोपलभ्य विरचनव्यतिरेकेण पुरुषाधीनोत्पत्तिमत्त्वमुपपद्यमानं न रास· १५७
वेदेष्वपि न कल्प्यतेनीत्यर्थः द्वितीयपक्षेपीदमेव दूषणमतिदिशति एतेनेति किं च भवतैवायमंगीकर्तव्यो यदस्तु मतिस्वतेर
न्यथासिद्धोपपत्तिवेदीमाह किन्त्वेत्यादिना॥ ६॥

१४८

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रुत्यंतरस्य शास्त्रस्य यथानेतव्यं तदिह मिति तदस्मन्मतेपि समानमित्याह अथेत्यादिना ब्रह्मवेदः पूर्वपक्षाशयमनुवदति नन्वेषामिति देवताधिकरणन्यायेनेति द्वेधा हि वाक्यार्थो द्वारभूतः प्रधानं चेति तत्र प्रधाने तात्पर्य्यं द्वारे त्वतत्परस्यमपि प्रमाणम् अबाधितासंदिग्धानधिगतार्थबोधकत्वं हि प्रमाणत्वं न चान्यपरैरपि मन्त्रादिभिः प्रतीयमानो वज्रहस्तेन्द्रादिलक्षणोर्थः संदिग्धः नापि विपर्य्यस्तो वा बाधाभावात् प्रमाणान्तरायोग्यत्वाच्चानधिगत इति प्रमाणमेव तस्मिन्नपि मंत्रादयः न चार्थभेदे वाक्यभेदप्रसक्तिः प्रधानार्थस्य भेदाभावात् अवान्तरवाक्यस्येष्टत्वाच्च न चातत्परत्वादप्रामाण्यं अतत्परस्याप्यर्थवादस्य द्वारभूतार्थे प्रामाण्यस्वीकारात् इतरथा तद्द्वारा तत्प्रधानेपि तत्प्रामाण्याभावादृणवारस्तुतस्सिद्धिरित्यादि सूत्राणामनारम्भप्रसङ्गात् विशिष्टविधौ च तात्पर्य्ये विषयेपि विशेषणे प्रामाण्यस्या

अथ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे इत्यादिवाक्ये वेदानामीश्वरकर्तृकत्वाधिगमादधिष्ठातृदेवतापरं तत्तद्वाक्यमिति कल्प्येत नहि ब्रह्म स्वयम्भुवा वाचाविरूपनित्यया अनादिनिधना नित्या वागुत्सृष्टेत्यादिश्रुतिस्मृतिशतेभ्योपि वेदानां नित्यत्वावगमात् तस्माद्यज्ञादित्यादिवाक्यसंप्रदायप्रवर्तकत्वपरमिति कल्पनात प्रकृतेपि दण्डवासिता नन्वेषामन्यपरत्वात्तेभ्यो नित्यत्वसिद्धिरिति चेन्नैवं देवताधिकरणन्यायेन प्रमाणान्तरप्राप्तिविरोधयोरसतोरन्यपराणामपि स्वार्थे प्रामाण्योपपत्तेः एतेन वाक्यत्वादिति पौरुषेयत्वानुमानमपि परास्तं पुरुषप्रणीतत्वमात्रसाध्ये सिद्धसाधनत्वात् ९॥ वक्तृस्वीकर्तव्यत्वात्तत्रापि विशेष

णांशे तत्परं विध्यन्तरमुन्नीयते इति चेत् किं तद्वाचकं विशिष्टविधानमेवेति चेत् हन्त परस्पराश्रयप्रसंगात् विशिष्टविधिप्रवृत्तौ च विध्यन्तरोन्नयनं विध्यन्तरप्रवृत्तौ च विशिष्टविधानमिति न च प्रमाणान्तरगोचरत्वं विशेषणस्य सर्वत्र संभवति चारवंतीपादौ तदभावात् तस्मादतत्परमपि प्रमाणान्तरप्राप्तिविरोधयोरभावे प्रमाणमेवेति सोयं देवताधिकरणन्यायसारः तेनासामपि श्रुतीनां वेदनित्यत्वप्रामाण्यमस्त्येवेत्यर्थः ननु नेदं पौरुषेयत्वश्रुतेः सामर्थ्यसिद्धं वेति अस्माभिः स्वीक्रियते किं त्वनुमानबलादिति तत्राह एतेनेति एतद्विशदयति पुरुषे

श्रुत

१
नि·सु· मालतीमाधवादिष्विति यद्यपि प्रथमं कविकृतवाक्येषु साध्याभावान्न व्यभिचारः तथाप्यस्मदुच्चार्यमाणमालतीमाधवादिवाक्ये
टी·न· व्यभिचारः नहि तत्तद्वाक्यं तत्स्यान्यत्वादित्यर्थः कविकृते ष्वोऽप्रसिद्धकविकृतकथापरेषु वाक्येषु व्यभिचार इत्यपि द्रष्टव्यं द्वितीयानुमाने
१४८ पि सिद्धसाधनतामाह तथेति अत्रापि किमाप्तेनोच्चार्यमाणत्वं पौरुषेयत्वं किंवोपलब्धविरचनं प्रथमे सिद्धसाधनतां विशदयति
आप्तेनेति स्यादेतत् द्वितीय एवतः पक्षः किं साधयिषितः तवेदानीमुच्चार्यमाणवेदवाक्येऽनैकान्तिकता तेषामपि परस्तुल्यत्वे
नांततः परमेश्वरविरचितत्वसिद्धत्वादिति तत्राह प्रमाणेति अन्यथासिद्धिमेव दर्शयति अस्मदादीति यदि हि विरचनं प्रमाणांत

प्रमाणान्तरेणार्थमुपलभ्य विरचितत्वं साध्यते च मालतीमाधवादिनैकान्तिकत्वात् तथा च प्रमाणत्वेऽस
तिवाक्यत्वादाप्तप्रणीतत्वानुमानेऽपि सिद्धसाधनता आप्तेनोच्चार्यमाणतया प्रणीतत्वस्यापौरुषेयवादि तत्
भिरभ्युपगमात् प्रमाणान्तरेणार्थमुपलभ्य विरचितत्वानुमाने तु हेतोरन्यथासिद्धिः अस्मदादिभिरुच्चा
र्यमाणेदानींतनवेदवाक्यानामिव सर्गकालीनानामपि तेषामीश्वरेणोच्चार्यमाणत्वमात्रेणापि प्रमाणवा
क्यत्वोपपत्तौ प्रमाणान्तराधिगतार्थपूर्वकविरचितत्वस्यानुमातुमशक्यत्वात् तस्य च सर्वज्ञत्वादतीतकल्पा
(तरगतवेदपरोक्षसम्भवात् ॥ ६ ॥ १४८

रेणोपलभ्य विरचनेन व्याप्तं तदास्मदादावपि तथा स्यात् न वास्ति ततो व्यागम्य
तेनूनमनयोः संबन्धोऽन्यप्रयुक्त इति भावः स्यादेतत् कल्पान्तरे निर्लेपप्रलीनस्य चिरकालातीतस्य संस्कारप्रमोषात् कथमीश्वरे
णापि शक्यः पूर्ववद्वेद उच्चारयितुमिति तत्राह तस्य चेति न तावन्निर्लेपः प्रलयः तत्संस्काररंजितमायोपरक्तस्य परमेश्वरस्य मूलका
रणस्याविद्यमानत्वात् अतएव तत्संस्कारवशात् तत्क्रमवद्वेदोच्चारणमपि सम्भवतीत्यर्थः ॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

कथं

तथापि ताल्वादिकरणरहितस्य कर्तृत्वं संप्रदायप्रवर्तकत्वं चेति तत्राह अविग्रहस्यापीति अभ्युपगम्येदमुच्यते वस्तुतस्त्वीश्वरस्य गृही
तदेहितोपदेष्टृत्वमेव नास्ति कुलालादिसधर्मतया तत्कल्पानुष्ठितविधिषु ज्ञानपरंपरापरिपुष्टपरमेश्वरानुग्रहवशान्निरतिशयज्ञानसमृद्ध
नां हिरण्यगर्भप्रभृतीनां तु यो वेदानामभिव्यक्तिः स खलु परमेश्वरस्यैवोपदेशः तेनामहमेव च यो वै वेदांश्चेति श्रुत्याप्युच्यते न
तत्र शरीरेण किंचित्प्रयोजनमिति यत्तु वेदाध्ययनस्यानिदंप्रथमतायामनुमानमुक्तं व्यवहृतिपूर्ववादिना तदपि संस्कारप्रमोषादिना
हिंसासमर्थितमित्याह यथेति यत्तु तेनाश्रयासिद्धिरित्युक्तं तत्र भवतु मीमांसकं प्रत्ययं दोषो नास्मान्प्रतीति परिहरति न चेति तन्मते
पि यावद्गतो वा नादिपरिगणनाविशिष्टस्य सर्गकालत्वपराणीकृतेन तत्कालः शक्यः पक्षीकर्तुमिति द्रष्टव्य आभाससमानयोगक्षेमतां

अविग्रहस्यापि तत्संभवात्तु कं पि तथा लीलाविग्रहग्रहणेन तदुच्चारणोपपत्तेश्च एतेन सर्गकालीनाध्य
यनस्यापूर्वपूर्ववेदाध्ययनपुरःसरत्वमपि समर्थनीयम् न वाश्रयासिद्धिः वेदानिभिः सर्गयोगीक्षणात् न च भार
ताध्ययनस्य तथात्वप्रसंगेनाभाससमानयोगक्षेमता तन्नर्ददतवकर्तृस्मरणेन वाधात् न चेहापि कर्तृस्मरः
स्याद्वा पक्षस्तस्याः संप्रदायप्रवर्तकत्वपरतयाप्युपपत्तेः अन्यथानित्यत्वप्रतिपादकवाक्यानामनवकाशत्वप्र

परिहरति न चेति ननूक्तमथापि कर्तृप्रतिपादकश्रुतिस्मृतिविरोधेते इति तत्राह न चेहापीति अथ किमित्युपलभ्यविरचिता कर्तृवाभिः
स्मृतिभिः न स्वीक्रियते तत्राह अन्यथेति नित्यत्वं चेदं पुरुषास्वातन्त्र्यं न पुनः सर्वथैव निश्वसितमित्यादिस्मृतिविरोधप्रसंगात् उक्तं च
वृद्धैः यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रतेति स्यान्मतं वयमपि नावद्वदपुच्चारणद्वारेण विरचयामः परमेश्वरोऽपि तथैव रचय
ति न तु पूर्वक्रममनपेक्ष्यैवेति नाप्युपलभ्यार्थं विरचयति कस्तर्हि विशेषः परमेश्वरस्यास्मादृशेभ्यः येन निश्वसितमित्यादिस्तुतयः पर
मेश्वरमेव कर्तारमावेदयन्तीति उच्यते उपादानत्वात्स खलु परमेश्वरः प्रतिसंचरसमये समस्तमेव जगत्संहरन् विपदादिवद्वेदा
त्मकमपि शब्दराशिं संहरति महासर्गसमये च ततदुत्स्नावास्थितावचिन्त्यशक्तिराशिर्महामायासहायसमापन्नः शब्दाकारेण ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

१
वि·सु· विवर्तते तद्वत्तु च पूर्वक्रमसदृशक्रमवच्छब्दराशिरूपवेदाकारेण विवर्तते सर्गादिभुवां हिरण्यगर्भप्रभृतीनां च तमुपदिशतीति श
टी·न· ब्दकर्तृत्वं संप्रदायप्रवर्तकत्वं चेश्वरस्यैवेत्युच्यते यद्यपि सर्वज्ञस्येश्वरस्य वेदार्थविषयमपि ज्ञानमस्ति तथापि न तस्य वेदनिर्माणे कारणभा
१५९ वः पूर्वपूर्वक्रमानुसरणमात्रेण तत्सदृशक्रमनिर्माणक्षमत्वात् अस्मदादीनामिवेदानींतनभारतादिक्रमनिर्माणे तेन नापौरुषे
यत्वक्षतिः नन्वेवं भारतस्यापि संप्रदायप्रवर्तयितैव व्यासः न तु कर्तेति तस्याप्यपौरुषेयत्वं स्यादित्यत आह भारतस्येति यच्चा
नाप्ताप्रणीतत्वे सत्याप्तप्रणीतत्वमेवायाति गत्यन्तराभावादित्युक्तं तत्र किमनाप्ताप्रणीतत्वमात्रेणाप्तप्रणीतत्वमनुमीयते श
ब्दत्वविशेषितेन वा नाद्य इत्याह नचेति द्वितीयं शंकते अथेति तत्रापि किमाप्तप्रणीतत्वमात्रमनुमीयते उपलभ्यविरचितं वा

भारतस्य नित्यत्वप्रतिपादकप्रमाणाभावाच्च न च वेदानामनाप्ताप्रणीतत्वादाप्तप्रणीतत्वमनुमातुं शक्यमा-
त्माकाशादौ व्यभिचारात् अथ शब्दत्वे सतीति विशेषणान्न दोषः नैवं आप्तप्रणीततामात्रस्य पूर्वोक्तन्यायेन
वेदेप्यंगीकारात् न चैवं सति पाषंडाद्यागमानामपौरुषेयत्वं मानांतरेणार्थमनुपलभ्य तत्तत्स्वरूपविरचि
तत्वस्य सौगतादिभिः स्वयमेवांगीकारात् अप्रसिद्धेश्च न च सामान्यवत्त्वे सत्यस्मदादिबहिरिंद्रियप्रत्यक्षतया ^
वर्णानामकृतकत्वानुमानम् अस्मदादिबहिरिंद्रियप्रत्यक्षस्य कालाकाशादेर्नित्यत्वेन भावात् प्रत्यानैकान्त्या

आद्यमाह नैवमिति द्वितीये तु पूर्वोक्तमेव दूषणमिति भावः यत्तु पाषंडाद्यागमानामप्यपौरुषेयत्वमेवं सति स्यादित्युक्तं तत्राह न
चेति अथ तदंगीकारेऽप्यतो नैयायिकादीनामिव वेदपौरुषेयत्वे इति तत्राह अप्रसिद्धेश्चेति ननु सर्वमेतच्छब्दनित्यत्वे सति स्यात्तदेव तु
नास्ति अनुमानाच्छब्दानित्यत्वसाधनान्नित्यत्वप्रमाणदूषणाच्चेति तत्राह न चेति अत्र तावदेकदेशिमतेन दूषणमाह अस्मदादी
ति आकाशमस्मदादिप्रत्यक्षं प्रदेशवृत्तिविशेषगुणवत्त्वात् आत्मवत् दिक्कालाकाशानि अस्मदादिप्रत्यक्षाणि विभुत्वादात्मवत् श्रो
त्रं विभुग्राहकं इंद्रियत्वान्मनोवदित्यादिना च तेषां प्रत्यक्षत्वसिद्धेः न च संबंधासंभवो बाधः अजसंयोगसंभवात् वक्ष्यते चैतत्र प्रमा

985
राम·
१५९

तन्मते नैव सत्प्रतिपक्षतामप्याह सदिति जातौ सिद्धसाधनतानिवृत्त्यै द्रव्यपदं घ्राणे रूपे वानैकान्त्यनिवृत्त्यै हेतौ पदद्वयं प्रत्यनु-
मानविरोधं निराचष्टे नचेति अनित्यो यो भूतविशेषगुणस्तस्येत्यर्थः वेदान्तिप्राभाकरयोर्मते सिद्धसाधनतापरिहाराय अनित्यग्रह-
णं शब्दनिष्ठद्वित्वादिना भाट्टमत्यर्थान्तरतानिवृत्त्यै विशेषग्रहणं नभोगुणत्वार्थं भूतपदं मानसप्रत्यक्षात्मवादिनां मनसि व्यभिचारवा-
रणाय बहिरिन्द्रियेत्युक्तं अत्रापि भाट्टमते न दूषणमाह प्रथमेति नैयायिकादीनां चक्षुर्योगीन्द्रिये व्यभिचारः अस्मदादिविशेषणं च पर-
स्यार्थमिति द्रष्टव्यं तावतापि तन्मते किं दूषणं अस्येत्याशंक्य प्रत्यभिज्ञाबाधं दर्शयितुं तस्या अपि जातिविषयत्वेनोक्तामन्यथासिद्धिं प-

सत्प्रतिपक्षत्वाच्च श्रोत्रं नित्यद्रव्यग्राहकं निरवयवेन्द्रियत्वान्मनोवदिति भाट्टमते न प्रयोगसंभवात् नच श्रोत्रं
न नित्यद्रव्यग्राहकं अनित्यभूतविशेषगुणग्राहकं वा बहिरिन्द्रियत्वादिन्द्रियत्वाद्वा चक्षुर्वदिति प्रत्यनुमान
बाधः प्रथमानुमानेनैव तस्य नित्यगगनादिग्राहकत्वेन दृष्टान्तस्य साध्यवैकल्यात् द्वितीये च ध्वनिग्राहक-
तया सिद्धसाधनत्वात् व्यक्तिभेदासिद्धौ च स एवायं गकार इति प्रत्यभिज्ञाया जातिविषयत्वकल्पनानुपप-
त्तेः नहि रोधध्वनित्वानुमाने द्वारः नच द्रुतो गकारो विलम्बितो गकार इति विरुद्धधर्मसंसर्गित्वाद्गकारव्य-
क्तिभेदसिद्धिः तस्याः प्रतीतेर्ध्वनिविषयतया वर्णविषयत्वाभावेन प्रामाणिकविरुद्धधर्मसंसर्गस्यासिद्धेः॥

रिहरति व्यक्तीति अथ कथं व्यक्तिभेदासिद्धिर्यावतोदात्तानुदात्तादितारतमत्वादिविरुद्धधर्माध्यासाद्भेद एव गकारादेरवसीयते इतित
त्राह नचेति अत्र किं प्रामाणिकविरुद्धधर्माध्यासाद्भेदः साध्यते प्रातीतिकाद्वा आद्ये असिद्धिमाह तस्याः प्रतीतेरिति यदि व्यक्तिभेदः स्यात्त-
दा द्वौ गकाराविति स्यात् न पुनर्द्विर्ग उच्चारित इति तदिह स्वारसिकं प्रत्यभिज्ञयैक्यं प्रतीयते विरुद्धधर्मसंसर्गस्तु परोपाधिकः नच परोपा-
धिभेदेन स्वाभाविकमैक्यं विहन्यते मा हि भून्नभसोपि कुम्भाद्युपाधिभेदादाजानतो भेद इति तेनानुवृत्तिव्यवहारः स्वरूपेण व्यावृत्तव्यव-
हारस्तूपाधिनिदान इत्यनवद्यं उक्तं च वृद्धैः तेन यत्प्रार्थ्यते जातेस्तद्वर्णादेव लभ्यते व्यक्तिलभ्यं तु नादेभ्य इति गत्वादिगीर्वृथेति ॥

१
चि·सु· द्वितीयेप्यनैकांतिकतामाह प्रातीतिकस्येति यथा हि मणिकृपाणदर्पणादिषु तद्भेदेन भिन्नमिव प्रतीयमानमपि मुखं न स्वतो भि-
टी·न· द्यते एवमित्यर्थः एतेन तीव्रादिधर्मोपेतत्वादुत्कर्षनिकर्षवत्त्वाद्भिन्नादिकमनित्यत्वसाधकहेतुजातमपहस्तितं मंतव्यं तथा च प्रत्य-
१५० भिज्ञायमानशब्देऽनागतनिरवग्रहा अनित्यत्वानुमानानि सैव सर्वाणि बाधते किंच सामान्यवत्त्वे सति अस्मदनुमाने शब्दमात्रपक्षीकारे
पि ध्वन्यंशे सिद्धसाधनता तदितरत्वविशेषणे चानिष्प्राप्यवच्छेदार्हे पर्य्यहेतोश्चोपान्त्यादिप्रसिद्धिः अन्यशब्दपक्षीकारे च पूर्ववद्वे-
ववैयर्थ्यं तथास्मन्मतेन सोपाधिकत्वं अश्रावणत्वस्योपाधित्वात् शब्दत्वादिनिवृत्तेसद्भावाच्च न पक्षेतरत्वम् एतेनेदमप्यपास्त-

प्रातीतिकस्य च तस्य मणिकृपाणादिविधानस्य भेदासाधकत्वात् ॥

म् यदाह मानमनोहरकारः अनित्यः शब्दः इन्द्रियविशेषगुणत्वात् चक्षूरूपवदिति तत्रापि हि समानं ध्वन्यंशे सिद्धसाधनत्वं १५०
तदितरत्वविशेषणे वैयर्थ्यं अश्रावणत्वोपाधिहतत्वं चेति उदयनस्तु आश्रयाप्रत्यक्षत्वेप्यभावस्य प्रत्यक्षतां महता संरंभेणासम-
र्थयन्नेव निवृत्तकोलाहलः उत्पन्नः शब्द इति व्यवहारं वर्णैकशरणाः प्रत्यक्षमेव शब्दानित्यत्वे प्रमाणयन्ति स्म तत्त्वविरुद्धध- रा·म·
र्मसंसर्गस्योपाधिकत्वोपपादनन्यायेन दत्तवेलिरवधेनालः योपि नित्यत्वे सर्वदोपलब्ध्यनुपलब्धिप्रसंगो न्यायभूषणकारोक्तः १५०
सोपि ध्वनिसंस्कृतस्योपलंभाभ्युपगमान्निरस्तः यत्तु युगपदिन्द्रियसंबद्धत्वेनाप्रतिनियतसंस्कारसंस्कार्यत्वाभावादनुमानं तद्भवन्म-
तव्यात्मन्यनैकांतिकमित्यलमतिकलकलेन ॥

चि॰प्र॰ यत्तु वैदिकानुपूर्वी इदं प्रथमा वर्णानुपूर्वीत्वात्संप्रतिपन्नवदित्यनुमानं नैयायिकानां तदसत् विगीतः कालो वेदाध्ययनयुक्तः कालत्वा
टी॰न॰ दिदानीन्तनवदिति सत्प्रतिपक्षत्वात् यदत्र पूर्वपक्षिणोक्तं तत्परिहरति वेदांतवादिभिरिति वादार्थमुपसंहरन्प्रथमपरिच्छेदार्थं संकल
२५१ यति एवमपौरुषेयत्वेनेत्यादिना अत्र च पुरुषदोषासंभवग्रहणमितरशब्ददोषासंभवस्याप्युपलक्षणं तेन स्वतःप्रामाण्यशक्यमिद्धि
तान्वयापौरुषेयसिद्धार्थप्रामाण्यकार्याप्रामाण्यवादानां संग्रहः कृतः विगलितनिखिलभेदग्रहणेनाखंडवाक्यार्थप्रपंचमिथ्यात्वं तदुपपा

वेदांतवादिभिः सर्गस्यतद्विशेषितकालस्य चांगीकारात् अतीतकालशब्देन तत्स्वीकारेणानुमानप्रवृत्तावपि न धर्म्यसि-
द्धिः न चाभाससमानयोगक्षेमता भारताध्ययनानामनादित्वनिरासेन पुरस्तान्निरस्तत्वात् एवमपौरुषेयतया वेदांतानामसं
भाविताशेषपुरुषदोषसंसर्गेभ्यस्तेभ्यो विगलितनिखिलभेदविशुद्धब्रह्मप्रमितिः सिद्ध्यतीति सिद्धम् ४९ इति श्रीमत्परमहंस
परिव्राजकाचार्य्यश्रीज्ञानोत्तमपूज्यपादशिष्यश्रीचित्सुखाचार्य्यमुनिविरचितायां तत्त्वप्रदीपिकायां प्रथमः परिच्छेदः। सं॰ ५९॥

दकभावरूपाज्ज्ञानं तदुपयोगीतमः ख्यातिविशेषविचाराः संगृहीताः परिशुद्धब्रह्मग्रहणेन विज्ञानात्म स्वप्रकाशवादो संगृहीता विनि- राम॰
पारच्छेदार्थः सकलः संकलित इति सर्वं निर्मलम् विज्ञानं स्वप्रकाशं भवति च पुरुषस्तद्रूपुर्भावरूपं ध्यानं मिथ्याप्रपंचो भ्रमभ्रमनिवृत्तयोः २५१
नादिभावोऽप्रबोधः आरोपारोप्यसिद्धप्रमितिजनकता खंडना स्वप्रमात्वम् शक्तिः लक्ष्यः पदार्थान्वय इति कथिताः पौरुषेयोन
वेदः इति श्रीमत्परमहंसपरिव्राजकाचार्य्यप्रत्यक्प्रकाशपूज्यपादशिष्यस्वप्रत्यग्रूपभगवतः कृतौ तत्त्वप्रदीपिकायां नयनप्र
सादिन्यां प्रथमपरिच्छेदः ॥ संख्या ग्रंथका ४२००२५ ॥ ९ ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीनयनप्रसादिनीटीकासंवलिततत्त्वप्रदीपिकायां प्रथमपरिच्छेदः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu